विश्वेश्वरानन्द-संस्थान-प्रकाशनम्—३९८
Vishveshvaranand Institute Publication—398

• • •

वुल्नर-भारतभारती-ग्रन्थमाला—८
Woolner Indological Series—8

संपादक: — विश्वबन्धुः
Editor — VISHVA BANDHU

V. BOOK AGENCY
Revised Price (4N8)
Rs. 35.00
SADHU ASHRAM HOSHIARPUR

• • •

भारते होशिआरपुरे वि. वै. शो. सं. मुद्रागृहे ।
शास्त्रिणा देवदत्तेन संमुद्राप्य प्रकाश्यते ॥
Printed and Published by DEV DATTA SHASTRI
at the V. V. R. I. Press, Hoshiarpur, (Pb., India)

वु. भाभा. ग्रन्थमाला—८

श्रीवर-शुकाभ्यां-कृते

राजतरङ्गिण्यौ

ते च

पाठविमर्शौपयिकेन पाठभेदादिटिप्पणेन संयोजिते सत्यौ

श्रीकण्ठकौलेन

संपादिते

होशिआरपुरम्

विश्वेश्वरानन्द-संस्थानम्

वि. २०२३

W. I. Series—8

RĀJATARAṄGIṆĪ
OF
ŚRĪVARA AND ŚUKA

Edited,

Critically, and annotated with text-comparative data from original manuscripts and other available materials

By
SRIKANTH KAUL

HOSHIARPUR
VISHVESHVARANAND INSTITUTE
1966

IND 4067-B

Indologisches Institut der Universität Wien
10 Okt 1969

सर्वेऽधिकाराः सुरक्षिताः

प्रथमं संस्करणम् , २०२३ वि.

प्रकाशकृत् — **विश्वेश्वरानन्द-संस्थानम्** ,
(पत्र-गृहम्) साधु-आश्रमः, होशिआरपुरम् (पं., भारतम्)

All Rights Reserved

FIRST EDITION, 1966

Publishers :

VISHVESHVARANAND INSTITUTE,
P. O. Sadhu Ashram, HOSHIARPUR (Pb., India)

Prepared and Published under the Patronage of the Government of India in the Ministry of Scientific Research and Cultural Affairs, the Government of Panjab, the University Grants Commission, the University of Panjab, the Dayanand Anglo-Vedic College Management, New Delhi and the Trusts and Charities of Shri Vishva Bandhu, Shri Moolchand Khairaitiram and other donors.

TABLE OF CONTENTS

Basic Manuscript Materials :		*Pages*
A. Jaina-Rājataraṅgiṇī of Śrīvara	...	vi
B. Rājataraṅgiṇī of Śuka	...	viii
Abbreviations and Symbols	...	ix
Text of Śrīvara's Jaina-Rājataraṅgiṇī	...	1
Text of Śuka's Rājataraṅgiṇī	...	301
Appendices to Śuka's Rājataraṅgiṇī :		
1. Appendix *A*	...	359
2. Appendix *B*	...	360
3. Appendix *C*	...	362
4. Appendix *D*	...	417
5. Appendix *E*	...	423
6. Appendix *F*	...	424
7. Appendix *G*	...	425
8. Appendix *H*	...	425
9. Appendix *I*	...	426
Verse Index to Śrīvara's Jaina-Rājataraṅgiṇī	...	427
Verse Index to Śuka's Rājataraṅgiṇī	...	461
Additional Verse Index to Śrīvara's Jaina-Rājataraṅgiṇī	...	476
Corrigenda	...	478

BASIC MANUSCRIPT MATERIALS

A. The Jaina-Rājataraṅgiṇī of Śrīvara

The present edition of the Jaina-Rājataraṅgiṇī is based on the following manuscripts and editions :—

MSS S′ 6+A1+I 5+K 1+D 1+M 1+C(alcutta)+B(ombay) Editions=17.

S'_2=Folios : 65 Incomplete : Ends witth : अपकृत्य पुनः सैदा (iii. 335). For description see *Jonarāja*, § § 1 ; 6.

S'_3=Folios : 73 (321-393). For description see *Jonarāja* § § 1; 7.

S'_4=Folios : 20. Fragment : Ends with कर्तुं प्रचक्रमे (i. 4. 44). For description see *Jonarāja*, § § 1; 8.

S'_6=Folios : 38 (21-58). For description see *Jonarāja*, § § 1; 10.

S'_7=Srinagar, Research Department, Jammu and Kashmir Government. Microfilm of Stein's MS No 122-23 deposited at the Indian Institute, Oxford. Described in the Catalogue of the Stein Collection of Sanskrit MSS from Kashmir (Journal of the Royal Asiatic Society, 1912, pp. 587-627). Folios : 67. Size : $10\frac{1}{4}'' \times 7\frac{1}{4}''$. Lines : 20 to a page. Letters : 22 to a line. Script : Śār. This manuscript forms the basis of the present edition.

S'_8=Srinagar. in possession of the present editor. Folios : 80. Size : $9\frac{1}{2}'' \times 7''$. Lines : 18 to a page. Letters : 16-20 : to a line. Script : Śār. Incomplete : i. 7. 104^{cd}-finis.

A=Archaeological Department of Jammu and Kashmir Government, Srinagar. The manuscript contains two Rājataraṅgiṇīs of Śrīvara and Śuka. Foolscap paper. Script : Dev. Transcribed from a manuscript belonging to Pandit Ganesh Das, *Pujārī*, of Rudrasandhyā, Village Muṇḍā, Tehsīl Anantnag, Kashmir. Scribe : Nāth Paṇḍit.

C=For description see *Jonarāja*, § § 1; 13.

I_1=India office Library No 2769^{b-e}. The manuscript contains three Rājataraṅgiṇīs of Kalhaṇa, Śrīvara, and Śuka. Folios : 149. Śrīvara's Jaina-Rājataraṅgiṇī is written on 62

folios : library No 2769c. Size : $12\frac{1}{4}'' \times 8\frac{3}{4}''$. Lines : 21 to a page. Script Dev. Catalogue No 3972. Described in the Catalogue of the Sanskrit Manuscripts in the Library of the India Office, Part VII. Collation sheets supplied by the Vishveshvaranand Institute, Hoshiarpur.

I_2=India offlce Library No 1146^{a-e}. The manuscript contains three Rājataraṅgiṇīs of Kalhaṇa, Śrīvara, and Śuka. Folios : 369. Śrīvara's Jaina-Rājataraṅgiṇī is written on 141 folios : library No 1146^{b}. Size : $9'' \times 5''$. Lines : 10 to a page. Script : Dev. Catalogue No 3976. Described in the same Catalogue as that for I_1. Sheets supplied by the Vishveshvaranand Institute, Hoshiarpur.

I_3=India office Library No 2848^{a-b}. The manuscript contains two Rājataraṅgiṇīs of Kalhaṇa and Śrīvara. Folios : 166. Śrīvara's Jaina-Rājataraṅgiṇī is written on 90 folios : library No 2848^{b}. Size : $16\frac{1}{2}'' \times 5\frac{1}{2}''$. Lines : 8 to a page. Script : Dev. Catalogue No 3980. Described in the same catalogue as that for I_1. Collated at Vishveshvaranand Institute, Hoshiarpur.

I_4=India office Library No 2414. Folios : 209. Size : $9'' \times 3\frac{1}{2}''$. Script : Dev. Lines 7 to a page. Catalogue No 3982. Described in the same catalogue as that for I_1. Collated at Vishveshvaranand Institute, Hoshiarpur.

I_5=India office Library No 2901. Folios : 134. Size : $8\frac{1}{2}'' \times 7''$. Script : Dev. Lines : 16 to a page. Catalogue No 3983. Described in the same catalogue as that for I_1.

K=Folios 106 (410-515). For description see *Jonarāja*, § § 1; 11.

D=Library No 175. Catalogue No 626 Folios 106. For description see *Jonarāja*, § § 1; 12.

B=For description see *Jonarāja*, § § 1; 14.

RSs_1=See *Jonarāja*, § § 4; 16.

RSs_2=For description see *Jonarāja*, § § 4; 16; 19.

M=Foolscap sheets 84 (57-140). For description see *Jonarāja*, § § 1; 15.

B. The Rājataraṅgiṇī of Śuka

The Rājataraṅgiṇī of Śuka[1] in this edition is based on the following manuscripts and editions :—

MSS S′ 4+A 1+I 2+K 1+D 1+M 1+C(alcutta)+B(ombay) Editions=12.

S'_2=Folios 48. This manuscript forms the basis of the present edition from st. 226 up to the end. For description see *Jonarāja*, § § 1; 6.

S'_3=Folios 30 (395-424). For description see *Jonarāja*, § § 1; 7.

S'_6=Folios 14 (60-73). For description see *Jonarāja*, § § 1; 10.

S'_7=Srinagar, in possession of the present editor. Folios : 10. Size : $9\frac{1}{2}'' \times 6\frac{1}{2}''$. Lines : 17-10 to a page. Letters : 22 to a line. Script : Śār. Fragment : Abruptly ends with रिगचक्रनिरोधाख्य (i. 226). It appears that it is the continuative part of Stein's manuscript No 122-23 (see *Śrīvara*). This manuscript forms the basis of the present edition from st. 1 up to st. 226.

A=For description see *Śrīvara.*

C=For description see *Jonarāja*, § § 1; 13.

I_1=India office Library No 2769[e]. Catalogue No 3974. Folios : 28. For description see *Śrīvara.*

I_2=India office Library Nos 1146[c] and 1146e. Folios 33 and 30 respectively. Catalogue Nos 3977 and 3979 respectively. For description see *Śrīvara.*

K=Folios 38 (516-553). For description see *Jonarāja*, 1; 11.

D=Library No 180. Catalogue No 628. Folios 48. For description see *Jonarāja*, § § 1; 12.

B=For descriptton see *Jonarāja*, § § 1; 14.

RSs_1=See *Jonarāja*, § § 4; 16.

RSs_2=For description see *Jonarāja*, § § 4; 16; 19.

M=Foolscap sheets 36 (141-176). For description see *Jonarāja*, § § 1; 15.

---

1 See *Jonarāja*, Introd., § 40, n 2.

ABBREVIATIONS AND SYMBOLS

abbr.	=abbreviation
assim.	=assimilation
comm.	=commentary
conj.	=conjuct
contam.	=contamination
corr.	=correction
Crit. App.	=Critical Apparatus
Dev.	=Devanāgarī
ditto.	=dittography
ed.	=edition
emend.	=emendation
evid.	=evident
fig.	=figure
f. or fol.	=folio (s)
gram.	=grammatical
hapl.	=haplographically
illeg.	=illegible
inf. lin.	=*infra lineam* (below the line)
ins.	=insert(s), inserted.
int. lin.	=*inter lineas* (between the lines)
introd.	=introduction
Kaś.	=Kaśmīrī
l. ; ll.	=line ; lines
marg.	=marginal(ly)
mislec.	=mislection
n ; nn.	=note ; notes
om.	=omit(s) omiting, omitted
orig.	=originally
pl.	=plate

pr. m.	=*propria manu* (by own hand)
prob.	=probably
Sap.	=Saptarṣi
Śār.	=Śāradā
sec. m.	=*secunda manu* (by another hand)
s. f.	=*sub finem*
st. ; stt.	=stanza ; stanzas
subst.	=substitute(s)
sup. lin.	=*supra lineam* (above the line)
syll.	=syllabic
transp.	=transpose(s), transposition
var.	=with variation
v. l.	=varia(e) lection(nes)
*	=indicates a probable interpolation
~~	=indicates that the text is less than certain

अथ

श्रीवर-कृता

जैन-राजतरङ्गिणी

अथ

श्रीश्रीवरकृतायां जैनराजतरङ्गिण्याम्

प्रथमे तरङ्गे

प्रथमः सर्गः

शिवायास्तु नमस्तस्मै त्रैलोक्यैकमहीभुजे ।
अशेषक्लेशनिर्मुक्तनित्यैश्वर्यदशाजुषे ॥ १ ॥

प्रेम्णार्धं वपुषो विलोक्य मिलितं देव्या समं स्वामिनो
मौलौ यस्य निशापतिर्नगसुतावेणीनिशामिश्रितः ।
आस्ते स्वाम्यनुवर्तनार्थमिव तत् कृत्वा वपुः खण्डितं
देयादद्वयभावनां स भगवान् देवोऽर्धनारीश्वरः ॥ २ ॥

वन्द्यास्ते राजकवयः पदन्यासमनोहराः ।
ख्याता ये सरसैः शब्दैः क्षीरनीरविवेकिनः ॥ ३ ॥

[Before st. 1, $S'_{2.3.4.6}$ A C K B ins. ओं अथ श्रीवरपण्डितकृता तृतीया जैनराजतरङ्गिणी (S'_4 A C B om. ओं; after ओं S'_6 ins. नमः श्रीगणेशाय ओं नमः सरस्वत्यै; B om. जैन–; after -तरङ्गिणी S'_2 ins. ओं); $I_{2.3.4.5}$ D ओं श्रीगणेशाय नमः ओं (I_4 om. first ओं; after first ओं D ins. स्वस्ति; $I_{2.4}$ om. second ओं; after second ओं I_3 ins. नमो भगवते वासुदेवाय नमः। श्रीमते रामानुजाय नमः)].

1 In S'_7 st. 1.1.1–34, and in S'_8 st. 1.1.1–7.103[ab] lost on missing fol. —[b]) $S'_{2-4.6}$ A I_{1-5} K सत्रैलोक्य– (for त्रैलोक्यैक–).

2 [a]) S'_2 पूर्णार्धं. —[c]) K °नुवर्जना°; I_2 °नवर्तना°; S'_3 (before corr.)$_4$ K कृता.

अनित्यतान्धकारेऽस्मिन् स्वामिशून्ये महीतले ।
काव्यदीपं विना कः स्याद् भूतवस्तुप्रकाशकः ॥ ४ ॥

येषां करोमि वपुरस्थिरमत्र राज्ञां
तेषामयं जगति कीर्तिमयं शरीरम् ।
आकल्पवर्ति कुरुते किमितीव रोषाद्
धाताहरद् ध्रुवमतः कविजोनराजम् ॥ ५ ॥

श्रीजोनराजविबुधः कुर्वन् राजतरङ्गिणीम् ।
सायकाग्निमिते वर्षे शिवसायुज्यमासदत् ॥ ६ ॥

शिष्योऽस्य जोनराजस्य सोऽहं श्रीवरपण्डितः ।
राजावलीग्रन्थशेषापूरणं कर्तुमुद्यतः ॥ ७ ॥

क्व काव्यं मद्गुरोस्तस्य क्व च मन्दमतेर्मम ।
वर्णमात्रेण मक्कोलं घनसारायते कथम् ॥ ८ ॥

राजवृत्तानुरोधेन न काव्यगुणवाञ्छया ।
सन्तः शृण्वन्तु मद्वाचः स्वधिया योजयन्तु च ॥ ९ ॥

अथवा नृपवृत्तान्तस्मृतिहेतुरयं श्रमः ।
क्रियते ललितं काव्यं कुर्वन्त्वन्येऽपि पण्डिताः ॥१०॥

तत्तद्गुणगणादानात् स्वसम्पत्तिसमर्पणात् ।
पुत्रवद्वर्धितो राज्ञा ग्रामहेमाद्यनुग्रहैः ॥११॥

---

6 c) S'_3 (before corr.) C शायका°.

7 c) $I_{1.4.5}$ D -कंठ- (for -ग्रन्थ-); M (evid. emend.) -शेष-. —d) $I_{1.5}$ -पूरजं (mislec. for S'ār. र्णं).

8 b) A मन्दा मतिर्.

10 d) S'_2 $I_{4.5}$ कुर्वन्ति.

11 d) K याम- (for ग्राम-); S'_2 $I_{3.5}$ K -होमा°.

अतो वाञ्छन्नमेयस्य तत्प्रसादस्य निष्कृतिम् ।
सोऽहं ब्रवीमि तद्वृत्तं तद्गुणाकृष्टमानसः ॥ १२ ॥

एकया तद्गुणाख्यानं जिह्वया वर्ण्यते कियत् ।
रोमवत् कोटिशश्चेत् स्युस्तास्तदा मद्गिरः क्षमाः ॥ १३ ॥

सत्यं नृपाम्बरेऽमुष्मिन् विपुले विमलाशये ।
गुणतारापरिच्छेदे न शक्ता भारती मम ॥ १४ ॥

तथापि सकलं चित्रपटान्ते त्रिजगद्यथा ।
श्रीजैनोल्लाभदीनस्य न्यस्यामि गुणवर्णनम् ॥ १५ ॥

केनापि हेतुना तेन प्रोक्तं मद्गुरुणा न यत् ।
तच्छेषवर्तिनीं वाणीं करिष्यामि यथामति ॥ १६ ॥

सात्मजस्य नृपस्यास्य प्राप्यते राज्यवर्णनात् ।
प्रतिष्ठादानसम्मानविधानगुणनिष्कृतिः ॥ १७ ॥

स्वदृग्दृष्टमृतानेकविपद्विभवसंस्मृतेः ।
सूते कस्य न वैराग्यं नाम जैनतरङ्गिणी ॥ १८ ॥

श्रीजैनोल्लाभदीनः स हत्वा शत्रून् दिगन्तरे ।
आगत्य पैतृके देशे राज्यं राम इवासदत् ॥ १९ ॥

हृतावशिष्टां कोशेभ्यः स्वप्रबन्धोपयोगिनीम् ।
नानापदार्थसामग्रीं राजा कविरिवाचिनोत् ॥ २० ॥

---

13 b) M (evid. emend.) क्रियते (for वर्ण्यते).

15 b) M (evid. emend.) -पटेऽत्र. —c) B (evid. emend.) °ल्लाब° (This emendation is not recorded onward); D °देनस्य.

19 c) D पैत्रिके.

20 a) S'_4 C K कोषेभ्यः.

तद्राज्यमालिशाहस्य राज्यकालादनन्तरम् ।
अज्ञायि कैर्न ग्रीष्मान्ते मरौ श्रीखण्डलेपनम् ॥ २१ ॥

धर्मराजोपमात् तस्मात् तास्ता नरकयातनाः ।
अपराधानुसारेण पापाः केचिद् द्विषोऽभजन् ॥ २२ ॥

यो द्रव्यगुणसत्कर्मसमवायविशेषभृत् ।
असामान्योऽप्यधाच्चित्रं नानार्थपरिपूर्णताम् ॥ २३ ॥

नेत्रोज्ज्वले लसद्धर्म्यशब्दाढ्ये कमलार्चिते ।
यस्य श्रीरवसन्नित्यं वदने सदनेऽपि च ॥ २४ ॥

बङ्गालमालवाभीरगौडकर्णाटदेशगा ।
यत्कीर्ती रागमालेव बभूवामृतवर्षिणी ॥ २५ ॥

भास्वान् राजा सदाचारो बुधः सधिषणो महान् ।
अधाद् विश्वग्रहाख्यातिमासन्नस्य ग्रहोचिताम् ॥ २६ ॥

यं सम्प्राप्य गुणाः सर्वेऽप्यलभन्नधिकां श्रियम् ।
रात्रौ कुमुदवृन्दानि चिन्तामणिमिवोडुपम् ॥ २७ ॥

षड् दर्शनक्रिया यस्य वृत्तं समन्वरञ्जयन् ।
सुमनोरचिताह्लादा ऋतवो नन्दनं यथा ॥ २८ ॥

---

21 c) $I_{1\cdot 3}$ (corrupt) कैनग्रयिकैर्नग्री°; M (evid. emend.) ग्रीष्मातैर् .

22 a) I_{2-5} °राज्यो°. —c) $S'_{2-4\cdot 6}$ A C K या: या: (for पापा:). —d) D केऽपि.

23 c) S'_4 [अ]थ (for °पि). —d) $I_{1\cdot 3}$ -पूर्णता.

24 a) S'_2 °द्धर्म्यें. —b) I_5 कस्य वा चिते; $I_{2\cdot 4}$ D B °चिते.—A om. 24ab.

25 a) $I_{1\cdot 3-5}$ भंगाल–; $S'_{2\cdot 3\cdot 6}$ C $I_{1\cdot 3\cdot 4}$ D °भेरी–; S'_4 K °भीरे–; $I_{2\cdot 5}$ °भोरी–; A °भीरी–; B (evid. emend.) °भीर– (as in text). —b) K –कणाढ-.

26 c) K विश्वग्वहा°.

28 b) $S'_{4\cdot 6}$ A C $I_{1\cdot 2}$ D -रञ्जिताह्लादा; B (evid. emend.) -रञ्जिकाह्लादा.

त्रिवर्गं प्रोज्ज्वलं दृष्ट्वा यस्मिंस्तद्रसिका इव ।
अवसन् शक्तयस्तिस्रः सममेकमता इव ॥ २९ ॥

भूपेऽर्थैः पूरयत्यर्थिसार्थं पार्थोपमेऽन्वहम् ।
आह्वानार्थमिवैतस्य यशः सर्वदिशोऽगमत् ॥ ३० ॥

शिल्पिनो विश्वकर्माणं गोरक्षं योगिनां गणाः ।
अवतीर्णं रसज्ञा यं नागार्जुनमिवाविदन् ॥ ३१ ॥

तस्याग्रे योग्यतादर्शी यैः शिल्पकविकौशलात् ।
तथा प्रसादमकरोत् तत्परास्ते यथाभवन् ॥ ३२ ॥

काव्यशास्त्रश्रुतैर्गीतनृत्यतन्त्रीचमत्कृतैः ।
आजीवमनयत् कालं कार्यानुद्विग्नमानसः ॥ ३३ ॥

न्याय्यं कुर्वन्ति शास्त्रज्ञाः कार्यभारं सुधीरतः ।
तेभ्यः क्षिप्त्वा च स्वे धर्मे तिष्ठतेत्येवमभ्यधात् ॥ ३४ ॥

अवार्यवेगैः सततमाशुगैर्यस्य ताडिताः ।
आसन् वनदिगन्तेषु मशका इव शात्रवः ॥ ३५ ॥

तस्य स्वपरवृत्तान्तं नित्यमन्विष्यतश्चरैः ।
केवलं स्वप्नवृत्तान्तो बभूवाविदितो विशाम् ॥ ३६ ॥

गृहं गृहस्थवृत्तस्य ध्यायतो नीतिशालिनः ।
अन्यायान्नाशकद्धर्तुं काकिनीमपि कश्चन ॥ ३७ ॥

---

33 [b]) I_{1-5} D -नृत्त-.

34 [a]) $S'_{3\cdot4}$ $I_{4\cdot5}$ K D न्यायं.

35 MS S'_7 begins with यस्य in 35[b]. —[d]) S'_7 D मषका.

36 [b]) C अन्विष्यतश्च (mislec. for S'ār. श्च)रैः.

37 [a]) S'_3 गृहस्य (for °स्थ–).

आदिश्य कृष्यै वास्तव्यान् श्वपचादीन् स तस्करान् ।
मृत्कर्माकारयद् बद्धपादायःश्रृङ्खलान् बलात् ॥ ३८ ॥

न कः प्रवर्तते चौर्ये नीचो वृत्तिकदर्थितः ।
इति कारुणिको राजा तेभ्यो वृत्तिमकल्पयत् ॥ ३९ ॥

चकादीन् क्रमराज्यस्थान् दुष्टान् ज्ञात्वा स तद्भुवम् ।
हृत्वा मडवराज्यान्तर्दत्तवृत्तीन्न्यवेशयत् ॥ ४० ॥

तस्करोपद्रवे राज्ञा नीत्यैव शमिते सुखम् ।
गृहेष्विवाटवीष्वन्तः पथिकाः शेरते स्म हि ॥ ४१ ॥

सत्ताप्रकृतिमध्यस्थो नित्यसर्वाङ्गवर्धनः ।
स्वतन्त्रवृत्तिर्भूपालो रेमेऽव्यय इवानिशम् ॥ ४२ ॥

मंदेहानहितान्निवार्य च भजन् पूर्वाचलाग्रोदयं
यो नित्यं कमलाकरेषु रसिको बिभ्रत्प्रतापोच्चयम् ।
सङ्कोचं कुमुदाशयेषु रचयन् पद्माकरोत्पूजितः ।
शस्यः कस्य न सन्नमस्यमहिमा भास्वान् यशस्वी विभुः ॥४३॥

---

38 a) $S'_{3.4.6.7}$ A C I_{1-4} K D B कृष्यैर्; S'_2 I_5 कृष्यै (as in text). —c) S'_7 (before corr.) बद्धान् .

39 S'_4 hapl. om. words beginning with कदर्थित: and ending with वृत्तिम°.

40 a) I_2 व (mislec. for S'ār. च) क्रा°. —c) $I_{1.3.4}$ मरु (mislec. for S'ār. ड)व–. —d) S'_2 A –वृत्तिर् .

41 d) $S'_{2.7}$ A ते; $S'_{3.4.6}$ C I_{1-5} K D B हि (as in text).

42 a) S'_2 A सप्त– (for सत्ता); M (evid. emend.) सदा (for सत्ता). —b) A नित्यं; I_4 -सुन्दर: (for –वर्धन:). —d) $S'_{3.4.6}$ C I_{1-5} K D B नानापुरेषु स: (for [अ]व्यय इवानिशम्).

43 b) S'_4 A प्रतापोश्च (mislec. for S'ār. च्च)यम् . —c) M (evid. emend.) कुमुदाकरेषु; S'_7 पत्त्राङ्कुरो (*sic*) (for पद्माकरो°). —d) $S'_{3.6.7}$ (marg.) C I_{1-5} K D B दत्तलोक– (for सन्नमस्य–); $S'_{2.7}$ A यशस्यो (S'_7 marg. °स्वी as in text).

धात्रेयाष्ठक्कुरा राज्ञो विभवश्रीमदोद्धताः ।
विस्फूर्तिहारिणोऽस्यासन् गजा इव निरङ्कुशाः ॥ ४४ ॥

श्रीमेरठक्कुरो ज्येष्ठः प्राड्विवेकपदोज्ज्वलः ।
तेषां मुसुलवृद्धोऽपि बभौ ग्रन्थगुणोज्ज्वलः ॥ ४५ ॥

कष्टेन काष्ठवाटं स प्राप्तोऽवटपथात्ततः ।
हिमान्यन्तरदग्धाङ्घ्रिर्हिमान्यन्तरमासदत् ॥ ४६ ॥

स्थित्वा माणिक्यदेवाग्रे स मद्रस्यान्तरे चिरम् ।
चिब्भदेशं ततः प्राप किञ्चित्प्राप्तपरिच्छदः ॥ ४७ ॥

तद्देशकालविषमावस्थाशतहतोऽपि सन् ।
स तत्र प्रेष्यवत् सैदपादशौचं समासदत् ॥ ४८ ॥

उद्गन्धतामयोत्पन्नस्फोटवैकृतगुप्तये ।
स रज्जुपटबद्धैकपादोऽभूज्जीवितावधि ॥ ४९ ॥

---

44 [c]) $S'_{2\cdot7}$ (before corr.) [आ]सीत् (for °सन्).

45 [a]) B (evid. emend.) -मीर-. —[b]) S'_7 (before corr.) I_4 प्राड्विवाक-; S'_3 प्राड्वि (*inf. lin.* ड्वि) वेका-; S'_4 K प्राधिवेका-.

46 [b]) K तथा (for ततः). —[c]) S'_6 (marg.) A हिमाभ्यन्त°. —[d]) S'_7 A हिमार्तान्ता° (*sic*); I_1 D हिमंतांत्त (I_1 त).

47 [a]) S'_3 K माणिक-. —[b]) I_2 (corrupt) समुद्धस्य; $S'_{2-4\cdot6\cdot7}$ A C $I_{1\cdot3-5}$ K (corrupt) समुद्रस्य; B स मुद्रस्य; D स मद्रस्य (as in text); S'_{3-6} C I_{1-5} K D B चिरात् . —[c]) $S'_{3\cdot4}$ C $I_{1\cdot3}$ K C चिक- (mislec. for S'ār. ब्भ); S'_6 चिक- (marg. °ब); $S'_{2\cdot7}$ A चिब्ब-; S'_7 (marg.) $I_{4\cdot5}$ D B चिब्भ- (as in text).

48 [c]) S'_2 सौद-.

49 [a]) $S'_{2\cdot6}$ (marg.)$_7$ A तद्गर्भ (mislec. for S'ār. उद्गन्ध) ता; D B त (mislec. for S'ār. उ) द्गन्धता°. —[b]) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B -शान्तये (for गुप्तये). —[c]) $S'_{3\cdot4}$ C I_{1-5} K D B वैधैर्वरत्रा° (for स रज्जुपट-).

तत्रोपायान् बहून् कुर्वन् स्वदेशविभवाप्तये ।
यथाकथञ्चित् तत्रस्थः पञ्चषाः सोऽवसत् समाः ॥५०॥

स सिन्धुहिन्दुवाटादिदेशान् जित्वा बहिःस्थितान् ।
प्रतस्थे भुट्टदेशं स जेतुं सकटको नृपः ॥ ५१ ॥

वनमध्ये प्रविश्यैव नरं कङ्कालपञ्जरम् ।
भित्तिस्थदीपमात्रं ते पश्यन्ति स्म सकौतुकम् ॥ ५२ ॥

तपस्तप्त्वा चिरं प्राप्य योगसिद्धिमसौ नरः ।
फणीव कञ्चुकं पूर्वं गुहायामत्यजत् तनुम् ॥ ५३ ॥

इत्याहुर्ज्ञानिनोऽन्ये वा ये बुद्ध्वा सत्त्वमूर्जितम् ।
तेषां प्रामाण्यमकरोत् स राजा च सविस्मयम् ॥ ५४ ॥

ध्रुवं महानुभावत्वं विना व्यवहितं नृपः ।
जानीयात् कथमित्याह विद्वज्जन उदारधीः ॥ ५५ ॥

---

50 d) $S'_{2-4\cdot6}$ A C $I_{1\cdot3-5}$ K पञ्चश: (K शा:); I_2 D B पञ्चष: (emended as in text with M).

—After 50, $S'_{3\cdot4\cdot6}$ A C I_{1-5} K D B अत: परं किञ्चिद् ग्रन्थ- (M evid. emend. काल for ग्रन्थ)चरितं कालवशाच्छिन्नम् .

51 a) MSS and C B -हिन्दुवाडा° (M टा as in text). —c) $S'_{2\cdot6}$ (after corr.) च (for स).

52 a) S'_7 $I_{2\cdot4\cdot5}$ D blank for वनमध्ये. —b) $S'_{3\cdot4\cdot6\cdot7}$ A C I_{1-5} K D B नर- (emended as in text with S'_2). —c) MSS and C B -मात्रे (mislec. for S'ār. त्रं).

53 b) $I_{1\cdot2\cdot5}$ योग्य-; MSS and C B नृप: (emended to नर:). —c) $S'_{3\cdot4}$ C $I_{1\cdot3}$ K पूर्व–.

54 S'_4 om. 54[ab].

55 a) $S'_{2\cdot7}$ A -भावि (S'_7 *sup. lin.* व as in text) त्वं. —d) B उदान (mislec. for Dev. र)धी:. —After 55, S'_2 (marg.)$_{-6}$ A (*sec. m.*) C I_{1-5} K D B इत्युपोद्घात: .

ज्येष्ठमादमखानं च हाज्यिखानं च मध्यमम् ।
बह्रमखानमनुजं सुतान् सोऽजीजनन्नृपः ॥ ५६ ॥

ज्येष्ठो लावण्यसौभाग्यसुभगैः प्राकृतैर्गुणैः ।
जनकं रञ्जयामास चन्द्रमा इव वारिधिम् ॥ ५७ ॥

प्रत्यहं हाज्यिखानः स कर्पूर इव सौरभैः ।
बाललीलायितैस्तैस्तैः स्वमुदन्तमजिज्ञपत् ॥ ५८ ॥

तौ सुतौ सम्मतौ पित्रो रक्षणायाक्षिपन्नृपः ।
स्वधात्रेयतया स्वस्थो द्वयोष्ठक्कुरपक्षयोः ॥ ५९ ॥

स्वपक्षस्थापनादक्षाः परपक्षेष्टखण्डनाः ।
तार्किका इव तेऽन्योन्यं धात्रेयाष्ठक्कुरा बभुः ॥ ६० ॥

सौदर्यस्नेहवृक्षस्य मूलच्छेदनकारिणः ।
तेऽन्योन्यगोत्रजद्वेषात् तयोरासन् समत्सराः ॥ ६१ ॥

राजपुत्रास्त्रयस्तस्य गुणातिशयसुन्दराः ।
तत्कृतान्योन्यवैरेण समं वृद्धिं समाययुः ॥ ६२ ॥

---

56 Before 56, S'_2 (marg.)$_{-6}$ A (*sec. m.*) C I_{1-5} K D B अथ राज्य (A ज) वर्णनम् . —[a]) $S'_{2\cdot7}$ (after corr.) आद्यम–. —[b]) $S'_{3\cdot4\cdot6}$ C $I_{1\cdot3\cdot4}$ K हाज्य–; I_5 हाजि–; B (evid. emend.) हाजी–. Variant readings of the name हाज्यिखान– are not recorded onward. —[d]) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B पार्थिवोऽजीजनत् सुतान् (for सुतान् सोऽजीजनन्नृपः).

57 [a]) S'_7 I_{1-5} D B तेषां; $S'_{2-4\cdot6}$ A C K ज्येष्ठो (as in text).

58 [d]) $S'_{2\cdot3\cdot6\cdot7}$ C K उदात्त (mislec. for S'ār. दन्त)म् ; D उदांत (<न्त)म् .

60 [a]) A -स्थापने.

61 [a]) B सौन्दर्य–. —[d]) $S'_{2\cdot7}$ A सु (S'_7 marg. स) मत्सराः.

देहसमो देशोऽयं तस्यात्मसमो महीपालः ।
तस्मिन् सुखिनि ससुखो दुःखिनि तस्मिन् सदुःखोऽसौ ॥६३॥

अन्योन्यं सरुषो राजपुत्रयोर्मन्त्रिदुर्नयात् ।
अभूज्ज्येष्ठकनिष्ठत्वं प्रक्रियारहितं तयोः ॥ ६४ ॥

श्रुत्वाथ पुत्रयोः वैरमन्योन्यं जातु भूपतिः ।
आह स्मादमखानं स विदेशगमनत्वराम् ॥ ६५ ॥

युक्तमुक्तं न गृह्णासि कुपुत्र यदि मद्वचः ।
मानप्राणधनध्वंसी प्रत्यूहस्तेऽन्यथा भवेत् ॥ ६६ ॥

श्रुत्वेति पितृसन्देशं स भृत्यानब्रवीद् वरम् ।
तत् पर्णोत्सपथा यामः सुखं तत्रैव नः सदा ॥ ६७ ॥

अथोचुस्ते तव भ्राता दाता जातोऽत्युदारधीः ।
स्वलक्ष्मीं भृत्यसात् कर्तुं स क्षमो न भवान् क्वचित् ॥ ६८ ॥

वरं मरणमेवास्तु तदग्रे नोऽद्य सेवया ।
विक्रमादिगुणैर्हीनं न त्वामेवं भजामहे ॥ ६९ ॥

---

63 c) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B ससुखे सुखितो (for सुखिनि ससुखो).

64 a) S'_7 सरु (*sic*) षो. —b) S'_3 C K दुर्णयात्.

65 c) $S'_{2\cdot7}$ (before corr.) [आ]दिम-. —d) M (evid. emend.) -गमनं कुरु.

66 d) M (evid. emend.) [अ]न्यदा; $S'_{3\cdot4\cdot6}$ C $I_{1\cdot4}$ K [अ]ब्रवीत् (for भवेत्. Thus *sup. lin.* in S'_3).

67 a) M (evid. emend.) -सन्देहं. —b) S'_2 A त्वन्या (mislec. for S'ār. भृत्या)न्; A वचः (for वरम्). —c) S'_4 A C पर्णोत्समथायामः (S'_4 °थान्यासः).

68 b) S'_7 जा (*sup. lin.* ज्ञा)तो.

69 bc) S'_7 (*sec. m.*) नोद्य सेवया विक्रमा°. —cd) S'_7 om. words beginning with °दिगुणैर् and ending with भजामहे.

अग्रजानुजयोः राजपुत्रयोः सुखदुःखयोः ।
विपर्ययं व्यधाद् वेधाः प्रमातेव विभागिनोः ॥ ७० ॥

अथाशङ्क्य नृपः पापं तद्वधात् कतिचिद्दिनैः ।
बहिर्निष्कासयामास भुट्टमार्गेण तं सुतम् ॥ ७१ ॥

वज्रबाणप्रकारांश्च शिल्पिनः समदर्शयन् ।
येभ्योऽश्रावि ध्वनिर्धीरलोकहृत्कम्पकारकः ॥ ७२ ॥

तद्यन्त्रभाण्डभेदांश्च तत्तद्धातुमयान्नवान् ।
आनीतवान् नरपतिः संहतान् शिल्पिनिर्मितान् ॥ ७३ ॥

प्रशास्तिः क्रियतां यन्त्रभाण्डेष्विति नृपाज्ञया ।
मयैव रचितान् श्लोकान् प्रसङ्गात् कथयाम्यहम् ॥७४॥

यदनुग्रहेण राज्ञां समयो लीलाविलासमयः ।
समयश्च यन्त्रतन्त्रैः स्थिरां प्रतिष्ठां क्रियात् स मयः ॥७५॥

रसवसुशिखिचन्द्राङ्के शाके नाकेशविश्रुतो राजा ।
श्रीजैनोल्लाब्दीनः कश्मीरान् पालयन् विजयी ॥ ७६ ॥

---

70 c) S'_6 (marg.) A विपर्ययविधौ वे°. —d) S'_2 (corrupt) प्रमात्रेव. S'_7 om. words beginning with प्रमातेव and ending with दिनैः in 71b.

71 c) $S'_{2\cdot4}$ C K निष्काश°.

72 a) S'_2 A वजा-.

73 cd) A -पतिर्म (mislec. for S'ār. स्त)हतात् (*sic*). —d) S'_7 -कल्पितान् (*sic*) (for निर्मि°).

75 c) $S'_{2\cdot7}$ समयैश्च.

76 a) S'_6 (corrupt) -शशि- (for शिखि). —c) MSS and C B (hypermetric) -जैनोल्लाभ (B व) दीनो (emended as in text).

वर्षे शशिवेदाङ्के निर्मितवान् यन्त्रभाण्डमिदम् ।
तोप् इति मौसुलभाषाख्यातं लोके च काण्डमिति ॥ ७७ ॥

दुर्गेषु दुर्गतिपरं हृत्स्फोटकरं तुरङ्गदत्तदरम् ।
दूरोन्मुक्ताश्मशरं कटकबलान्यदृष्टचरम् ॥ ७८ ॥

सारं सुरीतिबद्धं घनघोषं शिल्पिकल्पितमहार्घम् ।
नवमिव नगरं नृपतेः कल्पं स्ताद्यन्त्रभाण्डमिदम् ॥७९॥

धातुविभक्तिस्फारात् पदप्रवृत्त्या प्रयोजिते शब्दे ।
अर्थोपलब्धिहेतोर्भवत्विदं वृद्धिगुणयुक्तथा ॥ ८० ॥

इति पद्याङ्किता यन्त्रभाण्डाली व्यरुचन्नवा ।
यदुष्मौघध्वनिश्चक्रे मेघगर्जनतर्जनाम् ॥ ८१ ॥

कालेनादमखानेऽथ भुट्टान् जित्वा समागते ।
हाज्यिखानोऽकरोद्यात्रां लोहराद्रौ नृपाज्ञया ॥ ८२ ॥

कथं हि च्छुरिकायुग्ममेककम्बुनि स्थाप्यते ।
इति ज्ञात्वा सुतौ राज्ञा कारितौ निर्गमागमम् ॥ ८३ ॥

---

77 c) MSS and C B तदिति (emended to तोपिति). —d) S'_2 A $I_{2.4}$ D B om. च; S'_7 तस् (illeg.) काण्डम्; S'_2 $I_{3.4}$ तद्दकाण्डम्; $S^{\wedge}_{3.6.8}$ K C तत्काण्डम्; $I_{1.2.5}$ A D B तट्टकाण्डम् (for काण्डम्).

78 S'_2 hapl. om. 78[cd].

81 c) $S'_{3.4}$ उष्मौघ (S'_3 *sup. lin.* घ); S'_6 (marg.) A I_1 D अश्मोत्थ- (for उष्मौघ). —d) $S'_{3.4.6}$ A C I_{1-5} K D B -गर्जित-; $S'_{3.4}$ C I_{3-5} K -तर्जनम्.

82 a) $S'_{2.7}$ A °नाधम- (*sic*); S'_7 -खानेन (*sic*). —d) K om. words beginning with °पाज्ञया and ending with -काङ्क्षिणः in 91[b].

83 b) $S'_{3.4.7}$ -कुम्बुनि.

जनकस्यान्तिके स्नानपानलीलोत्सवादिकम् ।
आदमखानः सत्राणो विदधेऽनुदिनं ततः ॥ ८४ ॥

दृष्ट्वा सतीसरसि येन सुखस्थितिः सा
भीतः स यद्यपि गतो घनकालदोषात् ।
यावन्न नाशमुपयाति किरातघातै-
स्तावत् कथं तदवमुञ्चति राजहंसः ॥ ८५ ॥

अथाष्टाविंशवर्षेऽपि रावत्रलवलादिभिः ।
इतीरितोऽकरोत् खानः कश्मीरागमनस्पृहाम् ॥ ८६ ॥

स्वामिंस्त्वदग्रजीयास्ते कश्मीरसुखभागिनः ।
क्लिश्यामः परदेशेऽत्र वयमेव गृहोज्झिताः ॥ ८७ ॥

राजानकप्रतीहारमार्गेशकुलजादयः ।
अस्मत्प्रतीक्षणः सर्वे तत्र वीरा बलोद्धताः ॥ ८८ ॥

यद्यप्यवचनग्राही भूभुजा निश्चितो भवान् ।
तावतैव स किं क्रुद्धो हन्त्यस्मान् करुणापरः ॥ ८९ ॥

युद्धायादमखानश्च निर्यातः स्वबलान्वितः ।
त्वत्तः स नश्यति क्षिप्रं श्येनाग्रादिव पोतकः ॥ ९० ॥

---

84 [a]) S'_7 [अ]न्तिको (*sic*); $S'_{2\cdot7}$ I_{1-5} D खान- (for स्नान). —[c]) M (evid. emend.) आदम्खानः सुरत्राणो. —[d]) S'_4 गतः.

85 [a]) $S'_{4\cdot6}$ C दृष्ट्वा; S'_3 (before corr.)$_4$ स्या (for सा).

86 [b]) $S'_{2\cdot6}$ (marg.)$_7$ A रावुत्र-; RSs_2 notices -ललवादिभिः.

87 [a]) C तद्° (for त्वद्).

88 [c]) S'_2 मर्शे (mislec. for S'ār. सर्वे). —[d]) $S'_{2\cdot7}$ A बलोन्नताः; $S'_{3\cdot4\cdot6}$ C I_{1-5} D B बलोद्धताः (as in text).

89 [a]) S'_4 यद्यपि वचनाग्राही. —[b]) S'_4 C B भूभुजो. —[d]) B कु (*sic*) रुणापरः.

अमी राजपुरीयाद्याः सर्वेऽस्मच्छुभकाङ्क्षिणः ।
तत् तेनैवाध्वना यामो न किं सिध्यति साहसात् ॥९१॥

मृते रिगप्रतीहारे वीराः के सन्ति तद्बले ।
इति त्वत्पैतृकपदं हर्तुं गन्तुं तवोचितम् ॥ ९२ ॥

शिष्यास्तेऽमी वयं भृत्या वीरास्त्वत्पैतृकैः सह ।
योत्स्यामः कीदृशं शौर्यमेकदा द्रष्टुमर्हसि ॥ ९३ ॥

तथेत्युक्त्वाथ खानेन पृष्टौ तन्मन्त्रिणौ मतम् ।
स फिर्यडामरस्ताजतन्त्रीशश्चेत्यवोचताम् ॥ ९४ ॥

देव त्वत्सेवकाः सर्वे स्वगृहोत्कण्ठिताशयाः ।
देशकालमनालोच्य कथयन्त्यसुखप्रदम् ॥ ९५ ॥

कथमभ्यन्तरं यामः सति राज्ञि बलोर्जिते ।
प्रदीप्तं व्योम्नि मार्ताण्डं कुण्डेन पिदधाति कः ॥ ९६ ॥

यावज्जीवति भूपालस्तावत् को बाधितुं क्षमः ।
मनोनुवर्तनं कर्तुं तद्युक्तं तव साम्प्रतम् ॥ ९७ ॥

---

91 c) MSS and C B [अ]ध्रु (mislec. for S'ār. ध्व)ना.

92 b) $S'_{2-4\cdot6\cdot7}$ (marg.) A C I_{1-5} K D B तत्पुरे (for °द्बले). —c) $S'_{2\cdot7}$ D °पैत्रिक- (*sic*).

93 b) S'_{4} C K तत् (for त्वत्°); $S'_{2\cdot7}$ I_{3-5} D °पैत्रिकैः (*sic*). —d) A एकधा.

94 ab) $S'_{3\cdot4}$ K खानेन न (S'_{3} after corr. सं)पृष्टौ तन्त्रिणौ. —d) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B -तन्त्रेशः.

95 c) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B -कालौ.

96 c) C B मार्तण्डम्.

97 c) S'_{4} न (for तद्°).

प्रसन्ने जनकेऽस्माकं भवेयुः का न सम्पदः ।
ईश्वरे च गुरौ भक्तिर्जायते पुण्यकर्मणाम् ॥ ९८ ॥

अस्य कोपेन यत् साध्यं परानुग्रहतो न तत् ।
दुर्दिने या रवेर्दीप्तिः प्रदीपाज्ज्वलतो न सा ॥ ९९ ॥

खलोक्तिश्वासमालिन्यं सततं नयसेविनः ।
हृदयादर्शवैशद्योत्स्रंसकं नास्य दृश्यते ॥१००॥

निर्वाणगोष्ठीनिष्ठस्य तत्तच्छास्त्रविवेकिनः ।
कृपाब्धेरस्य नो किञ्चित् कृत्यमस्त्यसुखप्रदम् ॥१०१॥

स पिता त्वं सुतस्तस्य वयं सर्वे स्वसेवकाः ।
गत्वा चेत् कुर्महे युद्धं जयोऽस्माकं भवेत् कथम् ॥१०२॥

हताश्चेत् केऽपि तद्भृत्याः बहुभृत्यस्य का क्षतिः ।
एकपक्षक्षये किं स्याद् गरुडस्य जवाल्पता ॥१०३॥

---

98 ab) S'_7 I_{1-5} D °के नास्मान्न (mislec. for S'ār. ॰भ)वेयुः.

99 b) S'_4 I_{1-3} K नु; S'_6 C [अ]नु (for न).

100 c) S'_6 C D B -वैषद्यो°. —d) S'_6 (marg.) A D [उ] त्पुंसकं.

101 b) $S'_{3\cdot4}$ C I_{1-5} K D B तद्वत (emended as in text); $S'_{2\cdot6}$ (marg.)$_7$ A (hypermetric) सततं (for तत्तत्).

—After 101 MSS and C B ins. :

*1 तद्दुग्धपितृपक्षोऽपि स्वामिभक्तिं न सोऽत्यजत् ।
तेनैवान्त्यक्षणः श्लाघ्यस्तस्याभूज्जैनभूपवत् ॥
सौहार्दमार्दवोपेता योग्या कार्यविचक्षणा ।
जाने तेनैव पुण्येन सन्ततिस्तस्य राजते ॥

[(1. 1) C (corrupt) तद्द्रुग्ध–; $S'_{3\cdot6}$ C $I_{1\cdot3}$ K -पक्षे. — (1. 2) S'_3 C $I_{1.3.5}$ K [अ]न्त-; M (evid. emend.) -भूपते: (for °वत्)].

102 d) $S'_{2\cdot6}$ (marg.)$_7$ A [अ]स्मासु; $S'_{3\cdot4}$ C I_{1-5} K D B अस्माकं (as in text).

103 a) S'_6 हृ (marg. ह)ताः.

न शिवाः शकुनाः सन्ति देशाः पर्वतदुर्गमाः ।
तत्रापि जनकस्तेऽस्मान्न कालो विग्रहस्य नः ॥ १०४ ॥

भजत्वभ्यन्तरं राजा वयं बाह्यं भजामहे ।
तत्प्रसादादिहैवास्तां राज्यं छत्रं विना न किम् ॥ १०५ ॥

ते चेद्युद्धार्थमेष्यन्ति न जेष्यन्त्यस्मदन्तिकात् ।
वयं चेदन्तरं यामो न जेष्यामः कदाचन ॥ १०६ ॥

इति दर्पात् स श्रुत्वापि खानः शूरपुराध्वना ।
आगाद् राजपुरीं त्यक्त्वा कश्मीरान् पिशुनेरितः ॥ १०७ ॥

अस्मिन्नवसरे श्रुत्वा स्वपुत्रं सहसागतम् ।
गृहीत्वा स्वबलं तूर्णं नगरान्निरगान्नृपः ॥ १०८ ॥

गच्छन् सकटको राजा मरणे कृतनिश्चयः ।
सदुःखो निःश्वसन् श्लोकमिममेकमपाठयत् ॥ १०९ ॥

राज्येऽपि हि महत् कष्टं सन्धिविग्रहचिन्तया ।
पुत्रादपि भयं यत्र तत्र सौख्यस्य का कथा ॥ ११० ॥

अधर्मशङ्का दूरेऽस्तु युद्धे जनकपीडया ।
वैधेयातिविधेयेन येन स्नेहोऽपि विस्मृतः ॥ १११ ॥

त्वयि कुर्वति साम्राज्यं यः खेदाय समागतः ।
स यातु सबलः क्षिप्रं त्वद्वीर्याग्निपतङ्गताम् ॥ ११२ ॥

---

104 c) M (evid. emend.) तस्मात् (for तेऽस्मात्).

105 c) $S'_{2\cdot6}$ (marg.)$_7$ A [आ]प्तं (prob. mislec. for S'ār. स्तां).

107 c) MSS (except A) C B अगात् ; A आगात् (as in text).

109 c) S'_4 C K निश्व°.

112 c) $S'_{3\cdot6\cdot7}$ C I_{1-5} K D B शीघ्रं (for क्षिप्रं).

त्वमेवाकण्टकं राज्यं क्रिया धर्मक्रिया भजन् ।
वैरिणो विमुखा यान्तु रणे लब्धपराभवाः ॥ ११३ ॥

ग्रामेष्वित्यधिकास्तास्ताः शृण्वञ्जनपदाशिषः ।
प्रापत् सकटको राजा स सुप्रसमनाभिधम् ॥ ११४ ॥

अथ मल्लशिलास्थाने पितापुत्रबलद्वये ।
सन्नद्धे नृपतिर्दूतं विप्रमेकं व्यसर्जयत् ॥ ११५ ॥

स गत्वा नृपसन्देशमब्रवीदिति निर्भयः ।
किं वक्तीति क्षणं क्रुद्धैस्तत्त्वज्ञैः परिवेष्टितः ॥ ११६ ॥

राजपुत्र महाबाहो दाक्षिण्यामृतसागर ।
शृणु पित्रा समादिष्टं यत् तत्सर्वं ब्रवीमि ते ॥ ११७ ॥

फलं संसारवृक्षस्य लाभोऽमुत्र परत्र च ।
पित्रोर्नेत्रोत्सवो नित्यं पुत्रः कैर्नाम निन्द्यते ॥ ११८ ॥

सर्वः सञ्चिनुते सर्वं पुत्रार्थं प्रयतो यतः ।
वार्द्धके वचनग्राही भवेत् पितृसुखप्रदः ॥ ११९ ॥

इत्थं लोकद्वयस्थित्यां त्वयि जाते सुते मम ।
दूरे सर्वसुखाशास्तु चिन्ता प्रत्युत वर्धिता ॥ १२० ॥

त्वत्कृतो दुर्जनाश्वासो निःश्वासो य इवान्वहम् ।
मलिनीकुरुते शुद्धं मद्राज्यं मकुरोपमम् ॥ १२१ ॥

---

114 d) $S'_{2-4\cdot6}$ A C I_1 K B सुप्रशमना°; I_2 सुष्टशमना°; RSs_2 सुप्रचमना°.

115 a) K अष्ठ– (for °थ); S'_4 C I_2 पह्ल-. —c) $S'_{2\cdot7}$ दूत्यं. —$S'_{3\cdot4}$ K om. 115[cd] and 116[ab].

116 c) M (evid. emend.) वक्तेति.

120 a) S'_3 and S'_6 (before corr.) S'_4 C I_3 -द्वयं.

121 b) B (evid. emend.) निश्वासो. —d) $S'_{2-4\cdot6}$ A C $I_{1\cdot2\cdot4}$ B मुकुरो°.

जीवनाशोद्यता येऽमी लसन्त्युच्छृङ्खलाः खलाः ।
सुचिरं नैव तिष्ठन्ति सरसः सारसा इव ॥ १२२ ॥

मदादेशं विना देशं किमर्थं स्वयमागतः ।
केन राज्यं बलात् प्राप्तं निजभाग्योदयं विना ॥ १२३ ॥

बाह्यदेशावनिः सर्वा भुज्यते तृप्यसे न किम् ।
येन मण्डलमात्रं मेऽवशिष्टं हर्तुमागतः ॥ १२४ ॥

तन्निवर्तस्व मा पुत्र पापबुद्धिं वृथा कृथाः ।
बलद्वयवधात् पापं तवैतत् परिणेष्यति ॥ १२५ ॥

इत्युक्तिः पैतृकी प्रोक्ता किं तु सत्यमहं ब्रुवे ।
नश्यन्ति भूपाच्छयेनाघ्रात् त्वद्भटाश्चटका इव ॥ १२६ ॥

इति रूक्षाक्षरामुक्तिं श्रुत्वा विप्रस्य ते भटाः ।
छित्वा कर्णौ व्यधू रक्तादायुधेषु विशेषकान् ॥ १२७ ॥

तद्दृष्ट्वा हाज्यिखानोऽथ सत्रपः पितुरागमात् ।
अभिमन्युप्रतीहारमुखानाख्यदिदं वचः ॥ १२८ ॥

वरं पादप्रणामार्थं पितुर्याम्यमुतो बलात् ।
भूपस्तुष्टोऽथ रुष्टो वा यत् करोतु करोतु तत् ॥ १२९ ॥

सर्वथा तातपादा मे सेव्या रक्षेत् स नो ध्रुवम् ।
तन्मा कुरुत युद्धेऽस्मिन् संरम्भं चेन्मतं मम ॥ १३० ॥

---

122 a) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B मे (for [अ]मी). —b) $S'_{4\cdot6}$ C $I_{1\cdot2}$ खशाः (for °लाः).

126 a) S'_{6} (after corr.) $I_{1\cdot3\cdot5}$ पैतृका; I_2 D पैत्रिका. —c) $S'_{3\cdot4\cdot6\cdot7}$ C I_{2-5} K भूपाः (emended as in text with S'_2 A D B).

127 b) A तद्भटाः. —d) $S'_{3\cdot4}$ C K °दायादेषु (*sic*) (for °युधे°).

128 a) $S'_{3\cdot4}$ C K तं (for तद्°). —b) $S'_{3\cdot4}$ C I_{1-5} K आगमत्. —d) $S'_{3\cdot4\cdot6}$ A C I_{1-5} K D B -मुख्यान्.

किं तु स्वप्नेऽपि भूपाय नानिष्टं चिन्तयाम्यहम् ।
यो मे देवाधिकः पूज्यो लोकद्वयसुखप्रदः ॥ १३१ ॥

अग्रजोऽग्रे समायाति रणायायाति नो नृपः ।
इत्युक्तं तेन सम्प्राप्तो नाहं पितृवधोद्यतः ॥ १३२ ॥

श्रुत्वेति मन्त्रिणस्ताजतन्त्रिपत्यादयस्ततः ।
तत्तुरङ्गात्तवल्गाग्रा निष्ठुरं तेऽब्रुवन्निति ॥ १३३ ॥

यदोक्तं समयो नायं याम इत्यवधीरितम् ।
आरब्धस्यान्तगमनं तद्युक्तमधुना तव ॥ १३४ ॥

यूयं चेज्ज्ञातसौहार्दा मार्दवानन्दिताः पराः ।
वयमेव हताः कष्टं क्लिष्टास्त्वत्सेवनाशया ॥ १३५ ॥

भवेत् सन्ततयोः सन्धिर्नित्यं तैलकटाहयोः ।
तदन्तः पूरणी क्षिप्ता सैव दन्दह्यते क्षणात् ॥ १३६ ॥

भवान् स्वामी वयं दासाः पौरुषं पश्य साम्प्रतम् ।
जयश्चेत्तव राज्याप्तिर्नष्टो याहि यथागतम् ॥ १३७ ॥

यावद्युद्धं करिष्यामस्तावदेव विलम्ब्यताम् ।
हतेष्वस्मासु कर्तव्यं यत् पुनस्तत् समाचर ॥ १३८ ॥

अस्मदुक्तं न गृह्णासि यदि त्वं पितृवञ्चितः ।
त्वय्येवानुचितं कृत्वा पुनर्यामो दिगन्तरम् ॥ १३९ ॥

---

131 c) $S'_{2\cdot6}$ (after corr.)$_7$ I_{1-5} दैवा°.
132 c) $S'_{2\cdot6}$ (after corr.)$_7$ A I_{1-5} D B स (for सं).
133 ab) RSs_2 notices राजतन्त्र– (for ताजतन्त्रि–).
134 c) A [अ]नु (mislec. for S'ār. न्त).
135 b) $S'_{2\cdot7}$ A मार्दवेना° (*sic*); C B °नन्दिता°. —c) S'_3 K कष्ट–. —d) S'_4 K तत् (for त्वत्°); K तु (mislec. for S'ār. त्व)त्से°.
136 c) $S'_{3\cdot4}$ K तदन्त-.

इति निर्भर्त्सनावाक्यजातभीतिर्नृपात्मजः ।
तत्तच्चिन्तार्णवे मग्नो युद्धश्रद्धामगाहत ॥ १४० ॥

अत्रान्तरे द्विजं तादृगवस्थं वीक्ष्य भूपतिः ।
मुरारातिरिव क्रुद्धो युद्धसन्नद्धतां दधे ॥ १४१ ॥

शुक्रयोगजनामर्क्षपरीक्षणविचक्षणः ।
स्वपक्षरक्षणं क्ष्मापः पृष्ठीकृतरविर्व्यधात् ॥ १४२ ॥

राज्ञः पृष्ठगतः सूर्यः खड्गान्तःप्रतिबिम्बितः ।
जयस्ते भवितेत्येव व्यङ्क्तुं व्योम्नोऽवतीर्णवान् ॥ १४३ ॥

कियन्तोऽमीति यावत् सोऽचिन्तयत् तावदग्रतः ।
अर्कदीप्तिज्वलच्छस्त्रद्युतिद्योतितभूतलम् ॥ १४४ ॥

निर्यत्सन्नाहिसाद्योघपतद्भटतुरङ्गमम् ।
गणशो गणशो धावत् तत्सैन्यं समवैक्षत ॥ १४५ ॥

कोऽन्यो वीरो हाज्यिखानाद्यो राज्ञा वाग्रजेन वा ।
गृहीतसर्वसैन्येन धैर्यात् ऋष्टुमशक्यत ॥ १४६ ॥

तत्र मल्लशिलारङ्गसङ्गतास्तद्भटा नटाः ।
त्वङ्गदङ्गा विहङ्गानां नाट्यभङ्गिमदर्शयन् ॥ १४७ ॥

ववर्ष शरधाराभिः स भूपकटकाम्बुदः ।
स्फुरच्छस्त्रतडिज्ज्योतिस्तूर्यगम्भीरगर्जितः ॥ १४८ ॥

---

140 c) $S'_{2-4\cdot6}$ A C I_{1-4} K ततश्चिन्ता°.
141 c) K सुरा°; D B पुरा° (for मु°).
142 c) S'_6 -क्षपणं (for -रक्ष°). —d) S'_3 पृष्ठ.
143 c) S'_3 (before corr.)$._4$ K °तेव (for °त्येव). —d) MSS (except D) and C B वक्तुं; D व्यंक्तुं (as in text).
145 a) S'_7 साद्यौघ–; A C सोद्योग–. —S'_3 K om. 145ab.
147 c) $S'_{3\cdot4\cdot6}$ (before corr.) C I_{1-5} K D B त्वङ्गदङ्गवि°.
148 d) $S'_{3\cdot4\cdot6}$ (before corr.) C I_{1-5} K -स्थै (mislec. for स्तू)र्य–.

अन्योन्यमिलिताः कांस्यघनवत् कठिना घनाः ।
अन्योन्याघातसहना नदन्तः सुभटा बभुः ॥ १४९ ॥

भटा नयन्ति मां युद्धे मा मा ताडयत द्रुतम् ।
इतीव तारं दध्वान स्वानस्यानकदुन्दुभिः ॥ १५० ॥

पूर्वं मया प्रतीहारमुख्या गुरुलघूर्जिताः ।
रणे फलतया दृष्टा रवेर्वृत्ते घना इव ॥ १५१ ॥

ततो भूपबलात् क्रुद्धौ धात्रेयौ भूपतेर्हितौ ।
ठक्कुरौ निरगातां तौ वीरौ हस्सनहुस्सनौ ॥ १५२ ॥

सुवर्णसीहगङ्गाद्या राजपुत्रा रणाध्वरे ।
शस्त्रज्वालावलीलीढे जुहुवुः श्रीफलं वपुः ॥ १५३ ॥

ते वीरभ्रमरास्तत्र रणोद्याने तदाभ्रमन् ।
स्वामिमाधवसान्निध्याद् यशःकुसुमलम्पटाः ॥ १५४ ॥

ते वीरमस्तकाश्छिन्ना रणभूभाजने स्फुटम् ।
क्षुत्ततस्य कृतान्तस्य कवला इम रेजिरे ॥ १५५ ॥

---

149 a) K अन्योन्यं. —b) M (evid. emend.) -घट- (for घन). —c) $S'_{2.6}$ (marg.)$_7$ A $I_{3.4}$ D °न्यघातसुहताः; $S'_{3.4}$ C $I_{1.2.5}$ K B °न्याघातसहना (as in text).

150 b) C B मां(for 1st मा). —d) S'_6 (marg.) A रण-; $I_{2.5}$ D [आ]नन- (for °नक).

151 b) S'_7 (before corr.) -मुखा. —c) S'_3 दृष्ट-. —d) S'_7 (before corr.) न्नकैर् (for रवेर्); $S'_{2-4.6}$ A C I_{1-5} K B वृत्ते ($S'_{3.4}$ ते)र्; S'_7 D गणाः (for घनाः).

152 d) $S'_{2.3.6.7}$ A C I_{1-4} -होस्सनौ.

153 a) S'_7 $I_{1.3.5}$ D -नाट्याद्या; S'_2 -नटाद्या; $S'_{4.6}$ C B -नग्रा (S'_6 marg. ट्या)द्या; S'_3 नग्र (*sup. lin.* ग्रा)द्या; K -नचा (or द्या)द्या; A -नढ्याद्या; $I_{2.4}$ -नज्याद्या (emended as in text with PT, MSf. 72b).

155 a) S'_4 C (corrupt) °कच्छिन्ना.

रणतूर्यस्वनैस्तैस्तैर्जनकोलाहलैस्तथा ।
वीराणां सिंहनादैश्च शब्दाद्वैतमजायत ॥ १५६ ॥

तच्छुद्धये ऋणमिवैक्ष्य नृपप्रसादं
प्राप्ते क्षणे जहति ये निजजीविताशाम् ।
तत्तद्विहस्तपरिरक्षणधर्मलुब्धा
धन्यास्त एव कतिचिन्नृपसेवकेभ्यः ॥ १५७ ॥

राजाग्रादागतास्तीक्ष्णाः शरास्तत्पक्षपातिनः ।
स्वयं पाहीति भीत्येव स्खलन्तः समचोदयन् ॥ १५८ ॥

ध्वजचेलाञ्चला राजसुतस्याग्रे तु वायुना ।
सकम्पा रणभीत्येव पश्चाद्भागमशिश्रियन् ॥ १५९ ॥

शस्त्रकृत्तस्फुरद्वीरशिरःकमलनिर्भरा ।
जीवनाशा चलत्पत्रा नलिनी रणभूरभूत् ॥ १६० ॥

शौर्यमत्यद्भुतं दृष्ट्वा सूनोस्तत्कटकस्य च ।
पुनर्जातमिवात्मानं रणोत्तीर्णं नृपोऽविदत् ॥ १६१ ॥

कृत्वा सर्वदिनं युद्धं बलाद् भृत्यैर्निवारितः ।
हाज्यिखानः सवित्राणः समरात् स न्यवर्तत ॥ १६२ ॥

भग्नं निजानुजं दृष्ट्वा पश्चाल्लग्नो विविघ्नधीः ।
अग्रजोऽथावधील्लग्नान्मग्नांस्त्रासार्णवे भटान् ॥ १६३ ॥

किमुच्यते नृशंसत्वं येन शूरपुरान्तरे ।
जन्ययात्रागतो मोहान्निहतः पथिकव्रजः ॥ १६४ ॥

---

157 [a]) $S'_{2\cdot6}$ (marg.)$_7$ A रु (S'_7 marg ऋ)णम्; D B [ई]क्ष्य. —[c]) $S'_{4\cdot6}$ C $I_{2\cdot5}$ K -लब्धा.

158 S'_4 K om. hapl. words beginning with स्खलन्त: and ending with रणभीत्येव in 159[c].

159 [d]) $S'_{2-4\cdot6}$ A C $I_{1-3\cdot5}$ K D अशिश्रयन् .

163 [a]) S'_7 D निजात्मजं (corrupt). —[b]) S'_2 A विनिम्नधी:. —[c]) $S'_{2\cdot3\cdot6\cdot7}$ A I_{1-5} K D B नम्रान्; S'_4 C लम्रान् (as in text).

यस्यां मन्दप्रभो भास्वाञ्जनैः सर्वैर्विलोकितः ।
दक्षिणस्या दिशस्तस्याः प्रवासी स नृपोऽभवत् ॥ १६५ ॥

दुर्योधनार्पितरसा गुरुशल्यनिष्ठा
भीष्मप्रियाः परहतिं प्रति दत्तकर्णाः ।
ये धर्मजातिविमनस्कतया कृपेच्छा-
स्ते कौरवा इव रणे न जयं लभन्ते ॥ १६६ ॥

अन्येद्युर्हतशिष्टांस्तान् भृत्यानानीय पूर्ववत् ।
हाज्यिखानः सानुतापश्चिभदेशे स्थितिं व्यधात् ॥ १६७ ॥

खिन्नानाश्वासयन् कांश्चित् संभिन्नान् प्रतिपालयन् ।
भक्षयन् क्षुधया क्षीणान् नगाग्रे सोऽनयन्निशाम् ॥ १६८ ॥

मा बाधिष्ट सुतं कश्चिन्मत्परो वातिविह्वलम् ।
इति कारुणिको राजा न्यवर्तत रणाद् द्रुतम् ॥ १६९ ॥

आसिष्ये सुखितः सुतार्पितभरो बुद्ध्येति दत्ता निजा
राष्ट्रेशा वरसेवकाः सतुरगाः संवर्धिता ये मया ।
तेऽमी राज्यजिहीर्षवः सुतरता युद्धाय मय्यागता
धिङ् मां येन नयोज्झितेन घृणयानर्थः स्वयं स्वीकृतः ॥१७०॥

---

165 b) $S'_{3\cdot4}$ C K गणै: (for जनै:); $S'_{2\cdot7}$ A भास्वानपि (*sic*) (for जनै: सर्वैः). —d) प्रतापी is suggested (for प्रवासी).

166 RSs_2 cites 166 entirely. —a) I_5 गुड– (mislec. for S'ār. रु); MSS and C B -वि (mislec. for S'ar. नि)ष्ठा. —b) RSs_2 गुरु– (for पर–).

167 d) MSS and C B चित्र– (mislec. for S'ār. भ).

168 c) S'_3 (before corr.)$_{4\cdot6}$ C I_1 अ (S'_6 *sup. lin.* भ)क्षयन् ; S'_7 (before corr.) खिन्नान् (for क्षीणान्). —d) $S'_{2\cdot3}$ K नागाग्रे.

169 b) S'_7 A मत्पुरं (S'_7 *sec. m.* marg. मत्परो); $S'_{2\cdot6}$ (marg.) मत्परं; $S'_{3\cdot6}$ C I_{3-5} K D B -विह्वल:. —c) S'_3 (before corr.)$_4$ K कारुण्यको.

170 a) $S'_{2\cdot4}$ K आशिष्ये; $S'_{4\cdot6\cdot7}$ (before corr.) C I_{1-5} D B बुद्ध्वेति; K बुद्धेति; $S'_{2\cdot3}$ A बुद्ध्येति (as in text); S'_{2-4} A K दत्त्वा.

इत्यादि विमृषन् राजा स्वपुरं दुःखितोऽगमत् ।
विरोधादायिनो निन्दन् सेवकान् विधिकर्मणा ॥ १७१ ॥

संग्राममृतवीरेन्द्रच्छिन्नमस्तकपङ्क्तिभिः ।
आनीय राजा नगरे मुखागारमकारयत् ॥ १७२ ॥

इत्थं सेवकपैशुन्यात् पितापुत्रविरोधतः ।
समरे तत्र तद्वर्षे वीरलोकक्षयोऽभवत् ॥ १७३ ॥

राज्यस्थितिप्रविकसन्नलिनीहिमौघो
लोकक्षयोदितमहाभयधूमकेतुः ।
विघ्नप्रसक्तखलघूकनिशान्धकारः
शापः सुखस्य नृपतेः स्वजनैर्विरोधः ॥ १७४ ॥

इति पण्डितश्रीवरविरचितजैनराजतरङ्गिण्यां
मल्लशिलायुद्धवर्णनं नाम
प्रथमः सर्गः ॥ १ ॥

---

171 a) I_2 B (evid. emend.) विमृशन् .

172 d) C B सु (mislec. for S'ār. मु)खा°.

174 a) $S'_{2.7}$ A -स्थिति: (emended as in text with other MSS and C B); $S'_{2.7}$ A हि माघे. —b) MSS and C B -क्षयोचि (mislec. for S'ār. दि)त–.

—After 174 $S'_{3.4.6}$ A C $I_{1.3.5}$ K ins. :

*2 श्रीमानसिंह नृपते तव नामवर्णाः
पञ्चेषुपञ्चविशिखान्ति नितम्बिनीषु ।
प्राणन्ति बन्धुषु विरोधिषु पाण्डवन्ति
देवद्रुमन्ति कविपण्डितमण्डलेषु ॥

[(1.1) A -मर्त्य- (for -मान-). — (1. 2) $S'_{4.6}$ A C $I_{3.5}$ K -विवि (mislec. for S'ār. शि)ख°].

Colophon :— S'_8 fol. missing. D ins. श्री before पण्डित–; $S'_{4.6}$ C om. -वि–; $I_{1.3}$ om. -विरचित–; $I_{2.4.5}$ D -कृत– (for -विरचित–); I_2 om. -राज–. —$S'_{2.7}$ इति श्रीजैनतरङ्गिण्यां मल्लशिलायुद्धवर्णनं प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः

भूभृतो निर्गता प्रेमसरित् प्रोच्चानुजच्छलात् ।
प्रत्यावृत्ता कियत्कालं शुद्धाग्रजमशिश्रियत् ॥ १ ॥

यत् स्नेहभागी सुदशाभिरामो
भाति प्रदीपः समुपास्य पात्रम् ।
आशाप्रकाशैकनिधेस्तदारा-
दसंनिधानेन विरोचनस्य ॥ २ ॥

ददावादमखानाय नायकः स क्षितेस्तदा ।
प्रमेयान् क्रमराज्यस्थाननुजीव्यान् विरागतः ॥ ३ ॥

जगृहे स च वित्तौघं गृहग्रामादि देवगम् ।
हाज्यिहैधरखानीयं पानीयमिव वाडवः ॥ ४ ॥

ततःप्रभृति ज्येष्ठः स कश्मीरान्तर्नृपाग्रगः ।
यौवराज्ये सुखं तद्वद् बुभुजे पञ्चषाः समाः ॥ ५ ॥

येषां सुखं वितनुते विधिरन्नवृद्ध्या
दुर्भिक्षदुःखमपि संतनुते स तेषाम् ।
वृष्ट्या विवर्धयति यानि तृणानि मेघ-
स्तान्येव शोषयति भावितुषारभारात् ॥ ६ ॥

---

1 d) $I_{1.3}$ शुभ्रा°; $S'_{2.7}$ I_3 D अशिश्रयत् .

3 a) $S'_{2.7}$ A K [आ]धम–. —d) MSS and C B -जीयान् (emended as in text).

4 a) $S'_{2.7}$ जगृहेऽस्य च भृत्यौघं (marg. as in text). —b) MSS and C B देव (prob. mislec. for S'ār श)ग°. —d) I_3 वाडु (mislec. for S'ār. उ)वः.

5 b) D °जः (for °गः). —d) MSS (except I_5) and C B पञ्चशः ; I_5 (evid. emend.) पञ्चषाः (as in text).

सर्वसस्यसमृद्धेऽस्मिन् देशे षट्त्रिंशवत्सरे।
अकस्मादभवच्चैत्रे गगनात् पांशुवर्षणम् ॥ ७ ॥

बभूव वर्षः षट्त्रिंशः सर्ववृष्णिकुलक्षयात्।
भयकृत् सर्वजन्तूनां भारतादिति विश्रुतम् ॥ ८ ॥

अभवन् पत्रपुष्पौघा धूलिधूसरिता नताः।
भाविदुर्भिक्षपीडार्तजनचिन्तावशादिव ॥ ९ ॥

भविता वत्सरेऽमुष्मिन् दुर्भिक्षं पांसुवर्षणात्।
इत्याख्यन्नुत्तरं पृष्टा भूभुजा दैववित्तमाः ॥१०॥

षट्त्रिंशो वत्सरोऽतीतो दुर्भिक्षार्तिप्रदोऽभवत्।
ऐषमस्तादृशः प्राप्तो भीतिरित्युदभूद्धृदि ॥११॥

पपात मार्गशीर्षेऽथ मास्युपद्रवदर्शकम्।
देशेऽत्र विलसच्छालिमाले प्रालेयवर्षणम् ॥१२॥

दुर्भिक्षदुःस्थितं लोकं कथं पश्यामि साम्प्रतम्।
इतीव भूरभूच्छन्नमुखी हिमसितांशुकैः ॥१३॥

---

7 a) S′3 (before corr.)4 C B -शस्य-. —d) S′8 (after corr.)6 A D पांसु-.

8 a) S′7 वर्षे (*sic*) ; S′2.7 षट्त्रिंशे (*sic*).

9 a) B य (mislec. for Dev. प)त्र-. —b) S′6 I1–5 D -धूसरा; S′8 -धूसरिता (as in text); S′4 C -धूसरतानताः ; S′2.7 A K -धूसरभार (mislec. for S′ār. ता न)तः (evid. emend.); B -धूसरताननाः (evid. emend.).

10 b) S′4 C पांशु-.

11 b) S′6 C I1 °क्षाति°. —d) S′2.7 A अपि (for हृदि).

12 b) MSS and C B -दर्शनम् (emended as in text with M).

13 a) S′3.4.6 C I3 K -दुस्थितं.

छादिताः शालयः पक्का हिमैर्जनमनोहराः ।
खलमूर्खसभामध्ये पण्डितैः स्वगुणा इव ॥ १४ ॥

कुक्ष्यावेशाद् बुभुक्षार्तः क्षपिताक्षः क्षणे क्षणे ।
आशु दुर्भिक्षयक्षोऽत्र व्यधात् प्रक्षीणलक्षणम् ॥ १५ ॥

प्रविश्य रात्रौ गेहान्तः क्षुद्भक्षोद्रेकपीडितः ।
हिरण्यादि धनं त्यक्त्वा भाण्डेभ्योऽन्नमपाहरत् ॥ १६ ॥

सर्वस्मिन् दिवसे रात्रावपि भिक्षुपरम्पराः ।
शरा इवाविशन् देहे गेहे धान्यवहे तदा ॥ १७ ॥

धान्यवद्गृहसंपिष्टकुष्टकम्बुकदम्बकाः ।
नीरसापूपभोगेनाप्यरक्षन् केऽपि जीवितम् ॥ १८ ॥

पालीपालीवतासक्तघट्टङ्कटङ्कितभोजनः ।
चिराच्चिरास्वादरतः कोऽपि कोऽपि हतोऽभवत् ॥ १९ ॥

क्षीणा ग्रामेषु वास्तव्याः केचिदन्नामृताप्तये ।
शाकमूलफलाहारा व्रतनिष्ठा इवाभवन् ॥ २० ॥

---

14 d) $S'_{3.6}$ C सगुणाः.

15 a) $S'_{2-4.6}$ C I_{1-5} K D B °वेगा (S'_6 *sup. lin.* शा)त्.

16 b) S'_3 K क्षुद्र° (mislec. for S'ār. क्ष); D B °भक्ष्य–; S'_2 I_2 A -द्रोह–; S'_4 C $I_{1.3-5}$ D B -द्रोह्य– ; S'_3 -द्रोह्म–; S'_6 (orig.) -द्रोह्य– (after corr. ह); S'_7 (orig.) -द्रोह– (*sec. m.* ह्य); K -द्रोक– (emended as in text); S'_7 -पीडिताः.

17 d) S'_2 A गृहे.

18 a) MSS and C B सांदि (mislec. for S'ār. पि)ष्ट–. —b) $S'_{2.7}$ I_5 -कदम्बुकाः.

19 b) S'_3 -टकित–. c) MS and C B चिराचिरा° (emend. as in text).

चिराष्टङ्कान्तरे क्षिप्त्वा शाकं किमपि तण्डुलम् ।
पक्त्वान्ये केऽपि तद्भोगादकुर्वन् प्राणधारणम् ॥ २१ ॥

सर्पिर्लवणतैलानां तण्डुलेन महार्घता ।
हृता नीचेन साधूनामिव सर्वोपयोगिनाम् ॥ २२ ॥

बहुधान्यकथानिष्ठो योऽभूत् पूर्वं पुरान्तरे ।
बहुधान्यकथानिष्ठस्तत्कालं स व्यलोक्यत ॥ २३ ॥

बन्धुजीवस्तथा कन्दो बन्धुजीव इवाभवत् ।
मन्दान् संधारयामास क्षुधान्धान् योऽन्धसा विना ॥२४॥

धान्यखारेः क्रयः पूर्वं दीन्नाराणां शतत्रयम् ।
दुर्भिक्षतस्तदा सार्धसहस्रेणापि नापि सा ॥ २५ ॥

किमन्यत् कुत्रचिद् राष्ट्रे धात्रा निष्किञ्चनो जनः ।
अभवन्मण्डकुण्डस्य काञ्चिकेनापि वञ्चितः ॥ २६ ॥

यत् पूर्वमकरोद्धेलां रसवद्व्रीहिशालिषु ।
मन्ये तेनैव शापेन भयमापत् प्रजेदृशम् ॥ २७ ॥

करुणाकुलितो राजा स्वधान्यैः पुत्रवत् प्रजाः ।
पोषयामास मासेषु केषुचिद् यावदाकुलाः ॥ २८ ॥

---

21 a) MSS and C B चिराट° (emended as in text); $S'_{3\cdot4}$ C $I_{1\cdot2}$ -जाङ्कान्तरे.

23 d) D B व्यलोकत. —$S'_{3\cdot4}$ om. 23.

25 a) $S'_{3\cdot4}$ C $I_{2\cdot3\cdot5}$ -खार:; M (evid. emend.) -खारी–; S'_6 (marg.) -खार्या:; S'_4 C I_3 क्रुत: (for क्रय:).

27 b) S'_7 A रेणु–; S'_2 रेण्ड– (mislec. for S'ār. णु) (for रस–).

28 a) S'_7 -कू (evid. emend.) जि (mislec. for S'ār. लि) तो. —d) $S'_{2\cdot7}$ आकुल: (*sic*).

तावदस्यैव माहात्म्यात् सस्यसंपद्व्यजृम्भत ।
सत्यव्रतानां भूपानां क्वावकाशश्चिरं शुचाम् ॥ २९ ॥

मन्येऽथवा विधिर्भूपकारुण्यप्रथनेच्छया ।
दौर्भिक्षदौस्थ्याद् भूलोकं सशोकमकरोत् तदा ॥ ३० ॥

पार्थिवोपप्लवे चौरा अन्धकारेऽभिसारिकाः ।
दौर्भिक्षे चैव तुष्यन्ति धान्यविक्रयिणो जनाः ॥ ३१ ॥

अतः क्षुधा महार्घा ये पदार्था धान्यविक्रयात् ।
गृहीतास्तेषु तान् पूर्वमूल्येनादापयन्नृपः ॥ ३२ ॥

दुर्भिक्षभक्षिताक्षोटलोकदक्षः क्षितीश्वरः ।
धिया सरलवृक्षेभ्यस्तैलाकर्षणमादिशत् ॥ ३३ ॥

तस्मिन् संवत्सरे राज्ञा कारुण्याद् भूर्जगामिनी ।
उत्तमर्णाधमर्णानां व्यवस्था विनिवारिता ॥ ३४ ॥

चतुष्षष्टिः कलाः शिल्पं विद्याः सौभाग्यमेव च ।
दुर्भिक्षोपप्लवे सर्वं तदाभून्निष्प्रयोजनम् ॥ ३५ ॥

---

29 b) S'_4 C शस्य-.

30 a) $S'_{3\cdot4}$ C रि (mislec. for S'ār. वि)धिः. —c) D B दौर्भिक्ष्य-. —d) $S'_{2\cdot4}$ A I_5 D B अशोकम् (for स-).

31 c) $S'_{3\cdot4\cdot6}$ A C I_{1-5} K D B दुर्भिक्षे. —d) A I_{3-5} K विक्रियिणो.

32 c) $S'_{3\cdot4\cdot6}$ A C I_{1-5} K D B तेऽन्यदा (for तेषु तान्). —d) $S'_{3\cdot4}$ A C K प्रापयत् (for ⌊अ⌋दा°).

33 b) S'_7 -दो (marg. लो) क-. —d) $S'_{2\cdot7}$ तैल-; $S'_{2\cdot7}$ रक्ष (S'_7 marg. कर्ष)णम् .

34 a) D B राजा.

35 a) $S'_{2\cdot4\ 6\cdot7}$ A C I_{1-5} K B चतुःषष्टि°; S'_3 D चतुष्ष° (as in text). b) $S'_{2-4\cdot6}$ A C I_{1-5} K B विद्या.

पद्वाक्यतर्कनवकाव्यकथा
बहुगीतवाद्यरसनृत्तकलाः ।
सुरतप्रपञ्चचतुरा वनिताः
क्षुधितस्य नैव रचयन्ति सुखम् ॥ ३६ ॥

इति जैनराजतरङ्गिण्यां पण्डितश्रीवरविरचितायां
षट्त्रिंशद्वर्षे दुर्भिक्षवर्णनं नाम
द्वितीयः सर्गः ॥ २ ॥

36 b) C B -नृत्य-. —d) B (evid. emend.) जनयन्ति.

Colophon :—S'_8 fol. missing. I_3 ins. श्री before जैन-; S_4 D om. -राज-; S'_8 B transp. पण्डित- and श्रीवर-; I_5 षट्त्रिंश-; $S'_{3.4.6}$ षड्विंश-. —$S'_{2.7}$ श्रीजैनराजतरङ्गिण्यां दुर्भिक्षवर्णनं द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः

तुष्टः प्रसादमतुलं कुरुते क्षणाद्यः
क्रुद्धः प्रजासु तनुते भयमप्रतर्क्यम् ।
उन्मत्तपार्थिवपतेरिव हन्त धातो-
र्लीलास्वतन्त्रचरितं भुवि बुध्यते कैः ॥ १ ॥

षट्त्रिंशवर्षदुर्भिक्षदुःखविस्मरणं जनः ।
न यावदकरोत् तावदष्टात्रिंशेऽपि वत्सरे ॥ २ ॥

वृष्ट्या सह रजोवर्षमपतद् गगनाद् भुवि ।
उदीपक्षतशाल्युत्थभाविदुर्भिक्षसूचकम् ॥ ३ ॥

अथाचिरेण गर्जन्तो धृतचापा घना घनाः ।
जनानुद्वेजयामासुः शरासारैरिवारयः ॥ ४ ॥

वृष्ट्युपद्रवसंनद्धाः फलर्द्धिहरणाकुलाः ।
उत्थिता बुद्बुदव्याजाद् दुष्टा नागफणा इव ॥ ५ ॥

उत्पन्नध्वंसिनो भावान् करिष्याम्यहमञ्जसा ।
इति ज्ञापयितुं मेघो बुद्बुदानसृजद् भुवम् ॥ ६ ॥

---

1 b) MSS (except $S'_{2\cdot7}$) and C B कुरुते (for तनु°). —A (transp.) 1^{ab} and 1^{cd}.

2 a) $I_{1\cdot2\cdot4}$ A D B षट्त्रिंशद्°; $S'_{3\cdot4\cdot6}$ C K षड्विं (S'_6 marg. ट्त्रि)श–.

3 b) S'_3 C K गगणात् . —c) $S'_{3\cdot4\cdot6}$ A C $I_{3\cdot5}$ K (corrupt) उपादीक्ष (S'_6 A क्ष्य)त; S'_7 (gloss marg.) यीपो (= यूप् 'flood') इति भाषया (for उदीप–).

5 b) C ह (mislec. for S'ār. फ)ल–.

6 d) S'_7 I_3 D बुद्बुधा (mislec. for S'ār. दा) न् .

वृक्षाः सर्वत्र पत्रान्तःपतद्वृष्टिस्वनच्छलात् ।
अश्रुबिन्दूनिवामुञ्चन् रुदन्तो जनचिन्तया ॥ ७ ॥

वितस्तालेदरीसिन्धुक्षिप्तिकाद्यास्तदापगाः ।
अन्योन्यस्पर्द्धयेवोग्रा ग्रामांस्तीरेष्वमज्जयन् ॥ ८ ॥

सविभ्रमा धृतावर्ता वाह्निन्युत्थाः सहेषिताः ।
जवादधावन्नुत्तुङ्गास्तत्तरङ्गतुरङ्गमाः ॥ ९ ॥

अत्युच्चपातकृन्नीचोन्नतिदं च निरङ्कुशम् ।
आसीदपथगं सत्यं तदा जलविजृम्भितम् ॥१०॥

मृदोर्जलस्य तत्कालेऽद्रिवृक्षविटपालिषु ।
केनोपदिष्टं तत्काले मूलोत्पाटनपाटवम् ॥११॥

अग्राग्रपशुगोप्राणिगृहधान्यादिहारकः ।
भयदोऽभूज्जलापूरः स म्लेच्छोत्पिञ्जसंनिभः ॥१२॥

तदा मडवराज्यस्था विशोका शोकदा नदी ।
प्रदक्षिणेच्छयेवान्तर्विवेश विजयेश्वरम् ॥१३॥

स्नानात् पापहरी पूर्वप्रवाहोपगता नदी ।
इतीव तज्जले तूर्णं ममज्जुर्गृहपङ्क्तयः ॥१४॥

---

7 c) $S'_{2-4.6}$ A C I_{3-5} K अस्रु-. —d) $S'_{2.6}$ (marg.) K क्रन्दन्तो.

10 a) C B °च्चा°.

11 a) $S'_{3.4.6}$ A C I_{1-5} K D B मृदो ज°. —b) S'_3 (before corr.)$_4$ ⌊अ⌋दि- (for द्रि).

12 a) B (corrupt) आग्राग्र-. —b) S'_7 $I_{1.3.5}$ D -कारकः. —c) S'_7 (orig.) तवशो (after corr. भयदो).

13 a) $I_{1.5}$ मरु (I_5 भ) (mislec. for S'ār. ड)व-. —b) $S'_{2.6}$ (marg.)$_7$ A K (evid. emend.) -नाशिनी (for °दा नदी). —D B hapl. om. 13[cd] and 14[ab].

पुराणेषु प्रसिद्धा या विशोका शोकनाशिनी ।
तदाभूद् विपरीतार्था प्रजाभाग्यविपर्ययात् ॥ १५ ॥

येभ्यः प्रतिष्ठा प्राप्ता तान् दुःस्थान् द्रष्टुमसाम्प्रतम् ।
इतीव तोये तत्कालं ममज्जुर्नगरे गृहाः ॥ १६ ॥

शिलादारुमयी मग्नस्तम्भीभूतचतुर्गृहा ।
चतुष्पादिव धर्मो या लोकोत्तरणकृद् बभौ ॥ १७ ॥

तरदायामपङ्क्त्यश्वदशकाय विशांपतेः ।
यात्रागतस्य रामस्य सेतुबन्ध इवाभवत् ॥ १८ ॥

वितस्तायां कृता जैनकदलिः सा गृहोज्ज्वला ।
जलावेशात् तटे मग्ना भग्ना या नगरान्तरे ॥ १९ ॥

पादद्वयावशेषापि स्थापिताग्रे भविष्यताम् ।
पादद्वयं पूरयितुं समस्येव महीभुजाम् ॥ २० ॥

---

15 a) S'_3 (before corr.)$_4$ प्रसिद्धो. —b) $S'_{2.7}$ -हारिणी; $S'_{3.4.6}$ A C I_{1-5} K D B -नाशिनी (as in text).

16 b) $S'_{2.6}$ (marg.)$_7$ न शक्नुमः; $S'_{3.4}$ A C I_{1-5} K D B असाम्प्रतम् (as in text).

17 a) S'_2 (corrupt) -दाह- (for °रु). —b) $S'_{3.4}$ -लम्भी (for स्त°); A -गृहाः. —c) S'_6 A यो.

18 a) $S'_{3.4.6}$ A C K दारदा-; D B तारदा-; I_5 भुरदा- ; MSS (except S'_7) and C B (evid. emend.) -ग्राम-; S'_7 (orig.) -क्षाम- (after corr. -ग्राम-) (emended to [आ]याम- as in text); MSS and C -पङ्क्तयश्व (mislec. for S'ār. श्व); B (evid. emend.) -पङ्क्तयाश्व. —b) MSS and C B -दर्शनाय (emended as in text); see Crit. App. I.3.82. —c) S'_7 (before corr.) यत्रा°; $S'_{3.4.6}$ (*sup. lin.*) A C I_5 (*sup. lin.*) K D (*sup. lin.*) लोकस्य (for राम°).

19 b) $S'_{4.6}$ A C स- (for सा). —c) $S'_{3.6}$ (before corr.) A C $I_{1.2}$ तटोन्मग्ना. —d) $S'_{2.3.6.7}$ A C I_{1-5} K D B [अ] च (S'_3 *pr. m. inf. lin.* या as in text).

20 d) After महीभुजाम् $S'_{3.4.6}$ K चतुर्भिः कुलकम् ; I_{1-5} D चक्कलकम् ; M युग्मम् .

क्रमराज्ये तदा कुर्वत् कल्लोलैराकुलं जनम् ।
महापद्मसरो वेगादगाद् दुर्गपुरान्तरम् ॥ २१ ॥

अन्यः सरोवरः कोऽपि पद्मनागसरोन्तिकम् ।
प्रीत्या किमागतो दूराद् यं दृष्ट्वा विशशङ्किरे ॥ २२ ॥

स्वयमुत्पाटयत्यस्मान् वृक्षवत् सहसागतः ।
इतीव तत्र वेश्मानि चिक्षिपुः स्वं जलान्तरे ॥ २३ ॥

दूरे समुद्रो मद्भर्ता कोऽयं मे समुपागतः ।
इत्थं वितस्ता त्रस्तेव प्रतीपमगमत् तदा ॥ २४ ॥

सीमोज्झिता चलन्मार्गा पङ्कातङ्ककलङ्किता ।
स्थितिः कलियुगस्येव भूरभूज्जलपूरिता ॥ २५ ॥

तस्मिन्नवसरे धारासारं वर्षति वासवे ।
नौकामारुह्य भूपालो निरगाज्जनचिन्तया ॥ २६ ॥

पश्यञ्जलान्तरे मग्नां कृषिं कृशतरः शुचा ।
जनकारुण्यपुण्यात्मा विचचार पतिः स्थलम् ॥ २७ ॥

---

21 [ab]) MSS and C B कुर्वन्क° (mislec. for S'ār. त्क)ल्लो°. —[b]) S'_7 (before corr.) कङ्गोले (for कल्लोलै)र्; S'_7 जलम्. —[c]) $S'_{3\cdot4}$ महानप्य- (S'_3 after corr. प्यि)सरो; S'_6 महानप्प्र (before corr. प्य)सरो; A महदप्प्रसरः; $S'_{2\cdot7}$ C I_{1-5} K D B महानप्प्र- (emended as in text). —[cd]) S'_4 वेगा…दु°. —[d]) I_3 मत-; I_4 सुड-; I_5 उत- (for दुर्ग°).

23 [b]) B (evid. emend.) स सहागतः (for सहसा°). —S'_4 hapl. om. 23[cd] and 24[ab].

24 [b]) $S'_{3\cdot6}$ A C हि (for मे). —[c]) $S'_{4\cdot6}$ A C तत्रैव (for त्रस्तेव).

26 [d]) $S'_{3\cdot4\cdot6}$ A C जल- (for °न); K जज- (mislec. for S'ār. ल).

27 [d]) प्रति- is suggested for पतिः; S'_4 स्थवम् (*sic*).

दृष्टानि यानि घोषेषु गहनत्वान्न जातुचित् ।
स्थानानि तानि भूपालो नौकारूढो व्यलोकयत् ॥ २८ ॥

प्रतापशिखिनेवाथ शोषितोऽगान्मितैर्दिनैः ।
शान्तिं क्रूरो जलापूरः सन्निवारे समागतः ॥ २९ ॥

अथाचिरेण तद्वर्षे दानोत्कर्षादिव प्रभोः ।
हर्षमन्वभवन् सर्वे पक्कया शालिसंपदा ॥ ३० ॥

प्रजाचन्द्रकलावृद्ध्यै कश्मीरेन्द्रपयोनिधिः ।
तूर्णं पूर्णात्मतां प्राप दयापीयूषभूषणः ॥ ३१ ॥

आत्मेव कश्चित् सुकृती क्षितीशः
प्रजा प्रियास्य प्रकृतिर्यथैव ।
तत्सौख्यवृद्ध्या सुखिता यदास्ते
तदीयदुःखेन च दुःखयुक्तः ॥ ३२ ॥

वितस्तोच्चतटे भूपस्तदुपद्रवशङ्कया ।
पुरं चिकीर्षुर्बभ्राम जयापीडपुरान्तिके ॥ ३३ ॥

अकरोत् तिलकं भूमेरलकादर्पहृत्पुरम् ।
स जैनतिलकं नाम नदीतीरोन्नतस्थले ॥ ३४ ॥

---

29 d) $S_{2\cdot4\cdot6\cdot7}$ A C I_{1-4} K D B स त्रि (mislec. for S′ār. न्नि) सा (mislec. for S′ār. वा) रे; S'_3 I_5 सन्निसारे.

31 c) S'_2 पूर्णात् सुतं (for पूर्णात्मतां).

32 c) A सुखितो. —d) S'_6 C -युक्ता; I_{3-5} D B -भाग: (for -युक्तः).

33 a) B भूय: (mislec. for Dev. प:). —d) $S'_{2\cdot7}$ A पुरान्तरे; $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B -पुरान्तिके (as in text).

34 d) B (evid. emend.) °न्नति–.

राज्ञो दिदृक्षयेवात्र राजधानीरुचिच्छलात् ।
सौधभित्तिगता नूनं चन्द्रिकास्ते सुधासिते ॥ ३५ ॥

मूलोत्पाटे दशास्योऽरिर्ममेशेन विवर्धितः ।
इत्येव खिन्नः कैलासः सौधव्याजादिवागतः ॥ ३६ ॥

सुधासितगृहा यत्र सन्नागारवसुंधरम् ।
जयापीडपुरं जीर्णं हसन्तीव रुचिच्छलात् ॥ ३७ ॥

तलद्वारोत्सुकस्यास्य राज्ञः प्रत्यक्षतां गतम् ।
मायासुरपुरं किं वा यद् दृष्ट्वेत्यवदन् बुधाः ॥ ३८ ॥

यद् वारिकान्तं संक्रान्तं परितः सरितस्तटात् ।
द्वारिकां हसतीवास्य वारि कान्त्या सुधासितम् ॥ ३९ ॥

तत्र राजपुरीयाय जयसिंहाय भूपतिः ।
प्रददौ राज्यतिलकं निजजन्मदिनोत्सवे ॥ ४० ॥

तत्रोपविष्टः संतुष्टः सेवया मे महीपतिः ।
भट्टतन्त्राधिकारं च प्रददौ ब्राह्मणप्रियः ॥ ४१ ॥

काश्मीरकाद्यदेशीयसर्वगीताङ्किताङ्गने ।
तस्मिन् संवत्सरे राज्ञा चक्रे कनकवर्षणम् ॥ ४२ ॥

---

36 [a]) M (evid. emend.) °त्पाटी. —[b]) S''_4 C भमेशेन; S'_3 भीमेशेन; I_2 D ममै (*sic*) शेन. —[c]) $S'_{3\cdot4\cdot6}$ C I_{1-5} K C D B इतीव.

37 [d]) D B हसतीव.

38 [a]) $S'_{2\cdot6}$ (marg.)$_7$ A K बिल– (for त°); $S'_{3\cdot4}$ K -धारो° (for -द्वा°).

39 [d]) MSS and C B द्वारि (emended as in text).

41 [b]) S'_4 C K ⌊अ⌋स्य (for मे).

42 [a]) MSS and C B काश्मीरकाश्य° (prob. mislec. for S'ār. द्य); M (evid. emend.) काश्मीरिकान्य°. —[b]) S'_3 सर्व– (*pr. m.* marg. र्ब).

तत्रोपकण्ठे भूपालः स्मृत्यै कण्ठेरवद्विषः।
हेलालनाम्नो दासस्य हेलालपुरकं व्यधात् ॥ ४३ ॥

शैलपीठं विधायोच्चैर्जयापीडपुरान्तरे।
सरस्तीरे मनोहारि राजवासं नवं व्यधात् ॥ ४४ ॥

उदीपब्रुडितं जीर्णं निर्लुण्ठ्योपसरोवरम्।
महाप्रज्ञो नृपश्चक्रे तद्वद् राजगृहावलिम् ॥ ४५ ॥

नागयात्रादिने यत्र प्रत्यब्दं दिनपञ्चकम्।
गणचक्रोत्सवे राजा योगिनो भोगिनो व्यधात् ॥ ४६ ॥

यत्र कादम्बरीक्षीरव्यञ्जनादिप्रपूरिताः।
कृत्वा पुष्करिणीः सर्वान् स यथेच्छमभोजयत् ॥ ४७ ॥

यत्र योगिसहस्रोत्थशृङ्गनादासकृच्छ्रुतेः।
जाने मानसनागोऽपि न्यमीलन्निजचक्षुषी ॥ ४८ ॥

न तदन्नं न तन्मांसं न तत् सस्यं न तत्फलम्।
न ते भोगा न ये राज्ञा भोजिता भोजनक्षणे ॥ ४९ ॥

योगिनां त्रिविधाश्लीलं मद्यमत्ततयोदितम्।
असहिष्ट नृपो भक्त्या यदसह्यं जनैरपि ॥ ५० ॥

---

43 b) $S'_{3\cdot 4\cdot 6}$ C I_2 K B कण्ठी-.

44 c) $S'_{2\cdot 7}$ A C I_4 -तीर्थे (for °रे); $S'_{3\cdot 4\cdot 6}$ $I_{2\cdot 3\cdot 5}$ K D B तीरे (as in text). —d) $S'_{3\cdot 4\cdot 6}$ C I_{1-5} K D B स्वकं (for नवं).

45 d) MSS (except S'_4 A) B राजा (emended as in text with S'_4 A C).

47 b) S'_3 (before corr.)$_{4\cdot 6}$ C -पूरितः.

49 b) $S'_{3\cdot 4}$ C B शस्यं.

50 a) M (evid. emend.) विविधा°. —b) S'_3 (after corr.) मद्योन्मत्त°; $S'_{2\cdot 7}$ -क्रयो°; K -क्रियो° (1or °तयो°).

महार्हपरिधानोद्यद्दानमानादिलाञ्छनैः ।
तेषामधिपतिं यत्र पेरं स्वसदृशं व्यधात् ॥ ५१ ॥

सत्कन्थाकिन्नरामुद्रादण्डाद्यैर्द्वादशीदिने ।
भारिकान् योगिनः कृत्वा प्रत्यमुञ्चत् ततो बहिः ॥ ५२ ॥

वितस्ताजन्मपूजार्थं त्रयोदश्यां ततो नृपः ।
दीपमाला दिदृक्षुः सन्नौकारूढोऽभ्यगात् पुरम् ॥ ५३ ॥

सुभाषितानि संशृण्वन् संगीतानि जलान्तरे ।
समारोहावरोहाभ्यां स पौराशिषमग्रहीत् ॥ ५४ ॥

पूजार्थं प्रस्फुरत्पौरदत्तदीपावलिच्छलात् ।
वितस्तान्तरमायाता तीर्थकोटिरिवाद्युतत् ॥ ५५ ॥

पारावारतटप्रत्ता दीपमालास्तदा दधुः ।
अर्चनाप्तसुरोन्मुक्तसुवर्णकुसुमश्रियम् ॥ ५६ ॥

वितस्ताबलिपूजाप्तनागरीमुखनिर्जितः ।
लज्जया कम्पतीवेन्दुः सेवाप्तः प्रतिमाच्छलात् ॥ ५७ ॥

गर्वखर्वीकृताराति: सुपर्ण इव लीलया ।
सर्वां रात्रीं स गान्धर्वचर्वणैरनयत् सुखम् ॥ ५८ ॥

---

51 [a]) $S'_{3.6}$ C महार्घ्य–; $S'_{2.4}$ I_{1-5} K D B महार्घ–. —[d]) $S'_{3.4.6}$ A C I_{1-3} K B मेरं.
52 [b]) $S'_{2.7}$ A K द्वादशे.
53 [c]) $S'_{4.6}$ A C स (for सन्).
55 [b]) $S'_{3.4}$ C $I_{1.3.5}$ D -दीपबलि–. —[c]) S'_{7} °यात–.
56 [a]) I_4 D B -प्रत्त–; S'_3 -प्रोत्ता; S'_4 K -प्राप्ता.
57 [c]) S'_4 C A कम्पतेवे°.
58 [a]) S'_2 नाव– (prob. mislec. for गर्व–).

वन्द्योऽसौ गुणिबान्धवो दिनपतिर्यस्योदयानुग्रहाद्
दृष्टा कुत्र न सर्वदर्शनसुखात् सच्चक्रहर्षस्थितिः ।
निन्द्यौ तस्य सुतौ पितुर्विसदृशौ लोकव्यथोत्पादकौ
यौ कालोऽयमिति प्रथामुपगतौ क्रूरग्रहौ निश्चितौ ॥५९॥

अत्रान्तरेऽनुजद्वेषवशात् कलुषिताशयः ।
आदामखानो निःशेषं देशमाक्रामयद्धठात् ॥ ६० ॥

यंत्राश्मेवातिकठिनास्तन्त्रतन्त्रितयन्त्रिणः ।
दुर्मन्त्रिणोऽभजन् राज्ञि तस्मिन् सोऽपि स्वतन्त्रताम् ॥६१॥

स्फीते भीते न कामास्त्रे शास्त्रे न रसिकोऽभवत् ।
केवलं मृगयासक्तश्चमत्कारं श्वभिर्व्यधात् ॥ ६२ ॥

सरसामन्तरेऽरण्ये यत्र कुत्रापि तिष्ठतः ।
मृगयारसिकस्यास्य रात्रिर्दिनमिवाभवत् ॥ ६३ ॥

किमुच्यतेऽन्यन्नीचत्वं यद् भृत्यैर्व्यवहारिवत् ।
श्येनसंहृतपक्ष्योघविक्रयो नगरे कृतः ॥ ६४ ॥

---

59 RSs$_2$ cites 59 entirely. —[a]) RSs$_2$ -मणि: (for पति:). —[b]) RSs$_2$ -सङ्गतिभरात् (for °दर्शनसुखात्).

60 [a]) B (evid. emend.) निज– (for ⌊अ⌋नु°). —[c]) S′$_{2\cdot7}$ I$_{3-5}$ K आधा°.

61 [a]) S′$_{2-4\cdot6\cdot7}$ C I$_{1-5}$ K D B यत्र; S′$_6$ (marg.) A यंत्र (as in text); S′$_{2\cdot3\cdot7}$ I$_{3-5}$ D K -कठिन: (*sic*). —[d]) S′$_{2\cdot7}$ I$_{3-5}$ D ⌊अ⌋भजद्.

62 [b]) S′$_{2\cdot7}$ A transp. शास्त्रे and न.

63 [b]) S′$_3$ (before corr.)$_4$ A तत्र (for कुत्र). —[c]) B (evid. emend.) ⌊अ⌋त्र (for °स्य). —[d]) I$_1$ C रात्रिं दि (<त्रिन्दि mislec. for S′ār. दिं)नम् .

64 [b]) S′$_2$ भूत्यै (for भृत्यैर्). —[c]) S′$_{4\cdot6}$ A -संहृत–; S′$_{3\cdot4\cdot6}$ A C I$_{1-5}$ K B -पक्षौघ–.

अथैकदा विभज्यासौ यौवराज्यमदोद्धतः।
क्रमराज्यं नृपत्याज्यं ययौ प्राज्यपरिच्छदः ॥ ६५ ॥

यत्र यत्रोपविष्टः स पापनिष्ठोऽप्यनिष्टवत्।
अभवन् पीडितग्रामीणाक्रन्दमुखरा दिशः ॥ ६६ ॥

प्रसादमतुलोदग्रं प्रतिग्रहदृढां क्षितिम्।
उपग्रह इवात्युग्रः संजहार पदे पदे ॥ ६७ ॥

क्वचिद्रीत्या क्वचिद्भीत्या क्वचिन्नीत्या विलोभयन्।
लोभग्रस्तो बलात्काराच्च केषामहरद्धनम् ॥ ६८ ॥

स प्राकृत इव व्याजमैत्रीं कुर्वन् गृहागतः।
लोभादन्याँल्लिवन्यांस्तानन्यान् वित्तैरवञ्चयत् ॥ ६९ ॥

नीता जारकृताद् युक्त्या सभयास्ताडयन् स्त्रियः।
तदुक्त्यादण्डयत् तस्य ग्रामीणान् सेवकव्रजः ॥ ७० ॥

तत्तद्विनिग्रहस्थानसावधानमतिस्तदा ।
स तार्किक इवात्युग्रो राष्ट्रियैर्दुर्जयोऽभवत् ॥ ७१ ॥

जायास्नुषादुहित्राद्या भव्या येष्वभवन् गृहे।
बलात् प्रविश्य संभुक्ता निर्लज्जैस्तस्य सेवकैः ॥ ७२ ॥

---

65 c) S'_2 नृख– (mislec. for S'ār. नृप); $S'_{4\cdot6}$ C $I_{3\cdot5}$ K नख– (*sic*); D नख– (*pr. m. sup. lin.* नृप).

66 b) S'_4 K [अ]थ (for °पि). —c) $S'_{3\cdot4}$ C I_{3-5} K पीडिता.

67 a) MSS and C B °दग्र– (emended as in text). —b) S'_7 (after corr.) A क्षतिम् .

70 a) $S'_{4\cdot6}$ C I_1 चार– (for जा°); A जारैः; $S'_{2\cdot7}$ A -क्षणात् ; $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B -कृतात् (as in text).

71 c) S'_2 (gram. assim.) [अ]त्युग्रैः.

72 c) M (evid. emend.) तद्° (for सं°).

समण्डमत्स्यं कुण्डैस्ते पीत्वा शुण्डान्तरे मधु ।
भाण्डा इव मदोच्चण्डाः श्वासैर्भाण्डमवादयन् ॥ ७३ ॥

तण्डुलाश्च कुसूलेभ्यः शालाभ्यः पीनबर्कराः ।
वीटिकाभ्यः स्वयं मद्यं भुक्तं तैर्बलकारिभिः ॥ ७४ ॥

सेवकानौचिती तस्य कियती वर्ण्यते मया ।
ये श्वमूर्धनि वास्तव्यान् घृताभ्यङ्गमकारयन् ॥ ७५ ॥

हसन्तीरिव ज्वालाभिस्तैलपूर्णा हसन्तिकाः ।
तान् कारयित्वा ये दीपान् निशास्वज्वलयञ्शठाः ॥७६॥

इत्यादि कुत्सिताचारं भारार्त इव भूपतिः ।
विज्ञप्योद्वेजितो लोकैर्निर्गन्तुं नाशकद् गृहात् ॥ ७७ ॥

पीडां मा कुरुतेत्यादि राजदूते ब्रुवत्यमी ।
अवोचन्निति तद्भृत्या राजा क्रन्दतु पीडितः ॥ ७८ ॥

वैरं यो गुरुभिः करोति सततं पुष्णात्यलं दुर्जनाँ-
ल्लोभात् संचयमातनोत्यनुदिनं तद्दानभोगोज्झितः ।
दीनान् ग्राम्यजनांश्च पीडयति यो निर्हेतुमत्याक्षिपं-
स्तस्यासन्नविनाशिनः स्वविभवस्तापाय शापाय वा ॥७९॥

---

73 a) $S'_{3\cdot4\cdot6}$ C -माण्ड-; $S'_{2\cdot7}$ A K (gram. assim.) -मत्स्यैः. —b) $S'_{3\cdot4}$ शाण्डा°; $S'_{2\cdot7}$ A कुण्डा°. —c) S'_7 भण्डा°.

74 b) S'_6 I_3 C वत्क (mislec. for S'ār. बर्क)राः. —cd) S'_2 मद्यं···मुक्तं ते तु कारिभिः.

75 a) S'_3 and S'_6 (before corr.)$_4$ C सैव का°. —c) I_1 C [अ]ध्व- (mislec. for S'ār. श्व).

76 c) B तान्वा° (mislec. for Dev. न्का); A यो. —d) A [अ]ज्वलयच्छठः.

77 c) $S'_{2\cdot7}$ A विज्ञप्तयु (S'_2 स्त्व)द्वि°.

78 b) $S'_{2\cdot7}$ K_a [अ]पि (for °मी).

कुर्वन् स्वसैन्यसामग्रीं कुद्देनपुरे स्थितः ।
एकदा जैननगरे भूपालं सबलोऽभ्यगात् ॥ ८० ॥

तद्दिने शङ्कितस्तस्मात् पूर्णकर्णो दुरुक्तिभिः ।
स्वसैन्यसंग्रहं राजा राजधान्यां गतोऽकरोत् ॥ ८१ ॥

वितस्तान्तर्वसद्दारुशैलपूर्णचतुर्गृहम् ।
तरदायामपङ्क्त्यश्वदशकं नगरान्तरे ॥ ८२ ॥

सेतुबन्धं व्यधाज्जैनकदलाख्यमयं नृपः ।
स्वकृतं तं तदाज्ञासीत् स्वविघ्नमिव भीतिदम् ॥ ८३ ॥

नगरोपप्लवाशङ्की संत्रस्तो यत्नमास्थितः ।
पुरान्निष्कासयामास तं सुतं मन्त्रयुक्तिभिः ॥ ८४ ॥

संतापप्रदमुत्तरायणमिहारच्यापि रम्यं गुणै-
र्यो वाञ्छत्यथ दक्षिणायनममुं ज्ञात्वा हिमार्तिप्रदम् ।
लोकानामसुखक्षयार्थमुभयोराद्यं पुनर्यो भज-
त्यर्थायैव परोपकारनिरतः सूर्याय तस्मै नमः ॥ ८५ ॥

क्रमराज्यान्तरं प्राप्ते तस्मिन् द्वैराज्यशङ्कितः ।
स्वाक्षरैर्हाजिखानं स प्राहैषीत् पत्रमित्यदः ॥ ८६ ॥

---

80 b) S'_3 (after corr.)$_7$ A कुद्र (mislec. for S'ār. द्द) देन–; I_5 K D B कुद्म (mislec. for S'ār. द्द)देन–.

82 c) $S'_{3\cdot4\cdot6}$ A C $I_{1\cdot3}$ K -पङ्क्तथश्व (mislec. for S'ār. श्व; cf. P T, MS f. 77[a] : *dah suwār* 'Ten horsemen'); S'_2 पङ्क्त(*sic*)श्व; S'_7 $I_{2\ 4\cdot5}$ D B (evid. emend.) -पङ्क्तयुच्च–.

84 b) $S'_{3\cdot4\cdot6}$ (before corr.) C $I_{1\cdot3–5}$ K D संन्न(mislec. for S'ār. त्र)स्तो. —c) $S'_{3\cdot4\cdot6}$ (before corr.) C $I_{3–5}$ D निष्कालया°.

85 b) C दक्षिणायणम् ; I_1 हिमानि–; $S'_{3\cdot4\cdot6}$ C $I_{3\cdot4}$ K °तिप्रदम्. —d) $S'_{3\cdot6}$ (marg.)$_7$ A [अ]त्यर्थं च (for °र्थायैव).

पुत्र मेऽवसरो दुष्टस्तादृक् प्राप्तो दुरुत्तरः ।
यत्र मत्प्राणसंदेहे गतिर्नान्या त्वया विना ॥ ८७ ॥

मत्पत्रावेक्षणे युक्तं शयितस्य तवासनम् ।
आसीनस्य समुत्थानमुत्थितस्य च धावनम् ॥ ८८ ॥

किमन्यत् सत्यमेवोक्तं त्यक्त्वापि श्रुतयन्त्रणाम् ।
यद्यागच्छसि तत् तूर्णं पूर्णं प्राप्स्यसि वाञ्छितम् ॥ ८९ ॥

अतितूर्णं न चेत् प्राप्तो मयि जीवति विह्वले ।
गते मयि मदभ्यर्णं पुनरागमनेन किम् ॥ ९० ॥

तावत् सुयपुरं प्राप्तः सोऽभूत् तीर्णो नृपात्मजः ।
राजानीकैः समं युद्धमुद्धतं सबलो व्यधात् ॥ ९१ ॥

राष्ट्राधिकारिणं तत्र नत्थभट्टं भटैः सह ।
हत्वा कृत्वा च कदनं देशोत्पिञ्जं क्रुधा व्यधात् ॥ ९२ ॥

अथोदतिष्ठत् तुमुलस्तत्कालं सैन्ययोर्द्वयोः ।
उन्नद्धखानसन्नद्धयुद्धेक्षणसुदुःसहः ॥ ९३ ॥

अष्टाविंशाब्दवदस्मिन् पञ्चत्रिंशेऽपि वत्सरे ।
वैरं नीत्वा पितापुत्रौ पिशुनैः कारितो वधः ॥ ९४ ॥

---

87 a) $S'_{3\cdot4}$ C दृष्टः.

89 a) MSS and C B °क्ते (mislec. for S'ār. क्तं). —b) D B त्यक्ता°. —c) $S'_{3\cdot4}$ om. पूर्णं. —d) S'_4 वाञ्छितम्···; S'_3 वाञ्छितं ध्रुवम्.

91 a) C B स्व (mislec. for S'ār. सु)य (C य्य).

92 b) S'_6 A नक्तं (mislec. for S'ār. त्थं). —d) D B क्षुधा. —$S'_{3\cdot4}$ C I_{1-5} K hapl. om. 92. In S'_7, 92 *sec. m.* marg. —See Crit. App. 95.

93 S'_2 om. 93; 94; 95.

94 b) D पक्ष– (for पञ्च).

तत्रत्या दरदा वान्ये परितः सरितो जले ।
ममज्जुस्तद्भयाद् येन शवपूर्णमभूत् सरः ॥९५॥

हत्वा मृत्युरिवात्युग्रस्तद्दिने नृशतत्रयीम् ।
नौसेतुबन्धमुच्छिद्य नदीपारं समासदत् ॥९६॥

धिक् तं यः पैतृके देशे रक्षणीयेऽपि निष्कृपः ।
परदेशजयं त्यक्त्वा तादृङ् निन्द्यं समाचरत् ॥९७॥

पापास्ते शिखजादाद्याः गृहीत्वोभयवेतनम् ।
भूपमुद्वेजयामासुः फलं यैरनुभूयते ॥९८॥

उद्यः सत्फलदो यथायमहमप्येतादृगेतावता
स्पर्धां यावदियेष हन्त जनकेनैकेन मन्दः सुतः ।
भास्वानभ्युदितः स तावदतुलः सर्वप्रकाशोद्यतो
यन्माहात्म्यवशेन वक्रगतयो ध्वस्ता भवन्ति स्फुटम् ॥९९॥

तत्रैष कष्टनिष्टोऽपि प्रजानां नाशहेतुना ।
आदामखानो वित्राणो लक्ष्म्या भाग्यैश्च तत्यजे ॥१००॥

ईत्यातङ्कादिभिर्दुःखैर्वरं देशेऽत्र जीव्यते ।
सर्वनाशकरी मास्तु भूभर्तुर्बहुपत्यता ॥१०१॥

---

95 S'_7 reads 92 after 95.

96 a) MSS (except A) and C B [अ]त्युग्रां (emended as in text with A).

97 a) B (evid. emend.) पैत्रिके.

98 a) M (evid. emend.) शेख–. —K om. 98ab.

99 a) S'_2 A उच्चैः. —d) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B स्वयम् (for स्फुटम्).

100 a) S'_2 (marg.)$_{3\cdot4\cdot6\cdot7}$ (marg.) A C I_{1-5} K D B तद्देशकष्टदैर्दुष्टैः. —b) $S'_{2\cdot7}$ A भाग्य–; $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B नाश– (as in text). —c) $S'_{3\cdot4}$ C $I_{3\cdot5}$ K आदमखा° (corrupt); D आधाम–; M (erroneously) आदम्खानः सुरत्राणो. —d) S'_3 and S'_6 (before corr.) S'_4 C K भागैः.

101 a) MSS and C B इत्या° (emended as in text).

सा चेत् तेषां स्वभेदो मा भूयाद् वैरात् परस्परम् ।
मा जायेताथ वा दुष्टः सुतः कस्यापि दुःखदः ॥ १०२ ॥

प्रजान्तकारिणौ क्रूरौ राजपुत्रावुभावपि ।
सूर्यस्येव महीभर्त्तुः पङ्कुकालाविवोदितौ ॥ १०३ ॥

अपकर्तॄन् विपन्मग्नान् दयमानः परानपि ।
क्षमी दाता गुणग्राही स्वामीदृग् लभ्यते कथम् ॥ १०४ ॥

व्यथितो यत् सुतैर्दुष्टैः सोऽस्माद्भाग्यविपर्ययः ।
शृण्वन् स रुदिताक्रन्दमिति पौरगिरः पथि ।
पाददाहव्यथार्तोऽपि नगराग्निरगान्नृपः ॥ १०५ ॥

पुत्रोत्पत्तिमवेक्ष्य तुष्यति नृपो वोढा धुरः स्यादिति
स्नेहात् संपदमस्य यच्छति निजामुल्लङ्घ्य नीतिक्रमम् ।
ज्ञात्वा तं बलवन्तमात्मसदृशं तादृग् भिया शङ्कते
येनोत्सन्नसुखो न जातु लभते निद्रां सचिन्ताज्वरः ॥१०६॥

बद्ध्वा मल्लिकजस्रथेन स यदा राजालिशाहिर्हतो
भ्रातृद्वेषवशाद् बभूव कदनं काश्मीरिकाणां महत् ।
तद्वज्जैनमहीभुजोऽस्य तनयद्वेषात् किमालोक्यते
तन्मा भूद् बहुसन्ततिर्नृपगृहे देशे विनाशप्रदा ॥१०७॥

इति मार्गे कथाः शृण्वन् ग्राम्याणां जैनभूपतिः ।
वधात् कुतनयं निन्दन् प्राप सुयपुरान्तरम् ॥ १०८ ॥

---

104 [d]) $S'_{2\cdot7}$ कुतः (for कथम्).

106 [b]) S'_4 °लङ्घ्···पनीतम् . —[c]) S'_2 A शङ्कितो; S'_7 शङ्किते (*sic*). —[d]) $S'_{3\cdot4}$ C I_{1-5} K D B येनासन्न-.

107 [a]) $S'_{3\cdot4}$ C K -जप्र (mislec. for S'ār. स्र)थेन.

108 [d]) S'_4 C B स्व (mislec. for S'ār. सु)य (C य्य).

तीरद्वये वितस्तायाः पितापुत्रबलद्वयम् ।
न्यवीविशत् समासन्नं परस्परजयोद्यतम् ॥ १०९ ॥

अत्रान्तरे हाज्यिखानः पर्णोत्सात् तूर्णमागतः ।
सुपर्ण इव सद्वर्णो देशाभ्यर्णं समासदत् ॥ ११० ॥

श्रुत्वा वराहमूलान्ते पुत्रं प्राप्तं बलान्वितम् ।
अग्रे बह्रामखानं तं सत्कर्तुं व्यसृजन्नृपः ॥ १११ ॥

कालापेक्षी हाज्यिखानः प्रेम्णाश्लिष्य कृतादरः ।
प्रीतिनिष्ठं कनिष्ठं तं भ्रातरं स्वममानयत् ॥ ११२ ॥

अन्येद्युर्मानितं दृष्ट्वा जनकेन निजानुजम् ।
आदामखानो वित्राणः संत्रस्तोऽगाद् दिगन्तरम् ॥ ११३ ॥

शाहिभङ्गपथा सिन्धुं समुत्तीर्य बलान्वितः ।
प्राप सिन्धुपतेर्देशं कष्टक्लिष्टपरिच्छदः ॥ ११४ ॥

इत्थं त्रिस्त्रिंशमे वर्षे ज्येष्ठं निष्कास्य युक्तितः ।
हाज्यिखानान्वितस्तुष्टो नगरं प्राप भूपतिः ॥ ११५ ॥

शिशिरसमये योऽभूत् क्लिष्टश्चिरं हतपक्षति-
र्धरणिकुहरेष्वन्तः कालं निनाय शुचाकुलः ।
कुसमसमये प्राप्योद्यानं विकासिलतोज्ज्वलं
किसलयरतः सोऽयं भृङ्गः सुखं रमते पुनः ॥ ११६ ॥

---

111 b) A C पर्णोत्सन्तू (mislec. for S′ār. त्तू) र्णम्. — c) $S'_{2-4\cdot6\cdot7}$ (after corr.) A C I_{1-5} K D B सद्वर्ण–. — c) D भह्राम–; B भद्रा (mislec. for Dev. ह्रा)म–.

112 d) $S'_{3\cdot4}$ C I_{3-5} K स्वं समानयत्.

113 c) $S'_{2\cdot7}$ आधाम–.

114 d) $S'_{3\cdot4\cdot6}$ (before corr.) C तथा कष्ट– (for कष्टक्लिष्ट–).

115 a) RSs_2 notices षट्त्रिंशे; M (evid. emend.) त्रिंत्रिंशके. — b) S'_4 C निष्काश्य.

116 a) $S'_{3\cdot4}$ K C धुत– (for ह°). — c) C -विकाशि–.

अस्मिन्नवसरे तुष्टाद्धाज्यिखानो धृतं चिरात् ।
यौवराज्यपदं प्रापज्ञनकाज्जनकोपमात् ॥ ११७ ॥

पितुः प्रेममणिं प्राप्य स्वच्छं भक्तिपरायणः ।
हृदयान्नात्यजज्जातु श्रीमाञ् शार्ङ्गीव कौस्तुभम् ॥ ११८ ॥

विनयक्षितदेवाग्रजानुसंकुचिताकृतिः ।
हकार इव सद्वर्णः सोष्मा सर्वावधिर्बभौ ॥ ११९ ॥

न तत्तीर्थं न सा यात्रा न सा लीला न चोत्सवः ।
तदाभून्नैव यत्रागाद्धाज्यिखानान्वितो नृपः ॥ १२० ॥

यो नित्यं परितो वृतो गणशतैरत्यर्थभक्त्युज्ज्वलैः
पुत्राभ्यां सहितो हितस्त्रिजगतां नानाविलासान् भजन् ।
कालो गच्छति यस्य लास्यललितं गीतं च संशृण्वतः
शस्यः कस्य न तन्नमस्यविभवः कैलासवासो भवः ॥१२१॥

इति जैनराजतरङ्गिण्यामादमखाननिर्वासनं
हाज्यिखानसंयोगवर्णनं नाम
तृतीयः सर्गः ॥ ३ ॥

---

117 b) D B -खानोद्धृतं. —I_5 om. 117cd; 118; 119ab.

118 b) $S'_{2\cdot7}$ भक्ति (*sic*). —S'_4 hapl. om. words beginning with श्रीमाञ् and ending with जानु in 119b.

119 b) S'_8 -जानुः.

121 a) A अत्यन्त- (for °र्थ). —c) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B यत° (for सं). —d) S'_4 तत्र (mislec. for S'ār. न्न)मस्य-; S'_2 विभवैः.

Colophon.—S'_8 fol. missing. S'_7 D ins. श्री before जैन-; $S'_{2\cdot7}$ $I_{2\cdot5}$ D om. -राज-; $S'_{2\cdot7}$ आधाम-; $S'_{2\cdot7}$ A C समा° (for सं); $S'_{2\cdot7}$ om. नाम.

चतुर्थः सर्गः

अत्रान्तरे मदनबन्धुरयाद् वसन्तः
शृङ्गारसारकुमुदाकररोहिणीशः ।
मानान्धकारविनिवारणभानुमूर्तिः
स्फूर्जल्लतालिललनानवयौवनश्रीः ॥ १ ॥

ततश्चैत्रोत्सवे राजा पुष्पलीलाचिकीर्षया ।
ययौ मडवराज्योर्वीं नौकारूढः सुतान्वितः ॥ २ ॥

तरण्डमण्डली राज्ञो वितस्तान्तरगा बभौ ।
शक्रस्येव विमानाली छायापटविभूषिता ॥ ३ ॥

स्वकीयराजवासस्थो राजावन्तिपुराद् गतः ।
विजयेशादिदेशेषु नाट्यं द्रष्टुमुपाविशत् ॥ ४ ॥

शिवांशं भूभुजं जेतुं यत्र राजसभानिभात् ।
भवाशक्तोऽभवत् कृत्वा बहुधा स्वं मनोभवः ॥ ५ ॥

---

1 a) $S'_{2\cdot7}$ अगात् ; $S'_{3\cdot4\cdot6}$ A C I_{1-5} K D B अयात् (as in text). —b) $S'_{2\cdot7}$ A कुसुमा (mislec. for S'ār. मुदा)कर-. —d) $S'_{2\cdot7}$ A -यौवने.

2 b) S'_4 K (corrupt) चिकीर्षणा.

3 a) $S'_{3\cdot4}$ C K तरण्डा (mislec. for S'ār. ण्ड).

After 3c $I_{1\cdot3}$ ins. :

*3 तीरद्वयोपशोभिता द्वारोपरि गवाक्षस्तु ।

[I_4 blank for 3*].

—cd) $S'_{2\cdot7}$ A °लिच्छा° (*sic*).

5 a) $S'_{3\cdot4\cdot6}$ C I_{-5} K D B हरांशं. —c) $S'_{3\cdot4\cdot6}$ C I_{1-5} K D B °सक्तो; K सं (for स्वं).

सालङ्कारप्रबन्धज्ञाः सिद्धान्तश्रुतविश्रुताः ।
यत्रान्तःकरणोद्युक्ता द्रष्टारो गायना अपि ॥ ६ ॥

नानाग्रामगताश्चारुस्वररागमनोहराः ।
यत्र गीता रसस्फीता बभुर्युवतयोऽपि च ॥ ७ ॥

कलाकलापवेत्तासीन्मानमानससौख्यभृत् ।
रङ्गरङ्गद्रुचिर्लोको विद्याविद् यातसंशयः ॥ ८ ॥

प्रतितालैकतालादिबहुतालविभूषितम् ।
तत्र ताराचनाराचसंज्ञानं विदधुर्नटाः ॥ ९ ॥

उत्सवा नाम कामास्त्रं गायनी नयनोत्सवा ।
लास्यताण्डवनृत्यज्ञा न केषां रञ्जकाभवत् ॥१०॥

भावानेकोनपञ्चाशत्संख्यांस्तानांश्च तावतः ।
दर्शयन्त्यो बभुः पात्र्यस्ता मूर्ता इव मूर्च्छनाः ॥११॥

यासां नृत्ये च गीते च त्वत्तो मेऽस्त्यधिकं सुखम् ।
इति वादोऽभवच्छ्रोत्रनेत्रयोः प्रेक्षणक्षणे ॥१२॥

पात्रीगानपिकध्वाने रङ्गोद्याने तदाद्युतन् ।
दीपचण्पकमालास्ता मधुपैः परितो वृताः ॥१३॥

---

6 c) $S'_{2\cdot6}$ (marg.).$_7$ A यत्रेयु: (for °त्रान्त:). —d) $S'_{2\cdot6}$ (marg.).$_7$ A पण्डिता: (for द्रष्टारो).

7 b) $S'_{2\cdot6}$ (before corr.)$_7$ A -स्वरा.

9 b) I_3 B -तालादिभू°.

10 c) $AI_{3\cdot5}$ D -नृत्त-. —d) $S'_{4\cdot6}$ C $I_{3\cdot4}$ K B राञ्जिका.

12 a) $S'_{2\cdot7}$ I_5 D नृत्ते. —b) $S'_{3\cdot4}$ K ततो.

13 a) S'_2 A -पिका°. —c) $S_{3\cdot4\cdot6}$ A C I_{1-5} K B -चम्पक-.

राज्ञो राज्येक्षणात् तुष्टैर्नृत्यप्रेक्षागतैः सुरैः ।
दीपमालाच्छलान्मुक्ता नूनं हेमाम्बुजस्रजः ॥ १४ ॥

जलान्तर्बिम्बिता कापि दीपाली नागलोकतः ।
वरुणेन नृपप्रीत्या दापितेवाद्युतत् तदा ॥ १५ ॥

ता दीपिता दीपमाला द्विधा रङ्गे चकाशिरे ।
दिदृक्षागतनागानां फणामणिगणा इव ॥ १६ ॥

किं राजालोकलोभात् तटभुवि मिलिताः पूर्वभूपालजीवाः
किं व्योम्नस्तारकौघः शशधरविमुखः सेवनायावतीर्णः ।
किं वा सिद्धाः सुरेन्द्रा निजरुचिरुचिराः प्रेक्षणायोपविष्टाः
किं वैता दीपमाला इति जनमनसामास्त दूराद् वितर्कः ॥१७॥

साक्षादेष पुरन्दरः कविबुधा विद्याधराः सेवका
अन्ते देवसभासदः सवपुषः सिद्धा अमी योगिनः ।
एता अप्सरसो रसोर्जितगुणा गन्धर्वका गायना
रङ्गोऽयं त्रिदिवस्थलीति जगदुः सर्वे जनाः प्रेक्षकाः ॥१८॥

अङ्गारक्षारचूर्णादिगन्धकौषधयुक्तिभिः ।
रागैः शिल्पिकृता लीला क्रीडालोकमरञ्जयत् ॥ १९ ॥

तथा ह्यौषधसंपूर्णान्नालाद् वह्निकणा घनाः ।
निर्यत्कुसुमसंपूर्णस्वर्णवल्लीभ्रमं व्यधुः ॥ २० ॥

---

14 a) S'_3 (before corr.)$_4$ C K राज्ञे. —b) $S'_{2\cdot7}$ I_5 -नृत्त.
17 a) C D राज्या°; $S'_{3\cdot4}$ A C I_5 K -भावात् (for लोभा°).
18 a) S'_6 (before corr.) A -बुध-. —c) $S'_{3\cdot4}$ K om. रसो° in रसोर्जि°; S'_4 °र्जितगणगुणा.
19 c) M (evid. emend.) ज्वाला (for ली°). —d) S'_3 C I_{1-5} K D B अरञ्जयत्.

सर्पाकारानलज्वाला निर्गता सलिलान्तरात् ।
चक्रे प्रेक्षकलोकानां त्रासाश्चर्यरसोदयम् ॥ २१ ॥

नालकादुत्थिता व्योम्नि ज्वालागोलकपङ्क्तयः ।
राजद्राजतरोचिष्का जीवशुक्रोपमां व्यधुः ॥ २२ ॥

रज्जुबद्धागमद् दूरं ज्वलन्त्यौषधनालिका ।
आहूयेव तया नीतास्तादृश्यो बहवो गताः ॥ २३ ॥

गतागतानि कुर्वन्त्यो दीप्ता उल्का इवोल्वणाः ।
प्रेक्षकाणां प्रिया दृष्टीरहरन्नद्भुतावहाः ॥ २४ ॥

अत्र पात्रीकरस्थापि ज्वलन्त्यौषधनालिका ।
द्युलोकोन्मुक्तसद्वर्णस्वर्णपुष्पश्रियं व्यधात् ॥ २५ ॥

निर्गतं नडदण्डान्तर्ज्वालापिण्डं नभोन्तरे ।
उद्दण्डदण्डं सर्वेषां चण्डरश्मिभ्रमं व्यधात् ॥ २६ ॥

वह्निक्रीडनलीलाया युक्तिज्ञेन महीभुजा ।
शिक्षयित्वा हभेभाख्यं तास्ताः सर्वाः प्रदर्शिताः ॥ २७ ॥

क्षारस्तदुपयोग्योऽत्र दुर्लभो योऽभवत् पुरा ।
तद्युक्तिशिक्षया राज्ञा स्वदेशे सुलभः कृतः ॥ २८ ॥

---

21 d) $S'_{3\cdot4\cdot6}$ A C I_{1-5} K D B -भयो° (for रसो).

23 b) B ओषध-. —c) S'_{4} K C आहूतये; $S'_{2\cdot3\cdot6}$ A I_{1-5} D B आहूतेब.

25 b) $S'_{2\cdot7}$ ओषधि- (*sic*); B (evid. emend.) -नालिका:. —d) $S'_{3\cdot4}$ K ···पुष्प-.

26 a) D B नतु (mislec. for S'ār. ड-). —b) $S'_{2\cdot6\cdot7}$ A नभोङ्गने. —$S'_{3\cdot4}$ C $I_{1\cdot3\cdot5}$ K hapl. om. 26. In S'_{6} 26 marg.

प्रश्नोत्तरमयी स्वोक्तिर्हेभेभं प्रति या कृता ।
पारसीभाषया काव्यं दृष्ट्वाद्य कुरुते न कः ॥ २९ ॥

ते शिल्पा मतिकल्पिताः स च सदा संगीतवाद्ये रसः
सालङ्कारविचारचारुधिषणा काव्ये च तत् कौशलम् ।
सच्छास्त्रश्रवणादरः स च नवप्रोत्पादनायोद्यमः
श्रीमज्जैनमहीपतेर्बहुमतेस्तस्येव कस्याधुना ॥३०॥

खुज्याब्दोल्कादिराख्यस्य शिष्यः सर्वगुणाम्बुधेः ।
भूभुजश्चित्तमनयद् रागतालादिभिर्मुदम् ॥ ३१ ॥

खुरासानागतो मल्लाजादकाख्यो महीपतेः ।
वादनात् कूर्मवीणायाः प्रापातुलमनुग्रहम् ॥ ३२ ॥

मल्लाज्यमालनामापि म्लेच्छवाग्गेयकारकः ।
नारदो वासवस्येव राज्ञोऽभूदतिरञ्जकः ॥ ३३ ॥

तुम्बवीणाधरः सोऽहं सर्वगीतविशारदः ।
उद्बद्धनवगीताङ्कं कौशलं समदर्शयम् ॥ ३४ ॥

अन्येऽपि जाफराणाद्या मया सह नृपाग्रगाः ।
तौरुष्कान् दुष्करान् रागानगायन् वीणया समम् ॥ ३५ ॥

---

29 c) $S'_{2.7}$ पारिसी–.

30 a) MSS and C B -वाद्यो (emended as in text with M).

31 a) I_{1-4} B खुजा–; MSS (except S'_7) C B -कादरा°.

33 b) S'_2 -वाग्गेथ–.

34 b) S'_3 (before corr.)$_4$ K सर्वा. —c) S'_3 उद्बद्धं; S'_3 (before corr.).$_4$ C उद्बद्धन्; M (evid. emend.) उद्बध्नन्; K -व्रव– (for न°); S'_3 गीताङ्कं (as in text); $S'_{2.4.6.7}$ A C I_{1-5} K D B -गीताङ्क–. —d) B I_3 समदर्शयन्.

35 a) I_5 जाह (prob. mislec. for S'ār. फ)रा°. —c) I_2 मष्करान् (for दु°). —d) S'_4 K वीज (mislec. for S'ār. ण)या.

गीतं द्वादशरागाङ्कं गायतां नः सभान्तरे ।
प्रीत्यैवैक्यमिवापन्नास्तन्त्रीकण्ठोत्थिताः स्वराः ॥ ३६ ॥

देशसंस्कृतकाव्यज्ञो राज्ञो निकटवास्यभूत् ।
पण्डितो नोत्थसोमाख्यो देशजैनचरित्रकृत् ॥ ३७ ॥

देशभाषाकविर्योधभट्टः शुद्धं च नाटकम् ।
चक्रे जैनप्रकाशाख्यं राजवृत्तान्तदर्पणम् ॥ ३८ ॥

भट्टावतारः शाहामदेशग्रन्थाब्धिपारगः ।
व्यधाजैनविलासाख्यं राजोक्तिप्रतिरूपकम् ॥ ३९ ॥

वीणातुम्बीरभाभाद्याः सर्वास्तुष्टेन भूभुजा ।
सुवर्णरौप्यरत्नौघैर्घटितास्ताश्चकाशिरे ॥ ४० ॥

तद्वाचिकाङ्गिकाहार्यसात्त्विकाभिनयोज्ज्वलम् ।
नाट्यं दृष्ट्वा जनः सर्वश्चतुर्मुखमशंसत ॥ ४१ ॥

इत्थं त्रिवर्गविद्राजा त्रिजगत्ख्यातपौरुषः ।
त्रियामास्त्रिविधैर्नृत्यैरनयत् त्रिदशोपमः ॥ ४२ ॥

स्फुरद्विचकिलोल्लासहासं स भवनान्तरम् ।
आसदत् तारकापूर्णं पूर्णचन्द्र इवाम्बरम् ॥ ४३ ॥

ततो विमलकुण्डान्ते पानक्रीडां महीपतिः ।
कर्तुं प्रचक्रमे तत्र पुत्रमित्रविभूषितः ॥ ४४ ॥

---

36 [a]) D B -रागाङ्गं. —[c]) S'_3 (after corr.) प्रीत्ये°.

37 [c]) S'_7 A नत्थ–.

39 [a]) $S'_{2\cdot 7}$ A °स्तुम्ब–; S'_3 C K -रबाबा°.

42 [c]) $S'_{2\cdot 7}$ A D नृत्तैः.

44 MS S'_4 ends with कर्तुं प्रचक्रमे in 44[c].

पितृप्रेमामृतोत्सिक्तो हाज्यिखानोऽथ भक्तिमान् ।
वसन्तवर्णनोन्मिश्रां चाटूक्तिमवदद् विभोः ॥ ४५ ॥

संगीतनादनिपुणान् कलकण्ठभृङ्गान्
कृत्वानिलं व्रततिलास्यविधानदक्षम् ।
गीतप्रियं नरपते किमु सेवितुं त्वां
प्राप्तो वसन्तऋतुचारणचक्रवर्ती ॥ ४६ ॥

मेघाडम्बरमम्बरं यदि तदा निर्नष्टशोभा वयं
नित्यं तीक्ष्णकरेण तेन दिवसे तत्राप्यहो बाधिताः ।
स्वामी नः शशभृल्लयोदयहतो दुःखादितीवागता
उद्याने नरदेव सेवनपराः पुष्पच्छलात् तारकाः ॥४७॥

पङ्कातङ्ककलङ्किता जलमया ये भोगिदेहार्तिदा-
स्त्वद्देशे विलसन्त्युपात्तविषयाः सन्मार्गविघ्नोद्यताः ।
ते याताः स्वयमेव देव विलयं श्रीमत्प्रतापोदया-
दस्मिन् हर्षमये वसन्तसमये प्रालेयपूरा यथा ॥ ४८ ॥

श्रुत्वेति भूपतिर्हृष्टो हाज्यिखानाय सत्वरम् ।
सौवर्णकर्तरीबन्धं सप्रमेयं समार्पिपत् ॥ ४९ ॥

---

45 a) S'_2 पुत्र- (for पितृ).

46 a) C -निपुणात्क (mislec. for S'ār. न्क)ल-. —ab) C भृङ्गात्क (mislec. for S'ar. न्क)त्वा.

47 d) $S'_{2.7}$ $I_{3.5}$ D तव (for नर-).

48 a) S'_6 (after corr.) A -भोग-. —b) $S'_{3.6}$ C K -लसन्तु पा (K या)त्रवि°.

49 cd) MSS and C B -बन्धमप्र° (emended as in text with P T, MS f. 80b: *Jā-gīr...muqarrar namūd* 'Assigned Jāgīr = सप्रमेयं).

यैर्यैः सेवा कृता तस्य बाह्यदेशे विचार्य तान् ।
पुत्रस्नेहेन भूपालो घोषराष्ट्राधिपान् व्यधात् ॥ ५० ॥

प्रेष्याद्याक्षेपसिन्ध्वौघे मग्नांस्तान् सेवकव्रजान् ।
प्रसादपट्टपोतेन समुत्तीर्णान् व्यधान्नृपः ॥ ५१ ॥

विद्वद्गीताङ्घ्रिभृत्येभ्यस्तस्मिन्नवसरे नृपः ।
सुताप्त्यानन्दबाष्पाढ्यो व्यधात् कनकवर्षणम् ॥ ५२ ॥

दत्तमार्गोपचारार्था राष्ट्रिया दर्शनागताः ।
प्राप्तपट्टपरीधानमानतुष्टा न केऽभवन् ॥ ५३ ॥

तान् विलोक्य भवनोपवनादीन्
पुष्पपूगपरिपूरितनौकः ।
संस्तुवन् मडवराज्यनिवासान्
प्राप जैननृपतिर्नगरं स्वम् ॥ ५४ ॥

इति जैनराजतरङ्गिण्यां पुष्पलीलावर्णनं नाम

चतुर्थः सर्गः ॥४॥

---

50 b) MSS and C B शाह्या– (emended as in text with P T, MS f. 80b : *dar Hindustān* 'In India' = बाह्यदेश–).

51 a) A प्रेषा°; S′2.4.6.7 A C I1–5 K D B -सिन्ध्वौघ– (S′3 °घे as in text).

54 b) S′3.6 C I1–5 K D B -पुष्पपूर–. —c) S′3 C स्तं (for सं).

Colophon.—S′4.8 fol. missing. S′7 A I3 ins. श्री– before जैन–; S′2.7 I2.5 D om. -राज–.

पञ्चमः सर्गः

अत्रान्तरे सुतप्राप्त्या निश्चिन्तः सुकृतोद्यतः ।
कुल्या नवनवाः कर्षन् प्रतिष्ठारसिकोऽभवत् ॥ १ ॥

कविः श्रीजोनराजो यां स्वसंदर्भान्तरेऽब्रवीत् ।
ग्रन्थविस्तारभीत्या तद्वर्णनं न मया कृतम् ॥ २ ॥

एकैवास्त्यमरावती दिवि पुरी साक्षातनिर्माणका
तत्राप्यत्र सदा विमानवसतिर्देवादिषु श्रूयते ।
सोऽभूद् भूमिपुरंदरः पुरशतं कुर्वन्नवं सर्वतो
यत्रैते निवसन्ति मानसहितास्ते भूमिदेवादयः ॥ ३ ॥

श्रीजैननगरे पञ्चदशेऽब्दे या कृता पुरा ।
राजधानी नवात्युच्चा विद्धा देवगृहोपरि ॥ ४ ॥

तस्याः समीपे नृपतिश्चत्वारिंशेऽथ वत्सरे ।
इष्टिकादारुसंबद्धं राजवासं नवं व्यधात् ॥ ५ ॥

यत्पृष्ठे स्वर्णकलशो भाभिर्भाति मनोहरः ।
हेमपद्म इवोन्मुक्तः शक्रेण श्रुतकीर्तिना ॥ ६ ॥

यद्द्वाराग्रे नियुक्तेभ्यस्तत्तत्कर्म समादिशन् ।
आजीवं सोऽवसद् राजा राजधान्युज्झितास्थितिः ॥ ७ ॥

---

3 a) S'_6 (orig.) ननु (after corr. दिव्य–); $S'_{2\cdot3}$ A C I_{1-5} K D B ननु (for दिवि).

4 b) $S'_{2\cdot7}$ D transp. कृता and पुरा. —d) S'_3 C K -गृह- (for गृ°).

6 a) C B -कलसां. —b) $S'_{2\cdot7}$ D C B भाति भाति.

7 a) MSS and C B °द्वाराग्र– (emended as in text with M).

यत्र वापीगता हंसा गीतशंसां स्वनच्छलात् ।
कुर्वन्तीव समीपस्थगायद्गीताङ्गिसंस्कृतैः ॥ ८ ॥

यत्र खर्वीकृताराति: सुपर्वाधिपतिर्यथा ।
सर्वाहः सुखगान्धर्वचर्वणैरनयत् सुखम् ॥ ९ ॥

यदन्तरे सुविस्तीर्णः सर्वदर्शनमण्डपः ।
काचभित्तिमयो भाति ऽयश्रसिंहासनोज्ज्वलः ॥ १० ॥

यद्गर्भाद् धूपसंदर्भनिर्भरान्नृपसंश्रितात् ।
वातोऽपि सफलो यातः प्रातर्घ्राणसुखप्रदः ॥ ११ ॥

कदाचिल्लाहरं दुर्गं यात्रां द्रष्टुं गतो नृपः ।
राजवासं नवं कृत्वा जीर्णोद्धारमकारयत् ॥ १२ ॥

समुद्रकोटादारभ्य यावच्छ्रीद्वारकावधि ।
तत्तन्नवनवावासवासवालयसुन्दरान् ॥ १३ ॥

जैननामाङ्कितान् ग्रामानकरोन्नगभूषितान् ।
उपतीरं महापद्मश्रीमत्पन्नगभूषितान् ॥ १४ ॥

तदन्नसत्रतृप्तानामर्थिनां त्रिपुरेश्वरे ।
उदरं मेदुरं क्षान्तो राजा लम्बोदरः कथम् ॥ १५ ॥

---

8 b) S'_2 गीति-. —c) $S'_{3-4\cdot6\cdot7}$ C I_{1-5} K D B -समीपस्था. —d) A -संस्थितैः; M (evid. emended.) -संस्कृताः.

9 a) A खिली° (for खर्वी). —b) D सुपर्णाधि°. —c) I_{1-5} C B -गन्धर्व-.

11 a) $S'_{6\cdot7}$ A D यूप-; S'_3 I_1 C K युप-. —d) After -प्रदः $S'_{3\cdot6}$ A C $I_{1\cdot2\cdot5}$ K कुलकम्.

12 c) S'_7 राजावासं. —d) A अकल्पयत्.

13 b) K -द्वारकावधिः.

14 bd) S'_2 °षि…पतीरं……श्री.

अन्नसत्रे क्षितीशान्नैर्वराहक्षेत्रभूमिषु ।
अस्तु नम्रशिराः शेषश्चित्रमिन्द्रोऽपि चाभवत् ॥ १६ ॥

मत्स्येभ्यो नित्यतृप्तेभ्यः सूक्ष्माणामभयं ददौ ।
मत्स्यानामन्नसत्रेण वितस्तासिन्धुसंगमे ॥ १७ ॥

अर्थिनामतितृप्तानां श्रीशङ्करपुरे नृपः ।
अपेक्ष्य विदधे छायां न फलानि महीरुहाम् ॥ १८ ॥

अश्रमायां व्यधादन्नसत्रैः सन्तर्पयञ् जनान् ।
भङ्गं शृङ्गाटवल्लीनां शृङ्गाटैरतिसंस्कृतैः ॥ १९ ॥

तस्य पद्मपुरे चान्नसत्रे व्यञ्जनसौरभैः ।
कथं न कुङ्कुमस्याभूद् गन्धभेदकदर्थना ॥ २० ॥

अच्छिन्नेनान्नसत्रेण विजयेश्वरवासिनाम् ।
उदरे मेदुरे सिद्धः प्रणामो यत्नतो विभोः ॥ २१ ॥

अन्नसत्रमविच्छिन्नं कृत्वा शूरपुराध्वना ।
शुल्कस्थाने व्यधाद् राजा भारिकानभिसारिकान् ॥ २२ ॥

गुणी मूर्खो निराचारः साचारो यवनो द्विजः ।
नापोषि यस्तदन्नेन कश्मीरेषु स नाभवत् ॥ २३ ॥

---

17 K hapl. om. 17[cd].

19 $S'_{3\cdot6}$ C $I_{1-3\cdot5}$ K hapl. om. words beginning with सत्रैः and ending with चान्न in 20[a].

20 [d]) $I_{1\cdot3\cdot5}$ संध– (for गन्ध). —[d]) C -कदर्थनः (*sic*).

21 [b]) S'_3 $I_{3\cdot5}$ K D -वासिना. —[c]) S'_3 I_3 K C सिद्ध–.

22 [c]) S'_2 D शुष्क–. —[d]) $S'_{3\cdot6}$ (before corr.) $I_{3\cdot5}$ C K आभि°.

शंभुश्रीपतिधातृजह्नुमनुभिः पूर्वं रवेरन्वये
जातेनापि कृतः श्रमस्त्रिपथगा गङ्गैव जाता नदी ।
तेषां स्वार्थमभूद्रसो नरपतिः सोऽयं परार्थे पुन-
र्देशेऽस्मिन् स्वधिया नदीर्नवनवा नानापथाः कृष्टवान् ॥२४॥

नवीनोदारकेदारभूम्युत्पन्नाः प्रतिस्थलम् ।
कूटा धान्यफलैः पुष्टा दृष्टाः पर्वतसन्निभाः ॥ २५ ॥

धान्यकूटच्छलान्नूनं साभूद् धात्र्याः कुचस्थली ।
प्राप्ताप्याया प्रजा यस्माद् वृद्धिमापद् दिने दिने ॥ २६ ॥

दुर्लभोपद्रवानिष्टा यत्र यत्राभवत् क्षितिः ।
स सुध्य इव सस्याढ्यां तत्र तत्राकरोन्नृपः ॥ २७ ॥

न तत् स्थलं न कन्तारो न स देशो न साटवी ।
यत्र नानीय कुल्याः स्वाः स्वनामाङ्काः पुरीर्व्यधात् ॥ २८ ॥

न सा नदी न तत् क्षेत्रं न स ग्रामो न सा पुरी ।
न तत् स्थानं न यद् राज्ञा जैननामाङ्कितं कृतम् ॥ २९ ॥

यत्र यत्राभवन्निम्नः प्रदेशस्तत्र कुल्यया ।
व्यधाद् राजा सरः पक्षिबिसशृङ्गाटभूषितम् ॥ ३० ॥

---

24 a) S′₂ I₁.₅ A D transp. -धातृ- and -जह्नु-; S′₂.₆.₇ A C I₅ K D -मुनि° (for मनु). —b) S′₃ K श्रमं (<श्रम् mislec. for S′ār. स्.). —d) D B सु (mislec. for S′ār स्व) धिया; S′₃.₆ A C I₁₋₄ K B -पथः.

25 b) S′₃ C I₃.₅ K °त्पन्न-.

26 b) S′₂.₇ A धन्या. —c) MSS and C B प्राप्तोपाया (S′₂ A याः) (emended as in text); S′₃ C यस्या. —d) A आपुः.

27 a) A °रिष्टा.

29 c) B राजा.

धन्यो वारिधरो धरोपकरणोद्युक्तः सदा जीवनै-
र्यः सिन्धोः सलिलं निरर्थकतया निन्ये निकृष्यान्वहम् ।
कान्तारेष्वफलेषु केषु रुचिरं मुञ्चत्यभीक्ष्णं यत-
स्तत्सेकोदितसर्वसस्यविभवो लोकः सुखी जायते ॥ ३१ ॥

लोके डल इति ख्यातं यदगाधं सरोवरम् ।
तस्य प्रतिष्ठाप्रस्तावाद् वर्णनं क्रियते मनाक् ॥ ३२ ॥

आ राजधान्या यद् दीर्घं सुरेश्वर्याः सरोवरम् ।
नौकारूढोऽचरन्नित्यं व्योम्नीवेन्दुः सुनिर्मले ॥ ३३ ॥

अरित्रपत्रा यत्रान्तः सोड्डीनाः पटसुन्दराः ।
पोता इवारुचन् पोता राज्ञः शाकुनिकान्विताः ॥ ३४ ॥

तिलप्रस्थागता यत्र तटिनी त्रिपुरेश्वरात् ।
संगच्छते सुटङ्कां यल्लङ्कां द्रष्टुमिवोत्सुका ॥ ३५ ॥

श्रीपर्वतोऽपि षट्क्रोशस्तीर्थस्नानफलेप्सया ।
स्वसङ्गतिच्छलाद् यत्र मज्जतीव दिवानिशम् ॥ ३६ ॥

शैवलन्ति द्रुमा यत्र कमठन्ति च पर्वताः ।
पुर्यश्च नागलोकन्ति जलान्तर्यत्र बिम्बिताः ॥ ३७ ॥

यच्चलत्तृणभूशालिकुलानि सरसीरुहाम् ।
तत्सौगन्ध्यमिवाघ्रातुमानतानीक्षते जनः ॥ ३८ ॥

---

31 RS′s$_2$ cites 31 entirely. a) RSs$_2$ परोप°. —b) RSs$_2$ निन्म्यं (*sic*) मुदे कर्षति (for निन्ये निकृष्यान्वहम्). —c) S′$_3$ C मुञ्चन्ति. —d) C B -शस्य-.

33 a) S′$_2$ दीप्तं (for °र्घं).

35 c) S′$_3$ C सटाङ्कां .

36 c) MSS and C B -सङ्गाति- (emended as in text with M).

37 a) S′$_{2\cdot7}$ D शेव°.

38 b) S′$_{2\cdot7}$ A I$_{3\cdot5}$ -शिलानि (for कु°). —d) D जनैः.

यल्लङ्कायुगलोत्प्रेक्षास्वोदयद्वयसंभ्रमात् ।
जाने याति रविः कुर्वन् प्रत्यब्दमयनद्वयम् ॥ ३९ ॥

यत्र तीरे सुरेश्वर्याः क्षेत्रं भुक्तिविमुक्तिदम् ।
वाराणस्यधिकं भाति तीर्थराजिविराजितम् ॥ ४० ॥

विहारैरग्रहारैश्च मठैः सुकृतकर्मठैः ।
आश्रमैरश्रमै राजवासैः स्वर्गोपमां व्यधात् ॥ ४१ ॥

दीर्घैश्चतुष्किकाहस्तैर्नृत्यन्त इव सूनृताः ।
दृश्यन्ते ये जनैर्दूराद्धेमच्छत्रवरोदराः ॥ ४२ ॥

येषां सिद्धपुरी नाम प्रसिद्धं नृपतेर्गृहम् ।
स्वसौधैः कुरुते सिद्धविमानावलिविभ्रमम् ॥ ४३ ॥

जीर्णा देवालया यत्र राजधान्यन्तरीकृताः ।
धृत्यौन्नत्यान्निजस्थित्या सत्यार्था भूभुजा कृताः ॥ ४४ ॥

यत्र सर्वतृणक्लेदनिर्भेदोत्पन्नभूस्थली ।
संचारिण्युर्वरा राज्ञा सफला विहिता धिया ॥ ४५ ॥

एकत्र देशे यत्रान्धःसत्रं श्रीजैनवाटिका ।
योगिनां पात्रपूजार्थं कृतं भोगाकृतस्मयम् ॥ ४६ ॥

---

39 a) S'_2 A °लोत्प्रेक्ष्य. —bc) S'_2 स्वोद···याति.
40 a) A मुक्ति- (for मु°). — S'_2 om. 40cd.
42 c) $S'_{2.7}$ A (gram. assim.) यैर्. —d) After -वरोदराः $S'_{2.3.7}$ A C $I_{1.3-5}$ K D मध्ययुगलम् ($S'_{2.7}$ D °लकम्).
43 c) $S'_{3.6}$ (before corr.) C $I_{1.2}$ K -सिद्धथै ; $I_{3.5}$ -सिद्धैः (for -सौधैः).
44 b) D °न्तरे. —c) $S'_{2.6.7}$ A C I_{1-5} K D B धृत्यौ (S'_2 तो; S'_7 तौ) न्नत्या (emended as in text with S'_3); S'_2 निजो (*sic*). —d) S'_3 (after corr.)$_6$ C कृता.
45 c) $I_{3.5}$ K C B राज्ञां.
46 a) MSS and C B यत्रान्तः (emended as in text). —d) M (evid. emend.) भोगाकृ°.

मद्यपुष्करिणीमध्ये संक्रान्तः स्वादलिप्सया ।
यत्रैति द्विजराजोऽपि योगिचक्रान्तरे ध्रुवम् ॥ ४७ ॥

भूपतिर्भोजयन् योगिसहस्रं मीलदीक्षणम् ।
निष्कम्पमकरोन्नित्यं किं तृप्त्या किं समाधिना ॥ ४८ ॥

आहारमनु तीव्रोद्यत्कीर्त्या रसवतीश्रिया ।
दिवीव क्रियते यत्र सर्वा रसवती प्रजा ॥ ४९ ॥

पक्वान्नराशयोऽदभ्रा यत्राभ्रमुभ्रमप्रदाः ।
बिभ्रत्यभ्रभ्रमच्छुभ्रशरदभ्रश्रियोपमाम् ॥ ५० ॥

यत्राधर्ममृगं हन्तुं शृङ्गनादमिषाद् ध्रुवम् ।
संमिलत्सारसारावं श्रूयते मृगयारवः ॥ ५१ ॥

सामोदकामनिर्मुक्तमोदका यत्र योगिनः ।
श्रमघर्मोदका जग्धेर्जाता राज्ञः प्रमोदकाः ॥ ५२ ॥

योगिस्फुरत्करक्लिष्टदधिदिग्धाशनच्छलात् ।
योगाच्छशिकलास्रावास्तत्रैवान्त इवाद्युतन् ॥ ५३ ॥

मारी नाम नदी तस्माद् वितस्तान्तरमागता ।
केवलं याभवत् पौरस्नानपानप्रयोजना ॥ ५४ ॥

---

47 a) S'_3 C $I_{3\cdot5}$ K मध्यपु°; $S'_{2\cdot3\cdot7}$ I_5 -मध्यं (mislec. for S'ār. ध्ये); S'_6 C I_{1-4} K D B -मध्य–; A -मद्य–.
48 c) S'_3 K निष्कम्यम्.
49 c) S'_3 C K देव्याथ (for दिवीव).
50 d) S'_3 C K -शिखो° (for श्रियो).
51 a) I_3 C हर्तुं (mislec. for S'ār. न्तुं).
52 a) A अनिर्मुक्त–.
53 a) S'_7 -म्लिष्ट–; M (evid. emend.) -भ्रष्ट–. —b) S'_3 $I_{3\cdot5}$ C -दिग्धासन–. —d) $S'_{2\cdot3\cdot6\cdot7}$ A C I_{1-5} K तत्र वान्ता (emended as in text with D B). After इवाद्युतन् MSS and C कुलकम्.

हस्तिकर्णाभिधे क्षेत्रे युक्त्या राज्ञा प्रवेशिता।
सिन्धुसंगमपर्यन्तं निर्मिता शालिनालिनी ॥ ५५ ॥

मृतानां देहदाहेन स्वर्गदो नगरान्तरे।
स मारीसङ्गमः ख्यातो जातः सङ्गाद् वितस्तया ॥ ५६ ॥

यत्क्षेत्रपालाः कालेन किङ्कराः पञ्चवारिकाः।
पौरेभ्यः शवदाहोत्थमगृह्णन् शुल्कमन्वहम् ॥ ५७ ॥

मत्पितृप्रमये राजा विज्ञप्तः स मयैकदा।
दण्डयित्वा किरातांस्ताञ् शवशुल्कं न्यवारयत् ॥ ५८ ॥

ततः प्रभृति तत्स्थाने विमाना नगरान्तरे।
दह्यन्ते दर्शनद्वेषिम्लेच्छानां हृदयैः समम् ॥ ५९ ॥

निरर्गला वयं जाता इतीव शिविका न कैः।
छत्रहस्तैः प्रनृत्यन्त्यो दृश्यन्ते वाद्यनिःस्वनैः ॥ ६० ॥

दिगन्तरीयया रीत्या यत्र राज्ञाप्यवारिताः।
प्रियानुगमनं नार्यश्चितामारुह्य कुर्वते ॥ ६१ ॥

अर्थिसंघोपकारार्थं पौराणां सुकृती नृपः।
विहारं बहुविस्तारं तत्संगमतटे व्यधात् ॥ ६२ ॥

---

57 [a]) D (illeg.) B द्यु (for यत्°). —[b]) M (evid. emend.) किङ्करैः; M (evid. emend.) शाटिकाः (for वारि°); S'_6 (marg.) पञ्च वर्गाः (or शाः or नाः).

60 [b]) $S'_{3\cdot6}$ C I_{1-5} K B °कार (mislec. for S'ar. न) कैः. —[c]) MSS (except D) and C B प्रनृत्यन्तो (emended as in text with D).

61 K om. 61[cd].

स च हाज्येविहारश्च पारावारे पुरद्वये ।
गृहश्रेणिमणिव्रातनायकश्रियमापतुः ।
अन्याः प्रतिष्ठास्तत्कालं राज्ञा स्वस्थेन कारिताः ॥ ६३ ॥

श्रीहर्षो नृपतिर्बभूव कविताराज्ये तदा येऽभवन्
सर्वे ते कवयः किमन्यदपि ते सूदाः स्त्रियो भारिकाः ।
सन्त्यद्यापि कृतानि तैः प्रतिगृहं पद्यानि विद्यानिधी
राजा चेद् गुणवान् गुणेषु रसिको लोको भवेत् तादृशः ॥६४॥

छात्रशाला विशालास्ता धर्मार्थं गुणशालिना ।
कृता याभ्यः श्रुतः शब्दस्तर्कव्याकरणोद्भवः ॥ ६५ ॥

आचार्यपुस्तकावाससहायान्नसमृद्धिभिः ।
पाठयन् सर्वविद्यानां वर्धयामास मण्डलम् ॥ ६६ ॥

न विद्यासुखयोः संधिस्तेजस्तिमिरयोरिव ।
इति व्यर्थं वचश्चक्रे मुनीनामभयप्रदः ॥ ६७ ॥

सौराज्यसुखिते देशे विद्याभ्यासपरायणः ।
अकाङ्क्षीत् सर्वदारोग्यं नृपतेः स्वस्य चान्वहम् ॥ ६८ ॥

राज्योत्पत्त्या नृपस्तादृक् तुष्टोऽभून्न प्रतिष्ठया ।
यथा पण्डितसामग्र्या यामग्र्यामविदद् गुणैः ॥ ६९ ॥

---

64 RSs_2 quotes 64 entirely. —[c]) RSs_2 जनमुदे (for प्रतिगृहं). —[d]) RSs_2 सद्° (for चेद्); RSs_2 [अ]पि तादृग्भवेत् (for भवेत् तादृशः).

66 [c]) M (evid. emend.) -विद्याः सं°. —[cd]) S'_2 -विद्या…या…लम्; A -विद्यास्ता याः सुखत्वाभवन्नलम् (*sic*).

68 [a]) A (gram. assim.) -सुखितो देशो. —[b]) $S'_{2\cdot3\cdot6\cdot7}$ C I_{1-5} K D B -परायणे (emended as in text with A).

येषां स्वप्नेऽपि पाण्डित्यं नाभूज्ज्ञातुचिदन्वये ।
तेऽपि भूपप्रसादेन जाताः पाण्डित्यमण्डिताः ॥ ७० ॥

वर्धिता जीवनोपायैर्देवेन फलदाः सदा ।
याताः सहस्रशाखत्वं विद्याः कल्पलता इव ॥ ७१ ॥

न सा विद्या न तच्छिल्पं न तत्काव्यं न सा कला ।
श्रीजैनभूपते राज्ये नाभूद् या प्रथिता भुवि ॥ ७२ ॥

विदुषां मान्यतां दृष्ट्वा भूपतेर्गुणिबान्धवात् ।
काङ्क्षन्ति स्मापि सामन्ताः पाण्डित्यं नित्यमादरात् ॥ ७३ ॥

निदाघकाले विषमः प्रतापो
दहेद् धरित्र्यां तृणगुल्मपूगान् ।
वन्द्यो न केषां घनकाल एको
यो जीवनैस्तान् विततान् करोति ॥ ७४ ॥

सेकन्धरधरानाथो यवनैः प्रेरितः पुरा ।
पुस्तकान् सकलान् सर्वांस्तृणान्यग्निरिवादहत् ॥ ७५ ॥

तस्मिन् काले बुधाः सर्वे मौसुलोपद्रवाज्जवात् ।
गृहीत्वा पुस्तकान् सर्वान् ययुर्दूरं दिगन्तरम् ॥ ७६ ॥

किमन्यद् द्विजवद् देशे सर्वे ग्रन्था मनोरमाः ।
कथावशेषतां याताः पद्मानीव हिमागमे ॥ ७७ ॥

---

71 b) $S'_{2.7}$ C I_3 D B दै (*sic*) वेन.

75 a) C शेक°; B (evid. emend.) सिकन्दर-. —K hapl. om. words beginning with सर्वान् in 75c and ending with पुस्तकान् in 76c.

सुमनोवल्लभेनात्र राज्ञा भूषयता क्षितिम् ।
नवीकृताः पुनः सर्वे मधुनेव मधुव्रताः ॥ ७८ ॥

पुराणतर्कमीमांसापुस्तकानपरानपि ।
दूरादानाय्य वित्तेन विद्वद्भ्यः प्रत्यपादयत् ॥ ७९ ॥

मोक्षोपाय इति ख्यातं वासिष्ठं ब्रह्मदर्शनम् ।
मन्मुखादशृणोद् राजा श्रीमद्वाल्मीकिभाषितम् ॥ ८० ॥

श्रुत्वा शान्तरसोपेतां व्याख्यां स्वप्नेऽपि नो नृपः ।
अस्मार्षीदभिकः कान्ताहावभावक्रियामिव ॥ ८१ ॥

यो यद्भाषाप्रवीणोऽस्ति स तद्भाषोपदेशभाक् ।
लोके नहि जना नानाभाषालिपिविदोऽखिलाः ॥ ८२ ॥

इति संस्कृतदेशादिपारसीवाग्विशारदैः ।
भाषाविपर्ययात् तत्तच्छास्त्रं सर्वमचीकरत् ॥ ८३ ॥

धातुवादरसग्रन्थकल्पशास्त्रोदितान् गुणान् ।
यवना अपि जानन्ति स्वभाषाक्षरवाचनात् ॥ ८४ ॥

दशावतारपृथ्वीशग्रन्थराजतरङ्गिणीः ।
संस्कृताः पारसीवाचा वाचनार्हांस्त्वकारयत् ॥ ८५ ॥

---

79 a) S'_3 C $I_{1\cdot 3}$ K B -मीमांसाः. —b) M (evid. emend.) पुस्तकानि.

80 b) C वाशिष्ठं.

81 c) $S'_{3\cdot 6\cdot 7}$ C I_{1-5} K D B अभिकाः (emended as in text with S'_2 A). —d) $S'_{3\cdot 6}$ C I_{1-5} K D B -क्रिया इव.

83 a) M (evid. emend.) -देश्या°. —b) $S'_{2\cdot 7}$ A -पारिसी.

85 d) B (evid. emend.) वाचकार्हाः; S'_2 °नार्हांस्; A अकल्पयत्.

म्लेच्छैर्बृहत्कथासारं हाटकेश्वरसंहिताः ।
पुराणादि च तद्युक्त्या वाच्यते निजभाषया ॥ ८६ ॥

कश्चिच्छ्रुत्वा शुचिरुचि चिरं धर्मशास्त्रं पवित्रं
धत्ते चित्ते पट इव सितो रञ्जनं तत्क्रियां यः ।
आकर्ण्यान्ये प्रतिदिनमदः पद्मिनीपत्रतुल्याः
कुल्याधारा अपि धृतगुणा गृह्णतेऽन्तर्न किंचित् ॥ ८७ ॥

नौबन्धनगिरेर्यात्रामाकर्ण्यादिपुराणतः ।
तीर्थयात्रोत्सुकं राज्ञः कदाचिदभवन्मनः ॥ ८८ ॥

एकोनचत्वारिंशेऽब्दे पितृपक्षान्त्यवासरे ।
यात्रादिदृक्षया भूपो जगाम विजयेश्वरम् ॥ ८९ ॥

नानावर्णांशुकच्छन्नैः प्रेक्षकैः परिपूरितम् ।
पुष्पाकीर्णमिवोद्यानमद्राक्षीद् रङ्गमण्डपम् ॥ ९० ॥

यत्र बान्दरपालाद्या राजानो वीक्ष्य सद्बलाः ।
तद्धर्षे दर्शनायाता हर्षमन्वभवन्निति ॥ ९१ ॥

गगनं तारकापूर्णं दीपाढ्यं रङ्गमण्डपम् ।
यत्रान्योन्यं तुलां चक्रे रात्रौ कविबुधार्चितम् ॥ ९२ ॥

---

87 a) RS′s$_2$ quotes 87 entirely. —b) D पत्रः (for पटः); RSs$_2$ तत्क्रियायाः. —c) RSs$_2$ आकल्पा° (for °र्ण्या); MSS and C B अमुं (emended to °दः as in text with RSs$_2$). —d) S′$_{2\cdot3\cdot7}$ C I$_{1-5}$ K D B तन्न; S′$_6$ (after corr.) A [अ]न्तर्न (as in text).

89 b) I$_4$ A C -पक्षानु- (mislec. for S′ār. न्त). —c) B भूयो (mislec. for Dev. पो).

90 a) S′$_{2\cdot6}$ (marg.) -च्छत्रैः. —d) S′$_2$ अद्राक्षीद्र……; MSS and C B -मण्डलम् (emended as in text with M).

91 d) S′$_2$ °भव…ति; D अति (for इ°).

92 b) I$_4$ D -मण्डलम्.

अमावस्यादिने प्राप्तैर्नानानागरिकामुखैः ।
शुशुभे शुभदं यत्र शतचन्द्रं भुवस्तलम् ॥ ९३ ॥

दीपवृक्षो नृवाह्योऽपि यत्र रङ्गान्तरे स्फुरन् ।
दध्रे तारकामध्योद्यत्कृत्तिकर्क्षचयोपमाम् ॥ ९४ ॥

विजयेशादथोत्थाय भूपः पुत्रद्वयान्वितः ।
पद्भ्यामुल्लङ्घ्य दुर्मार्गं प्रपेदे वासरैस्त्रिभिः ॥ ९५ ॥

दृष्ट्वा क्रमसरोविष्णुपादमुद्राकृतिं प्रभुः ।
पादप्रणामजानन्दमविन्दद् भक्तिसुन्दरः ॥ ९६ ॥

ब्रह्माच्युतेशगिरयः पतत्तोयरवच्छलात् ।
अकुर्वन् कुशलप्रश्नं हरांशजमहीभुजे ॥ ९७ ॥

कस्तूरीकुसुमश्यामां कोष्ठागारावनिं गिरेः ।
दृष्ट्वा तुष्टो नृपश्रेष्ठो योगीवेष्टां हरेस्तनुम् ॥ ९८ ॥

अथ नौकां समारुह्य धीवरैः पञ्चषैर्वृताम् ।
धृत्वा मां सिंहभट्टं च चचार सरसोऽन्तरे ॥ ९९ ॥

गीतगोविन्दगीतानि मत्तः श्रुतवतः प्रभोः ।
गोविन्दभक्तिसंसिक्तो रसः कोऽप्युदभूत् तदा ॥१००॥

कुञ्जप्रतिश्रुतो मञ्जुर्गीतनादस्तदावयोः ।
अनुगीत इवात्रस्थैः किंनरै राजगौरवात् ॥१०१॥

---

96 d) D भुक्ति- (for भ°).

98 b) कुष्ठ- is suggested for कोष्ठ-.

99 b) $S'_{2.7}$ A पञ्चशै: (*sic*). —d) Some MSS transp. सिंहभट्टं and मां.

क्षणं सरोन्तश्चरतो हिमवृष्टिनिभाद् विभोः।
भक्तिप्रीतैरिवोन्मुक्तं देवैः कुसुमवर्षणम् ॥१०२॥

दृष्ट्वा सरोन्तरे श्वेता हिमान्यो भ्रमणाकुलाः।
तीर्थस्नानातकैलासशृङ्गभङ्गिभ्रमं व्यधुः ॥१०३॥

सत्यं विष्णववतारः स येन भक्त्या प्रदक्षिणम्।
त्रीन् वारानकरोन्नूनं ज्ञातुं स्वक्रमविक्रमम् ॥१०४॥

योऽभूदागमसिद्धार्थो नौबन्धनगिरिस्तदा।
प्रत्यक्षार्थः कृतो राज्ञा बद्ध्वा नौकां यदागतः ॥१०५॥

स कुमारसरो यावत् सुकुमारं स्मरन् पथि।
सकुमारोऽम्बुपानेन सुखं पुण्यमिवासदत् ॥१०६॥

शृण्वन् स्थानाभिधाः पुण्याः स्पृशंस्तीर्थजलं शुभम्।
पिबन् सतुहिनं तोयं पश्यन् वनतरुश्रियम् ॥१०७॥

जिघ्रन्नोषधिपुष्पाणि पञ्चेन्द्रियसुखप्रदाम्।
तीर्थयात्रां विधायेत्थं नगरं प्राप भूपतिः ॥१०८॥

इति जैनराजतरङ्गिण्यां क्रमसरोयात्रावर्णनं नाम
पञ्चमः सर्गः ॥ ५ ॥

---

103 b) S'_2 भ्रमरा (mislec. for S'ār. भा) कु°.

104 d) K ज्ञात्वा .

105 c) $S'_{3\cdot6}$ $I_{1\cdot3}$ K प्रत्यक्षतः .

106 a) C सु° (for स). —b) K मुक्तसारः (mislec. for S'ār. सुकुमारः); $S'_{2\cdot3\cdot6\cdot7}$ A C I_{1-5} D B सुकुमारः (emended as in text). —c) C सु° (for स).

108 a) B औषधि–. —b) I_5 K -प्रदम्–. —S'_2 om. 108cd.

Colophon. — $S'_{4\cdot8}$ fol. missing. S'_7 A $I_{1\cdot3\cdot5}$ D ins. श्री– before जैन–; B om. जैन–; $S'_{2\cdot7}$ $I_{2\cdot5}$ D om. -राज–; $S'_{2\cdot7}$ om. नाम.

षष्ठः सर्गः

ततः क्रमसरस्तुल्यं राजा पद्मपुरान्तरे ।
तत्कौतुकापनोदाय चक्रे जैनसरो नवम् ॥ १ ॥

फुल्लत्कुङ्कुमपुष्पौघश्यामीभूतस्थलच्छलात् ।
शारदीवागता प्रीत्या यमुना यत्सरोवरम् ॥ २ ॥

कुलोद्धरणनागाख्यमण्डिते यत्तटे नवम् ।
राजद्राजगृहं राजा राजराजोपमो व्यधात् ॥ ३ ॥

उच्चैः पदस्थममलं रुचिरञ्जिताशं
संपूर्णमण्डलमखण्डकलाकलापम् ।
राजानमीशमवलोक्य हतोपतापं
काङ्क्षन्ति के न नितरामपि दूरसंस्थाः ॥ ४ ॥

दिगन्तरीया भूपालाः श्रुत्वैतद् गुणगौरवम् ।
नानोपायनवर्षौघैर्ववर्षुर्नितराममुम् ॥ ५ ॥

वेगेन जितवायुं स्वं ताजिकाख्यं तुरङ्गमम् ।
उपदां व्यसृजत् सख्यादुच्चं पञ्चनदप्रभुः ॥ ६ ॥

किंनरोऽश्वमुखः ख्यातः कण्ठान्नृत्तं न वेत्त्यसौ ।
इतीव नाट्यं यो दर्पाद् वरारूढोऽकरोत् पथि ॥ ७ ॥

---

2 a) $S'_{2\cdot7}$ फुल्लकु°.

3 a) S'_7 -नाग (*sup. lin. sec. m.* रा ?) ख्य–; S'_2 -नादा (for °गा).

5 c) S'_3 K -वर्यौ (K र्यौ) वै: .

6 c) $S'_{2\cdot7}$ A उपधिं; D उपधां. —d) B उच्चै: .

7 b) C B -नृत्यं. —c) S'_6 [ए]व (for इ°). —d) $S'_{2\cdot6\cdot7}$ A I_{1-5} K D B -धरा°; S'_3 C वरा° (as in text).

प्रवालहस्तः सद्रश्मिः सुखलीनः सुलक्षणः ।
यथासावहमित्थं यो नासहिष्टास्य ताडनम् ॥ ८ ॥

पादैश्चतुर्भिः शुभ्रो यो मुखमध्येन चाव्रहत् ।
कल्याणपञ्चकख्यातिं कल्याणाभरणोज्ज्वलः ॥ ९ ॥

माण्डव्यगौडभूमीशः खलच्यो यो महीपतिः ।
अतूतुषद् दरन्दामनामवस्त्रैरुपाहितैः ॥ १० ॥

इतो ह्यस्मै नृपो भव्यं काव्यं कृत्वा स्वभाषया ।
प्राहिणोद् द्रव्यसंयुक्तं सव्यसाच्यग्रजोपमः ॥ ११ ॥

सोऽप्यनर्घैः पदार्थैर्न तथा तुष्टो महीपतिः ।
सालङ्कारैर्यथा भूपकाव्यस्यातिमनोहरैः ॥ १२ ॥

वस्त्रं नारीकुञ्जराख्यं कुम्भराणो विसर्जयन् ।
अहरद्धृदि तद्देशनारीकुञ्जरकौतुकम् ॥ १३ ॥

राजा डुगरसीहाख्यो गोपालपुरवल्लभः ।
गीततालकलावाद्यनाट्यलक्षणलक्षितम् ॥ १४ ॥

---

8 c) I_4 इत्थं···ना°; S'_3 C I_3 K तु (for यो).

9 a) $S'_{3\cdot6}$ (before corr.) C $I_{3\cdot4}$ K शुद्धो; I_5 शुद्रो (mislec. for S'ār. भ्रो). —c) S'_6 (marg.) A -पादुकं तं वै (for -पञ्चकख्यातिं).

10 a) $I_{3\cdot5}$ -गौढ-. —b) $S'_{3\cdot6}$ C $I_{1\cdot3\cdot5}$ K ख(K खु)लश्यो (mislec. for S'ār. च्यो); I_2 B खलुच्यो. —c) MSS and C B अतूतुषन्द° (mislec. for S'ār. द) र°; MSS and C B दरन्दाम-; M (evid. emend.) दूरन्दाम-.

12 b) I_3 C D B -पतेः. —I_5 om. 12[ab].

13 b) MSS and C B कुम्भराजो (mislec. for S'ār. णो). —c) MSS (except A) C B तच्छेष-; A तद्देश- (as in text).

14 a) S'_6 A C $I_{1\cdot3\text{-}5}$ तुगरसे (A सी) हा°; K तुरंगसेहा°.

संगीतचूडामण्याख्यं श्रीसंगीतशिरोमणिम् ।
राज्ञे गीतविनोदार्थं गीतग्रन्थं व्यसर्जयत् ॥ १५ ॥

तस्मिन् राज्ञि दिवं याते कीर्तिसीहो महीपतिः ।
तत्पुत्रः पितृवत् प्रीतिमरक्षत् प्रहितोपदः ॥ १६ ॥

मण्डलीकाधिपो राजा सुराष्ट्रनगराधिपः ।
प्राहिणोन्नृपतेः प्रीत्या ललामं कमनीयकम् ॥ १७ ॥

चित्रवर्णाल्लसत्पक्षलक्ष्यशोभान् महीपतेः ।
पक्षिणो मुचुकुन्दाख्यान् प्राहिणोदक्षिसुन्दरान् ॥ १८ ॥

जिघांसया चरन् सोऽपि भूपतेः प्राकृतैर्गुणैः ।
बद्धो हिंस्रोऽपि ढिल्लीशो बल्लको बल्लकोपमः ॥ १९ ॥

कश्चिच्छ्रीराजहंसस्य राजहंसयुगं ददौ ।
अन्ये हंसा यदुत्पन्ना राजहंसमरञ्जयन् ॥ २० ॥

---

15 d) $S'_{3\cdot6}$ C I_{1-5} K D B युग्मम् after विसर्जयत्.

16 b) $S'_{2\cdot6}$ C I_2 K B (evid. emend.) -सिन्धौ; A $I_{1\cdot3-5}$ D (evid. emend.) -सिद्धौ; S'_7 -सिंहौ (marg. सिद्धौ) (emended to -सीहो as in text with P T, MS f. 83b. : *Kirat Sīha*). —d) $S'_{2\cdot7}$ A D प्रहितोपधिः (D धः).

17 b) S'_6 A C स्व (mislec. for S'ār. सु) रा°. —d) $S'_{2\cdot3}$ C K D B ललाम–.

18 b) S'_2 -लक्ष–.

19 c) $S'_{3\cdot6}$ A C I_{1-5} K D B डिल्ले (A ल्ली)शो. —d) S'_3 A K बलूको (for °ल्लू°); C B रल्लको°.

20 a) S'_3 K म(or स)श्चि° (or श्चि); $S'_{2\cdot7}$ A I_{1-5} D कश्चि°; C B कश्चि°; M (evid. emend.) कंचि°. —c) $S'_{2\cdot7}$ अन्य– (*sic*).

सरःस्वन्तर्भ्रमन्तस्ते निर्दराः पङ्क्तिपावनाः ।
तरङ्गतरलोत्फुल्लश्वेतोत्पलतुलां दधुः ॥ २१ ॥

खुरासानमहीपस्य यस्यैवाज्ञा हयप्रभोः ।
मूर्ध्ना मन्दारमालेव भ्रियते दिगधीश्वरैः ॥ २२ ॥

यस्यायुधोर्जितकराः किङ्कराः सुभयङ्कराः ।
यमस्य चार्पितकरा व्यचरन् धरणीतले ॥ २३ ॥

उत्तराशाधिपो मिर्जाऽभोसैदः स महीभुजे ।
उच्चाश्ववेसरीयुक्तं व्यसृजत् सोपधिं चरम् ॥ २४ ॥

कतेफसोफसग्लातख्यातवस्त्राद्युपायनैः ।
महम्मदसुरत्राणो गूर्जरीशोऽप्यतूतुषत् ॥ २५ ॥

गिलानमिस्रमक्कादिदेशाधीशा हितेच्छया ।
दुर्लभोपायनैस्तैस्तैर्न के भूपमरञ्जयन् ॥ २६ ॥

अनल्पाः शिल्पिनः कल्पवृक्षकल्पममुं न के ।
भृङ्गा इवाययुर्दूराच्छिल्पकल्पितकल्पनाः ॥ २७ ॥

---

21 a) S'6 (*sup. lin. pr. m.*) A I5 नमन्तः (for भ्र°). —b) S'3·6·7 A C I1–5 K D B निर्दाराः ; S'2·6 (*sup. lin. pr. m.*) निर्दराः (as in text).

22 b) S'2 [आ] ज्ञां. —d) I5 श्रि(mislec. for S'ār. भ्रि)यते.

24 a) S'3·6 C K D मेर्जा°. —b) K महीपतिः (for °भुजे).

25 a) C कतेह (mislec. for S'ār. फ)सोह– (mislec. for S'ār. फ); S'3 -सम्लात–. —c) S'7 *sup. lin.* gloss सोल्तान् (for -सुरत्राणो). —d) A I1–3 D B गुर्जरी°.

26 a) S'6 A C I1·4 -मेस्र–. In MS A one page blank after 26.

27 b) S'3 C K (corrupt) -समं (for °ममुं).

काश्मीरिका अथाभ्यस्य तुरीवेमादिचातुरीम् ।
कौशेयकं वयन्त्यद्य बहुमूल्यं मनोहरम् ॥ २८ ॥

और्णाः सोफादयो वस्त्रविशेषा दूरदेशजाः ।
काश्मीरिकाश्च भान्त्यद्य समर्थास्ते नृपोचिताः ॥ २९ ॥

विचित्रवयनोत्पन्ननानाचित्रलताकृतीः ।
दृष्ट्वा चित्रकरा येषु जाताश्चित्रार्पिता इव ॥ ३० ॥

अनन्ततन्तुसंतानवर्णविच्छित्तिसुन्दरः ।
बभौ कौशेयकख्यातो देशो वेशश्च भूपतेः ॥ ३१ ॥

नानावर्णविशेषचित्रकटकालङ्कारसारोचितो
विद्यामानवराजितोऽतिसुखदः कौशेयताख्यातिमान् ।
श्रीमान् नित्यमहोज्ज्वलोऽतुलगुणः सत्तन्त्रसम्पत्तिभृद्
राज्ञा तेन विशेषितो निजधिया वेशोऽपि देशोऽपि वा ॥३२॥

इति जैनराजतरङ्गिण्यां चित्रोपचयशिल्पवर्णनं
नाम षष्ठः सर्गः ॥ ६ ॥

---

29 a) S'_2 C सोहा (mislec. for S'ār. फा)द°; I_5 सोछाद°. —d) M (evid. emend.) समानाः (for °मर्थाः).

30 d) A नानाचि° (for जाताश्चि°).

31 c) $S'_{2.7}$ I_3 D कौशेयका° (*sic*).

Colophon. — $S'_{4.8}$ fol. missing. $S'_{2.7}$ A $I_{2.5}$ D ins. श्री before जैन-; K जैमिनि- (for जैन-); $S'_{2.7}$ $I_{2.4.5}$ D om. -राज-; $S'_{2.7}$ A -शिल्पि-; $S'_{2.7}$ om. नाम.

Indologisches Institut der Universität Wien

सप्तमः सर्गः

दाता भवेत् क्षितिपतिर्यदि सादरोऽयं
लोकोऽपि दर्शयति तत् स्वकलाकलापम् ।
वर्षासु वर्षति घनो यदि चातकोऽपि
नृत्यन् मुदा भवति तज्जनरञ्जनाय ॥ १ ॥

अथोत्तरपथाद् दानख्यातकीर्तेर्महीपतेः ।
रज्जुभ्रमणशिल्पज्ञः कोऽप्यागात् यवनोऽन्तिकम् ॥२॥

विंशप्रस्थाभिधे स्थाने कदाचिद् यवनोत्सवे ।
तं द्रष्टुमगमद् राजा परिवारविभूषितः ॥ ३ ॥

धनुर्दण्डशतायामान्तरस्थान् दीर्घरज्जुभिः ।
उच्चान् स्तम्भानबध्नात् स स्वशिल्पप्रथनोद्यतः ॥ ४ ॥

अथो भूभागलग्नैकरज्जुमार्गेण निर्भयः ।
आरोहमकरोत्तत्र पतत्रीव नभोन्तरे ॥ ५ ॥

निपातास्खलितां तत्र लोकचित्तानुरञ्जिकाम् ।
कवितामिव शिल्पेज्यश्चित्रां पदगतिं व्यधात् ॥ ६ ॥

---

2 [b]) $S'_{3.6}$ C I_{1-5} K D B -भुजः (for -पतेः).

3 [b]) $S'_{2.3.7}$ A C $I_{3.5}$ °त्सवम् (*sic*). —[c]) A सं (for तं). —[bc]) S'_{2} °नोत्सव······न्धमगमद्.

6 [c]) A C -चिन्ता (mislec. for S'ār. त्ता) नु°. —[c]) S'_{2} A $I_{3.5}$ D कवितेव स; $S'_{3.6}$ (after corr.) A C I_{1-5} K B शिल्पेज्या चि°.

अनीचवर्तिनस्तस्य ग्रहस्येव फलप्रदा ।
सुरश्मिराशिगस्यालं बभूवाश्चर्यभूर्नृणाम् ॥ ७ ॥

कृत्वा सुखं सुरुचिरं सुचिरं विधाता
दुःखं पुनर्जनपदे जनयत्यसह्यम् ।
वर्षं प्रदर्श्य जलदः कृषिहर्षहेतुं
नेतुं फलं वितनुते करकाविकारम् ॥ ८ ॥

सौराज्यसुखिते देशे नरेशे निरुपद्रवे ।
अकस्माद् दुःसहान् जातानुत्पातान् ददृशुर्जनाः ॥ ९ ॥

ईत्यातङ्कागमे सेतुर्हेतुः सर्वजनक्षये ।
अथोत्तरदिशा रात्रौ धूमकेतुरदृश्यत ॥१०॥

दीर्घपुच्छोच्छलत्कान्तितत्केतुकपटाद् ध्रुवम् ।
कालेन द्रुघणं क्षिप्तं क्षयायेव महीक्षिताम् ॥११॥

मासद्वयं स्फुरन्नासीत् स व्योम्नि विमले सदा ।
सदये हृदये राज्ञश्चिन्तौघोऽनिष्टशङ्कया ॥१२॥

अभवन् कलुषास्ते ये नागा रज्जुपुरादिषु ।
भाविस्वभक्तभूपालदेहानिष्टेक्षणादिव ॥१३॥

---

7 c) M (evid. emend.) सा (for सु); $S'_{2.3.6.7}$ A C I_{1-5} K -गम्यालं; D B °गस्यालं (as in text). —d) I_4 C -वत् (for भूर्).

8 RSs_2 quotes 9 entirely. —b) RSs_2 अवश्यम् (for °सह्य°). —c) RSs_2 प्रदाय; D प्रविश्य (for °दर्श्य); $S'_{3.6}$ A C I_{1-5} K D B -कर्ष (for हर्ष. Thus marg. in S'_6); RSs_2 -सिद्धि- (for हर्ष). —d) RSs_2 °धनर्थम् (for विकार°).

10 a) C B इत्या°.

11 c) $I_{3.5}$ द्रुघनं.

13 b) S'_7 marg. gloss रजोलग्राम; I_5 जोलग्राम (for रज्जुपुर). —MSS and C B read 13 after 4.

अदृश्यन्त सदा श्वानो विक्रोशन्तः पुरान्तरे ।
शुचेव रुदिताक्रन्दा भाविविघ्नेक्षणादिव ॥ १४ ॥

एकपक्षेऽभवच्चन्द्रसूर्यग्रहणसंस्थितिः ।
एकपक्षमिवादातुं राज्यं राजविपर्ययात् ॥ १५ ॥

सूर्यसंक्रान्तयः क्रूरदिनेष्वातास्तदा विशाम् ।
भाविक्रूरफलोत्पादसादचिन्तनभीतिदाः ॥ १६ ॥

मन्निर्माता क्षयं यास्यत्ययं किमिति दुःखिता ।
राजधान्यरुदच्छत्रतलोलूकध्वनिच्छलात् ॥ १७ ॥

दृष्टोऽम्बरे द्वितीयस्यां सुधांशुस्तत्र तैर्जनैः ।
उत्तान इव भूपेशमन्यं सूचयितुं विशाम् ॥ १८ ॥

अत्रान्तरे महाघोरमनावृष्टिकृतं भयम् ।
उदभूदन्यदेशेषु दुर्भिक्षोपद्रवावहम् ॥ १९ ॥

भिक्षुकानन्यदेशीयान् प्रेतरूपानिवागतान् ।
दृष्ट्वापृच्छन्नृपस्ते च वार्तां तस्याब्रुवन्निमाम् ॥ २० ॥

राजन् देशेष्वनेकेषु वृष्ट्यभावात् समन्ततः ।
सर्वान्तकृत् काल इव दुष्कालः समुपस्थितः ॥ २१ ॥

---

18 S_3 K om. 18^{cd} and 19^{ab}. —c) A स्वमग्रे; S'_6 (conflated) स्वमन्यं (for °शमन्यं).

19 d) $S'_{2\cdot6}$ (marg.)$_7$ A I_{1-5} D B °द्रवासहम्; S'_3 C K °द्रवावहम् (as in text).

20 d) $S'_{2\cdot7}$ A इद (mislec. for S'ār. मा)म्; $S'_{3\cdot6}$ C I_{1-5} K D B इति (for इमाम्).

दुर्भिक्षेण प्रभवता मणीनां सा महार्घता ।
नीता नीचेन साधूनामिव सर्वोपयोगिनाम् ॥ २२ ॥

भुञ्जते श्वादयोऽन्योन्यपिशितं क्षुदुपद्रुताः ।
तत्तच्छून्यगृहान्तःस्थनिःशोषितशवव्रजाः ॥ २३ ॥

स्पृष्टोच्छिष्टतया दृष्टप्रायश्चित्तादिनिष्ठिताः ।
क्षुधा द्विजवरा देव प्रयाताः सर्वभक्ष्यताम् ॥ २४ ॥

कापि विप्रस्त्रियस्तत्तद्भक्ष्यवीक्षणाक्षमाः ।
पक्वान्नं सविषं भुक्त्वा स्वमन्यांश्च व्यसून् व्यधुः ॥ २५ ॥

अवृष्ट्या वसतिं त्यक्त्वा गते कापि मृते जने ।
शून्या के न पुरग्रामा दृष्टा राजन् पदे पदे ॥ २६ ॥

प्रीतिं स्नेहं च दाक्षिण्यं पत्न्यां पुत्रे पितर्यपि ।
कुक्षिंभरिः क्षुदुत्ततो विस्मरत्यवनौ जनः ॥ २७ ॥

खुरासानावनीशक्रं विक्रान्त्या शत्रुभूमिगम् ।
अन्नाभावाद् भवन्मित्रमभिषेणेन निर्गतम् ॥ २८ ॥

मेर्जाऽभोसैदनामानं सुरत्राणं रणान्तरात् ।
इराकभूपतिर्बद्ध्वावधीत् कोटिबलान्वितम् ॥ २९ ॥

---

22 a) S'_3 A C $I_{1.3-5}$ K प्रभवतां. —b) S'_6 (before corr.) C महार्घ्यता.

23 a) C B [अ]न्योन्यं. —d) I_1 C -प्रजाः (for व्र°).

25 b) MSS and C B °भक्ष्यान्वीक्षणक्षमाः (emended as in text).

27 b) S'_2 पितर्य……. d) S'_2 विस्मरत्यव…….

28 c) C भवान्मि° (mislec. for S'ār. वन्मि). —cd) S'_2 °भाव…मित्र…णेन. A S'_6 (marg.) स्वमित्राणां मरणेन (for भवन्मिमभिषेणेन).

29 a) D B (evid. emend.) मिर्जा°. This emendation not recorded onward. —c) A °न्तरे. —d) $S'_{2.3.6.7}$ A C $I_{1-3.5}$ D K युग्मं after -बलान्वितम्.

तस्य दुर्योधनस्येव बद्धस्य हरणक्षणे ।
अभूत् संख्यान्तरेऽसंख्यतुरुष्कनृपतिक्षयः ॥ ३० ॥

देशेषूद्भूतदुष्कालबलाबलविपर्ययात् ।
अन्योन्यनृपयुद्धेन विघ्नो देव पदे पदे ॥ ३१ ॥

सुखप्रदं भवद्देशं श्रुत्वान्नादिसमृद्धिभिः ।
आगतांस्तत्क्षमापाल रक्षास्मान् विक्षतान् क्षुधा ॥३२॥

श्रुत्वेति वार्तामार्ता तां जानन्निव निजां प्रजाम् ।
द्रव्यकोटिं ददौ राजा तदर्थं करुणाकुलः ॥ ३३ ॥

अत्रान्तरे सुय्यसिद्धकृतं सुय्यपुरं महत् ।
समस्तं वह्निना दग्धं शून्यारण्यमिवाभवत् ॥ ३४ ॥

क्रमराज्यस्फुरत्प्राज्यराज्यतन्त्रक्रियाङ्कितम् ।
भूर्जभाण्डादि तत्रस्थं समस्तं भस्मसादभूत् ॥ ३५ ॥

ग्राह्यो जैनगिरीक्षेत्रे सप्तमांशोऽत्र भाविभिः ।
इति ताम्रमये पट्टे कल्पं यस्यां व्यधान्नृपः ॥ ३६ ॥

श्रीमाञ् जैनोल्लाभदेनो नरेशो
याचे भूपान् भाविनो जैनगिर्याम् ।
कृष्टोत्पाद्य स्वैर्धनैर्भूर्मयात्र
तस्या ग्राह्यः सप्तमांशो भवद्भिः ॥ ३७ ॥

---

34 a) $S'_{2.3}$ K C B स्वयं (for सुय्य–). —b) B (corrupt) -परं.

35 ab) S'_2 °प्राज्य……तन्त्र–.

36 a) $S'_{3.6}$ A C I_{1-5} K D B (evid. emend.) -गिरि– (for °री-).

37 a) D B जैनोल्लावदेवो; C °भदीनो; $S'_{3.6}$ C ययाचे (for नरेशो). —b) $S'_{3.6}$ C सर्वान् (for याचे).

जलावतरणं कृत्वा गिरीनुल्लङ्घ्य मत्कृतः।
पुण्यकेतुरयं सेतुर्वर्धनीयः शुभेच्छया ॥ ३८ ॥

इत्थं ताम्रमये पट्टे श्रीबकाशीशनिर्मिता।
प्रशस्तिरासीत्तां राजधानीवह्नी ररक्ष च ॥ ३९ ॥

प्रदीप्तः सुकृतोत्कर्ष इवास्यैव महीपतेः।
अरक्षद् राजधानीं तां मध्यस्थामपि पावकः ॥ ४० ॥

श्रुत्वा दग्धं पुरं राजा शुचा दग्धो विदग्धधीः।
अचीकरन्नवं तूर्णं चारु दारुमयैर्गृहैः ॥ ४१ ॥

राजा वराहमूलीयां राजधानीं पुरा कृताम्।
आनीय विदधे तत्र राजावासं नवं महत् ॥ ४२ ॥

तन्त्रायकनृपागारं सेतुमत्तोम्भितं नवम्।
क्रमराज्यश्रियो हारं सारं सुय्यपुरं व्यधात् ॥ ४३ ॥

सेतुमत्तोम्भिते तत्र गृहश्रेणिमणिव्रजे।
राजधानी स्फुरच्छत्रा धत्ते मध्यमणिश्रियम् ॥ ४४ ॥

मानुष्यकं नववसन्तमिवाप्य हृद्यं
लोका लता इव लसन्ति नवे वनेऽस्मिन्।
तद्बान्धवा रुचिकरा इव पुष्पपूगाः
स्थित्वा दिनानि कतिचिच्चतुरं प्रयान्ति ॥ ४५ ॥

---

39 b) $S'_{3\cdot7}$ $I_{2\cdot4}$ D श्रीवका··· (S'_1 $I_{2\cdot4}$ श) नि°; S'_2 ···श्रीवका···नि°; A या श्रीवकवि° (for श्रीबकाशीश-). —d) $S'_{2\cdot6}$ (marg.)$_7$ A D °नीं वह्निररक्षत (*sic*).

43 a) S'_2 A तत्त्राय (A यि)क-; S'_3 तंन्त्रा (marg. न्त्रा) यक-; I_3 तंत्रायक-. —b) S'_3 °तोस्मितं; K °तोस्थितं; S'_6 °तोस्सितं.

44 a) K °त्तोन्मिते; S'_3 °त्तोस्मिते.

45 b) $I_{2\cdot3}$ D B वसन्ति (for ल°).

विहगेष्विव जातपक्षपूगः
पुरुषेषु प्रभवेत् कुटुम्बवर्गः ।
सुखगत्युचितोऽपि तत्प्रतिष्ठो
न चिरं तिष्ठति कायकष्टदायी ॥ ४६ ॥

अत्रान्तरे दिवं याता सा बोधाखातोनाभिधा ।
श्रीमत्सैदान्वयोदन्वच्चन्द्रिका नृपतिप्रिया ॥ ४७ ॥

यत्संयोगसुखं प्राप्य सोऽज्ञासीत् सफलं वयः ।
तद्वियोगाद्धि दग्धाङ्गः सर्वं शून्यमिवाविदत् ॥ ४८ ॥

न्यस्तो राजेन्दुना सिन्धुदेशे यो गुणसुन्दरः ।
स्वत्राणेन सुरत्राणपदे प्राणाधिकप्रियः ॥ ४९ ॥

श्रीक्यामदेनं सिन्ध्वीशं भागिनेयं सुतोपमम् ।
एबराहिमनाम्ना तं हतं युद्धेऽश्रृणोन्नृपः ॥ ५० ॥

परमाश्वासनोपायः सुखे दुःखे च योऽभवत् ।
तदा तन्मरणं राजा भुजच्छेदमिवाविदत् ॥ ५१ ॥

दर्याखानादिमृतौ याभून्मन्त्रिसभा नवा ।
लीलामित्रैः समं सर्वा सा ययौ स्मरणीयताम् ॥ ५२ ॥

लसन्मदो विभुः प्राप्तकार्योत्पादितसौहृदः ।
तत्कालं प्रमयं यातो दाता मेरखुशाह्वदः ॥ ५३ ॥

---

46 a) A -पक्षि-.
48 c) MSS (except A) and C B वि (A द्धि as in text).
49 c) S'_2 सुर···दप्रा°.
50 a) S'_3 सिग्ध्वी (marg. न्ध्वी)शं. —b) $S'_{2\cdot7}$ A I_5 भागिनीयं.
53 a) MSS (except S'_3) C B विमु–; S'_3 विभुः (as in text). —d) B (evid. emend.) मीर–. —S'_3 K om. hapl. 53[cd].

दुर्वार्तामन्वहं शृण्वन्नार्तां जानन्निजां प्रजाम् ।
स्वसुतान्योन्यवैरेण चिन्तातप्तो नृपोऽभवत् ॥ ५४ ॥

अतीतान् बान्धवान् भृत्यान् सखीन् प्राणसमान् स्मरन् ।
स्वात्मानमविदद् राजा यूथभ्रष्टमिव द्विपम् ॥ ५५ ॥

अत्रान्तरे राजसूनोर्हाज्यिखानस्य रक्तजम् ।
अस्वास्थ्यमुदभून्नित्यं मद्यपानातिसेवनात् ॥ ५६ ॥

शौर्यौदार्यनिधेः सूनोरतिप्रियतया तया ।
राज्यसौख्यलता राजहृदुद्याने फलाचिता ।
तदाभून्नीरसप्राया तदस्वास्थ्यदवाग्निना ॥ ५७ ॥

अथानीयान्तिकं दृष्ट्वा सविकारं भृशं कृशम् ।
स्नेहादित्यब्रवीद् राजा पुत्रं मन्त्रिसभान्तरे ॥ ५८ ॥

अहो पुत्र फलं लब्धं दोषासक्तेन पानजम् ।
येनेदृशी दशा प्राप्ता चन्द्रेणेव क्षयावहा ॥ ५९ ॥

स्वार्थापेक्षी हितः कोऽपि भृत्यस्ते नास्ति रक्षकः ।
पानव्यसनसंसक्तं यस्त्वामुपदिशत्यलम् ॥ ६० ॥

कियन्तो वत नो भोगाश्चमत्कारकरास्तव ।
किमेकेन भवान् ग्रस्तो विषयेण पतङ्गवत् ॥ ६१ ॥

---

54 c) B -वी (*sic*) रेण.

57 b) S'_3 K तथा (for °या). —d) B °भूनीर°.

58 a) S'_2 अ˙˙नी°.

60 c) S'_6 (marg.) A -संयुक्तं.

61 a) S'_6 C [अ]यतनाः (for वत नो).

अस्मिञ् जन्मनि सामग्री येयं प्राप्तान्यदुर्लभा ।
प्राप्ता नैवेदृशीं भूयो यदि दुर्व्यसनो भवान् ॥ ६२ ॥

किं चिरन्तनवृत्तान्तैर्वृष्ण्यादीनां समीरितैः ।
मद्येनातनुभूपाला दृष्टनष्टा विचार्यताम् ॥ ६३ ॥

तथा हि सबलारातिगणतूलसमीरणः ।
मल्लेकजस्तथो योऽभून्मद्राज्यातिनिधानभूः ।
तेनापि दृष्टं दुष्टं प्राङ् नात्याक्षीत् तत् स्ववञ्चकः ॥ ६४ ॥

तस्य पुत्रोऽभवच्छाहिमसोदः प्रमये पितुः ।
सर्वं हारितवान् क्षीवः कुर्वन्नुन्मत्तचेष्टितम् ॥ ६५ ॥

सप्तप्रकृतिधात्वाढ्यं तन्मल्लेकपुरं महत् ।
कुपुत्रव्यसनाद् यातं देहवत् स्मरणीयताम् ॥ ६६ ॥

मद्यं यल्लोहितं वर्णं बिभर्त्ति चषकान्तरे ।
जाने पानप्रवृत्तानां हृद्रक्तेनैव जायते ॥ ६७ ॥

न मद्येनामुना तुल्यः शत्रुरस्ति हि देहिनाम् ।
सेवितो हितकृच्छत्रुर्मद्यं हन्त्यतिसेवितम् ॥ ६८ ॥

---

62 c) MSS and C B [ई]दृशी (emended as in text with M).

63 b) MSS and C B वृष्टया (mislec. for S'ār. ष्ण्या; cf. PT, MSf. 86a *Jādav*=यादव) दी°.

64 b) S'_2 C $I_{1.3-5}$ D -तृण- (for -तूल-). —d) D मा त्या°. C सोऽत्याक्षीस्तत्सुवञ्चकः.

65 d) S'_6 I_1 C कुर्वन्नर्मतु (mislec. for S'ār. °न्नुन्मत्त)चे°.

67 c) $S'_{3.6}$ A C K D B -पाप- (for °न). —d) $S'_{3.6}$ CK हृद्रक्तमिव.

मैरेयमदमत्ता यां कुर्वन्त्यनुचितां क्रियाम्।
उन्मत्तोऽपि न तां कुर्याद् यत् स तस्मात् पलायते॥६९॥

मद्यरूपेण वेतालः प्रविश्य हृदयं क्षणात्।
न केषां हरते प्राणान् सहासरुदितक्रियम्॥७०॥

विषेण वासुना पुत्र पीतेनासेदृशी दशा।
पाहि स्वं त्यज सावद्यं मद्यमद्यप्रभृत्यतः॥७१॥

न चेत् त्यजसि मूढस्त्वं व्यसनार्पितमानसः।
अचिराद् वञ्चितो लक्ष्म्या प्रक्षीणायुर्भविष्यसि॥७२॥

श्रुत्वेति राजपुत्रः स स्वपितुः संमता गिरः।
राजन्नद्यप्रभृति न पिबामीत्युत्तरं व्यधात्॥७३॥

दीप्त्युज्झितं क्षीणदशं मन्दमस्नेहभाजनम्।
सुतं दीपमिवैक्ष्याभूद् भूपो मोहतमोहतः॥७४॥

उपदेशगिरोऽप्रियाः श्रुतौ
गतभाग्येषु भवन्ति जन्तुषु।
विपदभ्युदये पुनः स्मृता
न मयाश्रावि किमित्यरुन्तुदाः॥७५॥

अथ स्वावसथं गत्वा सोऽपिबद् यन्त्रितोऽपि सन्।
विषवद्व्यसनान्धानामुपदेशो निरर्थकः॥७६॥

---

72 d) B भविष्यति.

73 c) $S'_{3.6}$ C I_{1-5} K D B त्वदाज्ञां न विना मद्यं (for राजन्नद्यप्रभृति न). —cd) S'_2 ···पिवामी°.

74 c) B [ई]क्ष्य.

75 a) C B -गिर: प्रि°.

तावतास्नेहमाशङ्क्य राजपुत्रेऽतिमन्त्रिणः ।
आदामखानमानिन्युर्गूढलेखैर्दिगन्तरात् ॥ ७७ ॥

अनुजागमनत्रासाद् यथा यातोऽग्रजः पुरा ।
तथाग्रजागमत्रासादनुजो याति देशतः ॥ ७८ ॥

एतत्कलहनिश्चिन्तः प्राग्वत् स्यां निजमण्डले ।
इति बुद्धया प्रवेशोऽस्य कृतोपेक्षो नृपोऽभवत् ॥ ७९ ॥

हाज्यिखानात्मजः श्रुत्वा तं पितृव्यं समागतम् ।
युयुत्सुः प्राप पर्णोत्सं त्यक्त्वा राजपुरीं ततः ॥ ८० ॥

आन्द्रोटकोटमाश्रित्य भ्रातृपुत्रपितृव्ययोः ।
कश्मीरागमनद्वेषादभवद् युद्धमुद्धतम् ॥ ८१ ॥

दृष्टं हसनखानस्य क्षमित्वं बलशालिनः ।
विना पैतामहीमाज्ञां नागाद् देशोत्सुकोऽपि सन् ॥ ८२ ॥

अग्रजेऽभ्यन्तरं प्राप्ते द्वारस्थे लक्षिते पितुः ।
हाज्यिखानोऽनुजयुतो युक्त्या साम प्रयुक्तवान् ॥ ८३ ॥

दिव्यं मौसुलवेदेन ते कृत्वापि परस्परम् ।
नात्यजन् हृदयाद् वैरं कार्ष्ण्यमौर्णा इवांशुकाः ॥ ८४ ॥

---

77 [b]) M (evid. emend.) तु (for [अ]ति). —[c]) $S'_{2\cdot7}$ I_{1-5} D आधाम–; $S'_{2\cdot6}$ C K B आदम–; A आदाम– (as in text).

81 [a]) S'_2 A $I_{3\cdot4}$ आर्द्रटो– (I_3 marg. gloss ग्रामनाम); $S'_{3\cdot6}$ आन्द्रोढ (S'_6 marg. ट); C आर्द्रोढ–; K आदृर्द्राढ–; I_1 आद्रोट–; I_4 D B आसाद्य (for °श्रित्य).

84 [a]) S'_3 K C B -देवेन (for -वेदे°); S'_7 marg. gloss दिव्यं शपथमित्यर्थः.

अहो गुहायामेकस्यां प्राप्ता सिंहचतुष्टयी।
एतदन्योन्यवैरोत्थो नाशोऽयं समुपस्थितः ॥ ८५ ॥

राज्ञो देशस्य खानानां परिवारस्य मण्डले।
सर्वांस्तान् मिलितान् दृष्ट्वा प्रोवाच सकलो जनः ॥८६॥

अत्रान्तरे द्वयोर्द्विष्टं कनिष्ठं श्रेष्ठमात्मजम्।
विचार्यानीय बह्रामखानं स विजनेऽब्रवीत् ॥ ८७ ॥

बह्राम ज्येष्ठो भ्रातायं द्विष्टो दुश्चेष्टितैः कृतः।
स्मृतपूर्वापकारोऽयं हितो जातु न ते भवेत् ॥ ८८ ॥

अन्यं यं सेवसे भक्त्या दुराशाग्रस्तमानसः।
स कथं स्वं सुतं त्यक्त्वा कार्ये त्वां समपेक्षते ॥ ८९ ॥

तस्मात् त्वं पैशुनाचारं मा कृथा भाविदुःखदम्।
मदेकशरणो भूत्वा कालं नय ततोऽचिरात् ॥ ९० ॥

प्राप्स्यन्ति संपदः सर्वा न्यायमार्गस्थितस्य ते।
अन्यथा तप्ततैलायःकटाहफरणीनिभः ॥ ९१ ॥

तद्वैरानलमध्यस्थो मुग्ध दग्धो भविष्यसि।
श्रुत्वेति स पितुर्वाक्यं मुग्धधीरब्रवीदिदम् ॥ ९२ ॥

---

86 d) $S'_{2.3.6}$ A I_{1-5} K D युग्मं after जनः.

88 b) A दुष्टे° (for °श्चे°).

90 a) S'_{3} C तं (for त्वं).

91 c) MSS (except A) C B तैलतप्ताय:; A तप्ततैलाय: (as in text). —d) I_2 -हरणी-.

92 b) $S'_{2.6}$ (marg.)$_7$ D कुलकं after भविष्यसि.

देव मे पितृवत् स्नेहं हाज्यिखानः करोत्यलम् ।
सेव्यः स एव मे भाति तं त्यजे नैव जातुचित् ॥ ९३ ॥

रक्षिष्यति स मां काले कोऽन्योऽस्मादधुना बली ।
श्रुत्वेति भूपः प्रोवाच क्रुद्धस्तं कृतनिश्चयम् ॥ ९४ ॥

हा धिक् त्वां मां परित्यज्य पितान्योऽङ्गीकृतस्त्वया ।
दृष्टिर्या विहिता मूढ प्रोल्लङ्घ्य वचनं मम ॥ ९५ ॥

तस्या नाशोऽचिरेणैव भविष्यति न संशयः ।
इत्युक्त्वा प्रतिमुच्यामुं स्वान्तरेवमचिन्तयत् ॥ ९६ ॥

अहो प्रदीप्तान्मत्तोऽमी जाता विसदृशाः सुताः ।
त्रयोऽमी दहनागारादिव हा भस्ममुष्टयः ॥ ९७ ॥

अयोग्या दीप्तिरहिताः काष्ठा कृष्टावनिष्ठिताः ।
कदाचिद् विजने राजा सुतानिष्टविशङ्कितः ॥ ९८ ॥

अधुना करणीयं किं मयेति व्यक्तमब्रवीत् ।
तत्समक्षं बुधा येऽपि तत्प्रसङ्गाद् बभाषिरे ॥ ९९ ॥

राजन्नुत्साद्यते देशो राज्यलुब्धैः सुतैस्तव ।
एकस्यैव निजं राज्यं किं नार्पयसि यो हितः ॥१००॥

व्याकुलत्वं विशां येन तव न स्याच्च भूपते ।
तत्रापि माणिक्यदेवः श्रुत्वामुं प्रबलं श्रिया ॥१०१॥

96 c) DB परि- (for प्रति-).
98 b) A कष्टा°. —d) B C °निष्टा°.
99 d) S′2 बभाषि···.
101 a) S′2 ···त्साद्यते.

वैरी स्याद्येन देशस्य सर्वनाशोऽचिराद् भवेत् ।
इति श्रुत्वाब्रवीत् पुत्रस्वभावेक्षणदक्षधीः ॥१०२॥

ज्येष्ठः श्रेष्ठोऽस्ति किंत्वस्य कार्पण्यं येन सेवकाः ।
न सन्ति तादृशा येषां राज्यं दार्ढ्यमवाप्नुयात् ॥१०३॥

मध्यमोऽतीव दातास्य प्रद्युम्नाचलसंनिभम् ।
द्युम्नं चेत् स्याद् व्ययान्नास्य कर्षमात्रोऽवशिष्यते ॥१०४॥

कनिष्ठो दुष्टधीः पापनिष्ठोऽस्मादचिरात् सभा ।
नष्टा स्यात् तत् सुतं श्रेष्ठं जाने कमपि नोचितम् ॥१०५॥

मया तावत् स्वयं राज्यं कस्मा अपि न दीयते ।
गते मयि बलं यस्य स प्राप्नोत्विति मे मतम् ॥१०६॥

बहवो न मरिष्यन्ति यदि तन्मम को गुणान् ।
ज्ञासिष्यति यतः स्थित्या द्वयोर्भेदो हि लभ्यते ॥१०७॥

ध्वान्तं पतेद्यदि न दिक्षु जनस्य दृष्टि-
नंश्येन्न चेद्यदि मुषन्ति न तस्कराद्याः ।
सङ्कोचमेति गुणवान् यदि नाम नासौ
जानाति को दिनमणिं परलोकयातम् ॥१०८॥

---

103 MS S'_8 begins with न सन्ति. and ends with येन सेवकाः. —c) M (evid. emend.) यैस्तु (for येषां).

104 d) M (evid. emend.) -मात्रा°.

105 a) $S'_{2\cdot8}$ A $I_{3\cdot5}$ D पापो.

107 c) S'_6 C गणिष्यति (for ज्ञासि°). —d) M (evid. emend.) दृश्यते (for लभ्यते). After लभ्यते MSS and C कुलकम् .

108 d) S'_6 C I_3 यो; $S'_{2\cdot7\cdot8}$ A $I_{1\cdot2\cdot5}$ D B नो (emended to को as in text with M). —S'_3 K om. 108ab.

स्ववीर्येणार्जितं राज्यं योजितं स्वधिया मया।
कुपुत्रैर्नाशितं सर्वं परस्परविरोधिभिः ॥१०९॥

सप्ताङ्गं धातुसंबद्धं राज्यं देहमिवोर्जितम्।
दोषैरिवैतैः पुत्रैर्मे त्रिभिः संदूषितं नु यत् ॥११०॥

तत्स्वास्थ्यमासादयितुं शक्ताः पथ्यचिकित्सया।
मन्मन्त्रिणोऽगदंकारा न सन्त्यद्यतने क्षणे ॥१११॥

भोक्ता भोगाश्चिरं शास्त्रगीतकाव्यविनोदनैः।
वयः सफलतां नीतं कार्यं किमपि नास्ति मे ॥११२॥

देशस्य यावत्युत्पत्तिर्नवा तत्त्रिगुणा मया।
संपादिता प्रजास्नेहात् कुल्याकर्षणयुक्तिभिः ॥११३॥

सर्वदर्शनरक्षायै पात्राण्यालोच्य सर्वतः।
प्रतिपद्य शुभे काले भूर्नवा धर्मसात्कृता ॥११४॥

सच्छिद्रमधुना राज्यं वदने रदनोपमम्।
तुदति प्रत्यहं तस्मात् तत्त्यागेन सुखं मम ॥११५॥

चौराणामिव दीपोऽहं येषामक्षिगतोऽस्म्यहम्।
अचिरान्मद्गुणस्थित्या ते स्युरनुशयार्दिताः ॥११६॥

---

110 a) M (evid. emend.) सप्ताङ्ग–.

111 b) M (evid. emend.) -चिकीर्षया (for °चिकित्सया).

112 a) $S'_{2\cdot7\cdot8}$ शस्त्रं.

116 c) C $I_{1.3}$ K स (K त्स)गुण–.

स्थास्यन्ति न चिरं तेऽपि मद्द्विष्टा ये सुतादयः ।
शलभाः प्रलयं यान्ति भुक्त्वा धान्यफलं न किम् ॥११७॥

युक्त्या निर्याणमेवास्य जीवस्येच्छामि साम्प्रतम् ।
येन सर्वे भविष्यन्ति पुत्राः पूर्णमनोरथाः ॥११८॥

श्रुत्वेत्युक्तिं सदुःखस्य नृपतेस्तेऽब्रुवन् पुनः ।
देवेदं चेन्मतं तत्किं कोशोऽयं रक्ष्यते महान् ॥११९॥

परलोकस्य पाथेयं कुरु जीवन् स्वयं व्ययम् ।
तदाकर्ण्याब्रवीद्राजा युक्तमुक्तमिदं वचः ॥१२०॥

किंतु शृण्वन्तु मे हेतुं यत् कोशोऽयं धृतो भृतः ।
मयि प्रमीते मद्राज्यं मत्पुत्रः कोऽपि चेल्लभेत् ।
मत्संचयेन तृप्तः स प्रजायाः स्वं त्यजिष्यति ॥१२१॥

पुत्राधिका प्रजेयं मे रक्षणीया विभाति या ।
तस्याः पीडां भविष्यन्तीं हरिष्ये संचयादतः ॥१२२॥

पूर्णो विलासान् कुरुते प्रजेशो
रिक्तः प्रजापीडनमातनोति ।
तृप्तो मृगेन्द्रो रमते गुहान्त-
र्भुङ्क्ते क्षुधार्तो वनजन्तुवर्गम् ॥१२३॥

---

117 c) $S'_{2\cdot7\cdot8}$ A $I_{2\cdot5}$ D सफलाः; $S'_{3\cdot6}$ C $I_{1\cdot3}$ K B सकला (emended as in text). —d) K नु (for न).

119 d) S'_3 C K कोषो.

120 b) C अमुं (for स्वयं).

121 b) $S'_{3\cdot6}$ C K कोषो. —d) S'_8 A D प्रजायासं.

122 d) D हनि (mislec. for S'ār. रि)ष्ये.

123 cd) C गुहान्तंसु(<न्तम्सु mislec. for S'ār. र्भु)ङ्क्ते.

मत्संचयोपकारेण भाविभिः पीडनोज्झितैः ।
आयतिज्ञं वदद्भिर्मां करिष्यन्ते न गर्हणाः ॥ १२४ ॥

पूर्णाद्राजगृहादन्ये पूर्णाः स्युरुपकारकाः ।
नयन्त्यब्धेर्न चेत्तोयं भूमौ वर्षन्ति किं घनाः ॥ १२५ ॥

इयं या सामग्री भवति नृपतेः सर्वरुचिरा
धनेनैकेनैव प्रभवति चिरं सा प्रभवता ।
फलं पत्रं पुष्पं समुदयति यद्यद्विटपिनो
धरण्यन्तर्भूतो जनयति तदेको रसगुणः ॥ १२६ ॥

सुदीर्घदर्शिनो वाक्यं श्रुत्वेति पृथिवीपतेः ।
आसंस्तच्चोद्यकर्तारस्तदग्रे ते निरुत्तराः ॥ १२७ ॥

राजवेश्मनि पयोनिधौ च या
वाहिनीभृति पदार्थपूर्णता ।
जीवनाप्तजनयाचकाचिता
सैव तस्य सुषमा समाहिता ॥ १२८ ॥

यद्यदुक्तं नरेन्द्रेण स्मृत्वा तत्तत् फलेक्षणात् ।
न कः शंसति शोकार्तस्तदीयां दीर्घदर्शिताम् ॥ १२९ ॥

सचिवाः सेवकाः पुत्रमित्रसंबन्धिबान्धवाः ।
दुःखापनोदं कुर्वाणाः केऽपि नासन् महीभुजे ॥ १३० ॥

राजा गर्भगृहान्तःस्थः शृण्वन् पुत्रस्थितिं मिथः ।
कृतकप्रेमवैराढ्यां न बहिर्निरयाद्भिया ॥ १३१ ॥

---

126 [ab]) S'_2 नृप··· केनैव. —[c]) S'_3 C K समदयति.
127 [a]) C स (for सु).
131 [a]) K C B -गृहान्त-.

संसारदुःखशान्त्यर्थं मत्तो व्याख्यानवेदिनः ।
अश्रृणोद् गणरात्रं स श्रीमोक्षोपायसंहिताम् ॥ १३२ ॥

स्वकण्ठस्वरभङ्ग्याहं तद्वृत्तपरिवर्तनैः ।
व्याख्यामकरवं येन निःशोकोऽभूत् क्षणं नृपः ॥ १३३ ॥

"भ्रमस्य जाग्रतस्तस्य जातस्याकाशवर्णवत् ।
अपुनः स्मरणं साधोर्मन्ये विस्मरणं वरम् ॥ १३४ ॥

"दीर्घस्वप्नोपमं विद्धि दीर्घं वा प्रियदर्शनम् ।
दीर्घं वापि मनोराज्यं संसारं रघुनन्दन ॥ १३५ ॥

"यदि जन्म जरा मरणं न भवेद्
यदि वेष्टवियोगभयं न भवेत् ।
यदि सर्वमनित्यमिदं न भवे-
दिह जन्मनि कस्य रतिर्न भवेत् ॥ १३६ ॥

"यतो यतो निवर्तेत ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि" ॥ १३७ ॥

मद्व्याख्याश्रवणाभ्यस्तान् स्वावस्थासूचकान् बहून् ।
इत्यादिकान् स्वयं श्लोकानपठत् स महीपतिः ॥ १३८ ॥

मोक्षोपाये श्रुते मत्तस्तत्तत्पद्यार्थभावनात् ।
अथैकदाब्रवीद् राजा विबुधानन्तिकस्थितान् ॥ १३९ ॥

---

133 [b]) S'_3 K C उ(mislec. for S'ār. त)द्वृ°.

136 K om. hapl. 136[cd].

137 [d]) MSS and C B सुखम् (emended to दुः° as in text).

139 K om. hapl. 139[cd].

किमर्थं स्वसुतस्नेहं करोषि को न तेऽहितः।
इत्येवं वक्ति मे नूनं कर्णोपान्तागता जरा ॥ १४० ॥

अस्थि दन्तादिभिर्भङ्क्त्वा मांसं मांसेन भुज्यते।
रक्तबीजमये भोगे भ्रमोऽयं न व्यपैति मे ॥ १४१ ॥

अहो मयि मृदौ सर्वसुखदे छिद्रकारिणः।
नाशायामी सुता जाता राङ्कवे क्रिमयो यथा ॥ १४२ ॥

यैः समं स्ववयो नीतं तेऽवशिष्टा न केचन।
आजीवनं चलत्येषा तद्वियोगविषव्यथा ॥ १४३ ॥

देहोटजमिदं जीर्णं केशतृणगणावृतम्।
सच्छिद्रं रोचते नाद्य दुर्दिने मन्मनो मुनेः ॥ १४४ ॥

भुजगैरिव दष्टानि राज्याङ्गानि सुतैर्मम।
तत्त्यागोपाय एवैको युक्तो मे नान्यथा सुखम् ॥ १४५ ॥

इत्यादि चिन्तयन् राजा पारसीभाषया व्यधात्।
काव्यं शीकायताख्यं स सर्वगर्हार्थचर्वणम् ॥ १४६ ॥

राज्ञो धात्रेयपुत्राद्याः प्रमेयैरपि सत्कृताः।
भूपपक्षं परित्यज्य हाज्यिखानमुपागमन् ॥ १४७ ॥

किमन्यद् व्यक्तमेवाह्नि ये दृष्टा नृपसन्निधौ।
अलक्ष्यन्त निशि स्वैरं ते खानाग्रे गतत्रपाः ॥ १४८ ॥

---

140 b) $S'_{6\cdot8}$ A C I_4 करोष्ये; $S'_{2\cdot5\cdot7}$ $I_{1-3\cdot5}$ K D B करिष्ये (emended as in text). —d) $S'_{2\cdot3\cdot6\cdot7}$ I_{1-5} K D C B °न्तागतो जनः; S'_8 (after corr.) A न्तगता जरा (as in text).

141 a) MSS and C भुक्त्वा; B (evid. emend.) भङ्क्त्वा (as in text).

148 b) B (evid. emend.) दृष्टा. Cf. Kal. viii. 793.

ताटस्थ्येन स्थिते राज्ञि तद्भृत्यानां परस्परम् ।
तत्तदाक्षेपतो देशे कोऽप्यजृम्भत विप्लवः ॥ १४९ ॥

भविष्यन्निव साम्राज्यस्यार्धभागी न कस्तदा ।
तत्पुत्रेष्वनुरक्तोऽभून्न तु राज्यसुखस्थिते ॥ १५० ॥

इत्थं स्वभृत्यसंचारदुराचारविचारणात् ।
परिवारान्निजात् सर्वान्निर्विण्णोऽभून्महीपतिः ॥ १५१ ॥

अद्य ये स्वान्तिके दृष्टाः प्रातः खानान्तिके श्रुताः ।
दार्ढ्यं कुत्रापि नो प्रापुः सारसा इव सेवकाः ॥ १५२ ॥

हृद्गदो वर्ण्यते यस्मै तादृगाश्वासभाजनम् ।
तत्कालं सेवको भक्तो दृष्टः कोऽपि न भूभुजा ॥ १५३ ॥

यन्नोक्तं यच्च नो दृष्टं यच्छ्रुतं वा कदाचन ।
निर्यन्त्रणो जनः प्रोचे प्रत्यहं राजमन्दिरे ॥ १५४ ॥

स्वभ्रातृकलहैकाग्रस्तत्तत्पैशुन्यकर्मणा ।
बहामखानोऽनर्थानां कर्णो मूलमिवाभवत् ॥ १५५ ॥

स्निग्धोऽयमित्यवगते यदि काष्ठखण्डे
दत्तप्रदीपपदवीपरिदीपिताशे ।
किं स ज्वलन्नपि करोति चिरं प्रकाशं
दोषं न कं वितनुते निजकज्जलौघैः ॥ १५६ ॥

---

150 ab) S'_2 °न्निव……स्तदा. —d) MSS and C B राज्ञि (emended as in text with M).

153 a) B (evid. emend.) हृद्गतो.

156 b) S_6 C दण्डे (for दत्त–); S'_3 om. दत्त. —c) S'^8 A सञ्ज्वलन्. – d) S'_2 K किं (for कं).

प्रातस्त्राणाय राज्ञोऽसावित्याशा यन्निवेशिता ।
अभूदादमखानः स वित्राणोऽप्यात्मरक्षणे ॥ १५७ ॥

भ्रात्रा समं जिघांसुर्मां बहामो द्वैधनिष्ठुरः ।
अहमेकोऽबलस्तन्मे गतिः कान्या त्वया विना ॥ १५८ ॥

नास्त्यस्मान्मे स्वजीवाशा तत् स्वात्मा रक्ष्यतां विभो ।
त्वयि जीवति राज्यस्थे भयं मम न विद्यते ॥ १५९ ॥

कुर्वन्त्यन्ये तदास्कन्दमद्यान्योन्यरणोद्यताः ।
इत्यादिवार्तां श्रृण्वन् स बभूव भयविह्वलः ॥ १६० ॥

इत्थमादमखानेन कदाचिज्ज्ञापितो नृपः ।
ऊचे तं नास्ति मे लाभो राज्ये वा निजजीविते ॥ १६१ ॥

गच्छ कापुरुषाव स्वं विघ्नार्थं किमिहागतः ।
इत्थं निर्भर्त्सितः पित्रा कुद्दीनपुरीं गतः ।
अनुजास्कन्दभीतोऽभूत् स्वरक्षणकृतक्षणः ॥ १६२ ॥

लब्धेऽमुष्मिन् भवति हि सुखं सर्वदैवेति बुद्ध्या
यः संहर्तुं रिपुकृतभियो रक्षणीयोऽवभाति ।
तत् तन्त्रस्थो यदि भवति स स्वात्मरक्षास्वशक्तो
भाण्डत्रासादिव तुरगतः प्रत्युतोपद्रवः स्यात् ॥१६३॥

---

157 e) $S'_{2\cdot7\cdot8}$ $I_{3\cdot5}$ D आधा (S'_8 ध) म–.

158 a) $S'_{3\cdot6}$ (after corr.)$_8$ A C I_{1-5} K B जिघांसुं मां (<सुम्मां mislec. for S'ār. र्मां).

159 b) $S'_{2\cdot8}$ रक्षतां.

161 a) $S'_{2\cdot8}$ $I_{3\cdot5}$ D आधाम–. —c) $S'_{2\cdot6\cdot8}$ A C K लोभो.

162 a) A °वस्थं (for °व स्वं). —d) C B कुद्म (mislec. for S'ār. द्द) दी°.

163 a) C B लुब्धे. —b) B (evid. emend.) -भयो; $S'_{2\cdot8}$ A D तत्तत्रस्थो (S'_8 स्तो).

पित्रास्मदर्थमानीतो ज्येष्ठो द्विष्टो भयाय नौ।
इति क्रुद्धौ सुतौ श्रुत्वा चकितः स नृपोऽभवत् ॥ १६४ ॥

राजा च राजपुत्राश्च तदमात्यपुरोगमाः।
अन्योन्याशङ्किताः सर्वे न निद्रामुपलेभिरे ॥ १६५ ॥

भोगोपचारं संत्यज्य तत्कालं तेषु सेवकाः।
तत्तज्जिह्वोपकारेणारञ्जयन् स्वामिनो निजान् ॥ १६६ ॥

कर्तव्यमादिशत् किंचिद्यत् स भृत्यान् क्षणान्तरे।
अवोचत् कृतकर्तव्यान् किमुक्तं न स्मराम्यहम् ॥ १६७ ॥

स्वहस्ताक्षरसम्पन्नां त्यक्त्वा रीतिं पुरातनीम्।
ज्ञात्वा प्रकृतिवैगुण्यं चक्रे तन्त्रं स मन्त्रिसात् ॥ १६८ ॥

यैरस्मत्सदने क्षिप्तः सोऽयं वैरानलः खलैः।
तच्छमाय कृतोपेक्षा तैस्तैरुभयवेतनैः ॥ १६९ ॥

मद्वर्धितास्ते नश्यन्तु मन्त्रिणस्तनयाश्च मे।
ये मन्नाशेन तुष्यन्ति राज्यलुब्धा जिघांसवः ॥ १७० ॥

इत्युद्विग्नो महीपालः श्वसञ् जपपरायणः।
प्राप्तदुःखोऽशपत् सर्वं यास्यति स्मृतिशेषताम् ॥ १७१ ॥

स्वामी विरक्तस्तत्पुत्रा मिथो वैरपरायणाः।
किमु जीव विधेयं नः कष्टमापतितं महत्।
इत्थं पौरजनः सर्वश्चुक्रोशातितरां तदा ॥ १७२ ॥

---

166 c) MSS and C B यत्तत्° (emended as in text).

169 a) S′₁₉₆ C I₁.₃.₅ K सदनोत्क्षिप्तः. —c) S′₂.₇.₈ A °पेक्षस्तैः; D °पेक्षास्ते.

यवनव्रतमासाप्तौ त्यक्तमांसाशनो नृपः ।
संदध्यौ च कुपुत्रोऽयं यैरानीतो दिगन्तरात् ।
तैः स्वात्मरक्षिभिः सर्वं राज्यं मे बत नाशितम् ॥ १७३ ॥

एकतः सबलौ पुत्रौ नगरे मिलितौ मिथः ।
एकतः पुत्र एकाकी तन्निष्ठा मन्त्रिणः शठाः ॥ १७४ ॥

पुत्रा युद्धं करिष्यन्ति कष्टमापतितं महत् ।
किं तु दूये पुरी सेयं पाल्या कुलवधूरिव ॥ १७५ ॥

मयि जीवति नश्येच्चेत् किं कार्यं जीवितेन मे ।
भक्ताः शक्ता गता भृत्याः कं पृच्छामि करोमि किम् ॥१७६॥

इत्यादिचिन्तासंतापजाताधिव्याधिबाधितः ।
विमुक्तराज्यनिर्बन्धः स निःस्पन्द इवाभवत् ॥ १७७ ॥

सबालवृद्धं नगरं क्षुभ्यत् तत्तत्कुवार्तया ।
सोऽभूदब्धिमिवोद्वृत्तं न संस्थापयितुं क्षमः ॥ १७८ ॥

भोक्तव्यं यन्मया भुक्तं किं भोक्ष्येऽद्य नय द्रुतम् ।
आनीतभोज्यमन्येद्युः शिवभट्टं क्रुधाब्रवीत् ॥ १७९ ॥

---

176 [d]) $S'_{3\cdot6\cdot8}$ A C $I._{3\cdot5}$ K D B किं (for कं).

177 [d]) S'_3 C K B निस्पन्द.

178 [c]) S'_8 A ना°; M (evid. emend.) अ° (for सो); S'_8 A C B इवोद्धृ (mislec. for S' ār. द्वृ) तं. —[d]) MSS and C B समास्था° (emended as in text with Kal. viii, 812); M (evid. emend.) स नास्था°.

179 [a]) S'_2 भं······यन्मया.

अतिचिन्ताकुलो राजा छायायामप्यविश्वसन् ।
दुध्रुक्षून् सचिवाञ् श्रुत्वा श्रद्दधे न स्वजीवितम् ॥ १८० ॥

गतसंविदिव स्थित्वा दिनानि कतिचिन्निजैः ।
स पृष्टोऽप्युत्तरं राजा न कस्मा अप्युदैरयत् ॥ १८१ ॥

पृष्टः प्रकृतिभिः कार्यं संभाष्यानर्थकं वचः ।
रुजार्त इव शय्यायां स सुष्वापैकदालसः ॥ १८२ ॥

नाविदंस्तद्रुजो हेतुं लक्षणं वा चिकित्सकाः ।
जानेऽवाच्यां शुचं हर्तुं बभूवानशनव्रती ॥ १८३ ॥

अत्युन्नतान् सुफलदान् विततोच्चशाखान्
ख्यातान् द्विजप्रियतया शुभमार्गसंस्थान् ।
धाता निपातयति सर्वजनोपयोग्यान्
पृथ्वीधरांस्तरुवरानिव दुष्टवातः ॥ १८४ ॥

अत्रान्तरे त्रयः पुत्रा दोषा इव महोल्वणाः ।
धातुवद् दूषयामासुर्देशं प्रकृतिसप्तकम् ॥ १८५ ॥

मूकप्रायं नृपं तादृगवस्थं द्रष्टुमन्वहम् ।
सशङ्कास्तमुपाजग्मू राजपुत्रा भटोल्वणाः ॥ १८६ ॥

---

180 a) S′$_2$ ...... राजा.

181 c) S′$_8$ संवृष्टो.

185 b) S$_{2\cdot7\cdot8}$ I$_{3\cdot5}$ D महोल्ल्वणाः. —d) MSS and C B देशे (mislec. for S′ār. शं).

186 c) M (evid. emend.) नृपं जग्मू (for उपा°). —d) S′$_{2\cdot7\cdot8}$ I$_{3\cdot5}$ D महोल्ल्वणाः.

राजान्तरङ्गास्तत्पुत्रभीत्यै तादृग्दशं नृपम् ।
द्वाराग्रे स्थापयामासुः सर्वदर्शनदित्सया ॥ १८७ ॥

स्वस्तिवादध्वनिं श्रुत्वा सबाह्याभ्यन्तरा जनाः ।
द्वितीयेन्दुमिवाद्राक्षुः सानन्दा दर्शनागताः ॥ १८८ ॥

श्रुत्वा बहामखानोऽथ चकितोऽन्तिकमागतः ।
गत्वरं लक्षणैर्ज्ञात्वा भूपं भ्रात्रेऽब्रवीदिति ॥ १८९ ॥

जीवत्यस्मत्पिता नैव मिथ्यैवोत्थाप्यते विटैः ।
द्वाराग्रात् पतितो भूमौ मूकप्रायो विचेतनः ॥ १९० ॥

तदुत्तिष्ठ वयं यामः ससंनाहा नृपाङ्गनम् ।
हरामस्तत्तुरंगादि बद्ध्वा दुष्टांश्च मन्त्रिणः ॥ १९१ ॥

नौसेतुबन्धं छेत्स्यामस्तेन नश्यति तेऽग्रजः ।
श्रुत्वेति सोऽभ्यधान्नैवं वक्तुं युक्तं ममाग्रतः ॥ १९२ ॥

स्वप्नेऽप्यनिष्टं यस्याहं नेच्छामि स्वामिनः पितुः ।
तच्छ्रुत्वैकां निशां यावत् तदग्रे सोऽनयच्छुचा ॥ १९३ ॥

तावन्मुमूर्षुं तं श्रुत्वा पितृराज्यजिहीर्षया ।
आदामखानः श्रीजैननगरं सबलोऽभ्यगात् ॥ १९४ ॥

---

187 a) I_4 राजातु (mislec. for S'ār. न्त) रंगास्; $S'_{3\cdot6}$ C $I_{2\cdot3\cdot5}$ K C B ग (mislec for. S'ār. रा) जांस्तु (K स्व) रंगांस्.

188 K om. 188[cd].

189 d) S'_3 C K दूरं (for भूपं). —I_5 om. 189 and 190.

194 c) $S'_{2\cdot7\cdot8}$ $I_{3\cdot5}$ D आधाम–.

भटसंनाहसामग्रीं प्रापय्य पथि गोपिताम् ।
अवसत् स निशामेकां राजधान्यन्तरालये ॥ १९५ ॥

तावद्धस्सनकोशेशः स्वार्थान्धो मोहयन् परान् ।
गृहीतदिव्यः श्रीहाज्यिखानपक्षं समाश्रयत् ॥ १९६ ॥

अथ निष्कासितोऽन्येद्युः सचिवैः सबलोऽग्रजः ।
कुद्दीनपुरं गत्वा धिया भाग्यश्रियोज्झितः ॥ १९७ ॥

ज्येष्ठोऽप्यभूत् कुशलधीरपि भृत्ययुक्तः
शूरोऽप्यनन्यसदृशोद्यमधैर्ययुक्तः ।
प्राप्ते क्षणे किमपि साधु न कर्म कुर्यात्
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ १९८ ॥

स चेत्तन्निशि हत्वैकमहरिष्यत् तुरङ्गमान् ।
अलभिष्यद् ध्रुवं राज्यं बुद्धिः कर्मानुसारिणी ॥ १९९ ॥

अत्रान्तरे हाज्यिखानः कोशेशानुजचोदितः ।
राजधान्यङ्गनं गत्वा तुरङ्गाद्यहरत् पितुः ॥ २०० ॥

यद्वार्तया विनिर्धैर्या येऽभवन् सुतसेवकाः ।
विविशुस्ते ससंनाहाः समदाः कालपर्ययात् ॥ २०१ ॥

---

195 a) M (evid. emend.) भटान् (for भट-). —b) C गोपिता.

196 a) S'_3 C -कोषेशः.

197 a) K C B निष्काशितो; S'_6 C B कुब्म–; D कुद्र–; C -पुरीं.

199 c) S'_6 $I_{2.3.5}$ अभिलष्यद्; S'_3 C K अभिलष्य वरं; K राज्ञां (for °ज्यं).

200 b) $S'_{3.6}$ A C K कोषेशा–.

अभिमन्युप्रतीहारमुखा निन्द्यं यदब्रुवन् ।
तदुत्पिञ्जे तत्फलं तैरचिरेणानुभूयते ॥ २०२ ॥

तद्दिने हाज्यिखानः स सबलो बहिरास्थितः ।
नाशकज्जनकं द्रष्टुं सोत्कोऽपि द्रोहशङ्कया ॥ २०३ ॥

तद्वार्ताकर्णनाद्भीतो निराशः सपरिच्छदः ।
आदामखानो वित्राणो विषुलाटाध्वना ययौ ॥ २०४ ॥

स तारबलमार्गेण गच्छन्निजजनावृतः ।
अन्वागतानुजभ्रातृवीरलोकक्षयं व्यधात् ॥ २०५ ॥

अभिमन्युप्रतीहारमुख्याः शौर्यममानुषम् ।
दृष्ट्वैवादमखानस्य सान्वर्थाभिधमूचिरे ॥ २०६ ॥

यावान् सुय्यपुरे तेन कृतो लोकक्षयः क्रुधा ।
तावानेव कृतस्तत्र सङ्कटे गिरिगह्वरे ॥ २०७ ॥

तावद्धस्सनखानोऽपि राजपुत्रो गुणोज्ज्वलः ।
तूर्णं पर्णोत्समुल्लङ्घ्य कश्मीरान्तरमाययौ ॥ २०८ ॥

ग्रीष्मोष्मशोषिततनुर्विरसश्चिरं य-
श्छायोज्झितो मरुतरुः पथिकैर्निरस्तः ।
वर्षाप्तसेकमहिमा जनतापशान्त्यै
सेव्यः स एव बत पत्रविचित्रशोभः ॥ २०९ ॥

---

204 c) S'_6 C आदम–; $S'_{2.7.8}$ $I_{1-3.5}$ D आधाम–. —d) S'_8 A विषलाटा°; B C विपु (mislec. for Dev. षु) ला°.

205 a) I_1 तरावल–. —c) D B अन्धा° (for °न्वा).

206 c) $S'_{2.7.8}$ $I_{3.5}$ दृष्ट्वैवाधाम–; D दृष्ट्वैवाधम–; B (evid. emend.) दृष्ट्वैवादाम–.

207 a) B (evid. emend.) स्वयं (for सुय्य-). —ab) S'_2 -पुर······क्रुधा. —d) C सङ्कटो.

208 bc) S'_2 -पुत्रो गु······मुल्ल°.

209 d) S'_3 C पुष्प- (for पत्र–).

सहशैवावहन्मध्ये या द्वयोस्तटयोरिव ।
एकपार्श्वगता सर्वा तदाभूद्राज्यनिम्नगा ॥ २१० ॥

इत्थं भ्रातृद्वयस्थित्या विजयावजयक्रमः ।
अन्यथा कल्पितः सर्वैरन्यथाभूद्विधेर्वशात् ॥ २११ ॥

पुत्रः स्यान्नु कदेति शोचति पिता जातेऽतिहर्षाकुल-
स्तद्वृद्ध्यै यततेऽन्वहं विधिशतैश्चिन्तां तदीयां वहन् ।
वृद्धो विघ्नमिव स्वकं स जनकं जानाति लोभान्वित-
स्तद्वित्तातिधिया मरिष्यति कदेत्यन्तः सदा चिन्तयन् ॥२१२॥

अस्मिन्नवसरे राजा कियद्भिः सेवकैर्वृतः ।
श्रुतमश्रुतवत् कर्तुं स निश्चिन्त इवाभवत् ॥ २१३ ॥

दर्शितास्वास्थ्यवाग्बन्धस्त्यक्तपेयाद्युपक्रमः ।
नृपेन्द्रो विरुचिः क्षीणकलश्चन्द्र इवाभवत् ॥ २१४ ॥

प्रजाभाग्यविपर्यासात् सर्वायासाय विच्छवि ।
कल्पान्तरविवत्सोऽस्तं गन्तुं प्रावर्ततातुरः ॥ २१५ ॥

कंपितोष्ठपुटज्ञातमन्त्रपाठः कवेर्दिने ।
द्वादश्यां ज्येष्ठमासस्य मध्याह्ने जीवितं जहौ ॥ २१६ ॥

---

211 [b]) I_1 B (evid. emend.) °याविजयक्रमः.

212 RSs_2 quotes 212 entirely. —[a]) $S'_{2\cdot3\cdot6}$ $I_{3\cdot4}$ C K न (for नु). —[b]) $S'_{2\cdot3\cdot6}$ A I_{1-5} C K D B चिन्तास्तदीया. —[c]) RSs_2 [आ]त्मजः (for स्वकं); S'_3 K RSs_2 स्वं (for स).

213 [c]) S'_7 *pr. m.* marg. कुर्वन् (for कर्तुं°).

214 [b]) S'_7 *sec. m. sup. lin.* gloss माया [=Kaś. māi] (for पेय-). —[d]) S'_6 C -कालचन्द्र; $S'_{2\cdot3\cdot8}$ I_{1-5} K B -कलचन्द्र.

215 [c]) K कल्पान्तरे.

216 [a]) S'_6 C कम्पितौष्ठ-. —[c]) S'_3 K C ज्यैष्ठ-.

प्राणप्रयाणसमये नृपतिः स मयेक्षितः ।
सर्वाङ्गनिर्यत्सौभाग्यभाग्यावृतमुखच्छविः ॥ २१७ ॥

जाने तद्वदने लक्ष्मीसदने स्वेदसंततिः ।
निर्यद्भाग्यतरङ्गिण्याः प्रवाह इव दिद्युते ॥ २१८ ॥

तज्जीवरत्नहरणाज्जातभीतिरिव ध्रुवम् ।
प्राणवायुर्हरन्नायुः क्षणं तूर्णगतिं व्यधात् ॥ २१९ ॥

प्राणान्ते विगलत्सूर्यसोमनेत्रजलच्छलात् ।
निरगान्नरदेवस्य प्रजास्नेहरसो ध्रुवम् ॥ २२० ॥

द्वापञ्चाशतमब्दान् स राज्यं कृत्वा सुखप्रदम् ।
षट्चत्वारिंशवर्षेऽगाद्दिवं श्रीजैनभूपतिः ॥ २२१ ॥

कर्णीरथशवप्रोद्यच्छत्रचामरकैतवात् ।
शुचेव पतितौ नूनं सूर्याचन्द्रमसौ दिवः ॥ २२२ ॥

तत्कालं मन्त्रिणो भृत्या दासा जनपदाश्च ये ।
रुदितास्रुस्रुतिव्याजान्निवापाञ्जलिमक्षिपन् ॥ २२३ ॥

राज्यं षण्णवते वर्षे ज्येष्ठे मास्यग्रहीन्नृपः ।
उत्तरायणकालान्ते तेनैवान्तर्धिमासदत् ॥ २२४ ॥

---

217 d) $S'_{2\cdot3}$ -वृत्त-.

218 a) MSS and C B तद्वदनं (mislec. for S'ār. ने). —b) MSS and C B -सदनं (mislec. for S'ār. ने).

220 b) S'_2 -सो···त्र.

221 b) S'_2 कृत्वा···. —c) $S'_{7\cdot8}$ A I_5 D -चत्वारिंशे.

223 b) M (evid. emend.) जानपदाः.

224 b) I_5 C ज्यैष्ठे; $S'_{2\cdot8}$ A D ज्येष्ठ-. —c) $S'_{3\cdot6-8}$ C I_{1-5} K D B कालान्तः; S'_2 A कालान्ते (as in text). —d) S'_3 C I_3 K [अ]न्तरम् (for °र्धिम्).

अतीतगणितैकोनसप्तत्यब्दायुषं नृपम् ।
वदनावगतप्रोद्यत्कृष्णकूर्चकचच्छटम् ॥ २२५ ॥

शवीभूतं शिवीभूतं शिबिकायां शवाजिरम् ।
रुदन्तो मन्त्रिणो निन्युश्छत्रचामरराजितम् ॥ २२६ ॥

यत्र सुप्ता इवैकत्र भान्ति पूर्वे महीभुजः ।
भर्तृप्रेम्णा धरण्येव निहिता हृदयान्तरे ॥ २२७ ॥

रुदत्पौरजनप्रोद्यत्तारोदननिःस्वनैः ।
बभूवुस्तच्छुचेवारं साक्रन्दमुखरा दिशः ॥ २२८ ॥

क्व प्रयासि प्रजास्त्यक्त्वा हा देव नरजीवित ।
इत्यस्मादपरः शब्दो नाश्रावि नगरान्तरे ॥ २२९ ॥

तत्तदाक्रन्दितैः शश्वत्कर्णसंजातसंस्तवाः ।
शून्येऽप्यश्रृण्वंल्लोकानामाक्रन्दितमथासकृत् ॥ २३० ॥

कर्णीरथादथोत्क्षिप्य पितुः पार्श्वे नरेश्वरम् ।
कृत्वा पटैकसंवीतं भूगर्भाभ्यन्तरे न्यधुः ॥ २३१ ॥

नेत्रनालस्रवद्बाष्पधाराः स्वाचारकारणात् ।
मुखावलोकनं कृत्वा सर्वे मृन्मुष्टिका जहुः ॥ २३२ ॥

---

225 [d]) C -कूर्च्च-.

226 [a]) S'_8 A शिवीभूतं शवी°.

228 [b]) S'_6 (before corr.) C $I_{1\cdot3}$ °त्तारोरोदन-. —[cd]) I_4 °वारमाक्र°.

231 [a]) K D कर्णे-. —[d]) MSS and C B -गर्भा (prob. mislec. for S'ār. र्ता)भ्य°.

232 [d]) $I_{2\cdot4}$ B °ष्टिकां.

भूपतिर्भविता नान्यस्त्वत्समो भूरियं गता ।
इतीव भावनां चक्रुर्मृन्मुष्टिग्रहणच्छलात् ॥ २३३ ॥

जित्वारीन् प्रबलान् रणे क्षितिमिमां बृत्वा धनैः सर्वतो
दत्त्वा कोशमशेषदेशविदिताः कृत्वा पुरीः स्वाभिधाः ।
सप्ताङ्गोर्जितभङ्गिसङ्गिसुभगंकृत्वापि राज्यं चिरं
हित्वा सर्वमहो पटैकरचनामन्ते लभन्ते नृपाः ॥२३४॥

स वैरराज्यदावाग्निसंतप्त इव शीतलम् ।
तद्गुहान्तरमासाद्य सुखनिद्रामिवाभजत् ॥ २३५ ॥

मुखं निद्रावृतस्येव दृष्ट्वा सौभाग्यसुन्दरम् ।
हाज्यिखानोऽकरोत् पित्रे मस्तकं स्वमरात्रिकाम् ॥ २३६ ॥

अपराद्धं मया तात बहुशः पापबुद्धिना ।
मन्ये तेनैव रुष्टस्त्वमसहायो गतो दिवम् ॥ २३७ ॥

सेकन्धरनृपो धन्यो यस्त्वां पश्यति नाकगः ।
धिङ्मां यो वञ्चितो राजन् दर्शनामृतवर्षणैः ॥ २३८ ॥

विहृतं क्वापि नो तात मां विना स्वोत्सवक्षणे ।
वदाद्य कथमेकाकी भजसे स्वर्गसंपदः ॥ २३९ ॥

---

234 a) S'_3 K कृत्वा (for वृ°). —b) S'_3 C कोषम् ; S'_2 पु···भिधाः. —d) S'_2 -रचना···भन्ते.

235 a) M राज्यवैर-. —c) $S'_{3.6.8}$ A C $I_{1.5}$ K तद्गृहा°. —cd) S'_2 त···मिवा°.

236 cd) S'_2 -खानो···रात्रिकम्.

238 a) C शेकन्धर-; B (evid. emend.) सिकन्दर-.

239 b) $S'_{3.6}$ C $I_{3.5}$ K सोत्सव-.

यस्त्वं कोमलशय्यासु नागा निद्रां गणावृतः ।
स कथं भूगणस्यान्तस्तिष्ठस्येकः सशर्करे ॥ २४० ॥

प्रतिमुच्य भवन्तं मे प्राप्तस्य स्वगृहं न कः ।
अशपन्मास्तु मेलापो भूयो वामिति कोपितः ॥ २४१ ॥

औन्निद्र्यं कारितोऽस्माभिः कुपुत्रैः सततं भवान् ।
अद्यैवावसरं प्राप्य दीर्घनिद्रां करोषि किम् ॥ २४२ ॥

ज्वलिताभूत् तनुर्नित्यं सततोदितया यया ।
साद्य किं चलिता राजंश्चिन्ता ते मानसान्तरम् ॥ २४३ ॥

चित्रे वाप्यथ संकल्पे पश्यामि वदनाम्बुजम् ।
शृणोमि ताः कथाः कुत्र तात ते बहुपातकी ॥ २४४ ॥

राज्यं विपद् दिनं रात्रिः सूद्यानं पितृकाननम् ।
जीवनं मरणं नाथ त्वां विना मम सांप्रतम् ॥ २४५ ॥

कुपितो वा प्रसन्नो वा कुतोऽप्यागत्य तात मे ।
दर्शनं देहि नो सोढुं क्षमो विरहवैशसम् ॥ २४६ ॥

विहाय क नु मां तात गतः पादैकसेवकम् ।
द्युतिं न लभते पद्मकोरको भास्करं विना ॥ २४७ ॥

---

240 c) S'_8 A D -गृह- (for गण).

241 b) S'_8 A नु (for न). —c) B (evid. emend.) प्रशपेत्.

243 d) $S'_{2\cdot3\cdot6\cdot7}$ I_{1-5} K B मानसान्तरम्; S'_8 A D मानसान्तरात्. (as in text).

किं रुष्टोऽसि महीपतेऽहमधुना दासोऽस्मि सेवापरो
मौनं मा भज देहि वाक्यमधुनाप्येकं ममात्यादरात् ।
नो जीवामि विना त्वयेति विलपन् कुर्वन् भुजारात्रिकां
साक्रन्दं रुदितं चकार सुचिरं दृष्ट्वा मुखं भूपतेः ॥ २४८ ॥

इति प्रलापमुखरं हाज्यिखानं शुचार्दितम् ।
राजधानीं ततो निन्युर्दिनान्ते मन्त्रिणो बलात् ॥ २४९ ॥

पितुर्लोकान्तरस्थस्य प्रीत्यर्थं तत्क्षणं सुतः ।
सालोरग्राममात्मीयं न्यधात् तत्र शवाजिरे ॥ २५० ॥

ग्रीष्मपानीयदानेन तृप्त्यर्थं तत्प्रदायिनाम् ।
बह्वनां प्रददौ क्षोणीमहार्यां धर्मसात्कृताम् ॥ २५१ ॥

राज्ञानेन विना शून्यां नास्मि क्ष्मामीक्षितुं क्षमः ।
इतीव दुःखात् तत्कालं स्वमब्धौ रविरक्षिपत् ॥ २५२ ॥

संध्याभ्रशाटीमुत्सृज्य रोदनार्थमिवेशितुः ।
शुचेव विस्तृतं चक्रे तमःकचचयं क्षितिः ॥ २५३ ॥

आशाप्रकाशके वन्द्यदर्शने गुणिबान्धवे ।
परलोकं गते तस्मिन् मण्डले प्रोदभूत् तमः ॥ २५४ ॥

---

248 a) S'_6 C त्वम् (for [अ]हम्).

249 c) D B राज्य–.

250 c) S'_3 I_2 मालोर–.

252 a) S'_6 C $I_{3.5}$ K शून्यं.

253 a) S'_2 सन्ध्या…शा°. —c) B (evid. emend.) विसृतं.

254 a) S'_3 C K -प्रकाशकैर् . —ab) S'_2 -प्रकाश…णि–.

तद्दिने रन्धनाभावाद् गृहधूमविवर्जिता ।
शोकमूका निरुच्छ्वासा निर्जीवेवाभवत् पुरी ॥ २५५ ॥

शवागारोपरि शिलां स्फाटिकीं रचनोज्ज्वलाम् ।
दीर्घां सर्वोन्नतां राज्ञो मूर्तिं परिणतामिव ॥ २५६ ॥

घनोत्कण्ठदिदृक्षार्तरुदल्लोकाश्रुबिन्दुभिः ।
यत्र मुक्ताफलैः पूजा लसतीवोपरि प्रभोः ॥ २५७ ॥

पौराः शुक्रदिने भान्ति यत्रान्तःप्रतिबिम्बिताः ।
राज्ञेव निकटं नीताः कुतूहलतयात्मनः ॥ २५८ ॥

कवाटविकटं वक्षो मुखं पूर्णेन्दुसुन्दरम् ।
शुकवद्दीर्घनासाग्रं नेत्रे कमलकोमले ॥ २५९ ॥

भ्रूलेखे लोमशे भालं प्रभालम्भितलक्षणम् ।
सा बुद्धिस्ते गुणास्ताश्च राज्यकार्यविधानताः ॥ २६० ॥

स्मारं स्मारं जनः सर्वो राज्ञः पुर इव स्थितः ।
पर्यन्तनीरसासारं संसारं निन्दते न कः ॥ २६१ ॥

---

255 c) S′₂ शोक…सा.

256 d) S′₂ मू…मिव.

—After 256 S′₂ ins. :

*4 गोलाभसिंहभूपालो कालेनाकृष्य लम्पटः ।
अकरोत् स्वोपभोगार्थं नीत्वा तां स्फाटिकीं शिलाम् ॥

[S′₂ स्वोपभगार्थं (emended as above)].

258 d) M (evid. emend.) कुतूहलितया°.

260 b) S′₆ C $I_{1\cdot3-5}$ -लम्बित–.

ज्योत्स्ना पूर्णसुधाकरस्य कुसुमोत्कर्षो वसन्तस्य यत्
सौभाग्यं शरदि प्रसन्ननभसो नार्या नवं यौवनम् ।
राज्ये चैव विवेकिनो नरपतेर्यत् सर्वसौख्यप्रदं
धाता तत् कुरुते स्थिरं यदि जने स्वर्गार्जने न स्पृहा ॥ २६२ ॥

बाल्ये पित्रा वियोगो वरसचिवभियो भ्रातृभृत्यैर्विरोधः
प्राप्ते राज्ये प्रवासो बहिरथ समरोऽप्यग्रजेनातिकष्टः ।
धात्रेयेभ्योऽथ चिन्ता तदनु निजसुतैर्याविदायुश्च बाधा
संसारे सर्वदाघुस्तुतिकृति भविनां नित्यदुःखां स्थितिं धिक् ॥२६३॥

नूनं जातकयोगेन पुत्रेभ्यो दुःखमन्वभूत् ।
अभूदस्य सुतस्थाने भौमो यत् पापवीक्षितः ॥ २६४ ॥

पण्डिताः कवयस्तस्य वाचाला येऽभवन् सदा ।
त एव तं विना दृष्टाः पौषे मूकाः पिका इव ॥ २६५ ॥

याभूत् सरस्वतीनेत्रनिभा विकसिता सदा ।
ग्रन्थ्या संकुचिता साभूद् बुद्धपुस्तकसंततिः ॥ २६६ ॥

तर्कव्याकरणादीनां शास्त्राणां ये श्रमं व्यधुः ।
ते राजरञ्जनायालं देशभाषाश्रमं व्यधुः ॥ २६७ ॥

राज्ञा ये बहुमानिता गृहसुखश्रीमण्डिताः पण्डिताः
शास्त्राभ्यासमहर्निशं प्रविदधुर्ग्रन्थार्जनाद्युत्सुकाः ।
पृष्टाः किं पठितेति ते प्रतिजगुः श्रीजैनलाभे गते
कुत्र व्याकरणं क्व तर्ककलहः कुत्रापि काव्यश्रमः ॥ २६८ ॥

---

263 c) $I_{3 \cdot 5}$ D बाधा:.
266 d) S'_8 A -संहति:.
267 cd) S'_2 ते···.
268 b) S'_2 शास्त्राभ्यास·· भ्युत्सुका:; S'_8 A °भ्युत्सुका:; I_5 D °त्युत्सुका:. —c) $S'_{2 \cdot 3 \cdot 6-8}$ A C I_{1-5} K -भूपे; D B -लाभे (as in text). —d) S'_2 व्याकर···र्क–.

योऽभूत् सर्वकलानिधिः शुभविधिर्दाताभिगम्यो गुणी
काव्यज्ञो बहुभाषया गुणिरतः कारुण्यपुण्याकुलः ।
सोऽयं हन्त समीक्ष्यतेऽवनितले धिक् पापिनोऽस्माञ् शठान्
ये जीवन्ति शुचा न यान्ति विपिनं संसारतृष्णाजिताः ॥२६९॥

हारेणेव विनाङ्गनाकुचतटी शास्त्रेण हीनेव धीः
सूर्येणेव विना प्रफुल्लनलिनी तारुण्यहीना तनुः ।
चन्द्रेणेव विना यथैव रजनी पत्या विना भामिनी
येनैकेन विना नृपेण न बभौ कश्मीरराज्यस्थितिः ॥२७०॥

श्रीमत्तर्कादिविद्याभ्यसनरसलसद्गर्वसर्वप्रवीण-
प्रेक्षोद्यद्दानमानोचितविचितयशोभूषिताशेषदेहः ।
श्रीजैनोल्लाभदीनो नरपतितिलकः सर्वशास्त्रप्रवीणः
कश्मीरान् योजयित्वा दिवमपि स गतो योजनायेव नष्टाम् ॥२७१॥

इत्यादि संततं सन्तो वदन्तोऽत्यन्तचिन्तया ।
नितान्ततान्तहृदया विश्रान्तिं नाभजन्त ते ॥ २७२ ॥

दृष्टो रम्यश्चिरमुपवने वंशवाटो जनैर्यो
नानावर्णैर्नवतृणगणैर्भूषितो भूरिपत्रः ।
तत्रान्योन्याहननजननात् तादृगभ्युत्थितोऽग्नि-
र्येनैकान्तादुपवनगतं सर्वमेव प्रनष्टम् ॥ २७३ ॥

या कारकसभा भव्याभवच्छ्रीजैनभूपतेः ।
वर्षेणैकेन तच्छापात् सर्वा स्वप्नोपमाभवत् ॥ २७४ ॥

---

271 b) S′$_3$ -मानो···चितयशो-.

273 c) S′$_6$ C -स्वजनहननात् (for °हननजननात्).

क्षुब्धे राज्यमहाम्भोधौ भूपप्रमयवायुना ।
तत्तत्सेवकरत्नौघः शतैकीयोऽवशिष्यत ॥ २७५ ॥

प्रभवत उत यावत् स्वप्रभुः सौख्यदाता
विदधति खलु तावत् सेवकास्तस्य मानम् ।
इह वसति वसन्तो यावदेव स्वनन्तो
मधुकरपिकभेकास्तावदेवाद्रियन्ते ॥ २७६ ॥

केचिदप्यवशिष्टा ये सेवकास्तस्य भूपतेः ।
तेऽप्यनन्तरविज्ञानात् तृणतूलोपमां गताः ॥ २७७ ॥

इति पण्डितश्रीवरविरचितायां जैनराजतरङ्गिण्यां
जैनशाहिवर्णनं नाम प्रथमस्तरङ्गः ॥ १ ॥

---

276 [c]) $S'_{2\cdot6\cdot8}$ A ⌊आ⌋श्रियन्ते.

277 [d]) S'_7 (before corr.) C B -तुल्यो° (for तूलो). —After 277, $S'_{2\cdot7\cdot8}$ I_{1-5} D ins. इति जैनशाहिस्वर्याणम् (I_3 ins. श्री- before जैन-; S'_8 -शाह-; I_1 D °नं; I_2 °न).

Colophon.—S'_4 fol. missing. D ins. श्री- before पण्डित-; $S'_{2\cdot8}$ A transp. पण्डित- and -श्रीवर-; $S'_{2\cdot8}$ A om. -वि-; $S'_{2\cdot7\cdot8}$ $I_{2\cdot4\cdot5}$ D om. -राज-; S'_8 A -शाह-. —After Colophon $S'_{2\cdot8}$ conclude with

नन्देन्दुनन्दहिमरश्मिमितेष्वमीषु
श्रीविक्रमार्कनृपतेः परिवत्सरेषु ।
श्रीजैनराजतटिनीमलिखत् स राज्ये
श्रीयुद्धवीरनृपतेः खलु शङ्कराख्यः ॥

S'_6 concludes with सं ४९८९ मार्गवद्यष्टम्यां कवौ चित्रितम् ।

द्वितीयस्तरङ्गः

वन्दे विश्वमयं देवं सर्ववाङ्मन्त्रनायकम् ।
यदंशवर्णनस्तुत्या तत्पूजाफलभाङ् न कः ॥ १ ॥

पादो दक्षिण एष यच्छति पदं यत्रैव नाट्येच्छया
तत्रैवेच्छति नाम वामचरणः सञ्चारसंस्कारतः ।
इत्थं मण्डलमण्डितां समपदां चारीं नरीनर्ति यः
सन्ध्यायां स सदा ददातु सुखितां देवोऽर्धनारीश्वरः ॥२॥

अथ हैदरशाहाख्यां ख्यापयन् मुद्रिकार्पणैः ।
हाज्यिखानोऽग्रहीद् राज्यं स ज्यैष्ठप्रतिपद्दिने ॥ ३ ॥

अर्घ्यार्चो दक्षिणानन्दी तत्तत्सुकृतसूचकः ।
बभावर्थिजनानन्दी स राज्यग्रहणोत्सवः ॥ ४ ॥

शुद्धांशुकचितै राजवल्लभैः सुखशालिभिः ।
बभौ सेकन्धरपुरी पूर्णा द्यौरिव तारकैः ॥ ५ ॥

राजधान्यङ्गने हैमं सिंहासनमशिश्रियत् ।
अतितीक्ष्णो नवो राजा मेरोस्तटमिवांशुमान् ॥ ६ ॥

---

1 [d]) S'_6 नरः.
2 [b]) S'_6 and S'_8 marg. संस्कारसञ्चारितः. —[c]) S'_8 K C -मण्डितं समपदं चारी.
3 [a]) $S'_{2\cdot7\cdot8}$ $I_{3\cdot5}$ D हैद्धर-. —[d]) D B ज्येष्ठ-.
5 [a]) $I_{2\cdot5}$ A D शुभ्रांशु-. —[c]) C शेकन्धर-; I_1 B (evid. emend.) सिकन्दर-. —[d]) K तारकैः···.

बभतुर्भूपतेरग्रे स्थितौ तस्यानुजात्मजौ ।
इन्दोः पुरस्तादुद्यन्ताविव शुक्रबृहस्पती ॥ ७ ॥

राज्ञो हस्सनकोशेशस्तद्राज्यतिलकं ददौ ।
सौवर्णं पुष्पपूजाढ्यं यदृच्छाविहितव्ययः ॥ ८ ॥

स हाज्यिहैदरनृपो घनकालोर्जितप्रभः ।
धाराधर इव धरां दधार धरणीधरः ॥ ९ ॥

सोऽनुजं स्वसमं भूमिनायकः सुक्षिते रसात् ।
बह्रामखानं नाग्रामदेशे तं स्वामिनं व्यधात् ॥ १० ॥

क्रमराज्येक्षिकादेशे स्वामिनं स्वसुतं व्यधात् ।
चिरान्निजसुतप्राप्त्या यौवराज्यसुखादपि ।
पितृशोकहतोऽप्यन्तर्विश्रान्तिमभजन्नृपः ॥ ११ ॥

तस्माद् विहितसेवास्तद्देशाधीशत्वराजिताः ।
प्रसादमतुलं प्रापू रावत्रलौलकादयः ॥ १२ ॥

अन्येऽप्युच्चावचान् ग्रामान् सेवका नवभूपतेः ।
पूर्वसेवानुसारेण प्रसादं प्रतिपेदिरे ॥ १३ ॥

राजा राजपुरीसिन्धुपत्यादीन् दर्शनागतान् ।
प्रत्यमुञ्चदलंकृत्य पार्थिवोचितया श्रिया ॥ १४ ॥

---

8 a) S'_6 A -कोषेशः. —c) $S'_{2\cdot6\cdot8}$ A I_{1-4} सौवर्ण-.

11 S'_3 K C hapl. om. 11^{ab}.

12 a) MSS and C B -से (B मे mislec.) वास्तु- (mislec. for S'ār. स). —d) $S'_{3\cdot6}$ C I_{1-5} K D B -लवका°; $S'_{2\cdot8}$ A -लोल्का°.

सौवर्णकर्तरीबन्धसुन्दरा नृपमन्दिरे ।
ननन्दुर्मन्त्रिसामन्तसेनापतिपुरोगमाः ॥ १५ ॥

पितृशोकार्पितानर्घपट्टांशुकविभूषणाः ।
विचेरुः सेवकास्तस्य तदन्तिकगताः सदा ॥ १६ ॥

आसीद्राजा च सततं प्रकामं दोषनिष्क्रियः ।
स्वपक्षपालने सक्तः सन्ध्याक्षण इवोडुपः ॥ १७ ॥

पक्षपातेक्षणापत्यप्रतिपालनतत्परः ।
लोभक्रोधविरक्तात्मा मोहान्धक्षपणाक्षमः ॥ १८ ॥

सैदनासिरपुत्रो यः स मेय्याहस्सनाभिधः ।
अहो तत्पितृवत् पूज्यो बहुरूपादिराष्ट्रभाक् ॥ १९ ॥

उत्सवादिसदाचारसत्कारेषु सभान्तरे ।
त एव प्रथमं मान्यास्तद्राज्ये सर्वदाभवन् ॥ २० ॥

एतत्पक्षाश्रयान्मद्रङ्गाव्ययं बलवानिति ।
मेय्याहस्सनपुत्र्याः स पाणिं पुत्रमजिग्रहत् ॥ २१ ॥

हत्वा ज्यंशरमार्गेशात्स ज्यहाङ्गिरमार्गपे ।
बाङ्गिलं प्रददौ राजा तद्गुणाकृष्टमानसः ॥ २२ ॥

---

18 a) S'_3 C I_{1-5} K D B पक्षपातो°; $S'_{2\cdot6\cdot8}$ A पक्षपाते° (as in text); S'_7 (illeg.) पक्षपाते°. —d) MSS and CB –क्षपणक्षम: (emended as in text).

19 b) $S'_{2\cdot3\cdot6\cdot8}$ A C I_2 B मेर्जा–; S'_7 $I_{1\cdot3-5}$ K D मेय्या– (as in text).

21 a) C B एतान्प (mislec. for त्प)क्षा°. —c) $S'_{2\cdot3\cdot6\cdot8}$ A C I_2 B मेर्जा–; K मेजी–; I_5 से (mislec. for S'ār. मे)य्या–.

22 a) S'_8 ज्यंशिर–; S'_6 C $I_{4\cdot5}$B ज्यंसर–; K ज्यंसन– (mislec. for S'ār. र). —ab) C मार्गेशात्म (mislec. for S'ār. त्स).

चक्रे कृतापकाराणामप्यनुग्रहमेव सः ।
प्रणम्य सिंहः पूर्वं हि हन्ति दन्तिगणं ततः ॥ २३ ॥

गूढभावो महीपालस्तत्तच्चेष्टां चरैर्विदन् ।
तदा हस्सनकोशेशं संमान्याधिकृतं व्यधात् ॥ २४ ॥

प्रतापतापितारातिश्छन्नकोपो महीपतिः ।
भस्मान्तरगतो वह्निरिवासीत् परमृत्युदः ॥ २५ ॥

कांश्चित् संनमयन् कांश्चित् संधाय प्रतिपालयन् ।
कांश्चिदुन्मूलयन् नीत्या नानावृत्तिरभून्नृपः ॥ २६ ॥

प्रसादकृत् स भृत्यानामभूद् वैश्रवणोपमः ।
मनागप्यपराधेन बभूवान्तकसंनिभः ॥ २७ ॥

पयःपितृसुतामात्याः फिर्यडामरकादयः ।
विचार्यासहनं कोपे बभूवुर्वृतयन्त्रणाः ॥ २८ ॥

चौरा जाराश्च रिपवो भृत्या दुर्नयकारिणः ।
अहीव जम्बुकाश्चेरुस्तद्राज्ये भयविह्वलाः ॥ २९ ॥

---

24 c) S'_3 C -कोषेशं.

25 ab) B °रातिच्छ°.

26 a) C D B सन्नभयान्. —c) S'_3 $I_{3.5}$ C B उन्मीलयन्.

27 d) C ⌊अ⌋न्तः (*sic*).

28 a) M S′ S′ (execpt M) C B –कृता° (doubtfully emended as in text with M) $S'_{2.3.6.8}$ A C I_{1-5} K C B °मात्य–. —c) I_5 K C कोपं (mislec. for S′ār. पे). —d) K वृत्त–.

29 b) S'_6 $I_{2.4}$ C B दुर्णय–; I दुर्नेय–.

श्रीजैननृपतौ शान्ते मूर्धारूढशिलोपमे ।
अबाधन्त पुनर्लोकं व्याला इव नियोगिनः ॥ ३० ॥

विशुद्धपक्षो रुचिरञ्जिताशः
कलाकलापो विबुधोपजीव्यः ।
पूर्णेन्दुनानेन समोऽस्ति कोऽन्यः
कलङ्क एको यदि नास्य दोषः ॥ ३१ ॥

श्रुत्वासद्दूषणाः सोऽयं सर्वान् हन्तीति कद्धिया ।
ऐक्यं पुरप्रवेशार्थं मिथस्तद्दूषका व्यधुः ॥ ३२ ॥

कुकृत्यप्रेरकः पापश्चान्यायोत्कोचहारकः ।
प्रियोऽभवद्दिवाकीर्ती राज्ञो रिक्तेतराभिधः ॥ ३३ ॥

कामीव व्यसनं नित्यमुपालब्धोऽपि भूभुजा ।
यं त्यक्तुं नाशकद्राजा संस्तवाढ्ढृदयङ्गमम् ॥ ३४ ॥

संचितार्थः प्रजायासैर्मुद्रादानादिनामभिः ।
आसीत् स्वकार्यकुशलः ख्यातो धूर्तः स नापितः ॥ ३५ ॥

---

30 c) $S'_{3\cdot8}$ C I_{1-5} K D B मूर्धगू (mislec. for S'ār. धारू) ढ– ; S'_7 marg. *sec. m.* gloss मूर्धानमारूढा या शिला उपलः इव । जैननृपतिर्हि दुष्टानां नियोगिनां मूर्धारूढशिलातुल्योऽभूत् .

31 a) B (evid. emend.) विरुद्ध–. —d) S'_3 C I_{1-5} K [अ]स्ति (for °स्य). —c) D [अ]न्येन (for °नेन).

32 b) S'_7 *int. lin. pr. m.* gloss कुत्सिता धीस्तया (for कद्धिया). —c) $I_{2\cdot4}$ C पर– (for पु). —d) S'_7 तद्दय्रू (*sic*) षका; A C K तद्भू (mislec. for S'ār. दू) ष°.

33 d) रिक्तेतर– (=पूर्ण–, cf. II. 52).

35 b) S'_3 C I_{1-5} K D B -कर्म– (for नाम).

रुद्धं चित्तेन काठिन्यं माधुर्यं जिह्वया धृतम् ।
शठस्य यस्य सततं लोकोद्वेजनकारकम् ॥ ३६ ॥

येनाधिकाराद् देशेऽस्मिन् प्रजाः कुकर्मभिः कृताः ।
दुःखिता रक्षिताः पूर्वं पुत्रवच्छ्रीमहीभुजा ॥ ३७ ॥

मीरेंसेखारनामापि बुद्धिमान् प्रथितो भुवि ।
नितरामपकोपाग्रे राज्ञः साचिव्यमादधे ॥ ३८ ॥

वात्सल्याद् विहितो राज्ञा स चुटगणनापतिः ।
समस्तकार्यस्थानेभ्यो भुङ्क्ते राजोपजीविकाम् ॥ ३९ ॥

यो वर्षणैकनिरतः शिखिहर्षहेतुः
संदर्शितातुलफलः कृतकर्षणेषु ।
जातोऽपि यः प्रतिदिनं हृतसर्वतापः
सोऽयं घनस्तुदति दुःसहवज्रपातैः ॥ ४० ॥

दुर्मन्त्रिप्रेरितो राजा व्यधान्मदविचेतनः ।
प्रजाभाग्यविपर्यासाद् विवेकविगुणाः क्रियाः ॥ ४१ ॥

सेकन्धरपुरीपार्श्वे स्वनिर्माणचिकीर्षया ।
अमृतोपवने प्रांशुतरुच्छेदनमादिशत् ॥ ४२ ॥

---

36 d) S'_7 -कारिणम् (*sic*).

37 b) S'_2 प्रजा···कु°.

38 a) S'_7 मेरेसेका (*sup. lin.* खा as in text) र–; MSS (except S'_7) and C B मे (B मी) रभोखार–. —c) S'_6 (marg.)$_8$ A विरराम स (for नितरामप°).

39 b) $S'_{3.6}$ C $I_{1.3}$ मचुर्य्या–; S'_6 (marg.)$_8$ A स चुटो; I_4 मचुट्ठ–; I_5 मशट्ठ– (for स चुट–). —d) D युक्तो (for भुङ्क्ते). —d) $S'_{2.7}$ D -जीविनाम् (*sic*).

42 a) K C शेकन्धर–; B (evid. emend.) सिकन्दर–; $S'_{2.3.7}$ C I_{1-5} K D B -पार्श्व–; $S'_{6.8}$ A -पार्श्वे (as in text). —b) C स (for स्व).

छिन्नांस्तान् पुष्पितान् वृक्षान् समीक्ष्यैतत्समुत्थिताः ।
तच्छुचेव व्यधुस्तत्र रोलम्बा रोदनध्वनिम् ॥ ४३ ॥

तन्निर्माणग्रहोऽन्येषां न केषां प्रत्यभाद्धृदि ।
अग्रे दिनपतेर्दीपप्रकाशनरसोपमः ॥ ४४ ॥

तद् ब्रूमः क्षीव एवैष करोतीति विनिश्चितम् ।
स्वाहितापक्रियाहेतोर्घूर्णितं तं नृपं व्यधात् ॥ ४५ ॥

बहूनामथ लोकानां नापितोऽवयवच्छिदाम् ।
भूपालादाप्तनिर्देशः क्षीबतोऽपि तथाकरोत् ॥ ४६ ॥

नापितो निर्घृणः पापी क्रोधी क्रकचपाटितान् ।
पैतृकांष्ठक्कुरादींश्च कारयामास भूपतेः ॥ ४७ ॥

चलितानग्रजभ्रातुः स्वावनायान्तिकं पथि ।
रुद्ध्वा शूलेऽधिरोप्यान्यान् पञ्चषानप्यघातयत् ॥ ४८ ॥

जीवन्तो गणरात्रं ते स्वकुटुम्बोक्तवेदनाः ।
पौरैः साश्रुजलैर्दृष्टाः शूलपृष्ठे पुरान्तरे ॥ ४९ ॥

---

44 ab) S'_2 °न्येषो प्रत्यभा⋯द्धृदि. —c) S'_6 (marg.)$_8$ A अग्रे: (for °ग्रे); S'_6 (after corr.) C -दीप्र-.

45 b) S'_8 A (gram. assim.) विनिश्चित:. —c) MSS and C B °हितापि (doubtfully emended as in text with M). —d) $S'_{3\cdot6}$ C $I_{1\cdot3}$ K पूर्णितं (for घू).

46 c) $S'_{2\cdot6}$ (marg.)$_8$ A D भूपालवाक्यनिरत: (for °लादाप्तनिर्देश:. Thus marg. in S'_8).

47. From निर्घृण: पापी in 47[a] up to °तृपुरान्तरे in 190[d] lost on missing folios in S'_7. —a) $S'_{2\cdot8}$ पाप:. —c) I_5 D पैत्रिकान्. —d) S'_2 भूपति:.

48 b) $S'_{6\cdot8}$ A ⌊अ⌋न्तिकात्. —d) S'_6 (marg.)$_8$ A पञ्चशान्; C अघातयन्.

वैडूर्यभिषजं ज्ञात्वा दूषकं परपक्षगम् ।
अमुञ्चद् बन्धनात् कृत्तभुजनासोष्ठपल्लवम् ॥ ५० ॥

तथैव नोनदेवादीन् शिखजादादिसंयुतान् ।
पञ्चाषानकरोत् कृत्तजिह्वानासैकहस्तकान् ॥ ५१ ॥

विरुद्धावयवच्छेदशूलारोपणकर्मणा ।
स पूर्णनापितः पापी बभूव नरशौनिकः ॥ ५२ ॥

आचार्यपुत्रो जय्याख्यस्तथा भीमाभिधो द्विजः ।
छिन्नाङ्गौ स्वं यथाशक्तौ वितस्तायां समौज्झताम् ॥ ५३ ॥

मद्यलीलाव्यसनतस्तद्राज्ये बाह्यदेशवत् ।
आसीन्माद्वीकवद्गौडी देशेऽत्र प्रचुरा सुरा ॥ ५४ ॥

तन्मद्यरसिके राज्ञि सर्वभोगपराङ्मुखे ।
खण्डादीक्षुविकारास्ते सुलभा न गुडोऽभवत् ॥ ५५ ॥

खुज्याब्दुल्कादिर्यस्यान्तेवासी गीतगुणाम्बुधेः ।
मल्लाडोदकनामासीत् तन्त्रीवाद्यगुरुर्नृपे ॥ ५६ ॥

---

50 a) C वैदू (mislec. for S'ār. डू)र्य–.

51 b) B शिखजाजा (by syll. contam. for दा) दि–. —c) $S'_{2\cdot8}$ A पञ्चशान् .

52 a) $S'_{2\cdot8}$ A -च्छेदात् . —c) $S'_{2\cdot8}$ A पापो. —d) $S'_{2\cdot3\cdot8}$ A $I_{3\cdot5}$ D -सौनिकः.

53 d) $S'_{2\cdot8}$ A समुज्झताम् ; $I_{4\cdot5}$ D समोज्झताम् .

54 a) S'_2 माध्वीक–; K मांद्दीक– (for माद्वींक).

55 c) S'_6 (after corr.)$_8$ इक्षु–.

56 a) S'_8 $I_{3\cdot5}$ A C D खुज्याब्दोल–. —c) $S'_{2\cdot3\cdot6}$ (after corr.)$_8$ A C K -डौदक–; I_4 ओदक–. —d) $S'_{2\cdot8}$ A hapl. om. words beginning with °त् तन्त्री and ending with [आ]सी in 57c; K तंत्रीवाद ··· नं विना.

कूर्मवीणादिवाद्यानां प्राप्यास्माद् गीतकौशलम् ।
आजीवं क्षणमप्यासीन्न तन्त्रीवादनं विना ॥ ५७ ॥

तन्त्रीवादविशेषज्ञो राजा व्यञ्जनधातुभिः ।
स्वयं वादननिष्णातो वैणिकानप्यशिक्षयत् ॥ ५८ ॥

रबाबवाद्यरचनैर्बह्लोलाद्यैश्च गायनैः ।
राज्ञः प्रसादात् किं नात्तं तत्तत्कनकवर्षिणः ॥ ५९ ॥

शौचालयस्थैः सुरतालयस्थै-
भूतैरिवान्तश्छलनप्रवीणैः ।
वशीकृतो यः पिशुनैर्नरेशो
बिभेति तस्मान्ननु को न मर्त्यः ॥ ६० ॥

रहःस्थितं नृपं जातु पिशुनः पूर्णनापितः ।
अपृच्छत् प्रेरितोऽमात्यैश्चिकीर्षां पूर्वमन्त्रिषु ॥ ६१ ॥

भवत्पक्षविनाशो यैः कृतस्त्वत्पितृमन्त्रिभिः ।
प्राप्तराज्येन भवता त एव प्रबलीकृताः ॥ ६२ ॥

अमी हस्सनकोशेशमुख्यास्त्वदनुजादृताः ।
सोऽपि धूर्तो धिया तत्तद्वशीकारसमुद्यतः ॥ ६३ ॥

---

57 b) D B [अ]स्मद्-.

59 a) $S'_{2.8}$ A रबाबु–. —d) $S'_{2.8}$ A न तत् (for तत्तत्°).

60 RSs_2 quotes 60 entirely. —a) M (evid. emend.) °स्थ: सुरतालयस्थ:. —b) RSs_2 छलनाप्रवृत्तैः. —c) RSs_2 यैः. —d) $S'_{3.8}$ A C $I_{3.5}$ RSs_2 नु (for न).

62 a) S'_2 (gram. assim.) यः.

63 S'_2 hapl. om. ab. —a) S'_6 (before corr.)$_3$ -कोशेष–. —b) B त (mislec. for Dev. त्व) द्-.

असमर्थशरीरस्त्वं भ्रात्रर्पितभरः सदा ।
तत्ते सपुत्रभृत्यस्य न नाशो भविता चिरात् ॥ ६४ ॥

श्रुत्वेत्यवोचन्मत्पुत्रः सत्यं मदनुजाऽप्रियः ।
किं तु ब्रवीमि येनायं रक्ष्यते कुटिलाशयः ॥६५॥

उग्रो मदग्रजस्तीक्ष्णो मत्पदाक्रान्तिसूद्यतः ।
अनेन क्रष्टुमिच्छामि कण्टकेनेव कण्टकम् ॥ ६६ ॥

कार्यापेक्षावशादेतं रक्षामि न तु गौरवात् ।
श्रुत्वेति द्वित्रान् महतो व्यधाज्ज्ञातचिकीर्षितान् ॥ ६७ ॥

अत्रान्तरेऽग्रजो राज्ञो मद्रदेशाद् बलान्वितः ।
भ्रातृराज्यजिहीर्षायै पर्णोत्सं प्राप दर्पितः ॥ ६८ ॥

तच्छ्रुत्वा नृपतिः क्रुद्धस्तान् समानीय पैतृकान् ।
अवोचत् किं नु कर्तव्यं ते तमित्यूचुरुत्तरम् ॥ ६९ ॥

तरिकासेतुबन्धं तं छेत्तुं यामोऽस्य तिष्ठतः ।
अन्यथा दुःसहः प्राप्तस्तदाज्ञा दीयतां विभो ॥ ७० ॥

श्रुत्वेति कातरं वाक्यं तेषां दुर्लक्ष्यचेष्टितः ।
तत्पक्षपातिनो ज्ञात्वा तथेति प्रत्यपद्यत ॥ ७१ ॥

प्रतिमुच्य नृपस्तान् स रात्रावित्यब्रवीन्निजान् ।
आनीय फिर्यडारादीन् मन्त्रिणः कार्यनिष्ठुरान् ॥ ७२ ॥

---

65 b) S'_8 A °जप्रियः.

66 a) C B (erroneously) °नुज° (for ग्रज).

69 b) D पैत्रिकान् . —d) S'_6 (marg.)$_8$ A तामित्थम् (for ते तमि°).

70 a) MSS and C B तटिका (emended as in text with M).

इयं हस्सनकोशेशचक्रिका यत् समागतः ।
एतद्वधेन नष्टः स्यादन्यथाभ्यन्तरं विशेत् ॥ ७३ ॥

तत्प्रातरेते हन्तव्या युक्त्यानीयेति तान्नृपः ।
छन्नकोपः सेवकान् स्वानकरोत् कृतसंविदः ॥ ७४ ॥

राज्ञा प्रातः समाहूय विसृष्टानुचरा गृहात् ।
सर्वे हस्सनकोशेशमुख्यास्तूर्णं समाययुः ॥ ७५ ॥

कम्पते तुरगस्त्रस्तो ज्ञातवृत्त इवाचलः ।
ताडनैर्बहुशः सास्रुः प्राप कष्टान्नृपाङ्गनम् ॥ ७६ ॥

महार्हास्तरणस्थांस्तान् राजकर्तव्यताकुलान् ।
कोशेशहस्सनमेरकाकादीन् पञ्चषान्नृपः ॥ ७७ ॥

भृत्यैः संज्यरमेराद्यैराज्ञप्तैर्मण्डपान्तरे ।
छलाद्विश्वासमुत्पाद्य राजधान्यन्तरेऽवधीत् ॥ ७८ ॥

किं द्रोह इति यावत् स कोशेशोऽभ्युत्थितोऽब्रवीत् ।
द्रुघणैकप्रहारेण तावत् प्राणैर्व्ययुज्यत ॥ ७९ ॥

---

73 a) S'_6 (before corr.) C K -कोषेश-. —b) S'_3 (gram. assim.) समागता.

75 a) B प्राप्तः (mislec. for S'ār. तः); M (evid. emend.) समाहूताः. —c) S'_6 (before corr.) C -कोषेश-.

76 c) C सास्रः; $S'_{2.6.8}$ A K om. सास्रुः. —d) $S'_{2.6.8}$ A कष्टान्नृप-गृहाङ्गनम् ; K कष्टान्नृपयोग…नम्.

77 c) S'^3 K C कोषेश-. —c) B (evid. emend.) -मीर-. —d) $S'_{2.8}$ A K -काकाद्यान् ; S'_8 A D पञ्चशान् .

78 a) $I_{2.4}$ B (evid. emend.) संजर-; S'_3 C K ज्यंस (S'_3 श) र-; $S'_{2.6.8}$ A ज्यंशिर- ; B (evid. emend.) -मीरा°. —b) $S'_{6.8}$ A मण्डला ($S'_{6.8}$ marg. पा) न्तरे.

79 b) $S_{,3.6}$ (before corr.) K C कोषेशो. —c) S'_8 A द्रुगणैक-.

शस्त्राघातैर्मुमूर्षुः सन्नुत्थितो मेरकाककः ।
राज्ञ एवाशिषः कुर्वन् पुनः परशुना हतः ॥ ८० ॥

लिखन्नह्मदमेराख्यः स विद्याव्यसनी गुणी ।
हतो जनमनःकान्तो ययौ कस्य न शोच्यताम् ॥ ८१ ॥

जीवतां मनसा चैक्यं तेषां नित्यमभूद्यथा ।
शस्त्रकृत्ततनूद्गच्छच्छोणितैक्यमभूत् तथा ॥ ८२ ॥

वर्णकम्बलपृष्ठस्था जीवन्तस्ते यथाभवन् ।
निद्राणा इव ते तत्र मृता अपि तथेक्षिताः ॥ ८३ ॥

क्षणमात्रात् तथा शस्त्रैर्मरणं राजवेश्मनि ।
अनन्यसुलभं तत्र तेषां श्लाघार्हतामगात् ॥ ८४ ॥

न वित्तं न च दारास्ते न भृत्या न शवाजिरम् ।
तेषां तथा प्रमीतानां ययावन्तोपकारिताम् ॥ ८५ ॥

निजपरिभवभीत्या बन्धवो यान्ति दूरं
त्यजति च निजपत्नी का कथा सेवकानाम् ।
प्रतिदिनमृणहेतोस्ताडनं बन्धनं वा
भवति हि यमभङ्गाद् राजभङ्गोऽतिकष्टः ॥ ८६ ॥

स्फुलिङ्गालिङ्गनात् क्रुद्धकृष्णसर्पोपसर्पणात् ।
मकराकरपाताच्च कष्टं नृपतिसेवनम् ॥ ८७ ॥

---

80 b) B (evid. emend.) -मीर-.
81 a) B (evid. emend.) -मीरा°.
82 a) S′6-8 K जीवता.—A hapl. om. 82cd.
84 a) B (evid. emend.) क्षत्र- (for °ण).
86 d) S′2-8 A राजभङ्गे.

प्रद्युम्नगिरिपादान्ते चण्डालैर्निश्यनाथवत् ।
इष्टिकाभिस्ततो नीत्वा भूगर्तेषु निवेशिताः ॥ ८८ ॥

कुर्वन्ति मौसुलजनाः स्वशवाजिरार्थं
यत्नं सदैव बहुकारुषु दत्तवित्ताः ।
नो चिन्तयन्ति परमेश्वरमन्तरेण
जानाति को मम कदा मरणं कथं स्यात् ॥ ८९ ॥

यः स्वायुषोऽवधिमवैति स्वदेहनिष्ठं
यस्यान्तको भवति मित्रतयातिवश्यः ।
युज्येत तं प्रति शवाजिरकर्म कर्तुं
म्लेच्छेषु दुर्व्यसनमात्रमिदं मतं मे ॥ ९० ॥

ते वैश्रवणभट्टाद्याः कृत्वापि स्वशवाजिरम् ।
अन्ते यत्र मृता ग्रामे भुवि तत्रैव शायिताः ॥ ९१ ॥

एक एको भुवो हस्तशतमात्रावृतौ रतः ।
पराप्रवेशदो यत्नात् प्राकृतो लज्जते न किम् ॥ ९२ ॥

श्रुतं यच्छास्त्रतः सूक्ष्मशिलाश्लेच्छवभूतले ।
स्थाप्यन्ते तत् सुखं तस्मिन् परलोकगते भवेत् ॥ ९३ ॥

अहो लोभस्य माहात्म्यं जीवद्वद् यन्मृता अपि ।
शवाजिरापदेशेन कुर्वन्त्यावरणं भुवः ॥ ९४ ॥

---

88 c) S''_6 C इष्टिका°; S'_8 A इटिका°; K (after corr.) शविका-; S'_3 इतिका-.

90 a) $S'_{2\cdot3\cdot6\cdot8}$ A C K [अ]वाधि भवेति; $S'_{3\cdot6\cdot8}$ I_1 K C- निष्ठां.

91 I_2 om. 91–116.

94 b) $S'_{2\cdot6\cdot8}$ A जीवन्यद्वत्.

महान्तो हन्त कुर्वन्तु कृतयत्नाः शवाजिरम् ।
तन्निर्माणेन जीवन्ति कियन्तोऽपि बुभुक्षिताः ॥ ९५ ॥

वन्द्योऽन्यदर्शनाचारो हस्तमात्रे भुवस्तले ।
दग्धा यत् कोटिशो नित्यं सावकाशं तथैव तत् ॥ ९६ ॥

इत्याद्यनुचिता निन्दा प्रस्तावाद्विहितात्र यत् ।
क्षन्तव्या मौसुलैर्यस्मात् कविवाचो निरर्गलाः ॥ ९७ ॥

ये राजवैभवमवाप्य निपीड्य लोकं
कुर्वन्ति संचयमतो न च दानभोगौ ।
अत्युत्कटाघभरतत्फललब्धदुःखा-
स्ते कोशरक्षणनिभाद् वितरन्ति राज्ञः ॥ ९८ ॥

द्रव्यं गृहतुरंगादि तेषां तद्राजसादगात् ।
तत्कुटुम्बैर्निरालम्बैर्नाताप्येका वराटिका ॥ ९९ ॥

कोशेशसंचितं स्वर्णपूर्णं रूपकभाजनम् ।
दृष्ट्वा धिक्कृत्य कृपणं थूत्कारं नृपतिर्व्यधात् ॥१००॥

तत्पश्चात् बहद्रागादीन् हृतसर्वस्वसंचयान् ।
कारायामक्षिपद्राजा मुक्त्वैकं सैदहोस्सनम् ॥१०१॥

---

95 a) $S'_{2\cdot6\cdot8}$ A C K कुर्वन्तः. —b) S'_8 K शिवा°.

97 d) S'_8 A -चारो (for वाचो).

98 c) S'_6 (after corr.) I_3 C K -लुब्ध–. —d) $S'_{3\cdot6}$ (before corr.) C K कोष–.

99 a) $I_{3\cdot5}$ C गृह्वा(C ह्वा)तु रङ्गादि.

100 a) K (after corr.) कोशेषु; S'_3 C कोषेश–. —d) C थुत्कारं; S'_6 थु(marg. थू)क्कारं.

101 a) $S'_{3\cdot6\cdot8}$ A ब्रह्मरा°; I_1 वफूरा°; S'_2 C I_{3-5} K D B बह्म (mislec. for S'ār. हृद, cf. PT, MS f. 98[a]: *Bahādur Āqā*) रा°. —d) B (evid. emend.) हुस्सनम्.

अन्ये पित्रपराधेन तस्माद् भृगुसुतोपमात् ।
क्षत्रिया इव ते सर्वे नाशं प्रापुः पुरातनाः ॥१०२॥

यासीत् पितुः सभा योग्या तत्तत्कार्यविशारदा ।
स्मृतपूर्वोपकारेण तेन सर्वावसादिता ॥१०३॥

अन्तरङ्गान् हभेभादीन् पञ्चषानधिकादरैः ।
अरक्षत् प्राक्तनं स्मृत्वा प्रेम सेवां च पैतृकीम् ॥१०४॥

आदामखानः पर्णोत्से श्रुत्वा कोशेशनाशनम् ।
स्वनामान्वर्थतां बिभ्रद्ययौ भीतो यथागतम् ॥१०५॥

बहामखानो वित्राणस्तद्वधाच्छङ्कितो भृशम् ।
गृहमेत्य नृपेणाश्वासितः कार्यावलोकिना ॥१०६॥

अस्मिन्नवसरे मद्रमण्डले सुभटक्षयः ।
अभून्माणिक्यदेवस्य तुरुष्कैः सह संयुगे ॥१०७॥

मातुलेन समं यातो योद्धुं तत्रैव संगरे ।
आदामखानः स प्रापच्छरभिन्नमुखः क्षयम् ॥१०८॥

---

102 [a]) S'_3 marg. gloss पितुरपराधेनेत्यर्थः (for पित्रपराधेन).

104 [a]) K हभांभा°. —[b]) $S'_{6.8}$ A पञ्चशान्. —[c]) D B प्राक्तनां. —[d]) $I_{3.5}$ D पैतृकाम्; A प्राक्तनीं (for पैतृकीम्).

105 [a]) $S'_{2.8}$ A $I_{3.5}$ D आधाम–; C आदमखानः; S'_8 पूर्णोत्से. —[b]) K कोशेषु; $S'_{3.6}$ (before corr.) C कोषेश–.

106 [a]) C K विभ्रा (mislec. for S'ār. त्रा) णस्.

108 [c]) S'_2 $I_{3.5}$ D आधाम–; C आदम–. —[d]) RSs_2 notices -गलः (for मुखः).

केऽप्यूचुः स निजैरेव हतस्तत्र भयाश्रितैः ।
केऽपि व्रणशलाकाग्राकृष्टिमर्मविदारणात् ॥१०९॥

श्रुततन्मरणो राजा दूतैरत्यन्तदुःखितः ।
तद्देशाच्छवमानीय जननीसंनिधौ न्यधात् ॥११०॥

ज्येष्ठोऽपि शौर्यनिलयोऽपि बलान्वितोऽपि
प्राप्तोऽपि जन्मभुवमात्तधनप्रपञ्चः ।
नैवाप राज्यमुचितं स कृतप्रयत्नो
भाग्यैर्विना न हि भवन्ति समीहितार्थाः ॥१११॥

अथवा पितृशापः स तस्यापि फलितोऽभवत् ।
यदाप्तोऽपि निजं देशं परदेशे क्षयं गतः ॥११२॥

अत्रान्तरे महोत्पाता दिव्यभौमान्तरिक्षगाः ।
अहंपूर्विकयेवापुर्नृपतेर्जनकम्पदाः ॥११३॥

तथाहि प्रथमं राज्ञि पुष्पलीलाचिकीर्षया ।
गते मडवराज्योर्वीं भूमिकम्पोऽभवन्महान् ॥११४॥

अस्मत्कर्तृजनः कोऽपि सुखी नैवाधुना स्थितः ।
इतीव देशे तत्कालं चकम्पुर्जनवद्गृहाः ॥११५॥

उद्भूत् पूर्वदिक्पुच्छः केतुर्नभसि विस्तृतः ।
पूर्वं बहामखानेन दृष्टोऽरिष्टस्य सूचकः ॥११६॥

---

109 b) S'_6 (after corr.)$_8$ A तत्रोभया–. —cd) $S'_{6\cdot 8}$ A -शलाकाभिः कृ° (S'_6 marg. as in text).

113 b) S'_3 (before corr.) C °न्तरीक्ष–.

114 c) $I_{1\cdot 3-5}$ मरु (mislec. for S'ār. उ) व–. —d) $S'_{6\cdot 8}$ A महानभूत् (for [अ] भवन्महान्).

115 c) K इत्येव.

116 a) I_5 त (mislec. for S'ār. उ)द°.

स दूरविस्तृतः पुच्छः कालकुन्तोपमो दिने ।
स्फुरन् प्रतीचीं प्रत्याशां तस्यैव ददृशे जनैः ॥११७॥

युग्मसूर्वडवा राजमन्दुरान्तर्गताभवत् ।
देशात् क्रष्टुं ददौ राजा यां भिया यवनक्षये ॥११८॥

सिंहादयो दिने चेरुर्वन्याः श्रीनगरान्तरे ।
बिडालपोतं सुषुवे शुनी च प्रसवक्षणे ॥११९॥

निष्फलो यः सदानन्दीतरुः स सफलोऽभवत् ।
उपराजगृहं मूलाद् दाडिमीकुसुमोद्गमः ॥१२०॥

सुमनोवाटशाटान्तर्भुवां शोणितवर्षणम् ।
इति दृष्ट्वा जनः सर्वः क्षते क्षारमिवान्वभूत् ॥१२१॥

अत्रान्तरे वसन्सैदखानगाहादिपीडनम् ।
हिन्दुका विदधुः पूर्णनापितोद्दलितक्रुधः ॥१२२॥

तच्छ्रुत्वा यवनाः सर्वे गत्वा क्रुद्धा नृपान्तिकम् ।
चुक्रुशुर्येन राजापि द्विजपीडनमादिशत् ॥१२३॥

---

117 [b]) D दिनैः. —[d]) K इव (for ⌊ए⌋ व).

118 [b]) S'_2 -मन्दुरान्त…ता°. —[d]) $S'_{2\cdot8}$ A भिय(S'_2 या)-व°; K भियावन…क्षये.

119 [a]) S'_2 A D B वने (for दि°).

120 [a]) D B सफलस्तूली–(for यः सदानन्दी). —[d]) K दाडिमे.

121 [b]) $S'_{2\cdot3\cdot6\cdot8}$ A C I_{1-4} K B °र्भवं; I_5 D भुवां (as in text).

122 [b]) K C -खाना-; S'_2 °गेहा°. —[d]) S'_6 $I_{2\cdot4\cdot5}$ B °ताः (I_2 तः) क्रुधा; $S'_{2\cdot8}$ A C $I_{1\cdot3}$ K D °तक्रुधा; S'_3 °तक्रुधः (as in text).

123 [d]) D B लोक– (for द्विज).

अजरामरबुद्धादीन् ब्राह्मणान् सेवकानपि ।
तत्कोपेनाकरोद् राजा निकृत्तभुजनासिकान् ॥१२४॥

त्यक्तस्वजातिवेशास्तद्दिनेषु ब्राह्मणादयः ।
न भट्टोऽहं न भट्टोऽहमित्यूचुर्भट्टलुण्ठने ॥१२५॥

बहुखातकमुख्या ये पुरे सन्तीष्टदेवताः ।
तन्मूर्तिलोठनं राजा म्लेच्छप्रेरणयादिशत् ॥१२६॥

दत्ता भूर्जैनभूपेन येषां गुणपरीक्षया ।
तेभ्यस्तां निर्निमित्तेनाप्यहरन्नधिकारिणः ॥१२७॥

स माहिसफरो मासः प्रसिद्धो म्लेच्छदर्शने ।
सर्वदर्शनविघ्नाय न केषां भयकार्यभूत् ॥१२८॥

भूपं नित्यमदोन्मत्तं स्वतन्त्रं मन्त्रिमण्डलम् ।
उत्कोचहारिणः सर्वानन्तरङ्गांस्तरङ्गितान् ।
दर्शिताबलपीडार्तिपण्डितानवलोक्य च ॥१२९॥

स्मृतश्रीजैनभूपालगुणमालस्तदा जनः ।
देशे सरुदिताक्रन्दं शुशोचात्यन्तदुःखितः ॥१३०॥

---

124 [a]) D B -युद्ध- (for बु°). —[b]) D B स्वकीयान् (for ब्राह्मणान्). —[d]) D निकृतं.

125 [d]) S'_3 C $I_{3.5}$ D -भट-.

126 [a]) S'_3 बहुखान (*sup. lin.* त)क-; $S'_{2.6.8}$ C I_{1-5} -खादक-. —[cd]) D B क्रोधेन तेषां नगरे तदोत्पातो महानभूत्.

129 [b]) C स- (for स्व). —[e]) M (evid. emend.) वनिता- (for दर्शि°); $S'_{2.6.8}$ A -पीडार्तिः.

सर्ववृद्धश्चिरारूढोऽग्रस्तोऽदृष्टपराभवः ।
सर्वकार्यान्तरज्ञोऽयं क्षयं याति कदा नृपः ।
इति येऽप्यवदन् दुष्टास्तत्सुते विभवार्थिनः ॥१३१॥

पारसीभाषया काव्ये यदूचे दूषणा विशाम् ।
स शापः फलितो देशे श्रीमज्जैनमहीपतेः ॥१३२॥

सेवकाः कितवप्राया भुक्तप्रेष्या नियोगिनः ।
तच्छापादिव कालेन प्राप्तात्यन्तनिपीडनाः ॥१३३॥

किमस्मद्रक्षको दैवहतो वृद्धो महीपतिः ।
इत्यादि सास्रुसाक्रन्दाः शुशुचुस्तेऽपि पार्थिवम् ॥१३४॥

स्वल्पोऽपि राज्यकालोऽभून्नवायासैः सुदुःसहः ।
निदाघरात्रिसंदृष्टदीर्घदुःस्वप्नसंनिभः ॥१३५॥

लोत्रराशिगृहद्रव्यहरणैः परपीडनैः ।
तुतुषुस्तस्य भृत्यौघाः कौशिकास्तिमिरैरिव ॥१३६॥

शय्यारूढो मधुक्षीवः प्रजाकार्यपराङ्मुखः ।
सर्वं दिनं निनायान्तः स्वपार्श्वपरिवर्तनैः ॥१३७॥

कुलालगायनोद्गीतं गीतं शृण्वन् दिवानिशम् ।
गुणिभ्यो राजयोग्येभ्यो नादाद् दर्शनमात्रकम् ॥१३८॥

शाहाभदेनराज्ये या संपन्नातिमनोहरा ।
लक्ष्मीपुरे राजधानी तां पुप्लोषोदितः शिखी ॥१३९॥

---

131 [a]) I_2 B -वृद्धिः. —[b]) $S'_{2\cdot6\cdot8}$ A C I_{2-5} K दिष्ट- (for दृ°). —[f]) $S'_{2\cdot6\cdot8}$ A C K तत्सुता- ($S'_{3\cdot7}$ I_{1-5} D B °त-) ; M तत्सुते (as in text).

132. [a]) I_5 D पारिसी- ; K (after corr.) फारसी-.

134 [c]) $S'_{2\cdot8}$ A सास्रं ; C सास्र-.

135 [b]) C B नवायामैः (mislec. for S'ār. सैः).

136 K hapl. om. 136[cd]; 137.

139 [a]) B (evid. emend.) शाहावदीन-. —[c]) K -पुरी-.

या बलाढ्यमठस्थाने वेश्माली विपुलाभवत्।
सापि दग्धा समं तत्र तत्तत्पौरजनश्रिया ॥१४०॥

इत्याद्युपद्रवान् देशे दृष्ट्वा वास्तव्यनाशकान्।
एतन्नाशाद् भवेद् विघ्नशान्तिरित्यवदज्जनः ॥१४१॥

राजा पञ्चगृहावासं स्वं ज्वलन्तं समीक्ष्य च।
हर्म्यमारुह्य संतुष्टः पानलीलां व्यगाहत ॥१४२॥

अस्मिन्नवसरे नेयधिषणः पिशुनेरितः।
यात्रार्थं सबलं पुत्रं बहिर्देशे व्यसर्जयत् ॥१४३॥

यत्सैन्यं वीक्ष्य दैन्यं ते ययुर्बाह्यमहीभुजः।
प्रदीप्तं रविरश्म्योघं दिवसे तारका इव ॥१४४॥

पूर्वं राजपुरीराजो जयसिंहो नृपात्मजम्।
स्वसारं च स्वसारं च दत्त्वा तोषयति स्म तम् ॥१४५॥

कालीधाराभसिलतामिव वीक्ष्य तदाश्रिताम्।
कम्पं के नात्र देशस्थाः प्रापुस्तद्भयतो जनाः ॥१४६॥

सेना दीन्नारकोटीयाः शिश्रियुस्तां भयच्छिदे।
बलिभिर्मङ्गलादेवीमिवोन्नतभुवि स्थिताम् ॥१४७॥

---

141 a) B उपद्रवाद्दे (mislec. for Dev. न्दे)शे.

145 K om. 145[cd]; 146[ab].

146 a) B (evid. emend.) काला–. —c) $S'_{2\cdot3\cdot8}$ A[?]वेश्म–; K C वेश– (for देश–). —d) $S'_{2\cdot3\cdot8}$ A C K प्राप्ताः.

147 a) S'_8 A दीनार–. —b) S'_8 तं (for तां); I_2 (evid. emend.) -च्छिदः ; D -च्छिदोः (sic).

मद्रगकखडचिब्भेशा राजहंसास्तमाययुः ।
सरोवरमिव प्रोद्यच्छुक्लपक्षा विनिर्मलम् ॥१४८॥

राजवृत्तानुरोधेन स्वपदार्थोपपादकैः ।
मातुलैरपि तस्याग्रे मल्हणैः कल्हणायितम् ॥१४९॥

कौमारोद्ध्वंसिकं वीक्ष्य कटकालंकृता अपि ।
अभूवन् धैर्यरहिता माहिला महिला इव ॥१५०॥

बद्धपङ्क्तिस्तरन्ती सा ज्यलमेस्तन्नदीतटात् ।
तत्सेना रामबद्धाब्धिसेतुकौतुकमातनोत् ॥१५१॥

कुटीपाटीश्वरीप्राप्तं तत्सैन्यं दैन्यवर्जितम् ।
नारायणोदरोद्गच्छद्विश्वलोकभ्रमं व्यधात् ॥१५२॥

संप्लुष्टे भोगपालानां पुरे मद्राचितान्यपि ।
सुचिरं धूमितान्यासन् गृहाणि हृदयानि च ॥१५३॥

---

148 a) $S'_{2\cdot 8}$ A -गक्वर-; S'_3 B -गगड-; K -शक्वर-; D -गग्खड-; $I_{1\cdot 3}$ -गखर-; $I_{2\cdot 5}$ -गखडा-; I_4 -गखड-; RSs_2 notices गह्व (or क्क)र-; $S'_{2\cdot 6\cdot 8}$ A C I_2 K B -चित्ते (I_2 त्भे, B म्भे) (mislec. for S'ār. ब्भे)शा.

149 a) C B वृत्तान्त (mislec. for S'ār. नु) रो°; $I_{3\cdot 5}$ K D वृत्तांत (त्तान्त). —b) S'_2 °पादकः (sic). —d) S'_3 स (mislec. for S'ār. म)ल्हणैः (as in text); $S'_{6\cdot 8}$ A $I_{1\cdot 2\cdot 4}$ B सुल्हणैः ; I_3 C सुह्णैः ; S'_2 I_5 मुल्हणैः ; K मह्मणैः ; I_3 C कह्लणां°; K कह्म (or ल्म)णा°.

150 a) S'_3 C $I_{1\cdot 2\cdot 4}$ KB °द्धं(S'_3 K द्धां)सिकं; S'_6 (marg.) B A °द्वासिकां; $S'_{2\cdot 6}$ °द्वासिकं; $I_{3\cdot 5}$ D °द्ध्वंसिकं (as in text). —d) I माफि (mislec. for S'ār. हि) ला.

151 b) S'_2 $I_{2\cdot 4}$ D B ज्यलेम (S'_2 I_5 लमे)स्तनदी-; $I_{1\cdot 3}$ °स्तनु (mislec. for S'ār. न्न)दी-; M (evid. emend.) ज्यलीमाख्यनदी-.

152 a) $I_{1-3\cdot 5}$ D -पाटीश्वरे; B (evid. emend.) -पाटीश्वर-. —K om. 152[cd].

153 b) I_{1-5} D B मद्रा (mislec. for S'ār. द्रा) चि°. —d) $I_{1\cdot 3\cdot 5}$ C K हृदयाणि.

उन्नादह्रदसंसङ्गतत्तुरङ्गतरङ्गिता ।
बाल्येश्वरगिरेः पादमूलं प्रापास्य वाहिनी ॥१५४॥

तदीयकटकोदीपस्तत्तुरङ्गतरङ्गितः ।
तं तमेव नतं चक्रे येन येन पथावहत् ॥१५५॥

निस्तृणं भूतलं तत्तु निष्पानीया जलाशयाः ।
निरिन्धनान्यरण्यानि तत्सैन्ये चलितेऽभवन् ॥१५६॥

सोऽहं संमान्य राज्ञास्मै दत्तस्तत्समयेऽन्वहम् ।
कुर्वन् बृहत्कथाख्यानमभूवं धृतपुस्तकः ॥१५७॥

करदीकृतभूपालः स षण्मासकृतस्थितिः ।
अभवच्चैत्रमासान्ते कश्मीरागमनोत्सुकः ॥१५८॥

तावद् बभ्राम बह्रामखानो दामनिरर्गलः ।
आक्रान्तमन्त्रिसामन्तो ज्ञात्वा व्यसनिनं नृपम् ॥१५९॥

अथ संततपानेन क्षीणदेहबलच्छविः ।
स वातशोणितव्याधिबाधितोऽभून्महीपतिः ॥१६०॥

प्राप्तो हस्सनखानः स पूर्णचन्द्र इवोदितः ।
तान् दुष्टमन्त्रिणः पद्मानिव संकुचितान् व्यधात् ॥१६१॥

किं नैतेन समानीतो बद्ध्वा पिरुजगख्खडः ।
इति रोषं सुते राजा पिशुनप्रेरितोऽग्रहीत् ॥१६२॥

---

154 a) K उत्ता (mislec. for S'ār. न्ना)द°; I_2 त(mislec. for S'ār. उ)न्ना°. —c) I_4 K बालेश्वर–; M (evid. emend.) बालेश्वरी–.
155 d) B य (mislec. for Dev. प) था°.
156 a) D तंतु (< तन्तु mislec. for S'ār. त्तु). K om. 156[ab].
157 d) $S'_{2\cdot6}$ (marg.)$_8$ A पुष्प(S'_8 marg. स्त) कः.
159 b) S'_2 -खानोद्दाम–.
161 b) K इव दिवः. —c) K प्रष्टुं (for दुष्ट–); B (corrupt) पघ्नान्.
162 b) S'_6 C -गख्खराः; I_4 -गः खरः; I_1 -गखराः; S'_3 -ग…रः; K A -गः खडाः I_2 DB -गख्खडाः.

पश्चिमाशागतं श्रुत्वा तमपूर्वार्कसंनिभम् ।
बहामखानो मन्देहो मन्देह इव सोऽभवत् ॥१६३॥

प्राप्ते सुतेऽन्तिकं सोऽभून्न तदत्यधिकादरः ।
प्रत्यासन्नविनाशानां धीर्भीत्येव पलायते ॥१६४॥

अत्यभ्यर्थनया मन्त्रिसामन्तानां महीपतिः ।
यात्रागताय पुत्राय ददौ दर्शनमात्रकम् ॥१६५॥

नूनं स्वानुजभीतोऽभूत्तत्कालं सोऽन्यथा कथम् ।
परिधानादिसत्कारं न्यूनमेवाकरोत् सुते ॥१६६॥

बहामो बाधते नूनं मत्पुत्रमिति शङ्कितः ।
स तस्मिंश्छन्नकोपाग्निः शमीतरुरिवाभवत् ॥१६७॥

पानार्थं राजधान्यग्रं तस्मिन्नवसरे नृपः ।
आरुरोह समं भृत्यैर्मृत्युनेव प्रचोदितः ॥१६८॥

तत्र पुष्करसौधान्तर्लीलया काचमण्डपे ।
धावन् पपात नासाग्रस्रवदस्रविसंस्थुलः ॥१६९॥

कक्षाक्षिप्तभुजैर्भृत्यैर्नीतः शयनमण्डपम् ।
ध्वस्तच्छाय इवादर्शः संमूर्छ्य शयनेऽपतत् ॥१७०॥

---

163 b) $S'_{6\cdot8}$ A C $I_{3\cdot5}$ °पूर्वाद्रि–. —c) S'_8 A -खानसन्देहो. —d) B सन्देह.

164 a) S'_3 A C [अ] धिकं (for °न्ति°).

165 a) C अन्य- (mislec. for S'ār. त्य); D B अन्योत्क्रान्तितया (for अत्यभ्यर्थनया).

166 d) $S'_{3\cdot6}$ C नूनं (for न्यूनं).

167 c) B तस्मिंच्छ (mislec. for Dev. श्छ) न्न–.

169 a) S'_3 $I_{1\cdot3}$ पौष्कर–. —d) S'_3 C K स्रवदस्रु (C श्रु). —d) S'_3 CK -विसंष्ठुलः.

170 a) $S'_{2\cdot8}$ A K कक्ष्या–.

भिषजोऽस्यावमन्यातान् कोऽपि योगी चिकित्सकः ।
विषोत्कटौषधस्तस्य यतते स्म कृतव्यथः ॥१७१॥

तस्यौषधप्रयोगेण प्राप्तदाहो दिवानिशम् ।
काङ्क्षति स्म स्वमरणं क्षणमात्रं न जीवनम् ॥१७२॥

राजधान्यन्तरे राजसुतः स्वजनकान्तिके ।
आयुक्ताह्मदसंयुक्तस्तद्दिनेषु स्थितिं व्यधात् ॥१७३॥

मुमूर्षौ पितरि ज्ञात्वा महतो दर्शनागतान् ।
तन्निर्गमनिरोधाय द्वारधान्यां भटान् न्यधात् ॥१७४॥

स्वालयस्थोऽनुजो राज्ञो भयहर्षात्तसंभ्रमः ।
करानिव रविस्तीक्ष्णांश्चारान् संचारयन्नभूत् ॥१७५॥

तत्कालं राजलक्ष्मीः सा पितृव्यभ्रातृपुत्रयोः ।
द्वयोरासीत् समारूढा चित्ते संशयधीरिव ॥१७६॥

अत्रान्तरेऽह्मदायुक्तः संमन्त्र्य सचिवैः सह ।
बहामखानमागत्य युक्तमित्यब्रवीद् वचः ॥१७७॥

स्वामिहैदरशाहोऽद्य समर्प्य स्ववयस्त्वयि ।
सुगृहीताभिधो भ्राता प्रयातः कीर्तिशेषताम् ॥१७८॥

ज्येष्ठोऽधुनावशिष्टस्तद्भवान् भज नृपासनम् ।
स्वयं हस्सनखानाय यौवराज्यं प्रदीयताम् ॥१७९॥

त्वत्पित्रा महतो यत्नाद् रक्षिता चकिता सती ।
सेयं त्वयाद्य नगरी पाल्या कुलवधूरिव ॥१८०॥

---

171 [a]) D B [अ]वमत्य. —[b]) MSS and C B चिकित्सतः (emended as in text).

174 [d]) MSS and C B व्य (mislec. for S'ār. न्य) धात् .

176 [a]) $S'_{6\cdot 8}$ A C I_1 D राज्य–.

178 [a]) S'_6 (marg.)$_8$ A स्वामिन् ; I_3 C B हैधर–; K D हैद्धर–. —[c]) $I_{3\cdot 5}$ K त्रा (prob. mislec. for S'ār. भ्रा)ता.

किमन्यत् पुरलुण्टाकाः काका इव बलिप्रियाः।
यथागतं प्रयान्त्वेते कुशब्दा मलिनत्विषः ॥१८१॥

श्रुत्वेति भाषितं तस्य कोपरूक्षाक्षरोऽब्रवीत्।
सुस्निग्धो जनकस्त्यक्तस्तादृक्कल्पद्रुमोपमः ॥१८२॥

सदैवादमखानः स बाधितस्तदुपाधिभिः।
परलोकमनालोच्य स्वार्थं संत्यज्य दूरतः ॥१८३॥

अस्वस्थः स यथा भ्राता सेवितः सततं मया।
जानात्येवं न को राज्यं यथा तस्य मयार्जितम् ॥१८४॥

कोऽयं मद्भ्रातृपुत्रोऽद्य वद कैवास्य योग्यता।
अस्मिन् मत्पैतृके राज्ये योग्यो मदपरस्तु कः ॥१८५॥

स कनीयानहं ज्येष्ठो वयसा च गुणेन च।
पृथिव्यां वीरभोग्यायां साम्नः कोऽवसरोऽधुना।
इत्याद्यनुचितं यत्तद्योक्त्वा तं प्रत्यमोचयत् ॥१८६॥

यैः स ग्रथितकन्थोऽभूद् राज्यार्थे कृतभावनैः।
अप्राप्यैतांस्तथा मत्वा निराशः समपद्यत ॥१८७॥

प्रत्यासन्ने नाशे रुद्धजलौघस्य बद्धमूलस्य।
कुपथात् प्रसरत्यादौ धृतिरिव सेतोर्मतिर्जन्तोः ॥१८८॥

---

181 c) D प्रयान्ति.

182 b) S'_3 [अ] भवत् (for °ब्रवीत्).

183 a) $S'_{2\cdot8}$ A $I_{3\cdot5}$ K D °धमखानः.

186 c) S'^{6} (marg.) $I_{3\cdot5}$ K D -भोज्यायां.

187 a) $S'_{2\,8}$ C सं° (for स). —b) $S'_{2\cdot3\cdot8}$ $I_{3\cdot5}$ K D राज्यार्थं. —c) $S'_{2\cdot3\cdot8}$ A C I_5 K D तदा (for °था).

188 c) B (evid. emend.) कुपथा. —d) $I_{3\cdot5}$ D एव (for इ°); MSS and C B सेतौ मतिर्जन्तौ (emended as in text with M).

युक्तमायुक्तवाक्यं चेदग्रहीष्यन्नयान्वितः ।
तुरगाद्यर्जितं सर्वमदास्यच्चेत् स्वयं गतः ॥१८९॥

अथवाप्तं तमेकं चेदहनिष्यद्बलोन्नतः ।
कोशं हर्तुमयास्यच्चेत् स्थितं पितृपुरान्तरे ॥१९०॥

अथवा बाह्यदेशं चेदगमिष्यत् तदध्वना ।
निवृत्तः क्रमराज्ये चेदाक्रमिष्यच्छनैर्महीम् ॥१९१॥

क्रमात्तसकलस्यास्य किमु नश्येद् विलम्बतः ।
बालबालिशभृत्योक्तया युक्तवाक्याविनिश्चयात् ॥१९२॥

अनभिज्ञतया तेन वत किं किं न हारितम् ।
नास्मत्कोऽपि चिरं भोक्ष्यत्यतितीक्ष्णतया धियः ॥१९३॥

वरमज्ञे सुते राज्ञो राज्यं दत्त्वास्ति नः सुखम् ।
इत्येकमेवं संबोध्य बलिनं नृपवल्लभम् ॥१९४॥

आयुक्ताह्मदमल्लेकः संमन्त्र्य सचिवैः सह ।
चक्रे संभावनां राज्यनिश्चये राजसूनवे ॥१९५॥

---

189 a) S'_8 C $I_{3.5}$ K D B (corrupt) अयुक्त– (for आ°); C B वाक्ये (mislec. for S'ār. क्यं).

190 c) $S'_{3.6}$ (before corr.) C कोषं.

191 c) C निवृत्त–.

192 c) MSS and C B -भृत्योक्ता (emended as in text).

193 b) B तव (for वत). —c) S'_8 [अ]स्मात्. —d) MSS and C B धिया (emended as in text with M). —$S'_{2.7.8}$ A $I_{2.3.5}$ K कुलकं after धियः.

194 S'_2 transp. 194[cd] and 195[ab].

195 c) S'_8 A I_5 K संभावनं.

गत्वास्कन्दं प्रदास्यामि बहाममिति दर्पतः।
अभिमन्युप्रतीहारो निश्चिकायाभिषेणनम् ॥१९६॥

अथ स्वच्छन्दवार्तां स श्रुत्वा तूर्णं सुतान्वितः।
बहामखानो वित्राणो निरगान्नगरान्तरात् ॥१९७॥

दृष्ट्वा महार्घमणिमौक्तिकविद्रुमौघान्
रत्नाकरं श्रयति लुब्धमतिः स एकः।
तत्तन्महाभयकरान् मकरांस्तदीयान्
वीर्येण यः शमयितुं गतभीः समर्थः ॥१९८॥

श्रुत्वा स्वभ्रातृपुत्रस्य चरितं चित्रमत्र सः।
वित्रासितबलः पुत्रयुतो द्वाराध्वनाचलत् ॥१९९॥

यथैवादमखानस्य निष्कासनमयं व्यधात्।
तथैवास्याभवद् रात्रौ न चिरेण फलत्यघः ॥२००॥

राज्यं स दशमासाब्दं कृत्वा मासि च माधवे।
वर्षेऽष्टचत्वारिंशेऽगाद् दिवं श्रीपञ्चमीदिने ॥२०१॥

---

196 d) $S'_{2\cdot6\cdot7\cdot8}$ A I_{1-5} K D B [अ]भिषेचनम् ; S'^{3} C °षेणनम् (as in text).

197 a) S'_{2} तां (for स).

198 b) I_{5} लब्ध–.

199 d) S'_{3} C ध्वाराध्व°.

200 a) $S'_{7\cdot8}$ A $I_{3\cdot5}$ D K [आ]धम–. —b) C B निष्काशनम्.

201 a) $S'_{3\cdot6-8}$ A C I_{1-5} B च (mislec. for S'ār. स); MSS (except K) and C B -मासाब्दे (mislec. for S'ār. ब्दं). —b) MSS and B स (mislec. for S'ār. च). —d) $S'_{2\cdot8}$ K -पञ्चमे.

वेतालोऽवसदुद्दण्डस्तम्भमण्डितमण्डपे ।
तेनैवोच्चण्डकोपेन खण्डितःक्रियया नृपः ॥२०२॥

इत्यूचुः केऽपि केऽप्यूचुर्योगिनोऽशस्तहस्ततः ।
न्यस्तोत्कटौषधैर्ध्वस्तरुचिरस्तमगान्नृपः ॥२०३॥

केचिद् भ्रात्रैव दुष्टेन कैवल्यात् सुतवर्जिते ।
भूपतेर्दुश्चिकित्सार्थे कारिता भिषजस्त्वराम् ॥२०४॥

दिव्यं मौसुलवेदेन कृत्वाश्वस्ततया तया ।
बहिः श्यौटालदेशादौ हत्वा द्रोहेण पार्थिवान् ॥२०५॥

येभ्यश्च राज्यतिलकं सिंहासनगतोऽग्रहीत् ।
पित्र्यांस्तान् सचिवान् हत्वा प्रमीत इति केचन ॥२०६॥

नूनं स पितृशापेन तत्तत्पापेन दूषितः ।
हिमौघ इव तापेन विलयं प्रापदञ्जसा ॥२०७॥

निष्कण्टकं पुरं ज्ञात्वा निःशङ्को नृपनन्दनः ।
जनकं शिविकारूढं स निनाय शवाजिरम् ॥२०८॥

मञ्जूषिकान्तरान्नीत्वा तं पटैकावृतं शवम् ।
पितुः पादतले तत्र भूगर्ताभ्यन्तरेऽक्षिपत् ॥२०९॥

सर्वे मृन्मुष्टिकामात्रमेतदेवेति शंसिनः ।
मुखावलोकनं कृत्वा तस्मिन् मृन्मुष्टिकां जहुः ॥२१०॥

---

202 [d]) MSS and C B °तोक्रि°.
203 [c]) C I_{1-5} D B °टौषेधेर्.
204 [c]) S'_8 A भूपतौ.
205 [a]) $S'_{2\cdot8}$ K D मौसल–; B (evid. emend.) -देवेन (for वेदे°). —[c]) $S'_{2\cdot7\cdot8}$ A $I_{1\cdot3\cdot5}$ D B श्यौ (as in text, or च्यौ) टाल–; $S'_{3\cdot6}$ C सौ (S'_6 marg. श्यौ) टाल–; K चौटाल–; $I_{2\cdot4}$ श्यौ (I_4 च्यौ) जाल–.
206 [c]) C सचिवान्द (mislec. for S'ār. न्ह) त्वा.
208 [b]) S'_8 निशङ्को.
209 [d]) MSS and C B भूगर्भा (mislec. for S'ār. र्ता) भ्य°.

गर्तं तत्र समापूर्य शिलां मध्योन्नतां न्यधुः ।
कठिनोऽयमभूद् युद्धे जनानित्येव सूचितुम् ॥२११॥

अरुदन् सेवकास्तस्य कृतवक्षोवदारणाः ।
स्मृत्वा स्वामिप्रसादानां मुखरीकृतदिङ्मुखाः ॥२१२॥

तद्राज्यं स्वल्पकालीनं प्रसादसुभगोर्जितम् ।
अविन्दन् सेवकास्तस्य स्वप्नस्वर्गातिसन्निभम् ॥२१३॥

पारिसीभाषया हिन्दुस्थानवाचा च भूपतिः ।
काव्यं गीतं व्यधाद् येन प्रशंसन्ति न के जनाः ॥२१४॥

पुराणधर्मशास्त्राणि मोक्षोपायादिसंहिताः ।
शृण्वतो भूपतेरासीद् यामिनीषु प्रजागरः ॥२१५॥

दोषाकुलाः परगृहाशुभपाकदा ये
घूकादयो दिनपतेरुदयं द्विषन्ति ।
तस्मिन् समुद्यति महारुचिरप्रकाशेऽ-
निष्टा भ्रमन्ति विपिनेषु गुहात्तदुःखाः ॥२१६॥

दुष्टान् मेरेप्तकारादीन् ज्ञात्वानिष्टान् विशिष्टधीः ।
खानोऽन्येद्युः सदुःखोऽपि कारागारान्तरे न्यधात् ॥२१७॥

निर्वर्त्यान्त्यक्रियां सर्वां स पितुर्व्ययशालिनीम् ।
राज्याभिषेकसंभारं चक्रे षोडशभिर्दिनैः ॥२१८॥

---

211 d) $S'_{3\cdot6}$ C I_5 K सूचितम् .
212 b) $S'_{2\cdot8}$ A -विदारणाः .
214 a) B (evid. emend.) पारसी-.
216 d) S'_8 A नष्टा; M (evid. emend.) भवन्ति (for भ्रम°).
217 a) $I_{3\cdot5}$ D मेरें (D रों) तेकारा°. —c) B सुदुःखो.
218 a) C B निर्वत्यान्य-.

घूकादयो नभसि सन्ति पराप्रशास्ता-
स्तावत् प्रदोषसमयात्तसुखप्रचाराः ।
आशाप्रकाशविषदो विलसत्प्रकाशो
भास्वान्न यावदुदयं कुरुते सुचण्डः ॥२१९॥

इति जैनराजतरङ्गिण्यां पण्डितश्रीवरविरचितायां
हाज्येहैदरशाहराज्यवृत्तान्तवर्णनं
नाम द्वितीयस्तरङ्गः ।

---

219 b) S'_7 C I_{3-5} D -प्रचारः. —c) $I_{2\cdot4}$ B (evid. emend.) -विशदो.

Colophon :—S'_4 fol. missing. $S'_{2\cdot7\cdot8}$ A $I_{2\cdot3\cdot5}$ K D ins. श्री before जैन–; $S'_{7\cdot8}$ $I_{2\cdot4\cdot5}$ K D om. -राज–; I_4 -कृतायां (for विरचितायां); $S'_{3\cdot6}$ C -हाज्य–; B -हाजी–; $S'_{2\cdot7\cdot8}$ K D -हैद्धर–; $S'_{7\cdot8}$ A K -शाहि–; I_{3-5} om. -राज्य–; $S'_{2\cdot3\cdot7\cdot8}$ K om. नाम. —S'_6 concludes with सं ८९ । मार्गशुदि षष्ट्यां बुधे पूरितम् ; S'_8 with सम्पूर्ण समाप्तम् । श्रीरामचन्द्राय नमः ; I_4 with शुभमस्तु .

तृतीयस्तरङ्गः

शिवायास्तु नमस्तस्मै त्रैलोक्यैकमहीभुजे ।
अशेषक्लेशनिर्मुक्तनित्यैश्वर्यदशाजुषे ॥ १ ॥

भूतं यद् राज्यवृत्तान्तं वर्तमानं करोत्यलम् ।
स्ववाग्योग्यप्रकारेण वन्द्यो योगीश्वरः कविः ॥ २ ॥

प्रतिग्रहानुग्रहाप्ता भुक्ता यन्नृपजीविका ।
तद्वृत्तं स्वस्य निष्कृत्यै वक्ष्ये श्रीवरपण्डितः ॥ ३ ॥

स्वदृग्दृष्टस्मृतक्ष्माभृद्विपद्विभववैकृतैः ।
सेयं कस्य न वैराग्यं सूते राजतरङ्गिणी ॥ ४ ॥

राज्यवृत्तानुरोधेन न काव्यगुणचर्चया ।
सन्तः शृण्वन्तु मद्वाचः स्वधिया योजयन्त्वपि ॥ ५ ॥

कायस्थोक्तिवदेवेयं कृता स्मृत्यै भविष्यताम् ।
दृष्ट्वेमां ललितं काव्यं कुर्वन्त्वन्येऽत्र पण्डिताः ॥ ६ ॥

ततः श्रीहस्सनो राजा व्यसनोज्झितवासनः ।
सेकन्धरपुरीं त्यक्त्वा पित्र्यां प्राशास्त्यसुन्दरम् ।
अगमज्जैननगरं पितामहविनिर्मितम् ॥ ७ ॥

—Before 1, $S'_{2\cdot 8}$ A ins. :

5* दातुं वान्छति दक्षिणेऽपि नयने वामः करः कज्जलं
भौजङ्गं च भुजेऽङ्गदं घटयितो वामेऽपि वामेतरः ।
इत्थं स्वं स्वमशिक्षितं भगवतोरर्धद्वयं पश्यतोः
साधारास्मितलाञ्छितं दिशतु वो वक्त्रं मनोवाञ्छितम् ॥

1 K om. 1[cd].

3 [ab]) S'_2 °हाप्तभु°. —[b]) I_5 -जीविकाः. —[d]) $S'_{7\cdot 8}$ A I_{3-5} K D वक्ष्येऽहं श्रीवप°.

4 [a]) S'_2 -क्ष्माप (for °भृत्).

6 [c]) B (evid. emend.) [इ]दं (for °मां); D (gram. assim.) ललितां.

7 [c]) B (evid. emend.) सिकन्दर–; C शेकन्धर–. —[d]) I_5 D B पित्र्यं.

सिंहासनोपविष्टः स निर्मलाम्बरभूषणः ।
बभौ कुवलयानन्दी शशीवोदयपर्वते ॥ ८ ॥

मल्लेकोऽथाह्मदायुक्तो विधाय तिलकं स्वयम् ।
सौवर्णकुसुमैः पूजामकरोन्नवभूपतेः ॥ ९ ॥

रौप्यासनसमुद्भ्रान्तः कृत्वा छत्रपिधानकम् ।
एकशेषतयेव श्रीररक्षद् वंशभूषणम् ॥ १० ॥

चित्रं नवनृपस्यास्य मुखचन्द्रावलोकनात् ।
नागराननपद्मानां विकासः समपद्यत ॥ ११ ॥

अभिषेकक्रियारब्धहोमधूममिषाद् भुवः ।
हर्षेणैवोद्गतो राज्ञो सुखोच्छ्वास इवाबभौ ॥ १२ ॥

वाद्यमानोद्यतातोद्यतोद्यत्प्रतिरवच्छलात् ।
सुप्रसन्नाः सुदेवस्य प्रोचुः पूर्णाशिषो दिशः ॥ १३ ॥

ध्वजमाला बभुर्दीर्घस्फुरद्रक्तपटाञ्चलाः ।
ज्वाला इव प्रतापाग्नेर्निर्गता नवभूपतेः ॥ १४ ॥

छायाकुसुमकार्यास्ता बभुः श्वेताः प्रविस्तृताः ।
चिरात् तरुणराजाप्त्या हर्षहासा इव श्रियः ॥ १५ ॥

---

9 [a]) B मल्लको.

10 [c]) K -शेषत एव.

11 [c]) MSS and C B नगरा° (emended as in text with M). —[d]) C B विकाशः .

12 [c]) S'_8 A C [इ]व (for ए°). —[d]) C B मुखो°.

13 [b]) S'_6 C -तोद्यप्रति-. —[c]) $S'_{6\cdot8}$ A $I_{3\cdot5}$ K D सु (I_5 स) प्रसन्ना; S'_6 I_1 सुदेवास्य; S'_8 A C तदेवास्य; $I_{2\cdot4}$ स (for सु).

15 [b]) S'_2 $I_{3\cdot5}$ D प्रबिसृताः . —[c]) $S'_{2\cdot3}$ C $I_{3\cdot5}$ K राज्याप्तया.

कौशेयकोज्ज्वलाः सर्वे सेवका नवभूपतेः ।
स्फुरद्भाग्यतरङ्गस्य तरङ्गा इव तेऽरुचन् ॥ १६ ॥

कार्पासकपरीधानं यत्र यत्राभवत् पुरा ।
तत्र तत्रास्त तद्राज्ये कौशेयकव्ययो महान् ॥ १७ ॥

राज्यलाभे वसन्ताभे सूर्यस्येव महीपतेः ।
प्रतापहारकाः सर्वे दुष्टमेघा लयं ययुः ॥ १८ ॥

रविः प्रदीप्तः कुरुते प्रकाशं
विभाति चास्मिन् सति सूर्यकान्तः ।
तस्मात् समुत्थः स च पावकोऽर्च्य-
स्तमोपहः किं न करोति कार्यम् ॥ १९ ॥

आसन् पितृपितृव्याद्या यत्कृते विफलश्रमाः ।
पौत्रेण हेलया प्राप्तं तद्राज्यं गतकण्टकम् ॥ २० ॥

पितुः पितामहस्यापि पितृव्यस्य च संपदः ।
भाग्यभाजं नृपं प्रापुः सर्वाः सिन्धुमिवापगाः ॥ २१ ॥

षड्दर्शनपरिचयं सोऽग्रहीन्मत्सरोज्झितः ।
षड् दर्शनक्रिया यस्मिन्नैकमत्यमिवाययुः ॥ २२ ॥

भूपतेरब्रदायुक्तो नियुक्तः सर्वकर्मसु ।
साचिव्यं पुत्रसंयुक्तः पुण्योद्युक्तः सदाकरोत् ॥ २३ ॥

---

16 c) -तराङ्गिण्याः is suggested for -तरङ्गस्य.

18 c) MSS and C B प्र ($S'_{6\cdot 8}$ प्री) त्या (emended as in text with M) प–.

19 c) I_4 तस्मिन् ; I_2 -समुक्तः (mislec. for S'ar. त्थः); S'_3 I_{1-5} C [अ]न्यः (for र्च्यः). —d) M (evid. emend.) कुरुते न कार्यम् .

20 b) S'_8 A ह्यफल– (for वि°).

21 c) K प्राप्ताः .

22 a) S_3 षड्दर्शने.

अथ प्रथममेवाझदायुक्तं मल्लिकं नृपः ।
सग्रामग्रामनाग्रामप्रमेयस्वामिनं व्यधात् ॥ २४ ॥

पुत्रोऽस्य नौरुजायुक्तो द्वारपालादिकार्यभाक् ।
इक्षिकामभजद्राष्ट्रं सग्रामविभवोर्जितः ॥ २५ ॥

पानलीलान्तरे तत्तत्प्रसादामृतवर्षिणा ।
येन दारिद्र्यदावाग्निः केषां न क्षपितः क्षणात् ॥ २६ ॥

बहिर्देशस्थिते राज्ञि बाल्ये यः सेवकोऽभवत् ।
स ताजिभट्टो मल्लेकमतः प्रापान्तरङ्गताम् ॥ २७ ॥

निग्रहानुग्रहव्यग्रः समग्रे राज्यविग्रहे ।
दत्तदूत्याधिकारेण राज्ञो जिह्वेव सोऽभवत् ॥ २८ ॥

अधिकारनदी पूर्वं स्फुरन्ती शतधाभवत् ।
तदा द्वितीययावृत्त्या तस्मिन् कृतपदा बभौ ॥ २९ ॥

अन्येऽप्युच्चावचान् ग्रामान् जोनराजानकादयः ।
पूर्वसेवानुसारेण प्रसादं प्रापुरञ्जसा ॥ ३० ॥

श्रीमल्लेकाझदः सर्वकार्ये यां स्थितिमब्रवीत् ।
तां नोदलङ्घयद् राजा वेलां सिन्धुरिवोल्बणः ॥ ३१ ॥

पित्र्याः पैतामहा वापि विरुद्धा बन्धनेऽवसन् ।
भुट्टदेशं धिया तस्य तेषां निष्कासनं व्यधात् ॥ ३२ ॥

---

24 c) M (evid. emend.) संग्राम– (for स°).

25 a) RSs_2 notices ऊरुरुजार्तो (for नौरुजायुक्तो). —c) S'_3 इतिका° (for °क्षि°).

26 a) S'_3 C I_{1-5} B तत्र (for तत्तत्).

29 b) S'_8 शतदा°.

31 c) S'_3 C [उ]दलम्भ (S'_3 *sup. lin.* ङ्घ) यत् . —d) D [उ]ल्वण: .

32 b) D B निरुद्धा. —d) A C B निष्काशनं.

सर्वदर्शनसंयुक्तो नृपो मन्त्रिविधेयधीः ।
पितामहसमाचारं प्रावर्तयत मण्डले ॥ ३३ ॥

स्वामी क्षमी कृतज्ञश्च मन्त्री भक्तः स्मयोज्झितः ।
संयोगोऽयं प्रजापुण्यैः सुचिरेण निरीक्षितः ॥ ३४ ॥

उच्चासनेषु मार्गेशठक्कुरादीन् निवेशयन् ।
तद्दूत इव राजाग्रे स निषण्णोऽभवत्तदा ॥ ३५ ॥

हितं प्राणपणेनापि प्रभोः संपादयन्नयम् ।
महेश्वरवदेतस्मिन्नाभवद् भक्तिखण्डितः ॥ ३६ ॥

मठाग्रहारसदननिर्माणातिथिपूजनैः ।
नृपोपचारैः साफल्यमनैषीत् सर्वसम्पदः ॥ ३७ ॥

कमलममलं दृष्ट्वा श्रीमत्स्वकोशविभूषितं
मथयितुमथ प्राप्तो यावन्मदान्मदवारणः ।
प्रकृतिमलिनस्तावन्मग्नः सपङ्कसरोवरे
श्रवणचपलो बद्धो याति क्षयं मधुपैः सह ॥ ३८ ॥

अत्रान्तरे स बहामखानः पिशुनमोहितः ।
देशान्तरोद्यमं त्यक्त्वा युद्धायागान्मदोद्धतः ॥ ३९ ॥

त्वद्बलान्तरमेष्यामो वयं तव रणक्षणे ।
इति लेखैर्धृताशं तमकुर्वन् राजपूरुषाः ॥ ४० ॥

कर्णाह्लान्तरतः शैलानुल्लङ्घ्य कटकोत्कटः ।
क्रमराज्यपुरं प्राप्तः क्रमराज्यजिहीर्षया ॥ ४१ ॥

---

34 d) D B संचिरेण.
37 b) M (evid. emend.) -भोजनैः .
38 a) $S'_{3.6}$ (before corr.) C K -कोष-.
40 a) S'_{6} C तद् (for त्वद्°).
41 a) $S'_{3.6}$ C B (evid. emend.) कर्णाभ्य° (for °ह्ला°); D कर्णाह्लंतरतः .

तावन्मन्त्रियुतो राजा स्थितोऽवन्तिपुरान्तरे ।
तत्प्रत्यावृत्तिवार्तां तां श्रुत्वा तूर्णं न्यवर्तत ॥ ४२ ॥

राजा सुय्यपुरं प्राप्तः पितृव्यागमविह्वलः ।
आनीय सचिवान् सर्वान् सभान्तरिदमब्रवीत् ॥ ४३ ॥

पितुः क्रमागतं राज्यं पुत्रस्येत्युचितं मम ।
कोऽयं पितृव्यो ज्येष्ठोऽपि कनिष्ठो निर्मितोद्यमः ॥ ४४ ॥

अथवा वीरभोग्यायां भुवि कोऽयं नयो द्वयोः ।
युद्धेन विजयी यः स्याद् राज्यभाक् सोऽस्तु मण्डले ॥ ४५ ॥

श्रुत्वेति नृपतेर्वाक्यं प्रत्यूचुर्मन्त्रिनायकाः ।
ये तेऽप्यादमखानाद्यास्त्वदर्थे विधिना हताः ॥ ४६ ॥

कोऽयमल्पबलस्ते स्याद् योद्धा स्थानपरिच्युतः ।
किं त्वद्यावसरो नास्ति समित्युभयवेतनाः ॥ ४७ ॥

अमुमेव मिलन्त्येते यदि किं क्रियते पुनः ।
तद्धृत्वा कोशसामग्रीमितो गत्वा बहिस्ततः ॥ ४८ ॥

देशमाक्रम्य नः कार्यं सिद्ध्यत्येवाचिराद् विभो ।
श्रुत्वेति मल्लिकः प्राह भूपं तत्र सभान्तरे ॥ ४९ ॥

तिष्ठत्वत्र भवांस्तावन्मौलं मन्त्रिसभान्वितः ।
स्वकीयादमखानीयान् जेतुं तं विसृजामहे ॥ ५० ॥

---

43 [a]) C स्वय्य-.

45 [a]) $S'_{2\cdot 8}$ A $I_{3\cdot 5}$ K D -भोज्यायां .

46 [a]) K [इ] थं (for °ति). —[c]) $S'_{3\cdot 8}$ A $I_{3.5}$ D [आ] धम-. K om. 46^{cd}.

47 S'_2 hapl. om. 47^{ab}. —[d]) S'_7 *sup. lin.* gloss सङ्ग्रामे (for समिति).

50 [c]) S'_8 A $I_{3\cdot 5}$ K D °धम-; S'_3 C K -खानीयां .

ते चेज्जिता वयं यामः पुनः सर्वबलान्विताः ।
कोऽयं तत्सम्भ्रमः केऽस्य सहायाः किं करोत्यसौ ॥ ५१ ॥

श्रुत्वेत्यादिमतं तेषां विविधं निश्चयोज्झितः ।
मल्लिकाह्मदमन्त्रेण कर्तव्यं प्रत्यपद्यत ॥ ५२ ॥

पितुः पितामहस्याथ सैन्यं धृत्वा निजान्तिके ।
पैतृव्यान् सेवकान्स्वांश्च दत्त्वा तत्तद्बलान्वितान् ॥ ५३ ॥

सफिर्यडामरांस्ताजिभट्टादीन् व्यसृजन्नृपः ।
योद्धुं बह्रामखानाय मावरीदेशवासिने ॥ ५४ ॥

अथ स्वल्पबलानेताञ् जेष्यामीति त्वराकुलः ।
तावद् ब्रह्ामखानः स प्राप डुलपुरान्तरम् ॥ ५५ ॥

अनागतैः कृताश्वासैरपि राजमहत्तमैः ।
स्वात्मानं वञ्चितो मेने तन्निराशो नृपात्मजः ॥ ५६ ॥

तद्दिने राज्यलक्ष्मीः सा पितृव्यभ्रातृपुत्रयोः ।
द्वयोरासीत् समारूढा कोट्योः संदेहधीरिव ॥ ५७ ॥

चौरा इवान्धकारौघे द्वैराज्योपप्लवप्रियाः ।
तुतुषुश्चक्रवाडाद्यास्तच्छ्रुत्वा क्रमराज्यजाः ॥ ५८ ॥

---

51 cd) S'_3 C $I_{3.5}$ B कस्य सहायः.

52 b) $S'_{6.8}$ A C (gram. assim.) °ज्झितम्. —d) C B कर्तव्ये (mis-lec. for S' ār. व्यं).

53 b) S'_6 C I_{1-3} D B वृत्वा; S'_3 कृत्वा; I_4 दृत्वा.

54 a) S'_8 A I_1 D ताज–. —c) M (evid. emend.) -खानेन. —d) I_1 माचरी–; M (evid.e mend.) -वासिना.

55 d) $S'_{3.6}$ C दुल–; K लुलु–; S'_2 लुल–; RSs_2 notices लुलवपुर–.

58 c) $S'_{2.6}$ $(\text{marg.})_8$ A $I_{1.3.5}$ K D चक्र– (for °क्र); $S'_{3.6}$ C -भावा° (for वाडा. Thus marg. in S'_6); $I_{1.3.5}$ वाभा (I_5 *sup. lin.* ठा); M (evid. emend.) -पाला° (for वाडा). —d) MSS and C B

अथ जैनगिरीं यावदाययौ तद्रणाकुलः ।
दूतस्तावत् समागत्य भूपतेरिदमब्रवीत् ॥ ५९ ॥

देव बह्रामखानः सतनयो नयविच्युतः ।
युयुत्सुः समरे बद्धः करीव मदनिर्भरः ॥ ६० ॥

पतिते तद्रणोद्याने त्वद्बलोद्धतसारसे ।
तत्यजेऽनुचरैः खानः पौषे पर्णैरिव द्रुमः ॥ ६१ ॥

ततः संजरमेराद्या गर्जन्तः सैन्यनायकाः ।
दुष्टमेघा इवायाताश्चक्रुस्तच्छरवर्षणम् ॥ ६२ ॥

धन्यास्ते श्लाघ्यमरणस्मरणाः स्वामिनः पुरः ।
स्मृत्वामितप्रसादानां जीवं यत् तृणवज्जहुः ॥ ६३ ॥

तच्छुद्धये ऋणमवेक्ष्य मितप्रसादं
प्राप्ते क्षणे जहति ये निजजीवरत्नम् ।
शस्त्राणि पुष्पनिकरानिव संविदन्तो
धन्यास्त एव कतिचित् प्रभुसेवकेभ्यः ॥ ६४ ॥

अथो देवस्य माहात्म्यं यत्तस्यैव रणे भटाः ।
शिरालमार्गपाद्या ये तद्भृत्याः प्रलयं ययुः ॥ ६५ ॥

तं श्रुत्वा (emended as in text with M).

59 a) S'_6 $I_{1\cdot 2-4}$ C B (evid. emend.) -गिरिं.

61 a) S'_3 तद्रणात् . —b) $S'_{2.6}$ K त्वद्बलोद्यत–; MSS and C B -मान (mislec. for S'ār. सार) से.

62 a) S'_8 A I_5 D संज्वर–; I_2 B (evid. emend.) -मीरा°. —d) $S'_{2\cdot 8}$ A K ते (for तत्).

63 ab) S'_7 -मरणा । स्मरणाः; $S'_{3\cdot 8}$ A I_{2-5} K D -मरणा स्मरणाः; S'_6 C -मरणास्सरणाः; I_1 B मरणाः स्यरणाः; S'_2 -मरणस्मरणाः (as in text).

64 a) $I_{3\cdot 5}$ K तच्छूद्धये; $I_{1\cdot 4\cdot 5}$ K B श्वेक्ष्य. d) S'_2 नृप– (for प्रभु).

65 a) $S'_{3\cdot 6}$ (after corr.)$_8$ A I_2 D B अथ; S'_2 अहो. —c) S'_2 शिर (*sic*) ल–; RSs_2 notices सिराल–; S'_2 ते (for ये).

इदं चित्रतरं यन्नः कटके कोऽपि नो मृतः ।
किंत्वस्मद्भटनिर्मुक्तशराग्रफलसंधितात् ।
निष्क्रष्टुं नाशकत् कोष्ठात् खड्गं खानो रणोद्यतः ॥ ६६ ॥

तेनाफलायुधः खानो दीनस्त्वद्भटवेष्टितः ।
चितानल इवासारैर्मिथ्योष्मा समपद्यत ॥ ६७ ॥

यावत् समेत्य हन्तुं तं प्रारभन् कृपया द्रुतम् ।
तं फिर्यडामरस्तावदरक्षद् बाहुपञ्जरे ॥ ६८ ॥

भूः पङ्किलातिवृष्टिश्च द्विजोऽग्रे निःसहायता ।
मृत्युभीतिरिति प्राभूत् किं किं तस्य न दुःखदम् ॥ ६९ ॥

शीतवातभयोद्विग्नाः मग्नाः केदारकर्दमे ।
त्यक्त्वा तं तद्भटा नग्ना गर्तांटा इव तेऽचलन् ॥ ७० ॥

अर्जितां सर्वसामाग्रीं पामरैः परिलुण्ठिताम् ।
साक्रन्दं च सुतं पश्यन्नश्यद्धैर्यः स विव्यथे ॥ ७१ ॥

दध्यौ च क्व च मे भ्राता क्व भृत्याः क्व गृहादिकम् ।
ससुतः शत्रुभिर्बद्धः कं पृच्छामि करोमि किम् ।
वरं मरणमेवास्तु मा मास्तु मम जीवनम् ॥ ७२ ॥

फलितं वचनं मेऽद्य यदुक्तं जनकेन तत् ।
धिङ् मां चिन्तामणिं त्यक्त्वा येन काचमणिः श्रितः ॥ ७३ ॥

---

66 [d]) S'_6 C -सन्धिजात् .

67 [a]) B -फलयुधः . —[d]) MSS and C B मिथोष्मा (emended as in text with M).

68 [d]) M (evid. emend.) भुज- (for बाहु).

69 [b]) M (evid. emend. द्विषो (°जो).

70 [a]) K भयोद्विग्नाः .

72 [c]) S'_2 ससुशत्रु···भिः .

इत्यादि निन्दन् स्वात्मानं पश्चात्तापहताशयः ।
जीवन्मरणमापन्नः खानः संप्रति वर्तते ।
पौषे तरुरिवोन्नग्नः फलपत्रविवर्जितः ॥ ७४ ॥

राज्यं तव क्रमायातं दत्तं देवेन भुज्यताम् ।
फलितो धर्मविजयः सोऽयं भाग्यैर्महीपते ।
किमन्यत्तस्य कर्तव्यं यत्तत् तूर्णं समादिश ॥ ७५ ॥

श्रुत्वेति नृपतिस्तुष्टो दत्त्वास्मै पारितोषिकम् ।
जयवाद्यनिनादौघैः सर्वं बलमतोषयत् ॥ ७६ ॥

अन्येद्युस्तद्भटा जैनगिर्यां कटकवेष्टितम् ।
बहामखानमानिन्युः ससुतं भूपतेः पुरः ॥ ७७ ॥

संग्रामविजयोत्सिक्तं सत्कर्तुं स्वभटव्रजम् ।
सहर्षो राजधानीं तामारुरोह नरेश्वरः ॥ ७८ ॥

उच्चावचोक्तिमुखरपौरान्तरगतं नतम् ।
भूमे रन्ध्रमिवेक्षन्तं लज्जया च भयेन च ॥ ७९ ॥

रणक्षणभटन्यस्तहस्तध्वस्तविभूषणम् ।
दयालुनीचदत्तात्मजीर्णवस्त्रावगुण्ठितम् ॥ ८० ॥

---

74 c) S'_6 C °मरणसम्प (mislec. for S'ār. °माप) न्नः. —f) MSS and C कुलकं after -विवर्जितः .

75 c) M (evid. emend.) -ावटपी (for °जयः). —d) S'_8 A महीपतेः. —f) S'_6 C यत्तु तूर्णं.

79 a) S'_2 -मुखरं; D -मुखरः . —c) S'_2 भूमि–; M (evid. emend.) [ई]क्षाणं.

80 a) S'_2 -व्यूह–; K -व्यस्त– (for न्यस्त). —c) S'_3 (after corr.) दयालुना च दत्ता°.

मुखलग्नेषुभेदोद्यद्रक्ताक्तधृतवेष्टनम् ।
अलक्ष्मीवीक्षितं दूरात् पितृव्यं क्षणमैक्षत ॥ ८१ ॥

भाग्योर्जितस्य भूभर्तुरग्रे बद्धः स सात्मजः ।
दीनात्मा ददृशे पौरैः स्थिराः कस्य विभूतयः ॥ ८२ ॥

लोभाक्रान्तधियो विवेकमुचितं मुञ्चन्ति यन्मोहिता
भुक्ता या मनसापि दर्पकचितास्त्यक्तुं न शक्याः स्वयम् ।
सन्तापाय भवन्ति सन्ततमलं नीताः परैश्चेद् बला-
न्मा मा सन्तु भवेऽत्र हन्त चपला वेश्या इवैताः श्रियः ॥८३॥

उपेक्षितः पिता तादृगस्वास्थ्ये स्वार्थलिप्सया ।
ज्येष्ठोऽप्यादमखानः स बाधितोऽपाययुक्तिभिः ॥ ८४ ॥

दुराशयापरो भ्राता श्रियोऽसाध्या मयेक्षणात् ।
राज्यलोभाद् भ्रातृसुते तास्ता द्रोहधियः कृताः ॥ ८५ ॥

अद्यैतेन फलं प्राप्तं तदधर्मविनिश्चयात् ।
दृष्ट्वा बद्धं तमानीतं खानमित्यवदज्जनः ॥ ८६ ॥

केऽप्यूचुः स पितुः शापाद् विमूढः समपद्यत ।
तथाहि तं पिता जातु पितृद्वैधे रहोऽब्रवीत् ॥ ८७ ॥

---

81 b) I_4 °द्रक्त···धृ°. —d) $S'_{6\cdot7}$ I_5 after ऐक्षत (figure) 3.

82 b) S'_6 C B मा (mislec. for S'ār. सा) त्मजः.

84 c) $S'_{2\cdot8}$ A $I_{1\cdot3-5}$ K D [आ]धम–.

85 b) M (evid. emend.) श्रितो; $I_{2\cdot4}$ B अपेक्षणात्.

86 c) D आवी (mislec. for S'ār. नी) तं. —d) S'_2 [अ]ब्रवीत् (for °वदत्).

87 b) S'_6 C हि (for वि°). —d) M (evid. emend.) पुत्र– (for पितृ).

राज्यं त्वदग्रजाभ्यां मे नाशितं वैरतो मिथः ।
तत्राप्यनिष्टौ द्वावेव मम चिन्ताज्वरप्रदौ ॥ ८८ ॥

तदेतौ विनिवार्याहं युक्त्या देशसुखाशया ।
त्वामेव वर्धयिष्यामि त्वं मदेकाश्रयो भव ॥ ८९ ॥

श्रुत्वेति प्राह तं नाहं जातुचेद् भ्रातरं त्यजे ।
यतो ज्येष्ठोऽस्ति मे द्विष्टो द्वयोः किं स करिष्यति ॥ ९० ॥

श्रुत्वेत्याहाग्रजं हन्तुं त्वयेच्छुस्त्वां स रक्षति ।
प्राप्तप्राघुणहस्तेन भुजङ्गमिव वेश्मगम् ॥ ९१ ॥

सिद्धकार्यः सपुत्रः स बाधते यदि का गतिः ।
तच्छ्रुत्वा संस्कृतज्ञः स श्लोकेनेत्युत्तरं ददौ ॥ ९२ ॥

विद्यातीर्थे श्रुतपरिचिताः साधवः सत्यतीर्थे
गङ्गातीर्थे सकलमुनयो योगिनोऽध्यात्मतीर्थे ।
लज्जातीर्थे कुलयुवतयो दानतीर्थे वदान्या
धारातीर्थे धरणिपतयः किल्बिषं क्षालयन्ति ॥ ९३ ॥

तदाकर्ण्याब्रवीद् राजा सक्रोधं तं दुराशयम् ।
बहुधा युद्धदृष्टोऽसि नाहं यत्रास्मि तत्क्षमः ॥ ९४ ॥

---

88 b) S'_3 वैरजो (marg. तो).
90 b) M (evid. emend.) जातुचित्. —c) S'_3 C त्वि (mislec. for S'ār. द्वि) ष्टो.
91 a) I_{1-3} D हर्तुं (mislec. for S'ār. न्तुं). —b) I_2 B (evid. emend.) रक्ष्यति. —c) $S'_{2\cdot8}$ A $I_{1\cdot3-5}$ K D -प्राहुण-.
93 RSs_2 quotes 93. —b) RSs_2 मननिरताः (for सकलमुनयः). —c) S'_2 $I_{1\cdot3\cdot5}$ K D वदन्या. —d) S'_6 -तनयः (for पतयः).
94 a) S'_2 I_5 आकल्य (for °र्ण्य). —b) M (evid. emend.) सक्रोधः. —c) D युध-; S'_8 A -धृष्टो; M दृष्टयुद्धोऽपि. —d) S'_6 (marg.)$_8$ A तत्र सः (for तत्क्षमः); M (evid. emend.) तु (for तत्).

वराकः खड्गधारार्थी तत्र त्वमसि दर्पितः ।
किं वच्म्युत्पाटनायोग्ये नेत्रे पश्यामि दुर्धियः ॥ ९५ ॥

तदेक एव नष्टस्त्वं भवेः सानुशयोऽचिरात् ।
इत्युक्तमस्मिन् पित्रा यत् तदद्य फलितं वचः ।
तं वीक्ष्येति कथा लोकः स शोकोऽप्यकरोन्मिथः ॥ ९६ ॥

यथोचितैर्दानमानैस्तोषयित्वा निजं बलम् ।
तस्मिन्नेव दिने राजा तुष्टो नगरमाययौ ॥ ९७ ॥

बद्धं रिपुं समादाय नौकारूढं सुतान्वितम् ।
श्रीजैननगरे राजावासे स्वे बन्धने व्यधात् ॥ ९८ ॥

जननी नृपतेः प्रीता दर्शनामृतहर्षणा ।
अमन्यत रणोत्तीर्णं पुनर्जातमिवात्मजम् ॥ ९९ ॥

शङ्कितो यौनसंबन्धाद् भूपतिः कतिचिद्दिनैः ।
रुषावतारसीहादीन् कारागारान्तरे न्यधात् ॥ १०० ॥

पापो मल्लिकजाजः स पञ्चगह्वरदेशजः ।
पुनश्चाट्टुकतन्त्रेण तत्तदायासकार्यभूत् ॥ १०१ ॥

---

95 c) MSS and C B उत्पाटने (emended as in text).

96 c) M (evid. emend.) अस्मै. — e) $S'_{6\cdot7\cdot8}$ A C $I_{1\cdot3-5}$ K D तमीक्षेति; S'_2 I_2 B तमीक्ष्येति (emended as in text with M). — f) After मिथः MSS and C B इति बह्रामखानपराजयः.

98 c) S'_8 A C राज–.

99 b) M (evid. emend.) -वर्षणा.

100 a) I_5 -सधानात् (°बन्धात्). — d) MSS and C B ब्य (mislec. for S'ār. न्य) धात्.

101 a) K मल्विकजातः; $I_{1-3\cdot5}$ C -टाजः (for जा°); M (evid. emend.) -जादः. — c) $S'_{6\cdot8}$ A $I_{1\cdot3}$ K D चुटक–; $S'_{2\cdot3}$ चुट्टुक–; I_4 शटक–; B चट्टुक.

उत्कोचमुद्रादानादिप्रपञ्चाञ्चितवञ्चनः ।
सुसंचयकृता येन देशोऽशेषो विलुण्ठितः ॥ १०२ ॥

अभिमन्युप्रतीहारः स्वतन्त्रो मन्त्रिमण्डले ।
स देवसरसि स्वाम्यमभजद् बलदर्पितः ॥ १०३ ॥

लोत्रप्रतिग्रहक्षेत्रदत्तरुद्धिः पदे पदे ।
लुब्धः स निजमात्मानमनाशीर्भाजनं व्यधात् ॥ १०४ ॥

शङ्क्यो राजगृहासन्नः पितृव्यो बन्धनस्थितः ।
त्वय्यन्यत्र स्थिते कोऽपि नीत्वा द्वैराज्यमाचरेत् ॥ १०५ ॥

इत्यादि प्रेरितोऽनेन नेयबुद्धिर्नरेश्वरः ।
क्रुद्धो बहामखानाय नेत्रोत्पाटनमादिशत् ॥ १०६ ॥

तस्य तूलाचिते नेत्रद्वये तप्तां शलाकिकाम् ।
जोनराजानको लौहीं दङ्नाशार्थमदापयत् ॥ १०७ ॥

नैर्घृण्यमक्षिहर्तुर्यत् कृष्टाक्षस्य च या व्यथा ।
द्वयं न शक्यते वक्तुं यथार्थं मादृशां गिरा ॥ १०८ ॥

दुर्नीतिमवदन् केचित् केचिदीश्वरजृम्भितम् ।
प्राक्कर्मपाकमपरे नीचसङ्गमथापरे ॥ १०९ ॥

केचिद्विभववैशस्यं कातरत्वमथापरे ।
तदन्धंकरणं श्रुत्वा कोऽप्यवाच्यगिरोऽब्रवीत् ॥ ११० ॥

---

104 a) $S'_{2\cdot6}$ -गृह-.

105 c) $S'_{2\cdot3}$ C [अ]प्यत्र (for °न्य°).

107 c) $S'_{3\cdot6-8}$ A C I_2 K B जैन-; S'_2 $I_{1\cdot3-5}$ D जोन- (as in text).

108 a) $S'_{3\cdot6}$ C नैर्गुंग्याद (mislec. for S'ār. °र्घृण्यम) क्षि-; S'_8 A C I_5 -हन्तु (mislec. for S'ār. र्तु)र्. —b) S'_2 कृष्णाक्षस्य.

109 a) $S'_{3\cdot6}$ C दुर्णीतिम्.

110 c) K D B अन्धक°. —A I_{1-5} K D hapl. om. 110[ab].

मानुष्यं मास्तु तच्चेत्स्याद् वरं प्राकृतवेश्मनि ।
राजगेहेऽस्तु मा जन्म कस्यापीति न कोऽवदत् ॥ १११ ॥

स्फूर्जद्भाग्यसमुद्भवन्नवनवप्रोल्लाससंपत्सुखः
प्रायो वेत्ति विभुर्विनोदकलया कालं विशालं क्षणम् ।
दौर्भाग्योदितदुर्गतेः स्मृतनिजप्राच्यप्रकर्षोन्नते-
स्तस्य प्राप्तमहाभयस्य स भवेत् स्वप्नोऽपि कल्पोपमः ॥११२॥

अयःशृङ्खलबद्धाङ्घ्रिः सोऽन्धस्तत्रैव बन्धने ।
स्मरन् विभवसामग्रीमनयच्छेषमायुषः ॥११३॥

नायं गीतैर्विना जातु वर्तते स्म गृहान्तरे ।
इत्येव तस्य साराचा झिल्ल्यो जागरणं व्यधुः ॥११४॥

योऽभूच्छय्यागृहे नित्यं सर्वाङ्गे सेवकैर्वृतः ।
अभूवन् केवलं तस्य भृत्याश्चटकमत्कुणाः ॥११५॥

वितानावलयो यस्य बभूवुर्दुर्लभाम्बरैः ।
दृष्टास्त एव तद्गेहे लूतातन्तुविनिर्मिताः ॥११६॥

यद्वपुः कोमलं पट्टतूलशय्यामभूषयत् ।
तदा तत्तस्य भूपृष्ठेऽशयिष्टादृष्टविष्टरम् ॥११७॥

दीयतां दीयतां तस्य वाणी या त्यागिनः श्रुता ।
विपत्क्षणेन सैवाभूत् तत्तद्वस्तूपयाचने ॥११८॥

गतं स्वाम्यं हता भृत्याः प्राप्तः परिभवो नवः ।
बन्धनं शृङ्खलाबन्धैर्नेत्रोत्पाटनतो व्यथा ॥११९॥

---

112 c) S'_3 (before corr.)$_{6.8}$ A C K स्मृति–; S'_7 *int. lin.* gloss प्राग्भाव: प्राच्य: .

113 b) S'_3 C बन्धनै: .

114 d) K झिल्यो; I_5 चिल्यो.

116 b) S'_2 C I_{2-5} K (evid. emend.) दुर्लभा:, °सु (mislec. for S'ār. म्ब) रै:; I_1 B दुर्लभा: सुरै: .

इत्येवैकः स्मरन् दुःखं सोऽन्धो राजसुतश्चिरम् ।
नाज्ञासीत् स्वात्मनस्तुल्यमपरं प्राक्कथास्वपि ॥१२०॥

कोशोज्ज्वलं कमलमेक्ष्य नवं समन्ता-
दस्मिन् रमेऽहमिति तुष्यति चञ्चरीकः ।
दोषानुषङ्गमधिगम्य निबद्धमूर्ति-
स्तत्रैव नाशमुपयाति विधौ विरुद्धे ॥१२१॥

राजवासः स्वलीलार्थं निर्मितस्तेन यः स्वयम् ।
स एव बन्धनायाभूत् को वेत्ति भवितव्यताम् ॥१२२॥

इत्थं वर्षत्रयं तावदनुभूतमहाव्यथः ।
अस्थिशेषतनुः क्लेशात् तस्मिन्नेव क्षयं ययौ ॥१२३॥

देशकालमनालोच्य वैरं यः कुरुतेऽरिभिः ।
स नश्यत्यचिरेणैव शौर्यश्रीमण्डितोऽपि सन् ॥१२४॥

अभिमन्युप्रतीहारस्तत्तच्छौर्यमदोद्धतः ।
आयुक्तपक्षं प्रबलं नासहिष्ट स निष्ठुरः ॥१२५॥

स्वातन्त्र्येण स्फुरन् प्राग्वत् स्फुरद्वाक्शरताडनः ।
दर्पादायुक्तपक्षस्य सूचीवाक्षिगतोऽभवत् ॥१२६॥

उपायान् कुर्वता तांस्तांच्छन्नकोपेन मन्त्रिणा ।
बन्द्धुं तं मल्लिकेनात्र नावाप्यवसरः क्वचित् ॥१२७॥

---

121 a) C ऐक्ष्य; D B ईक्ष्य.

122 a) S'_2 राजावासः.

123 c) $S'_{3\cdot6}$ C -तनु-.

125 b) S'_6 C -महोद्धतः. —c) $S'_{2\,3}$ C I_5 K B अयुक्त-.

126 a) C B स्फुरत्प्रा (mislec. for S'ār. न्प्रा) ग्वत्. — b) MSS and C B -ताडनम् (emended as in text).

एकदा तद्गृहं गत्वाश्वस्तं श्रीविजयेश्वरे ।
तद्धिया नृपती राजधान्यन्तस्तमबन्धयत् ॥१२८॥

अभिमन्युः स्वयं ख्यातः पाण्डवाद्याश्च तत्सुताः ।
सृगालवत्तदाभूवन् धिगिच्छां विविधां विधेः ॥१२९॥

यस्याहवे मुखमवेक्ष्य महागजेन्द्रा
दूरं प्रयान्ति बलिनः सशिलीमुखौघाः ।
दर्पाद्विशेद्यदि न निर्मितकूटयन्त्रं
कस्तं निरोद्धुमलमुत्सहते मृगेन्द्रम् ॥१३०॥

सपुत्रं हृतसर्वस्वं बद्ध्वा नौकान्तरे ततः ।
ताजिभट्टः समानीय कारागारान्तरेऽक्षिपत् ॥१३१॥

यादृग् बहामखानाय कारयन्नृपतेरसौ ।
वर्षेणैकेन तादृक्षं नेत्रोत्पाटनमन्वभूत् ॥१३२॥

यादृग् बहामखानस्य व्यथाभूदतिदुःसहा ।
अविन्दत् तादृशीं सोऽपि वक्तुं नान्येन शक्यते ॥१३३॥

यस्मिन्नेव दिने यस्मिन् मासे विप्रियमातनोत् ।
तस्मिन्नेव दिने तस्मिन् मासे सोऽपि समासदत् ॥१३४॥

सोऽपि वर्षद्वयं भुक्त्वा सपुत्रो नरकव्यथाम् ।
बहामखानवद्बद्धो व्यसनान्तर्व्यपद्यत ॥१३५॥

अद्यैव मद्दृशौ धन्ये याभ्यां मत्कुलवैरिणः ।
सर्वस्वहरणं दृष्टं मरणं जैनभूपतेः ॥१३६॥

---

128 c) $S'_{6.8}$ C $I_{3.5}$ D राज्य–.

129 c) I_{1-3} C B शृगाल–.

130 a) $S'_{2.7.8}$ A I_{1-5} K D B वदनमीक्ष्य.

132 b) M (evid. emend.) नृपतिम् . —c) $S'_{2.7.8}$ A $I_{1.5}$ K D तादृक्तं; I_3 तादृशं; $I_{2.4}$ B तादृत्तं; $S'_{3.6}$ C तादृक्षं (as in text).

इत्यूचे निष्ठुरं यत्स दुष्टात्मा कृतलुण्ठनः ।
तदुक्तिफलमापासौ तयोर्नाशोऽभवत् फलम् ॥१३७॥

चिन्तितं जैनभूपेन संपन्नं नैव यत्पुरा ।
हेलयास्याद्य पौत्रेण कृतमित्यवदज्जनः ॥१३८॥

यत्कर्तुमिच्छति परापचयं मनुष्य-
स्तेनैव तस्य नियमेन भवेद्विनाशः ।
शृङ्गं बिभर्ति हरिणः पररन्ध्रबुद्धया
शार्ङ्गीकृतं तदिषुभिर्हरते तमेव ॥१३९॥

दृष्टो रम्यश्चिरमुपवने वंशवाटो जनैर्यो
नानावर्णैस्तृणगणगुणैर्भूषितो भूरिपत्रः ।
तत्रान्योन्याहननजननात् तादृगभ्युत्थितोऽग्नि-
र्येनैकान्तादुपवनगतं सर्वमेव प्रनष्टम् ॥१४०॥

या कारकसभा रम्याभवन्मौलमहीभुजाम् ।
अचिरेणैव कालेन सर्वा स्वप्नोपमाभवत् ॥१४१॥

क्रष्टुं मल्लिकजादोऽयमन्धजं खानमिच्छति ।
राज्यार्थमिति केनापि राज्ञोऽग्रे पैशुने कृते ॥१४२॥

सर्वस्वहरणं कृत्वा कारायां बद्धुमादिशत् ।
श्रुतेन येन तद्द्विष्टो न कः सौख्यं समासदत् ॥१४३॥

आक्षेपैरार्जिता यद्वत्तेन श्रीर्न्यायवर्जिता ।
तद्वदाक्षेपतस्तस्मान्नीता राजाधिकारिभिः ॥१४४॥

---

140 b) D -गुणगणै: (for -गणगुणै:); S'_7 (*sup. lin.*) I_5 -नव- (for गुणै:). —d) $S'_{2\cdot6-8}$ A $I_{1\cdot3\cdot5}$ K D प्रण (*sic*) ष्टम् .

143 b) MSS and C B बन्धु (prob. mislec. for S'ār. द्धु) म् ; $I_{2\cdot3\cdot5}$ D आवि (mislec. for S'ār. दि) शत् . —c) $S'_{2\cdot3\cdot7}$ C I_{1-5} K B तेन; S'_6 (marg.)$_8$ A D येन (as in text); $S'_{3\cdot6}$ C I_{2-5} K यद° (for तद्).

उत्कोचमुद्रादानादितत्तदायासकारणात् ।
स विपत्पतितो नाभूत् कस्यापि करुणावहः ॥१४५॥

कदर्यहस्ते क्षणसौख्यनिष्ठं
विशत्यशुद्धं प्रसभं धनं यत् ।
कष्टेन निर्याति तदेव कृष्टं
शुनीभगे लिङ्गमिव प्रविष्टम् ॥१४६॥

एकैकं संचितं वस्तु कृष्टं कष्टेन तत्करात् ।
नियुक्तैः पीडनं कृत्वा बिलान्तर्गतसर्पवत् ॥१४७॥

पूर्णनापितमल्लिकजादाद्या हृतसंचयाः ।
बन्धनस्थाश्चिरं भूत्वा ते सर्वे प्रमयं ययुः ॥१४८॥

तत्तद्राज्याहिताकाङ्क्षिकुले तस्य क्षयावधिः ।
शापः श्रीजैनभूपस्य प्रसारितभुजोऽभवत् ॥१४९॥

मन्त्रै राज्यविवर्धनं कुरुत भोः सत्यं ब्रुवे मन्त्रिणो
नाशं स्वामिनि कुर्वतां नहि सुखं स्याद्वः परत्रेह च ।
यैर्यैर्जैनमहीपतावपकृतं पुत्रैर्नु भृत्यैर्नु वा
तैर्लब्धं फलमीदृशं तदहिता मात्सर्यधीस्त्यज्यताम् ॥१५०॥

अन्येऽप्युच्चावचास्तस्य सेवका ये तदाभवन् ।
तदनिष्टकराः सर्वे तद्वत्तेऽपि प्रमिम्यिरे ॥१५१॥

यावद्वसति वसन्तस्तावद्विलसन्ति संततं भृङ्गाः ।
तस्मिन्निष्टे नष्टे भ्रष्टच्छाया न चेष्टन्ते ॥१५२॥

---

146 c) $S'_{2.6-8}$ A C $I_{1.3-5}$ कृष्टुं; D क्रष्टुं; S'_3 B कृष्टं.
147 b) C B क्रष्टुं.
149 a) MSS and C B राज्याहि° (emended as in text). —b) D °वधि. —d) S'_2 [अ] पतत् (for °भव°).
150 c) S'_3 $I_{3.5}$ C D B पुत्रैर्न भृत्यैर्न.
152 b) C हि (for वि). —d) C नु (for न).

पूर्वं जैननृपः सैदनासीरादीन् समागतान् ।
पैगम्बरान्वये जातान् पूज्याञ् ज्ञात्वा महागुणान् ॥१५३॥

प्रोच्चासनकरस्पर्शदर्शितातुलसत्कृतीन् ।
स्वसुतादानमानेन यांस्तान् राष्ट्राधिपान् व्यधात् ॥१५४॥

तेभ्यः सैदज्यमालादीन् राजा ज्ञात्वा तरङ्गितान् ।
प्रत्यसुञ्चत् तदा देशात् तत्सञ्चयमवञ्चयन् ॥१५५॥

स सैदनासिरो धन्यो गण्यो धुरि मनीषिणाम् ।
यो विचार्यायतिं राज्ञि सति देशान्तरं ययौ ॥१५६॥

सुतोपनयनाद् राज्ञः सुचिरं यैर्नृपायितम् ।
बहुरूपादिराष्ट्राधिपत्यनित्यसुखोज्ज्वलैः ॥१५७॥

इतस्ततो भ्रमन्तस्ते केचिड्डिल्लीपुरं ययुः ।
केचिद्विभवलोभेन पुनर्निष्कासिता अपि ।
नारमन्त बहिर्देशे माघे मधुकरा इव ॥१५८॥

प्राप्ता ये परदेशजाः कणभुजो देशेऽत्र संपद्युता
गर्भात्थादिव विस्मृतात्मचरिताः कुर्युः प्रजापीडनम् ।
ते तत्पापभरेण नष्टविभवा निष्कासिताः स्वामिना
गच्छन्ति ह्रदकृष्टमत्स्यतुलनां तज्जीवनाशाकुलाः ॥१५९॥

---

153 c) $S'_{6\cdot 8}$ A D पैगम्भरा°.
155 a) B -ज्जमाला°.
156 b) $S'_{3,6}$ (marg.) C युधि (for धुरि).
157 c) S'_{3} C -रूपाधि- (mislec. for S'ār. दि).
158 b) S'_{6} C दिल्ली-; S'_{2} ढिल्ली-; $S'_{3\cdot 8}$ I_{1-4} K B डिली-. —d) C B निष्काशिता.
159 b) K B °त्थादिविवि°. —c) C निष्काशिता. —d) S'_{3} $I_{2\cdot 4}$ B -कष्ट- —K om. 159[a].

राजानकैष्ठक्कुरैश्च तैर्मार्गपतिभिः सह ।
निबद्धयौनसंबन्धकृतैक्यो मल्लिकोऽभवत् ॥१६०॥

सर्वतन्त्राधिकारेण राज्यतन्त्रमखण्डितम् ।
ताजिभट्टाय मल्लेको मुष्टिबद्धमिवाकरोत् ॥१६१॥

पुत्रीकृतोऽयं सद्वंश्यो मदाज्ञासात् स्फुरत्यलम् ।
इति तस्याक्षमिष्टादौ मल्लेकः स्फूर्जितं न कम् ॥१६२॥

स्वसारं वीक्षते स्वल्पं मार्गेशोऽपि ज्यहांगिरः ।
स्वसारं सैदनिर्मुक्तिदत्तपत्राङ्कितां व्यधात् ॥१६३॥

तन्मार्गेशाग्रजां राजानुमतेन प्रसन्नधीः ।
अभ्यर्थ्य ताजिभट्टाय मल्लेकस्तामदापयत् ॥१६४॥

ज्यहांगिरोऽपि मार्गेशः क्षितिपालानुरोधतः ।
स्वाग्रजार्पणमेतस्मै चक्षमे नयदक्षधीः ॥१६५॥

चञ्चरीका इवोद्यानं कुल्या इव महोदधिम् ।
भाग्यभाजं समायान्ति कलत्राणि च संपदः ॥१६६॥

---

160 a) K ठक्कूरैः.

161 b) MSS and C B राज– (emended as in text with M). —d) MSS and C B -बन्ध– (mislec. for S′ār. द्ध) म्. —K om. 161.

162 a) MSS and C B म (mislec. for S′ār. स) द्वं°. —b) $S'_{3.6}$ C सदाक° (for मदाज्ञा°. Thus marg. in S'_6). —c) $S'_{2.6}$ $(marg.)_{7.8}$ A [अ] सौ (mislec. for S′ār. दौ). —d) B (evid. emend.) मल्लिकः; D (before corr.) B किम् (for कम्).

163 b) C D ज्यहंगिरः.

164 a) D °ग्र (*sup. lin.* नु) जां.

165 a) C ज्यहङ्गिरो.

166 c) S'_6 $(after\ corr.)_8$ A D -भाजां.

तां मार्गेशाकुलोद्यानकल्पवल्लीं फलप्रदाम् ।
तैः संपूर्णगुणैः पूर्णां भट्टो लक्ष्मीमिवासदत् ॥१६७॥

सैदनिष्कासनं नैव संपन्नं जैनभूपतेः ।
हेलयैवास्य पौत्रेण कृतमित्यवदज्जनः ॥१६८॥

कृते निष्कण्टके देशे मल्लिकाह्मदसम्मतः ।
प्रतिष्ठारसिको राजा तत्सभा च तदाभवत् ॥१६९॥

विवाहोत्सवसद्वेश्मनाट्ययात्रादिमङ्गलात् ।
नापरामग्रहीच्चिन्तां सौराज्यसुखितो जनः ॥१७०॥

पञ्चाशवत्सरे राजा निर्ममे निर्ममेहितः ।
दिद्दामठे नदीप्रान्ते राजधानीं मनोहराम् ॥१७१॥

धन्याहमन्याः किं शून्या इत्येवाम्बुनि बिम्बिता ।
स्फुरच्चतुष्किकाहस्तैर्नृत्यतीघ दिवानिशम् ॥१७२॥

मद्वंश्येन कृता केनापीदृशीति दिदृक्षया ।
स्वर्णच्छत्रच्छलाद्यस्याः प्राप्तो व्योम्नो दिवाकरः ॥१७३॥

---

167 S'_2 om. 167[cd].

168 [a]) C B -निष्काशनं.

169 [b]) MSS (except S'_2) C B संत (<सन्त mislec. for S'ār. सम्म) तः; S'_2 -संयुतः.

170 [b]) MSS and C -मङ्गलान् (emended as in text); B (evid. emend.) -मङ्गलाम्.

171 [a]) $S'_{2.3.6}$ C $I_{1.2-4}$ D B पञ्चाशद°.

172 [a]) S'_2 B C अन्या.

173 [a]) $S'_{3.6-8}$ A C $I_{1.3.5}$ K मद्वंशे न; S'_2 $I_{2,4}$ D B मद्वंश्येन (as in text). —[d]) S'_2 व्योम्नि; $I_{1.2.5}$ व्योषो.

यत्कारुक्लृप्तकोणस्थदारुगारुडमूर्तिभिः ।
त्रस्ताश्चरन्तो नायान्ति पक्षिणस्तन्नभोऽध्वना ॥१७४॥

गोल्खातोनाभिधा राज्ञी माता दिद्देव देवता ।
विशालां धर्मशालां साप्यकरोन्मद्रसाख्यया ॥१७५॥

यत्प्रवेशे नृपस्तुष्टो मात्रा सह समागतः ।
पक्षमेकं व्यधाद् भूरिव्ययशालिमहोत्सवम् ॥१७६॥

प्रतिष्ठामर्धनिष्पन्नां निर्लौठ्यानुचितां नृपः ।
नगरे पितृपुण्यार्थं खानगाहं विनिर्ममे ॥१७७॥

कुलोद्धरणनागस्य तटभूमौ महीपतिः ।
वह्निदग्धं नवं चक्रे राजवासं मनोरमम् ॥१७८॥

विजयेशनदीप्रान्ते राजवेश्म नवीकृतम् ।
भाति भातिशयान्मध्यरत्नं हारावलेरिव ॥१७९॥

छत्रं यत्र स्फुरत्पत्रं वितस्ताम्बुनि बिम्बितम् ।
प्रेक्ष्य तुष्टैः सुरैर्मुक्तमिव सौवर्णपङ्कजम् ॥१८०॥

भाति सुय्यपुरे राजधानी राज्ञा विनिर्मिता ।
पुरातनीं दराजीर्णां हसतीव सुधासिता ॥१८१॥

---

174 a) $S'_{6.8}$ A C $I_{1.2}$ D -क्लिप्त-.
175 a) $S'_{6.8}$ A गौल्खा°; I_2 B (evid. emend.) गुल्खातुना°.
176 b) $S'_{3.6}$ (before corr.) C $I_{1.3.5}$ मातामह (for °त्रास°).
177 a) S'_2 °ष्ठां सर्वनि°. —b) $S'_{3.6}$ C निर्लोच्य (mislec. for S'ār. ठ्य); B (evid. emend.) निर्लौड्य; $I_{1.3-5}$ [आ] नीतितां (for °नुचि°).
178 d) $I_{1.3.4}$ मनोहरम् . b) C राजवेक्ष्म (corrupt).
179 d) $S'_{7.8}$ A $I_{1.3-5}$ K D हारावनेर् .
181 b) $S'_{3.5}$ C B राज- (for राज्ञा). —c) MSS and C B प (mislec. for S'ār. द) रा°; $S'_{3.6.8}$ A C I_2 B °कीर्णा (for जी°). —K hapl. om. 181[cd].

राज्ञा कृतैरनेकाक्षे स्वोद्याने राजवेश्मभिः ।
यद्दर्शनादनेकाक्षो नूनं स्वमभिनिन्दति ॥१८२॥

प्रतिष्ठा विहिता राज्ञा नवा या निजमण्डले ।
अन्यास्ता वर्णिता नात्र ग्रन्थगौरवतो मया ॥१८३॥

दिद्दामठेऽह्मदायुक्तः कृतातुलगृहावलिः ।
मसोदाहुजिरोदारशिलाभित्तिविराजितम् ।
खानगाहेति विख्यातं धर्मवासं विनिर्ममे ॥१८४॥

येन नानादिगायाततत्तत्पथिकशालिना ।
दिद्दामठपुरं सर्वं ययौ नेत्राभिरामताम् ॥१८५॥

प्रवेशे नृपमानीय षष्टिलक्षकृतव्ययम् ।
दत्त्वा सतिपुषग्रामं सत्रं यत्रावतारितम् ॥१८६॥

शाहाभिधास्य भार्यापि मठं सुकृतकर्मठम् ।
खेरीविषयमार्गान्तर्निर्ममे सप्रतिग्रहम् ॥१८७॥

तत्पुत्रो नौरुजायुक्तः कृत्वा धर्ममठं नवम् ।
नगरात् क्षिप्तिकां यावच्छैलसेतुं नवं व्यधात् ॥१८८॥

---

182 a) D अनीकाक्षे; $S'_{3\cdot6}$ C अल्पकाक्ष. —b) $S'_{2\cdot3\cdot7}$ C I_{1-5} K D B सोद्याने; $S'_{6\cdot8}$ A स्वोद्याने (as in text). —d) S'_{2} A $I_{1\cdot3\cdot4}$ अभिनन्दाति.

184 c) $S'_{3\cdot6\cdot8}$ C मसोदाह (S'_{8} हा) जिरो° (emended as in text); $S'_{2\cdot7}$ I_{1-5} K D मसोदाम (S'_{2} ह्म, K ह्मो, S'_{7} *sup. lin.* ह) जिरो°; A मसोदाहिरो°; B (evid. emend.) मसूदामजिरो°. —d) S'_{7} $I_{3\cdot5}$ K D B (gram. assim.) -विराजिताम् .

186 b) M (evid. emend.) -व्ययः . —c) S'_{3} C सतिपश–; S'_{2} सतीमुष–; S'_{7} *sec. m. sup. lin.* gloss सियबोज्न (or °बौठे illeg.) नी (for सतिपुष–).

उदीपे सति यो हन्ति सर्वेषां पुरवासिनाम् ।
स्तम्भनिर्मितदीर्घाश्मसेतुबन्धकुतूहलम् ॥१८९॥

भ्रातरावपि तौ धन्यावन्यौ रिगकनूथकौ ।
व्यधातां क्रमराज्यान्तर्मठौ सौधमनोहरौ ॥१९०॥

ताजिभट्टोऽपि भूपालवाल्लभ्यविभवोर्जितः ।
करालविषये जैनपुरीमध्ये मठं व्यधात् ॥१९१॥

कुद्दैनपुरीमध्ये चक्रेऽश्मरचनां नवाम् ।
इन्द्रोऽपीक्षेत तां सोऽपि भवेत् कर्मकुतूहली ॥१९२॥

एदराजानको राजवस्त्रशोभाधिकारभाक् ।
खानगाहं सुनिर्वर्त्य बलाढ्यमठकान्तरे ॥१९३॥

नवः पितृविहारान्ते निजजन्मभुवोऽन्तरे ।
येन लोकार्तिहृच्चक्रे विहारः सुगृहोज्ज्वलः ॥१९४॥

---

189 a) MSS and C B त (mislec. for S'ār. उ) द्वी (emended as in text) पे.

190 b) S'_6 C $I_{1\cdot3-5}$ रिचक–; $S'_{2\cdot6}$ (marg.) I_4 -नावकौ; S'_8 A -नाथकौ; $I_{1\cdot3}$ -नुथकौ; S'_7 I_5 -नथकौ.

192 a) S'_7 D कुद्द (mislec. for S'ār. द्द) देन; S'_2 C कुम्रदीन–; I_{1-5} B कुद्द (B द्ध) दीन–; $S'_{3\cdot6\cdot8}$ A कुद्ददे ($S'_{3\cdot6}$ दी) देन–. —b) S'_8 A यृष्टे (for चक्रे); A C I_4 D -रचना नवा. —c) MSS and C B तत् (emended to तां as in text); M (evid. emend.) चत् (for तत् of C B).—K hapl. om. 192–202.

193 b) I_4 -वस्तु- (for °स्त्र). —c) MSS and C B स (emended to सु as in text with M).

194 b) $S'_{3\cdot6}$ (after corr.) C $I_{3\cdot5}$ D B स्व- (for सु).

मठाग्रहारमस्ज्येदाविहारगृहपंक्तिभिः ।
त्रिंशद्विंशाः प्रतिष्ठास्ता मण्डले येन कारिताः ॥ १९५ ॥

सर्वदर्शनसंपन्नप्रतिपादितदक्षिणे ।
प्रतिहार्यक्षणे येन कोटिरेका व्ययीकृता ॥ १९६ ॥

स फिर्यडामरो जैननगरे सत्रसुन्दरम् ।
मसोदाहुजिरोदारं खानगाहं विनिर्ममे ॥ १९७ ॥

हयातखातोना राजवल्लभा विभवोज्ज्वला ।
मृगवाटाभिधे स्थाने मठं दग्धं नवं व्यधात् ॥ १९८ ॥

मोमारखातोना राजमहिषी स्वधनैर्नवम् ।
राजधान्यन्तिके जैननगरे स्वमठं व्यधात् ॥ १९९ ॥

जयरालाभिधा राजपुरीराजान्वयोदिता ।
सेकन्धरपुरप्रान्ते खानगाहं नवं व्यधात् ॥ २०० ॥

श्रीजैननगरे यस्य मसोदाहुजिरादयः ।
भान्ति प्रतिष्ठा यत्रैताः पुण्यकीर्तिमनोहराः ॥ २०१ ॥

---

195 a) $S'_{3\cdot6}$ C -मस्जेदा–; B (evid. emend.) -मस्जीदा–. —c) D त्रिंशात्; $S'_{2\cdot3}$ C I_{1-5} B त्रिंशद्विंशा ($I_{2\cdot4}$ B °श).

196 c) S'_8 A प्रातिहार्य–.

197 b) C -मन्त्र (mislec. for S'ār. सत्र). —c) B (evid. emend.) मसूदा–; MSS and C B -हजिरो° (emended as in text).

198 a) B (evid. emend.) -खातुना.

200 a) M (evid. emend.) जयमाला°. —b) MSS and C B -पुत्री; (*sup. lin.* री as in text). —c) B (evid. emend.) शिकन्दर–; C शेकन्धर–; S'_8 A I_{1-3} -पुरी–.

201 a) C -नगरीयस्य. —b) B (evid. emend.) मसूदा–; MSS and C B -हजिरा° (emended as in text).

कर्मपत्यधिकारस्थो नापितः फेरठक्कुरः ।
विजयेशनदीपारे मठं चारुतरं व्यधात् ॥ २०२ ॥

सव्यभाण्डपतिश्चक्रे विहारं विजयेश्वरे ।
यो धर्मसङ्घाद्युपकृद् बौद्धमार्ग इवाबभौ ॥ २०३ ॥

प्रासादं लक्ष्ममेराद्या भ्रातरोऽस्य वणिग्वराः ।
भीमस्वामिगणेशस्य व्यधुः शैलमयं नवम् ॥ २०४ ॥

तद्गणेशालयं दृष्ट्वैवोन्नतं सुधया सितम् ।
द्वेषान्म्लेच्छमुखं चित्रं भवत्येवासितं नतम् ॥ २०५ ॥

अन्येऽप्युच्चावचा वेश्मप्रतिष्ठा विविधा व्यधुः ।
याभिः स्वर्गोपमं भाति मण्डलं वेश्ममण्डितम् ॥ २०६ ॥

देशेऽस्मिन् विभवो भवन् कति न ते यैः सञ्चयार्थे वयः
संनीतं न ततो मृतैरुपहृताप्येकाकिनी काकिनी ।
सोऽहं लब्धपदः करोमि यदि नो धर्मं प्रतिष्ठादिभी
रिक्तो याम्यमुतोऽचिरादिति मतिः पुण्यात्मनो जायते ॥२०७॥

---

202 [a]) MSS (except D) C B कर्मम (prob. mislec. for S′ār. प) त्य°; D कर्मसत्य– (*sup. lin.* भ्य). —[d]) S'_7 I_{1-5} D व्यधान्मठं मनोहरं (for मठं चारुतरं व्यधात्. Thus marg. in S'_7).

203 [a]) S'_7 *int. lin. pr. m.* gloss भांपाति (for -भाण्डपतिः). —[b]) S'_7 K D विहारे (mislec. for S′ār. रं). —[c]) $S'_{3.6}$ C $I_{3.5}$ K D B -सङ्गादि–. —[d]) S'_7 D बौध–; $S'_{3.6}$ C योध–.

205 [a]) M (evid. emend.) तं (for तद्°). —[c]) S'_6 C चित्र्यं.

207 [b]) $S'_{2.3}$ C K D संनीतो; S'_6 (after corr.)$_8$ A स्वं नीतं; $S'_{3.6}$ (before corr.) C $I_{1.5}$ D B मृतेर्. —[d]) C यस्य सु (mislec. for S′ār. याम्यमु)तो.

कोपोदीपे नरेन्द्रस्य वेगादपि समुत्थिते ।
द्विषामधोगतिर्जाता न तु तद्वेश्मनां क्वचित् ॥ २०८ ॥

योऽभूद् राजविरुद्धानां दण्डस्तद्गृहलोठनम् ।
तद्राज्ये प्रभविष्णूनां तद्विकल्पोऽगलद्धृदः ॥ २०९ ॥

किमन्यद्वेश्मनिर्माणव्यसने शाख्युपद्रवात् ।
जाता वनभुवः शून्या द्विषां वसतयो यथा ॥ २१० ॥

श्रीतोरमाणदीन्नारान् निष्प्रचारानवेत्य च ।
द्विदीन्नारी नागमयी नवा तेन प्रवर्तिता ॥ २११ ॥

पञ्चविंशतिको योऽभूत् पुराणस्ताम्रनिर्मितः ।
किञ्चिदूनीकृतश्चाभूद् द्रव्याप्राचुर्यलक्षणात् ॥ २१२ ॥

मुक्तामणिं नृपतिमौलिषु योग्यमूर्तिं
या वर्धयत्युपनतेन पयोधरेण ।
सा पावनी शुचिरुचिर्जननी सुमुख्या
संगच्छते न चिरकालमनेन साकम् ॥ २१३ ॥

---

208 a) MSS (except S′$_2$) C B कोपोद्दीपे (emend. as in text with S′$_2$).
209 b) B (evid. emend.) -लुण्ठनम् .
211 a) S′$_7$ *sup. lin.* gloss राज्ञो नाम (for श्रीतोरमाण-). c) S′$_{3.6}$ (before corr.) C द्वितीन्नारी.
212 d) MSS and C B °प्राचुर (emended as in text with M).
213 d) S′$_6$ (after corr.)$_8$ A अनेक- (for °न); after साकं S′$_3$ C I$_{1-5}$ D इति पाठः .
—After 213 MSS (except K) C B ins.:

*6 सा शुक्तिकास्य जननी जननीतचित्ता
साध्वीव तिष्ठति चिरं वरशुक्तिकामा ।

[(1.1) S′$_3$ अनु- (for second जन); I$_5$ -नीति-. —(1.2) D B नर- (for व°); S′$_{2.6}$ (marg.)$_{7.8}$ A शु (S′$_7$ *sup. lin.* शु) क्ति-.

शैशवे स्वपयो दत्त्वा राजा संवर्धितो यया।
गोल्खातोनास्य जननी साकस्मात् त्रिदिवं गता ॥ २१४ ॥

कोपौर्वविकृते राज्ञस्तरङ्गतरलात्मनः।
सततं प्रतिबन्धाय सिन्धोर्वेलेव याभवत् ॥ २१५ ॥

तां हिन्दुकसमाचारशतपत्ररविप्रभाम्।
स्मृत्वा सरुदिताक्रन्दं शुशोच सकलो जनः ॥ २१६ ॥

तया वियुक्तस्तत्कालं राजा कृष्णाम्बराम्बरः।
दिनश्रियेव पद्मोऽभूद् दुःखसंकुचिताननः ॥ २१७ ॥

ग्राहयित्वांशुकं शुद्धं व्यतीते दिनसप्तके।
सव्ययं मल्लिको राज्ञो व्यधाद् दुःखनिवारणम् ॥ २१८ ॥

शाहाभदेनपुर्यन्तर्नौसेतुं विपुलं नवम्।
तद्धनेनादिशत् कर्तुं तत्पुण्यवृद्ध्यै महीपतिः ॥ २१९ ॥

अभूत् सैदान्वये जाता वल्लभा या महीपतेः।
हयातखातोना राज्ञी प्रेमाश्वासविलासभूः ॥२२०॥

पदार्थान् घोषभूषादिपरिवारसमन्वितान्।
अनन्यरसिको राजा तस्यै सर्वं समार्पयत् ॥२२१॥

तयैकयैव राजेन्दुः स सुन्दरगुणश्रिया।
अविन्दत् परमानन्दं मालत्येव मधुव्रतः ॥२२२॥

After कामा S'_8 A पाठान्तरम् ; S'_2 पाठः, D इति पाठः; B इति पाठः. In S'_7 6* (for 213[cd]), and 213 [cd] marg. *sec. m.*]

214 [a]) $S'_{3\cdot6}$ C B स्ववयो. —[b]) B (evid. emend.) गुल्खातुना°.

217 [b]) $S'_{2\cdot3\cdot6-8}$ A C K °म्बरास्त (S'_7 *sup. lin.* म्ब) रः.

219 [a]) $S'_{3\cdot6}$ C शाहाभदीन–; B (evid. emend.) शाहाबदीन–.

220 [c]) B (evid. emend.) -खातुना.

विभवे सति भवति भवे कस्यचिदेवेप्सितो लाभः ।
वर्षति मेघे कृषिकृत् कोऽपि मणिं मौक्तिकं लभते ॥२२३॥

महाराज्ञ्यां महीभर्तुरस्यां राजसुतोऽजनि ।
यस्य मह्मदखानाख्यामकरोन्मौसुलोचिताम् ॥२२४॥

ततः पूर्वाधिकप्रीते ताजिभट्टे स भूपतिः ।
स्वसुतं रक्षणायादात् सिन्धुरिन्दुमिवेश्वरे ॥२२५॥

चतुःपञ्चाशवर्षेऽथ वैशाखे नरनायकः ।
पुत्रजन्मोत्सवानन्दमभजद् व्ययसुन्दरम् ॥२२६॥

विदग्धचर्चरीपालनर्तकीनटगायनान् ।
उद्दिश्य त्यागरसिकैर्न कैर्वैश्रवणायितम् ॥२२७॥

पट्टकौशेयवस्त्राप्ती राज्ये श्रीजैनभूपतेः ।
सामन्तसचिवादीनामासीत् सत्कारसिद्धये ॥२२८॥

तद्राज्ये विभवोदारव्यये सा प्राकृतालयात् ।
उत्सवे चर्चरीपालनटाद्यैः प्रापि तैरपि ॥२२९॥

स्फीतराज्यश्रिया प्रीतो नृपतिर्नवयौवनः ।
आनीतगीतविद्वर्गः संगीतरसिकोऽभवत् ॥२३०॥

---

226 [a]) $S'_{2\cdot 7}$ D चतुष्पञ्चाश (S'_7 शे).

227 [b]) M (evid. emend.) -गायकान् .

229 [c]) S'_3 उत्सरो- (for °वे).

230 [a]) MSS and C B -राज- (emended as in text with M). —[c]) $S'_{2\cdot 7\cdot 8}$ A I_{1-5} D -विद्वर्थः (mislec. for S'ār. र्गः); $S'_{3\cdot 6}$ (before corr.) C B -विन्द्वर्थः; K विद्धर्थः; M (evid. emend.) -वृन्दः (for वर्गः).

संगीतज्ञज्यहाङ्गेरमार्गेशाद्याः सुखोदिताः ।
तारका इव चन्द्राग्रे व्यरुचन्त सभासदः ॥२३१॥

कृष्णचन्द्रावलीराजरूपाभिनयनैपुणात् ।
राज्ञे वरनटा नाट्यात् तद्दर्शनकुतूहलम् ॥२३२॥

प्रलम्बकृतकश्मश्रुदन्तभ्रूविक्रियाञ्चनैः ।
तारानुसारितद्भावनाव्यहास्यकथाक्रमैः ॥२३३॥

अनेकमुख्यवाद्यैश्च प्राणिभाषानुकारकैः ।
भण्डिमापण्डितो भण्डो मूर्तो हास्यरसोऽभवत् ॥२३४॥

मल्लाहस्सननामापि पितुरभ्यधिको गुणी ।
प्रथमं दशतन्त्रीकां मोदवीणामकारयत् ॥२३५॥

भाषाभिगीतसामग्रीं पारसीगीतकौशलम् ।
तुम्बवीणाधरः सोऽहं नृपाज्ञतोऽप्यदर्शयम् ॥२३६॥

गाथागीतप्रियो राजा स्वयं संस्कृतपद्यवित् ।
नादशंसामयं श्लोकं रागालप्त्येममब्रवीत् ॥२३७॥

---

231 b) $S'_{3\cdot 6-8}$ A C I_{1-5} D सुखोचि (mislec. for S'ar दि) ताः; S'_2 सुखाचिंताः; K सुखविंताः .

232 a) C B कृष्ट–; M (evid. emend.) दृष्ट– (for कृष्ण); $I_{3\cdot 5}$ कृष्ल (mislec. for S'ar. ष्ण). —b) C -नू (mislec. for S'ār. रू) प–; S'_3 -जूपा° (for रू°). —c) M (evid. emend.) राज्ञोऽकरोन्नटी (for राज्ञे वरनटा).

233 b) $S'_{3\cdot 6}$ (after corr.) C B °ञ्चलैः . —c) M (evid. emend.) ताला°.

234 a) $S'_{3\cdot 6\cdot 8}$ A C $I_{1\cdot 2\cdot 3\cdot 5}$ K अनीक–; S'_2 I_5 -मुख–.

235 a) S'_8 A -हसन–. —b) B (evid. emend.) [अ]प्य° (for °भ्य). —c) S'_2 K दर्श–; $S'_{2\cdot 3\cdot 6}$ C K -तन्त्रीको; $I_{1\cdot 4\cdot 5}$ D -तन्त्रीका.

236 a) D B भाषादि°. —b) S'_8 A I_4 D पारिसी–; S'_6 (after corr.) I_3 पारसी–.

237 d) MSS and C B [इ]द (mislec. for S'ār. म)म् .

शुष्का येन समुल्लसन्ति तरवो वश्या भवेयुर्मृगा
पत्रे चावतरन्ति दैवतगणा जल्पन्त्यदृष्टा अपि ।
यो दुःखे च सुखे च मूर्खविदुषोर्बालस्य वृद्धस्य वा
प्रायः प्रीतिकरो ममास्तु सततं श्रीनादनामा रसः ॥२३८॥

श्रव्यकण्ठे नृपो गीत्वा रागैकालप्तितो बहून् ।
रागान् समोच्चगीतांश्च साश्चर्यान्सस्तदाकरोत् ॥२३९॥

अथ गायनवृन्दं तत् प्रवेशय ममाग्रतः ।
गीताङ्गाधिपतेराज्ञामदान्मे नृपनायकः ॥२४०॥

आनीय स्थापिताः सर्वे नामग्राहं निवेद्य च ।
ते ते वहाबदेनाद्याः सवाद्या वृन्दनायकाः ॥२४१॥

निर्दोषकण्ठसञ्जातमञ्जुलध्वनिरञ्जकाः ।
अधीतगीतबद्धात्तमात्तद्रवकमट्टकाः ॥२४२॥

शिक्षाकारादयः पञ्च स्वप्रपञ्चातिचञ्चलाः ।
अमुञ्चन् पञ्चमव्याजात् पञ्चेषु रससञ्चयम् ॥२४३॥

संगीतज्ञं नृपं तं ते श्रुत्वैवं तत्समुत्सुकाः ।
गीते शब्दगुणाः पञ्चदशसङ्ख्या स्थितिं व्यधुः ॥२४४॥

---

238 c) $I_{2.3}$ B (evid. emend.) यत्रैवा (for पत्रे चा°). —c) S'_2 मूल– (for° खं).

239 c) C ससो (mislec. for S'ār. मो) च्च–.

240 a) $S'_{2.3.6-8}$ A C $I_{1.4.5}$ K D तं; $I_{2.3}$ B तत् (as in text); S'_2 सं° (for तं). —c) $I_{4.5}$ K D गीताज्ञया°.

241 c) $I_{2.4}$ B (evid. emend.) वहाबदीना°. —d) MSS and C B सर्वाद्या (emended as in text).

242 b) S'_8 A $I_{1.3.4}$ K D -मन्जूल–. —c) S'_2 C I_4 -बद्धान्त (C तु, $I_{1.4}$ त्तु). —d) D -मात्तं; $S'_{3.6}$ (before corr.) C I_4 मातु (S'_3 त्त) न्द्रव्यकमट्ट (S'_3 ठ) काः. —B transp. 242 and 243.

244 d) $S'_{2.3.6.8}$ A C $I_{1.2.4}$ -सङ्ख्यां; S'_2 ययुः.

केदारगौडगान्धारदेशभङ्गालमालवाः ।
कर्णाटा गायना राज्ञो रागाश्चाप्यस्फुरन् पुरः ॥२४५॥

मदनोद्दीपिता रात्रौ नव्यभव्यदशोज्ज्वलाः ।
अशोभन्तानुगा राज्ञो लासिका दीपिका अपि ॥२४६॥

रत्नमालादीपमालारूपमालाङ्किताभिधाः ।
अकुर्वल्लांसिका लास्यं हावभावमनोहरम् ॥२४७॥

झम्पाकम्पाकुलाग्रप्रसरसरसताधारसर्वाङ्गहारा
प्रारब्धाशास्यलास्योत्तरतरललसद्धावभावानुभावा ।
उत्कण्ठाकारिकण्ठोद्गतसततततस्फीतगीतप्रपञ्चा
पात्रीयं रम्यगात्री लसति सतिलका कीदृशी रत्नमाला ॥२४८॥

गुणिमदतृणदात्री प्रेक्षकानन्ददात्री
नवकरणविधात्री रूपलावण्यधात्री ।
कलितललितगात्री शुद्धसङ्गीतगात्री
गुणगणमणिपात्री रूपमालैव पात्री ॥२४९॥

---

245 a) $S'_{7\cdot8}$ A K -गौढ-. c) I_{3-5} C B कर्णांट-.

246 a) M (evid. emend.) °द्दीपिका. —b) S'_8 A न वि° (for नव्य-); $S'_{2\cdot3\cdot6}$ C -भाव्य-; $S'_{7\cdot8}$ A I_{1-5} K D B -भाव्या- (emended as in text); S'_6 (marg.) मुद्रे [i.e. in C] नव्यभाव्यदशोज्ज्वला:. —d) S'_7 K ना (mislec. for S'ār. रा) सिका; D ना (*sup. lin.* ला) सिका.

247 b) $S'_{3\cdot6}$ C -नृ (mislec. for S'ār. रू) प-.

248 a) $S'_{3\cdot6-8}$ A C I_{1-5} D B -हार-; S'_2 K -हारा (as in text). —b) S'_6 (*sup. lin.*) A -हास- (for °व). —d) S'_2 सलतिका (for °तिल°).

249 a) S'_2 गुण-; $S'_{6\cdot8}$ A C -तृणधा (mislec. for S'ār. दा) त्री; C °नन्दधा (mislec. for S'ār. दा) त्री. —d) D गुणिगण-. K hapl. om. 249[cd].

यस्या मुखं हिमरुचिर्ननु यद्विधात्रा
संपूर्णपर्वमवशेषतयात्र मुक्तः ।
आश्यानतामुपगतोऽस्य रुचायमास्ते
नासाग्रमौक्तिकमिषादमृतस्य बिन्दुः ॥२५०॥

आसां कर्णालिकप्रोतलम्बिमुक्ताफलच्छलात् ।
मुखेन्दोर्निर्गता नूनं लावण्यामृतबिन्दवः ॥२५१॥

इत्यादि शंसां कुर्वाणो नृपतिर्नवयौवनः ।
लीलामित्रैः समं ताभ्यो मद्यपात्रमगाहत ॥२५२॥

तत्तत्कलापरिचये कविवाक्प्रपञ्चे
पञ्चेषुसंचयनिभासु वराङ्गनासु ।
संगीतचर्वणविधौ वसुधानृभोगे
धन्या नृपाः प्रतिदिनं व्यसनं भजन्ते ॥२५३॥

श्रुत्वा दिगन्तरात् कीर्तिं राज्ञः कर्णामृतप्रदाम् ।
गीतकाव्यकलाख्यातः पवारकदनोऽभ्यगात् ॥२५४॥

गायतः सोऽनुगीतानि स्वकृतानि सभान्तरे ।
तुष्टो महीपतिस्तस्मै व्यधात् कनकवर्षणम् ॥२५५॥

प्रबन्धगीतचतुरः कदाचित् स नृपाग्रगः ।
अगायत् सर्वलीलाख्यं प्रबन्धं देशभाषया ॥२५६॥

---

250 a) $S'_{2\cdot3\cdot6}$ C -चिं सृजता (for °चिर्ननु यद्); S'_8 A नन (for °नु). —b) MSS and C B -स (mislec. for S′ār. प)र्वं–.

252 d) S'_7 (marg.) $I_{1\cdot5}$ अगायत; D अगाह (*sup. lin.* य) त.

253 c) M (evid. emend.) -दान– (for धानृ).

254 d) D (before corr.) पावार°.

256 c) S'_3 I_1 C स च (for °र्व).

अनभिज्ञतया राज्ञा पृष्टोऽहं तस्य लक्षणम् ।
तूर्णं भरतशास्त्रादेः सोदाहरणमब्रवम् ॥२५७॥

पदपाठस्वरैस्तैस्तु तालरागैर्मनोहरम् ।
श्रुत्वा षडङ्गं तं मत्तो राजाभूदुदिताशयः ॥२५८॥

तद्गीतस्याङ्गवैकल्यं ज्ञात्वा मामब्रवीदिदम् ।
गीतदर्पभृता वादं कुर्वनेन सभान्तरे ।
तथेत्युक्ते महाराजो द्वयोर्वादमकारयत् ॥२५९॥

सभायां विहिते वादे गीतग्रन्थावलोकनात् ।
श्रुत्वा प्रबन्धान्मत्तः स साश्चर्यो गदनोऽभवत् ॥२६०॥

अहो काश्मीरिकोऽपीदृक् चतुरः सर्वशास्त्रवित् ।
इत्युक्त्वालिङ्ग्य मां मे त्वं गुरुरित्यब्रवीत् स्फुटम् ॥२६१॥

कौशेयकपरीधानप्रसादानन्दिताशयम् ।
अकरोन्मां नृपस्तूर्णं तद्वादजयरञ्जितः ॥२६२॥

घोषाः स्वोत्पत्तितोषा गतिगुणचतुराः पीवराङ्गास्तुरङ्गाः
स्फीतं यज्ञोपवीतं कनकमणिचितं द्रव्यमन्यच्च भव्यम् ।
वस्त्रोद्द्योताश्च पोता निजवपुषि धृता वस्त्रयोगाः सभोगा
राज्ञा श्रीहस्सनेन प्रसभमिह मयि श्रीवरे किं न दत्तम् ॥२६३॥

---

257 a) MSS (except K) C B राज्ञः; K राज्ञा (as in text).
258 c) B (evid. emend.) तद् (for तं).
259 a) C ङ (mislec. for S'ār. त) द्गीतस्याण्ड (mislec. for S'ār. ङ्ग) वै°.
260 d) S'_2 °र्यवदनो (for र्यो ग°); S'_7 marg. gloss अभिधः (for गदनो).
263 Quoted in *Subhāṣita-grantha*, MS f. 8a —a) *Subhāṣita-grantha* सो° (for स्वो); K पीवराङ्गाः by syll. hapl. (for पीवराङ्गास्तुरङ्गाः). —c) MSS (except D) C B वस्त्रोद्यो°; D वस्त्रोद्द्यो° (as in text); S'_7 marg. gloss नावाः (for पोताः).

नयज्ञः शंसदेनोऽभून्मन्त्री चालाभदेनकः ।
वीरः शाहाभदेनः स कुद्देनो विवेचकः ॥२६४॥

श्रीसेकन्धरशाहोऽपि यवनेन्द्रमतप्रियः ।
आलिशाहोऽभवद् दाता श्रीमज्जैनमहीपतिः ॥२६५॥

सर्वशास्त्रप्रियः सर्वभाषाकाव्यविचक्षणः ।
राजा हैधरशाहः स तन्त्रीवाद्यविशारदः ॥२६६॥

संगीतनिपुणः सोऽयं हस्सनेन्द्रो नरेश्वरः ।
एकैकगुणबाहुल्या प्रसिद्धा नृपमण्डली ।
मण्डलेऽस्मिञ् जनैर्दृष्टेत्यवोचन्नृपतेः सभा ॥२६७॥

श्रुत्वा राज्ञो महागीतं रागालप्तिमनोहरम् ।
श्रीज्यहाङ्गिरमार्गेशमुख्याः पादौ ववन्दिरे ॥२६८॥

देशेऽस्मिन् परवञ्चनात् प्रकुरुते लोको यदा संचयं
तत्तद्धर्मविपर्ययेण च भजन् स्वाचारनिःसारताम् ।
उत्पातैर्विविधैस्तदा समुदिताः संपीडयन्ति प्रजा
दुर्वात्यानलदाहदुर्हिममहाशैत्यस्वभेदामयाः ॥२६९॥

---

264 a) B (evid. emend.) शंसदीनो. —b) $S'_{2\cdot3}$ C I_{1-5} K D B वा° (mislec. for S'ār. चा); $S'_{6\cdot7}$ $(\text{marg.})_8$ A तु (for च). —c) B (evid. emend.) शाहाबदीनः. —d) C B कुद्र (mislec. for S'ar. द्द) दे (B evid. emend. दी) नो.

265 a) C °शेकन्धर–; B (evid. emend.) °शिकन्दर–. —b) C -मति–.

266 c) S'_2 D हैद्धर–; B (evid. emend.) हैदर-.

267 c) $S'_{2\cdot6\cdot8}$ A K -बाहुल्यात्. —f) MSS and C B सदा (mislec. for S'ār. भा).

268 c) C B ज्य (B ज) हाङ्गिर–.

269 c) C B स्वं (for सं-).

कदाचित् पौरवणिजो गोवधं नगरान्तरे।
आजन्महिन्दुकाचाराश्चक्रुर्मौसुलवल्लभाः ॥२७०॥

यत्र गावो हता भुक्तं तन्मांसं तैर्दुराशयैः।
स विहारः स नगरः शुद्धयै चाग्नौ स्वमक्षिपत् ॥२७१॥

अथ नैर्ऋतदिग्वातो जातोत्पातशताचितः।
अकस्मादुदभूद् देशे प्रत्यूहापातदुःसहः ॥२७२॥

आरेभ एव कोऽप्येतं श्लोकं सूनुर्विपश्चितः।
गणरात्रं समालोच्य दुर्वातं तं महाद्भुतम् ॥२७३॥

खरवर्णेन मेघेन चन्द्रवर्णेन भानुना।
नैर्ऋतेनातिवातेन हा प्रजे क्व गमिष्यसि ॥२७४॥

वत्सरे पञ्चपञ्चाशे प्रवरेशपुरान्तरे।
गोसौनिकापणोपान्तादकस्मादुदभूच्छिखी ॥२७५॥

मारीतटैकपार्श्वस्था गुलिकावाटिकावधिः।
क्षणान्नगरभूर्दाहाद् दग्धारण्यमिवाभवत् ॥२७६॥

---

271 [a]) S'_3 C I_{3-5} भुक्त्वे (emended as in text); $S'_{2\cdot6}$ (after corr.) $_{7\cdot8}$ A $I_{1\cdot2}$ K D B (gram. assim.) भुक्तैः (for °क्तं). —[b]) MSS and C B (gram. assim.) तन्मांसैः (for °सं). —[d]) $S'_{2\cdot6-8}$ A C I_{1-5} KDB शुद्धयेव (emended as in text with S'_3); MSS and C B वा (mislec. for S'ār. चा) ग्नौ.

273 [a]) MSS (except S'_7) C B आरंभ; S'_7 gloss अपठदेव (for आरेभ एव).

274 RSs_2 quotes 274 entirely. —[b]) RSs_2 भास्वता (for °नुना). —[c]) S'_7 A नैर्नृ (mislec. for S'ār. र्ऋ) ते°.

276 [a]) $S'_{3\cdot6}$ (marg.) C $I_{1\cdot2\cdot3\cdot5}$ -तथैक-. —[b]) S'_6 C -वाढिका°. S'_8 A C D °वधि.

भूर्जत्वग् वायुनोद्धूता ज्वलन्ती सजवागता ।
बृहन्मस्जेदाच्छत्रान्तः पपातोत्पातदूतिका ॥२७७॥

प्रसारिता चतुर्दिक्षु यत्र भित्तिः सुधासिता ।
श्रीसेकन्धरभूभर्तुर्मूर्ता कीर्तिरिवाभवत् ॥२७८॥

व्यधाद् यदन्तर्जनता प्रणता पुनरुत्थिता ।
त्वङ्गत्सरोवरोत्तुङ्गतरङ्गावलिभङ्गिताम् ॥२७९॥

मन्त्रपाठोद्यतं यत्र यवनानां कदम्बकम् ।
गुञ्जन्मधुपगर्भाब्जसहस्रमिव राजते ॥२८०॥

चतुर्दिग्द्वारनिर्गच्छच्छुक्रवारागता जनाः ।
कुर्वन्ति भूगतम्लेच्छास्तदहर्निर्गमभ्रमम् ॥२८१॥

यन्मध्योच्चचतुःस्तम्भदम्भाद् विधिदिदृक्षया ।
चतुष्पादिव तद्धर्मः प्राप्तो भात्युज्झितस्थितिः ॥२८२॥

स्वर्णछत्रच्छलाद्यत्र मायाकर्णनकौतुकात् ।
कर्णं दातुमिवाभ्यर्णं भजन् भाति दिवाकरः ॥२८३॥

---

277 a) S'_6 (marg.)$_8$ A I_4 D °नोत्तट्टा. —c) S'_8 A D °न्मसोदा–; S'_2 °न्मसेदा–.

278 b) $S'_{3\cdot6}$ I_{1-5} नित्य– (for भित्तिः). —c) C शेकन्धर–; B (evid. emend.) शिकन्दर–.

279 b) $S'_{2\cdot3\cdot6}$ C I_{1-5} D B प्रणीता. —c) S'_3 $I_{3\cdot5}$ C B त्वत्सङ्करो (for त्वङ्गत्सरो–).

280 K om. 280[ab].

281 c) MSS (except I_4) C B -म्लेच्छ (emended as in text with I_4).

282 a) $S'_{2\cdot3\cdot6-8}$ C I_4 -चतुस्त°. —d) S'_6 (marg.)$_{\cdot8}$ A I_3 D उम्बित–; C उज्झ्वित–.

तन्महासदनं व्याप्तगगनं रचनाद्भुतम् ।
म्लेच्छदर्शनवाजार्थं रक्षादुर्गश्रियं ददत् ॥२८४॥

कुर्वत् कल्पाग्निनिर्दग्धविश्वज्वालावलिभ्रमम् ।
क्षणमात्रात्तदा यातं भित्तिमात्रावशेषताम् ॥२८५॥

निमित्तजा विधा यस्यां म्लेच्छा कुर्वन्ति भक्तितः ।
एधामहोत्सवाद्येषु गणशो मिलिताः सदा ॥२८६॥

तत्तद्ब्रह्मामखानीयपञ्चावासादिभिर्गृहैः ।
सताण्डवचटत्कारं तैः खाण्डववनायितम् ॥२८७॥

ज्वलद्भूर्जत्वचो याता वितस्तासलिलान्तरम् ।
दग्धा जलगता नावाः शेकुः शमयितुं न याः ॥२८८॥

पुरपत्तनघोषेषु तदुपप्लववायुना ।
सहस्रसंख्या वेश्मौघास्तद्दिने जज्वलुर्न के ॥२८९॥

उत्पातवातजातोर्मिमहापद्मसरोन्तरे ।
शतसङ्ख्या दिने तस्मिन् किराताः प्रलयं ययुः ॥२९०॥

वर्णाचारविपर्यासः स मासः कुजवत्सरः ।
पुरश्रीविहितोद्वासे निवासक्षयकार्यभूत् ॥२९१॥

---

284 c) MSS and C B -रा (mislec. for S'ār. वा) जार्थां (S'₃ after corr. °र्थं°) (emended as in text). —d) दधत् is suggested (for °द°).

285 a) MSS and C B कुर्वन्क (mislec. for S'ār. त्क) ल्पा°. —c) S'₃ C यत्तं (mislec. for S'ār. यातं).

287 a) S'₃-₆ C (evid. emend.) अभूद् (for तत्तद्).

288 a) I₁-₃-₅ C यात-. —c) S'₃ दग्ध्वा.

289 a) C B सु (mislec. for S'ār. पु) र-.

291 a) M (evid. emend.) वर्णाश्रमविपर्यास-.

अथवा पूर्वकर्तॄणां जाते पुण्यक्षये सति ।
नवीनकर्तृनिर्माणकीर्त्यर्थं कुरुते विधिः ॥२९२॥

निर्मिता तादृशी राज्ञा सा महासदनस्थितिः ।
पुण्यश्रीरिव या स्फीता विभाति नगरान्तरे ॥२९३॥

अचिरात् सा पुरी दग्धा नवीकृतगृहा बभौ ।
भूपं तरुणमेवैक्ष्य विहिता तरुणी प्रिया ॥२९४॥

भूपालदुर्व्यसनजाः प्रभवन्ति दोषा
नाशाय यद्यपि हिमाध्वनि मण्डलेऽस्मिन् ।
अन्योन्यमन्त्रिवरवैरसमुत्थदोषो
राज्यं समस्तमपि नाशयति क्षणेन ॥२९५॥

शक्तिस्फीतं समुदयलसत्सप्तधात्वङ्गभङ्गं
धत्ते नित्यं यदपि सुभगं सर्वकार्यक्षमत्वम् ।
दोषा वातादय इव महामन्त्रिणोऽन्योन्यदुष्टा
यत्रैते स्युर्गलति न चिराद् देहवत् तत्र राज्यम् ॥२९६॥

अत्रस्थैः सर्वदा रक्ष्यः स्वभेदः प्रभविष्णुभिः ।
चार्वाकाणामिवैषां हि भयं न परलोकतः ॥२९७॥

ललितादित्यदेवोक्तामिति नीतिं लिलङ्घ्य ये ।
मिथो वैरं प्रकुर्वन्ति ते नश्यन्तीह मन्त्रिणः ॥२९८॥

---

294 c) $S'_{7\cdot8}$ A K D B ईक्ष्येव; S'_2 ईक्ष्यैव; I_{1-5} ईवेक्ष्य; $S'_{3\cdot6}$ C एवैक्ष्य (as in text).

295 b) S'_6 (after corr.) B हिसाधु (mislec. for S'ar. माध्व) नि.

296 a) M (evid. emend.) -भङ्गि. —b) $I_{3\cdot5}$ दत्ते. —c) C (corrupt) देषा.

297 See Kal. iv. 345.

मलाएसाकदर्याविखानादीनां विरोधतः ।
स्वभेदजर्जरं राज्यं दृष्टं श्रीजैनभूपतेः ॥२९९॥

तदाप्रभृति तेनैव दृष्टे नाशोऽत्र मण्डले ।
मन्त्रिणो नैव कस्यापि मत्सरो विरमत्ययम् ॥३००॥

अहो द्वेषपिशाचोऽयं रूढो राजसभाशये ।
केनापि मन्त्रिणा नैव जीयते सर्वनाशकः ॥३०१॥

रोगो हतप्रयोगो व्यालो वा धृतमहाविषज्वालः ।
नाग्निस्तादृग् भयकृत् प्रकृतिविरोधो यथा देशे ॥३०२॥

अत्रान्तरेऽह्मदायुक्तो युक्तोऽपि नयसम्पदा ।
अधीर इव नाशाय नेयबुद्धित्वमग्रहीत् ॥३०३॥

एकदा पितरं पुत्रा विजने नौरुजादयः ।
इत्यूचुर्दूषणां ताजिभट्टीयां विभवासहाः ॥३०४॥

निग्रहानुग्रहैकाग्रः समग्रे मन्त्रिमण्डले ।
उग्रो भट्टः प्रजायासैर्देशनाशाय वर्धितः ॥३०५॥

तत्रापि दुग्धपितृता राजसूनोर्नृपास्पदे ।
अग्रे ययौ समायोगः सोऽयं दाहाय दुःसहः ॥३०६॥

राज्ञीराजावचश्चास्मै सेनानीरयमेव हि ।
प्रबलं बाधते ह्यस्मान् यदि नायं प्रणाश्यते ॥३०७॥

---

299 a) B (evid. emend.) -ईसाक–.
301 a) D दोष– (for द्वे°).
304 c) $S'_{7.8}$ $I_{3.5}$ ताज–.
305 a) C B °काग्रा: .
306 a) S'_{3} C दग्ध–. —b) S'_{3} C $I_{3.5}$ D -सूनुर्. —c) M (evid. emend.) ययो: (for °यौ).
307 a) S'_{6} I_{2} C B राजावदश्चास्मै; $I_{1.3-4}$ राजावच: सा (I_{5} चस्सा) स्मै.

इत्याकर्ण्य सुतैरुक्तं वैगुण्यादवलोक्य च।
पुत्रीकृतेऽपि मल्लेकस्ताजिभट्टे व्यरज्यत ॥३०८॥

राज्याङ्गानि समस्तानि योऽरक्षत् समया दृशा।
प्राक्पुण्यसंक्षयात् सोऽपि शनैरासीत् स्खलन्मतिः ॥३०९॥

स्वार्थं परित्यज्य विभोर्हितं ये
　　कुर्वन्ति तत्कार्यकृतावधानाः।
विनाशकाले समुपस्थिते ते
　　भवन्त्यकस्माद् विपरीतचेष्टाः ॥३१०॥

प्रभविष्णुरयं राज्ञो दूरीकार्यः कया धिया।
इति चिन्ताकुलस्तांस्तानुपायान् मल्लिकोऽकरोत् ॥३११॥

अथैकदाब्रवीद्राज्ञः सभायां मल्लिकः क्रुधा।
राज्येनानेन किं राजन्नाक्रान्ता बाह्यभूः परैः ॥३१२॥

चिन्ता कस्यापि नैवास्ति यावत्सर्वं प्रणश्यति।
वरं स्वयमहं यामि तदाज्ञा दीयतां विभो ॥३१३॥

इति श्रुत्वाब्रवीत् ताजिभट्टस्तं साहसोत्सुकः।
यात्रायै दीयतामाज्ञा सेनानीर्मत्परोऽद्य कः ॥३१४॥

तच्छ्रुत्वा सर्वसामग्रीं दत्त्वा मल्लिकचोदितः।
राजा तं कटकोपेतं बाह्यदेशं व्यसर्जयत् ॥३१५॥

---

308 [a]) MSS (except S'_3) C B उक्त-; S'_3 उक्तं (as in text). —[c]) MSS and C B (gram. assim.) -कृतो (1or °ते); B (evid. emend.) मल्लीकः.

311 S'_3 C $I_{1\cdot3}$ om. 311[ab].

313 [c]) S'_6 C $I_{1\cdot2\cdot4}$ स्वैरम् (for स्वय°); S'_7 D स्वर (S'_7 *sup. lin.* य)म्.

314 [c]) S'_6 (before corr.) C $I_{1\cdot2}$ D B राज्ञः (for आज्ञा). —[d]) MSS and C B [अ]धिकः (emended to °द्य° as in text).

भीत्या प्रीत्या च नीत्या च जग्मुस्तमनु सेवकाः।
मधुपा इव गर्जन्तो यान्तं मधुकरेश्वरम् ॥३१६॥

राजप्रक्रियया रम्यं दृष्ट्वा तं व्ययशालिनम्।
नृपा राजपुरीयाद्याः बभूवुर्विस्मिताशयाः ॥३१७॥

अन्येऽप्यज्यभदेवाद्याः समस्ताः मद्रमण्डले।
तात्तारखानमुत्सृज्य तुष्टास्तमुपतस्थिरे ॥३१८॥

तदुपोद्वलिता मद्राः क्षुद्रा विद्रावितारयः।
देशं तत्तारखानीयं सोपद्रवमचीकरन् ॥३१९॥

दहन् स्यालकोटादौ मसोदां खाननिर्मिताम्।
सामान्यकुलजोऽप्येष निःसारोऽनुमितो जनैः ॥३२०॥

अचिन्त्यकृत्यकार्यासीत् स्वामिस्नेहप्रभावतः।
पुरपत्तनघोषादीननयत् स्मृतिशेषताम् ॥३२१॥

---

316 d) MSS and C B यातुं (mislec. for S'ār. न्तं).

317 c) S'_3 C $I_{1\cdot2\cdot5}$ राजपुरे.

318 a) K [अ]जाभ–; $S'_{3\cdot6}$ C $I_{1\cdot3-5}$ [अ]त्याभ–. —b) B भ (mislec. for Dev. म)द्र–. —c) $S'_{2\cdot3\cdot6-8}$ A C I_{1-5} C B तत्तार–; D तात्तार– (as in text); K उ (mislec. for S'ār. त)त्ता°.

319 a) $S'_{3\cdot6}$ C अपोद्व°. —d) MSS (except S'_2) C B अचीकरत् (S'_2 °न् as in text).

320 a) MSS सृगाल– (mislec. for S'ār. स्याल); C शृगाल–; B (evid. emend.) शृङ्गार– (for स्याल–). —b) $S'_{3\cdot6}$ C सस्जेदां; B (evid. emend.) मसूदां. —d) S'_2 जनेः.

321 a) MSS and C B -कृत– (emended as in text). —b) S'_3 C B -स्नेह.

प्रतापस्तस्य तत्कालं तीक्ष्णांशोरिव दुःसहः ।
तत्तड्ढिल्यादिदेशस्थजनोलूकभयं व्यधात् ॥३२२॥

करदीकृत्य सामन्तांस्तत्तत्साहसनिष्ठुरः ।
स्वदेशं प्रत्यगात्तूर्णं पूर्णस्तुरगसम्पदा ॥३२३॥

स्वामिकार्यवशान्मन्त्री पुत्रं पश्यति शत्रुवत् ।
शत्रुमप्यतिवैराहं पुत्रवत् परिरक्षति ॥३२४॥

इत्यादिनीतिमुल्लङ्घ्य मल्लिको दैवमोहितः ।
तदुत्कर्षासहस्तस्य दर्पनाशोद्यतोऽभवत् ॥३२५॥

सबलो बाधते सर्वान् वाल्लभ्यादिति शङ्कितः ।
मल्लिकस्तं प्रति क्रुद्धो भूपं द्वेषमजिग्रहत् ॥३२६॥

अत्रान्तरे सुतो राज्ञा कनीयान् होस्सनाभिधः ।
पयोदानाय मल्लेकनौरुजाय समर्पितः ॥३२७॥

तेन श्रुतेन तद्भूपविधेयत्वविसूत्रितः ।
आगच्छन् कटके भट्टो ययौ मन्दप्रतापताम् ॥३२८॥

तस्य सेनागतस्याथ नेयबुद्धिर्नृपेश्वरः ।
सत्कारं चोचितं तस्मै नाकरोद् विरसीकृतः ॥३२९॥

---

322 c) $S'_{3\cdot6\cdot8}$ A C I_4 दि (S'_8 A ड्ढि) ल्यादि-. —d) B -जनोल्लूक-; $S'_{2\cdot3\cdot8}$ A C -राजोलोक-; K (after corr.) -राजलोक- (for जनोलूक).

323 a) S'_2 K -कृत- (for °त्य); $S'_{2\cdot8}$ A सामन्तस् .

327 a) MSS (except S'_3) and C B राज्ञः ; S'_3 राज्ञा (as in text).

328 b) S''_2 -विसूत्रतः .

329 c) D C B चोदि (mislec. for S'ār. चि) तं.

अथ तस्यापकारार्थं मल्लिकः स्वयमक्षमः ।
दध्रे गतानां सैदानां पुनरागमने मतिम् ॥३३०॥

यदीया तनया राजंस्तव पुत्रवती प्रिया ।
रक्ष्यः श्वशुरपक्षः स कथं नानीयते त्वया ॥३३१॥

इत्यादि प्रेरणाद्राज्ञो राजाराधनतत्परः ।
सोपधीन् व्यसृजल्लेखान् सैदाण्ढिल्लीशमण्डले ॥३३२॥

तस्यैवेह प्रभवति जनो दुर्नयैर्दूषणाद्यै-
रेतद्बुद्ध्या नयति न वयः स्वं कथं गाढमूढः ।
सर्वां पृथ्वीं जयति न कथं तन्त्रमन्त्रोर्जितोऽसा-
वित्याशङ्क्यो भवति पुरुषो भाग्यभाग् यावदास्ते ॥३३३॥

अपकृत्य पुनः सैदान् यदानयति मल्लिकः ।
तेन स्यात् सर्वनाशोऽस्येत्यवद् तीक्ष्णधीर्जनः ॥३३४॥

सैदानयनवृत्तान्तं बुद्ध्वा श्रीफिर्यडामरः ।
गृहं गत्वाऽह्मदायुक्तं युक्तमित्यब्रवीद् वचः ॥३३५॥

ताजिभट्टो विधेयोऽयं भृत्यवद् वर्तते त्वयि ।
तदेतं रक्ष युक्त्यास्य विधाय मदशातनम् ॥३३६॥

---

331 a) $S'_{3\cdot 6}$ C D यदीयास्त°; B (evid. emend.) तदीयास्त°. —b) $S'_{3\cdot 6}$ C I_{1-5} पुत्रवतीं प्रियां. —c) B (evid. emend.) श्वसुर-.

332 c) B सोपाधीन्. —d) C $I_{1\cdot 3}$ डिल्लीश-.

333 a) MSS and C B [इ]ति (emended to °ह as in text with M); C दुर्णयैर्,

334 MS S'_2 ends with सैदा in 334[a].

335 b) $S'_{6\cdot 8}$ A C $I_{1\cdot 3\cdot 4}$ K D बुद्धथा; S'_8 A ग्रीहि (mislec. for S'ār. श्रीफि)र्य-; I_3 D ग्रीफिर्य-.

336 a) S'_8 A I_4 D ताज-

मा प्रवेशय सैदांस्त्वं दुर्धरान् देशकण्टकान् ।
तुरुष्कपुष्कलाश्वासान् यत्नान्निष्कासितानपि ॥३३७॥

एकनाशार्थमिच्छा चेत् सर्वनाशस्तदागतेः ।
पोतैकहेतोश्चैत्यस्य ज्वलनं किं समर्प्यते ॥३३८॥

नूनं सपुत्रभृत्यस्य नाशो न भविता चिरात् ।
यत् सैदानयने बुद्धिर्जाता भाग्यविपर्ययात् ॥३३९॥

कृतापकारान् सैदांस्तानानिनीषुर्भवान् यदि ।
विषमुष्टिं क्षिप स्थाल्यां सान्नायां तत् स्वमृत्यवे ॥३४०॥

मद्वचो गृह्यते सत्यं शम्मन्येन त्वया न तत् ।
विपत्तौ स्मरणीयं स्यान्मयि लोकान्तरं गते ॥३४१॥

श्रुत्वेति मल्लिकः प्राह किं कुर्वन्ति मयि स्थिते ।
एकदा ज्ञातसामर्थ्याश्चाटुकारा भवन्ति नः ॥३४२॥

तथेत्युक्त्वा गते तस्मिन् ज्ञम्मन्यत्वादनादृते ।
सैदानयनसङ्कल्पान्न मनाग् विरराम सः ॥३४३॥

ज्ञातायतित्वादुपदिष्टमिष्टै-
गृह्णाति वाक्यं न हि नष्टचेष्टः ।
कष्टे निविष्टः स हि वक्ति शोका-
द्धिङ् मामतिष्ठं न हितोपदेशे ॥३४४॥

---

337 d) C B निष्काशितान् .

341 a) $I_{3\cdot5}$ सर्वं (for °त्यं).

342 cd) C B -सामर्थ्याच्च (mislec. for S'ār. श्चा) टु-.

343 b) S'_7 $I_{1\cdot3-5}$ K D °त्वादृना°; S'_6 (before corr.) C B (evid. emend.) ऋणादृते; M (evid. emend.) रणादिव (for अनादृते).

344 a) C $I_{3\cdot5}$ (evid. emend.) ज्ञात्वा (for °ता).

तती लेखान् समालोच्य तस्योत्कण्ठितमानसाः।
हंसा इवाययुः सैदाः कृतपक्षपरिग्रहाः ॥३४५॥

अथ प्रथममेवेह स मेयाहस्सनोऽग्रणीः।
अग्राप्तनौरुजायुक्तयुक्तो भूपाग्रमाययौ ॥३४६॥

विहितान्योन्यकं शंसन् मल्लिकोऽस्मै प्रसन्नधीः।
खोयाश्रमं प्रदेशं तं स्वकीयं स समार्पयत् ॥३४७॥

यत् सैदहस्सनेनापि सिद्धादेशाधिकारिता।
तस्य तेनैव नाशार्थं सिद्धा देशाधिकारिता ॥३४८॥

क्रमात् समागतैः सैदैराक्रान्ते मण्डले बलैः।
आभ्यन्तराश्च बाह्याश्च काश्मीरास्तत्रसुर्जनाः ॥३४९॥

सैदांस्तरङ्गितान् दृष्ट्वा तुरङ्गाद् भूपतेर्मतात्।
नृपं जायाविधेयत्वात् तद्विधेयक्रमागतम्।
सपुत्रः सोऽह्मदायुक्तो बभूवानुशयाकुलः ॥३५०॥

पश्चाद्भवेद्या मनुजेषु बुद्धिः
कार्ये कृते सा प्रथमं यदि स्यात्।
मित्रार्पितश्रीः परिभूतशत्रु-
र्नैको भवेत् संततसौख्यभागी ॥३५१॥

---

346 [b]) B (evid. emend.) मीया–; S'_6 (before corr.)$_8$ A मेयाह:सनो. —[c]) $S'_{3\cdot6\cdot7}$ C I_{1-5} KDB अग्रया°; S'_8 A अग्रा° (as in text).

347 [a]) S'_8 A °न्यकोशं स (for °कं शंसन्). —[c]) M (evid. emend.) प्रमेयं (for °देशं); MSS and C B तत् (emended to तं as in text). —[d]) $S'_{6\cdot8}$ A C $I_{1\cdot3\cdot4}$ D समर्पितम्.

350 [a]) C M सैदा:. —[b]) M (evid. emend.) तुरङ्गान् भूपतेर्मतान् —[c]) MSS and C B नृपो (emended as in text with M). —[d]) MSS and C B -क्रमागत: (emended as in text with M).

अथ सैदाः स्वतन्त्रास्ते कलत्रहरणेच्छया ।
बन्धनं ताजिभट्टाय कर्तुमैच्छंश्छलैषिणः ॥३५२॥

एकदानिष्टमाकर्ण्य स्वात्मनः सैदचिन्तितम् ।
मल्लिकसदनं प्रायात् ताजिभट्टो भयाकुलः ॥३५३॥

सैदविस्फूर्जितं दृष्ट्वा साशङ्कः सोऽभवद्यदा ।
स फिर्यडामरो वृद्धस्तत्कालं प्रमयं ययौ ॥३५४॥

प्रतिहार्यादिसुकृतैरिह वा परदुर्लभाम् ।
य एकः सकलश्लाध्यामलब्धान्त्यक्षणे क्रियाम् ॥३५५॥

तच्छ्रुत्वा नृपतिस्तूर्णं क्रुद्धः सैदप्रतारितः ।
रोद्धुं तं व्यसृजज् जोनराजानकमुखान् भटान् ॥३५६॥

स्वगृहे स्थाप्यतां बद्धो हृतस्वो दत्तरक्षकः ।
इत्युक्तो मल्लिकस्ताजिभट्टं तेभ्यः समार्पयत् ॥३५७॥

तथैव स्थापितो बद्धः पुण्यशेषतयात्मनः ।
कालं वृत्त्या कृताप्यायः सकुटुम्बोऽत्यवाहयत् ॥३५८॥

---

352 b) M (evid. emend.) -हरणेच्छवः. —c) S'_8 A $I_{1\cdot2\cdot4\cdot5}$ K D ताज–.

353 d) S'_8 A $I_{2\cdot4\cdot5}$ K D ताज–.

355 a) $S'_{3\cdot7\cdot8}$ (before corr.) A C प्रातिहिर्यादि–; D प्रातिफि (*sup. lin.* हि) र्यादि–; $I_{1\cdot3\cdot5}$ प्रातहिर्यादि–; I_4 प्रात:फिर्यादि–; I_2 K B प्रतिक्रियादि–; S'_6 प्रतिहार्यादि– (as in text). —b) MSS and C B -दुर्लभम् (emended as in text). —c) $I_{3\cdot5}$ C सकलः. —d) C B अलब्ध्वा°; I_5 अलब्ध्यान्भ (mislec, for S'ar. न्त) क्ष°; S'_3 marg. gloss फातिह् (for क्रियाम्).

356 c) MSS and C B तद् (emended to तं as in text with M); S'_3 K C जैन–.

357 c) $S'_{7\cdot8}$ I_{1-5} K D ताज–. —d) $S'_{6\cdot8}$ A C I_{1-5} K D समर्पितम्.

भूर्यर्थव्ययपुण्यः स बद्धोऽपि स्वगृहान्तरे ।
सकुटुम्बः सुखं तस्थौ मराल इव मानसे ॥३५९॥

विभवे दानभोगं यः करोति सुकृतेच्छया ।
एतद्भ्रष्टः समाप्नोति भूयस्तत् ताजिभट्टवत् ॥३६०॥

एवं मल्लेकाह्मदेन परोद्रेकासहिष्णुना ।
ध्वस्तप्राया व्यधीयन्त सर्वे ते प्रभविष्णवः ॥३६१॥

कृतापकारी सैदेभ्यो भागिनेयप्रणाशनात् ।
ज्यहाङ्गिरोऽपि मार्गेशो मल्लिके शङ्कितोऽभवत् ॥३६२॥

सर्वाधिकारसामग्री स्वपक्षस्य समर्पिता ।
प्रतीहारादिवीरेन्द्राः स्वार्थबुद्ध्या विनाशिताः ।
इत्यादिदूषणै राजा मल्लिके विरसोऽभवत् ॥३६३॥

रक्षत्युक्त्या स्वमात्मानं कदाचित् कृतदर्शनः ।
नैकत्रावस्थितिस्तिष्ठन् स्वराष्ट्रान्तः स्थितिं व्यधात् ॥३६४॥

अथागात् कुसुमक्रीडां कर्तुं सैदसमन्वितः ।
भवनोपवनं राजा शक्रश्चैत्ररथं यथा ॥३६५॥

विधाय लीलां पुष्पाणां नौकायातो महीपतिः ।
मार्गेशनौरुजायुक्तः पानलीलां व्यगाहत ॥३६६॥

---

360 d) M (evid. emend.) तं (for तत्).

362 a) MSS and C B कृतापकारि (emended as in text). —b) $S_{6\cdot8}$ A I_4 K D भागिनीय–; भागिनेयी– (for °नेय–) is suggested.

363 e) $S'_{3\cdot6\cdot7}$ C I_{1-5} K D B -दूषणे; S'_8 A -दूषणैः (as in text).

364 a) I_2 B (evid. emend.) रक्षेत्युक्त्वा; K रक्षत्युक्त्वा; M (evid. emend.) रक्षेत्युक्तः .

सर्वे परस्परं क्षीवास्तत्तद्वाचानुबन्धिनः ।
ते वृष्णय इवान्योन्यं चक्रुर्वाक्शरताडनम् ॥३६७॥

क्षोभे प्रवृद्धे क्रुद्धोऽथ त्यक्तमस्तकवेष्टनः ।
अगात् कर्तुमुपालम्भं नृपो मल्लिकमन्दिरम् ॥३६८॥

प्रसादितोऽपि स प्राप राजधानीं क्रुधान्वितः ।
पुत्रदुर्नयजः शोको मल्लिकस्य च मानसम् ॥३६९॥

अन्येद्युरहितांस्तस्य राजा विरलमानसः ।
रक्ष्यो नायुक्तपक्षो मे व्यक्तमित्यब्रवीद्रहः ॥३७०॥

अवश्यमेव च्छिद्रं तं समासाद्य विरोधिनः ।
अपकाराय संनद्धा देहे दोषा इवाभवन् ॥३७१॥

राज्ये योसोभखानं चेत् कुर्युः किं क्रियते त्वया ।
एभ्यो नीत्वा तदन्यस्मै देह्येनं रक्षणाय भोः ॥३७२॥

तथेत्युक्त्वा नृपोऽन्येद्युर्जोनराजानकं द्रुतम् ।
विन्यस्य रक्षणे युक्त्या मल्लिकात् खानमग्रहीत् ॥३७३॥

पुत्रं विन्यस्य भूपाग्रे तद्दिने स्वगृहस्थितः ।
अपकर्तास्मि शत्रूणां प्रातरित्यब्रवीत् प्रियाम् ॥३७४॥

---

367 a) MSS and C B परस्पर– (emended as in text with M). —d) $S'_{3.7.8}$ C $I_{1.3-5}$ D B वाक्छर–.

369 c) S'_3 C -दुर्णय–.

370 b) M (evid. emend.) विरस–. —d) $S'_{3.6.}$ C $I_{1.2.4}$ B युक्तम्.

371 a) B (evid. emend.) तत् (for तं).

372 a) B (evid. emend.) यूसुब–; M (evid. emend.) हस्सन– (for योसोभ).

373 b) C B -राजानके (mislec. for S'ār. कं).

अत्रान्तरे मार्गपतिर्नृपाहूतो बलान्वितः ।
स्वराष्ट्रात् साहसोद्युक्तो नगरे तूर्णमाययौ ॥३७५॥

प्रातः श्रुत्वाथ मल्लेकः सबलोऽगान्नृपान्तिकम् ।
रुषा निवृत्तो रुद्धोऽपि चिल्लया दक्षिणस्थया ॥३७६॥

पादाभ्यां ताडयन् वक्षो गच्छतोऽस्य तुरङ्गमः ।
भविष्यत्स्वामिविरहाच्छुचेवास्रुमुखोऽभवत् ॥३७७॥

तत्कालोदितसूर्यार्चिःसङ्क्रान्तिज्वलितायुधः ।
नृपाज्ञप्तोऽपि मार्गेशः ससैन्योऽविशदङ्गनम् ॥३७८॥

अन्योन्यस्पर्धया तत्र द्वयोः प्रविशतोस्तदा ।
संनद्धयो राजधानी ययौ संभ्रमलोलताम् ॥३७९॥

सशस्त्रोऽयं प्रविष्टः किमित्यायुक्तः स भाङ्गिलम् ।
अदापयज् ज्यंशराय मार्गेशाय नृपं क्रुधा ॥३८०॥

तावन्निर्गत्य भीतेन राज्ञा स प्रेरितस्ततः ।
पुरान्तर्ग्रन्थनां कृत्वा ससैदः पुनरराययौ ॥३८१॥

निर्मुच्य बन्धनात् ताजिभट्टं राजानकान्वितः ।
राजधान्यङ्गनास्कन्दं ददौ जिष्णुर्ज्यहाङ्गिरः ॥३८२॥

प्रेरितास्ताजिभट्टेन तद्भटाः समरोद्यताः ।
पश्चिमद्वारधानीं तां राजधान्यामदाहयन् ॥३८३॥

---

376 a) B (evid. emend.) मल्लिकः.
377 d) C B [अ]श्रु-.
378 c) अनाज्ञप्तः is suggested for नृपा°.
380 c) C B ज्यंसराय. —d) MSS and C B नृपः (emended as in text with M).
382 b) S'_8 A $I_{3.5}$ K D ताज-.
383 a) S'_8 A $I_{3.5}$ K D ताज-. —d) C B अदाहयत्.

सोऽग्निर्हस्सनराजानकावासान्तं क्षणान्तरात् ।
सोच्चागारां गृहश्रेणीं दग्धारण्यमिवाकरोत् ॥३८४॥

इन्द्रवासोपमा वेश्मरचना ज्वलिता श्रुता ।
दूरस्थितानामप्यन्तः सन्तोषमुदपादयत् ॥३८५॥

तद्धूमस्तोमसंघट्टज्वालाजालगतोष्मणा ।
सर्वेऽन्तःस्थाः कटाहान्तर्जीवन्मत्स्योपमां दधुः ॥३८६॥

अङ्गनेऽग्निं समालोक्य ज्वलन्तं राजसद्मनः ।
सभृत्यो नृपतिर्भीतो विह्वलः समपद्यत ॥३८७॥

उष्णायमानमार्गेषु स्फुरन्तोऽपि युयुत्सवः ।
न केऽपि शेकुस्तान् योद्धुं तद्भाग्यैर्यन्त्रिता इव ॥३८८॥

स्वभृत्यांश्चलितान् दृष्ट्वा पुत्रैरेवावशेषितः ।
बभूव मल्लिकस्तत्र किंकर्तव्यतयाकुलः ॥३८९॥

पुत्राः कुर्वन्तु मा युद्धं राज्यं नश्यति भूपतेः ।
अयं राजास्य देशस्तु रक्षितो दश वत्सरान् ॥३९०॥

---

384 [b]) M (evid. emend.) क्षणान्तरे; I_2 क्षणान्तरम्.

385 [d]) M (evid. emend.) सन्तापम् ; D संतोषस्तमुदपादयन्.

386 [a]) $I_{1.4}$ C उद्धूम–.

387 [b]) MSS and C B -सद्मनि (emended as in text with M). —[c]) S'_3 C I_3 B सभीतिर् ; I_5 K स भीतो (for सभृत्यो).

388 [a]) $S'_{6.8}$ A $I_{1.5}$ D उष्णायमाण–. —[c]) K शक्ता: (for शेकु:); M (evid. emend.) तै: (for तान्).

389 [b]) $S'_{3.6-8}$ A C $I_{1.3-5}$ K D B पुत्रोत्से (doubtfully emended as in text) वा°; also consider पुत्रै: स्वैर्–; I_2 पुत्रोत्सैवाशेषत: .

तत् कथं नाश्यते युद्धादस्मिन् विषमविग्रहे ।
तत्रापि ज्येष्ठपुत्रो मे तटस्थोऽरिषु मध्यगः ॥३९१॥

अनिष्टं नौरुजाद्या मे लभन्तेऽस्माद्रणक्षणे ।
वरं ममेव नाशोऽस्तु नाकीर्तिं वार्द्धके सहे ॥३९२॥

इति ध्यात्वाब्रवीत् पुत्रान्न योद्धव्यमिहासत ।
इत्युक्त्वा गलितोत्साहो नृपं शरणमाययौ ॥३९३॥

मण्डपे राजधान्यां स राजा विन्यस्य रक्षिणः ।
स्नेहादरक्षदायुक्तान् पूर्वसेवामनुस्मरन् ॥३९४॥

आयुक्तनत्थकाद्यास्ते ज्ञात्वा भूपं तदाश्रितम् ।
युद्धाशक्ताश्च निर्गत्य भुट्टदेशान्तरं ययुः ॥३९५॥

अथोत्तरदिशा द्वारधान्या मान्या जयोद्यताः ।
ज्यहाङ्गिराद्या गर्जन्तः प्राविशन्त नृपाङ्गनम् ॥३९६॥

रणदुन्दुभिनिःस्वानप्रतिश्रुत्यारवच्छलात् ।
अहसद्राजधानीव तुष्टा तत्साहसक्रमात् ॥३९७॥

राजदर्शनतुष्टानामुत्कृष्टानां जयार्जनात् ।
प्रापुः प्रसादं तत्कालं मनांसि च वपूंषि च ॥३९८॥

प्रातः सपुत्रं मल्लेकं तत्तत्सेवकसंयुतम् ।
क्रुद्धैस्तैश्चोदितो राजा कारागारान्तरेऽक्षिपत् ॥३९९॥

---

391 [c]) $S'_{3\cdot6}$ C I_{1-4} B ज्येष्ठ:. —[d]) S'_6 (before corr.) C $I_{1\cdot3}$ K [अ]रिष्ट–.

392 [d]) B वार्धके.

394 [a]) K मण्डले. —[d]) S'_3 पूर्वां.

395 [a]) C -नर्थ (mislec. for S'ār. त्थ)का°.

399 [a]) K B मल्लिकं.

आयातायुक्तसदनाद् भीतेवातिव्ययादिभिः ।
अकरोद्राजलक्ष्मीः सा स्वगृहे सुखसुप्तिकाम् ॥४००॥

तेषां राजविरुद्धानां दासकायस्थपीडनात् ।
सञ्चितं रौप्यकुप्यादि सर्वं तद् राजसादगात् ॥४०१॥

यन्मन्त्रात् सभयः स जैननृपतिः श्रीहाज्यिशाहेऽभवद्
यन्नीत्या दशवत्सरीं गतभयः पुत्रोऽस्य राज्यं व्यधात् ।
यातास्ते स्मृतिशेषतां यदमता बह्रामखानादयः
सोऽपि व्याकुलतामगाद् रिपुभये धिग् वैभवं स्वामिनाम् ॥४०२॥

आतङ्कपङ्ककलुषाः प्रभवन्ति येऽर्थाः
सन्मार्गविघ्नकरणा धृतजाड्यदोषाः ।
तत्तद्दरिद्रजनपीडनहेतुभूता-
स्तिष्ठन्ति ते न सुचिरं हिमपूरतुल्याः ॥४०३॥

तद्भृत्यैः फेरभट्टाद्यैरित्यादिजनपीडया ।
यदानीय धनं दत्तं तत्सर्वं राजसादगात् ॥४०४॥

बहिर्देशात् समानीतांस्तुरङ्गांस्तान् मनोहरान् ।
स्वांशुकान् रक्षितांश्चापि निक्षेपमिव दत्तवान् ॥४०५॥

भूपालवन्महेच्छत्वात् स्वजन्मदिवसादिषु ।
यद्दत्तं यच्च भुक्तं स्वं तदेवास्याभवद् धनम् ॥४०६॥

---

400 a) D °युक्ति°; $I_{1.2.4.5}$ B (evid. emend.) युद्ध-(for °क्त).

401 d) A राजसद्म (mislec. for S′ār. साद) गात्.

402 a) S'_3 C $I_{1-3.5}$ सभयात्; B -हाजिसाहो; $S'_{3.6}$ C K -शाहो:
—b) $S'_{6.8}$ A -वत्सरो; $I_{1.3.5}$ C K -वत्सरी; I_1 पुरो (for °त्रो).

404 a) K फरवटा°; $S'_{3.6.8}$ A C $I_{1.3-5}$ D -वट्टा°.

405 c) S'_3 C °शुकानक्षि°. K hapl. om. 405[ab].

406 b) S'_3 C $I_{1.3.5}$ K स (for स्व).

हे मर्त्या नृपविभवात्तभूरिवित्ता-
श्चित्तात्तौ कुरुत यथार्थदानभोगौ।
संसारे जलधितरङ्गभङ्गुरेऽस्मिन्
सामग्री न पुनरियं सदैव लभ्या ॥४०७॥

राज्ञः प्रियोऽस्मि विभवप्रथितप्रभावो
हे सेवकास्त्यजत मानमिमं स्वनिष्ठम्।
गन्धर्वनिर्मितपुरे च कुसुम्भरागे
वेश्यारसे नरपतौ च कुतः स्थिराशा ॥४०८॥

प्राप्ता पूर्णा सपदि पदवी शत्रुवर्गो जितोऽयं
कोशोऽशेषो मम सदनगो भृत्यवर्गः सवर्मः।
इत्थं यावत् कलयति नरो वैभवोत्सिक्तचित्त-
स्तावत् सर्वं क्षपयति विधिः स्वप्नवत् तद्विरुद्धः ॥४०९॥

एकदा जुगभट्टस्तं बन्धने प्रष्टुमभ्यगात्।
अन्यत् किमस्ति ते स्वर्णं तूर्णं राज्ञे समर्प्यताम् ॥४१०॥

क्रुद्धस्तमब्रवीद् द्रव्यं कोटिसंख्यं हृतं मम।
एतावतापि नो तृप्तिः प्रभोर्लुब्धस्य विद्यते ॥४११॥

---

407 [a]) S'_3 रूप- (for नृ°). —[b]) S'_6 A C $I_{1\cdot5}$ चित्तात्तौं (I_5 त्तौं); S'_8 चितात्तौ; K चिंतांतौ; I_4 चित्तात्तौं; I वित्ताचित्तात्तौं; K दयार्थ- (for यथा°).

408 [b]) $S'_{3\cdot6\cdot7}$ C $I_{1\cdot5}$ K D इदं (mislec. for S'ār. मं). —[d]) I_8 B [आ]ज्ञा (for °शा).

409 [a]) MSS and C B य: (<यस् mislec. for S'ār. म्). —[b]) MSS (except S'_3) C B ससर्ग:; S'_8 सवर्म: (as in text).

410 [d]) $S'_{3\cdot6\cdot7}$ A C I_{1-5} K D राज्ये; S'_8 D राज्ञे (as in text).

411 [a]) MSS and C B द्रव्य- (emended as in text); —[d]) M (evid. emend.) दृश्यते (for विद्य°).

किं ब्रूमो राज्यरक्षार्थं स्वपक्षो नाशितोऽखिलः ।
शक्केनापि न युद्धाय सोढं तत् तुमुलेऽन्तरे ॥४१२॥

कांदिशीकाः समानीय सैदाः संवर्धिता मया ।
द्रोग्धारस्तेऽपि मे जाताः कृतघ्नेऽस्मिन् महीपतौ ॥४१३॥

सर्वं मद्योजितं राज्यमन्धं तावत् करोत्वसौ ।
पुनश्चेद् भुज्यतां राज्यं मन्नाशान्मुदितस्तु सः ॥४१४॥

दशवत्सरपर्यन्तं राज्यतन्त्रनियन्त्रणा ।
मदीयासीद् भवे दग्धे यदीदृश्यपि तद्विभुः ॥४१५॥

तुष्यत्वसत्प्रणाशेन मयि लोकान्तरं गते ।
इत्याद्युक्त्वा नृपाग्रे स स्वविज्ञप्तिं व्यसर्जयत् ॥४१६॥

धिङ्मां येन गृहीतं न वचनं दीर्घदर्शिनः ।
श्रीफिर्थडामरेशस्य निनिन्दात्मानमन्वहम् ॥४१७॥

यद्यहं सुविशुद्धोऽस्मि तन्मद्द्रोहकरा अमी ।
मार्गेशताजिभट्टाद्या लभन्त्वल्पदिनैः फलम् ॥४१८॥

इत्यादि दुःखदग्धः स बन्धनस्थो यदब्रवीत् ।
अचिरात् तत्फलं दृष्ट्वा साश्चर्यो भविता जनः ॥४१९॥

इत्थं निर्द्रोहवृत्तेऽस्मिन् सपुत्रे मल्लिकाह्वदे ।
नाशितेऽन्ये व्यजृम्भन्त खलप्राया नृपास्पदे ॥४२०॥

---

412 a) $I_{3\cdot5}$ D राज–. —d) B (evid. emend.) सोढुं.

413 c) D मां (for मे).

414 ab) $S'_{3\cdot6}$ (before corr.) C राज्यं सन्धि.

415 a) MSS and C B -पर्यन्ते (mislec. for S'ār. न्तं). —c) $S'_{3\cdot7\cdot8}$ A I_{2-4} K D B भवेदग्रे (mislec. for S'ar. ग्धे).

418. c) S'_{8} A $I_{1\cdot3-5}$ K D -ताज–; I_3 C B -भट्टश्च; $S'_{3\cdot6-8}$ A $I_{1\cdot2\cdot4\cdot5}$ K D -भट्टाश्च (S'_8 marg. द्या as in text).

420 a) C $I_{3\cdot4}$ निर्मोह–.

पाजभट्टादयो लुब्धाः सैदानामधिकारिणः ।
प्रमेयान् पीडयामासुर्दुष्टा देहमिवामयाः ॥४२१॥

आनन्दपुष्पदीन्नरखण्डप्राप्त्यादिनामभिः ।
सैदाधिकारिणश्चक्रुः प्रजायासैर्धनार्जनम् ॥४२२॥

श्रीज्यहाङ्गिरमार्गेशनोसराजानकादयः ।
मधाविव द्रुमाश्चित्रपत्रास्ते शिश्रियुः श्रियः ॥४२३॥

मल्लेकपदवीं मल्लाश्रीमेयाहस्सनोऽभजत् ।
नाग्रामग्रामराष्ट्रादि तदीयं तद्वदग्रहीत् ॥४२४॥

सभृत्यपुत्रवर्गेभ्यः प्रमेयान् विभजन्नवान् ।
स मेयामह्मदायार्धवनराष्ट्रं समार्पयत् ॥४२५॥

स्वायत्तीकृतभूपास्ते सैदा जयविश्रृङ्खलाः ।
दूतान् विसृज्य चतुरमानिन्युः सैदनासिरम् ॥४२६॥

प्राप्ते पञ्चालदेवाग्रं तस्मिन् शूरपुराध्वना ।
ज्वरस्तद्धृदयं पूर्वं पश्चात् स पुरमाविशत् ॥४२७॥

पौत्रीजामातृसम्बन्धिबान्धवान् सर्वमन्त्रिणः ।
अपुनःसङ्गमायेव सर्वेषां दर्शनं ददौ ॥४२८॥

तदर्थमिव संप्राप्तो मृतकल्पो दिनद्वयम् ।
अतिवाह्य ज्वराक्रान्तः स्वगृहे पञ्चतां ययौ ॥४२९॥

---

421 a) K याज–; S'$_6$ C ताजि–.

422 a) I_{1-5} D B -दीन्नाग–; (mislec. for Sār. न्नार) K -देर्ना (mislec. for S'ar. न्ना)र–.

424 a) B (evid. emend.) मल्लीक–; MSS and C B (gram. assim.) मल्लां. —b) B (evid. emend.) –मीया–.

425 cd) C B [अ]र्धवन–.

428 b) MSS (except S'$_8$) C B -बान्धवाः, S'$_8$ बान्धवान् (as in text). —c) C -सङ्गमा एव. —d) $I_{4,5}$ blank for दर्शनं; MSS and C B दधौ (mislec. for S'ār. दौ).

मल्लिको बन्धनस्थः संस्त्रस्तः पुत्रप्रवासनात् ।
तत्तच्छोकामयग्रस्तः सोऽप्यस्वस्थो व्यपद्यत ॥४३०॥

बद्धस्यापि मृतिं तस्य श्रुत्वा मन्त्रिशिरोमणेः ।
देशे सरुदिताक्रन्दं शुशोच सकलो जनः ॥४३१॥

सत्कार्यभाजां महतां वियोगाद्
भवन्ति नीचाः पदवीषु योग्याः ।
प्रकाशकेऽस्मिन् द्युमणौ प्रयाते
भवन्ति दीपाः शरणं प्रजानाम् ॥४३२॥

दुहितृभाग्यसौभाग्यसंप्राप्तविभवोर्जिताः ।
सैदाः काश्मीरिकान् सर्वान् न तृणायाप्यजीगणन् ॥४३३॥

याभूत् सैदमुखादाज्ञा निर्यान्ती स्वार्थलिप्सया ।
राज्ञस्तदर्थनिष्ठस्य प्रतिश्रुत्केव साभवत् ॥४३४॥

सैदेषु द्वैधनिष्ठेषु क्षान्तिशीले महीपतौ ।
प्रबलासु च नारीषु कोऽप्यजृम्भत विप्लवः ॥४३५॥

उत्कोचग्रहणं धर्मः प्रजापीडा च कौशलम् ।
स्त्रीषु च व्यसनं सौख्यममन्यन्ताधिकारिणः ॥४३६॥

प्रातिबन्धिकनिर्वृत्या स्वाच्छन्द्यप्राप्तिदर्पितः ।
स मेयाहस्सनः सर्वतन्त्रेभ्यो यन्त्रणां व्यधात् ॥४३७॥

प्रवर्धमानो राज्ञः स शनैराक्रान्तमण्डलः ।
ग्रहाधिपत्यं सर्वेषां राहुच्छायामिवाकरोत् ॥४३८॥

---

430 ab) A $I_{1\cdot2\cdot4\cdot5}$ K D B सन्त्रस्थः; C सन् त्र°.
433 a) S'_3 C दुहित्र-.
434 d) S'_8 A -श्रुत्केव (as in text); S'_3 C $I_{1\cdot2-5}$ -श्रतीव; S_7 D -श्रत्तेव; K -श्रत्येव; S'_6 (before corr.) I_2 B -श्रुतेव.
437 b) C स्वाच्छन्द्या-. —c) B (evid. emend.) मीया-.
438 c) K गृहा°.

अथ सूक्ष्मबृहद्भुट्टदेशान् सैदा जिगीषया।
श्रीज्यहाङ्गिरनासेरौ यात्रायै द्वौ व्यसर्जयन् ॥४३९॥

उभावेकत्र गच्छावो यद्यावां कर्म सेत्स्यति।
इति मार्गपतेर्वाक्यं सैदौ नैवान्वतिष्ठताम् ॥४४०॥

तयोर्देशं विजित्यैकः सयशाः प्राविशत् पुरम्।
अन्यो विशङ्कितो बद्धो युक्त्यात्मानमरक्षत ॥४४१॥

निपत्य पश्चाद् भुट्टैर्यत् सेनायाः कदनं कृतम्।
कालापेक्षानुरोधेन न मनाग् वर्णनं कृतम् ॥४४२॥

बहृदोरागादयस्तस्य सेवका वृद्धभूभुजः।
केचिज् ज्युल्च्याणभुट्टाजिवह्नौ शलभतां गताः ॥४४३॥

पूर्वापकारस्मरणात् सैदास्ते रन्ध्रलब्धितः।
नोस्सराजानकं रुद्धदर्शनं तं न्यवारयन् ॥४४४॥

तेभ्यः स्वानिष्टमाशङ्क्य निजरक्षणदक्षधीः।
युक्त्या तद्दर्शने राज्ञो राष्ट्रं मार्गपतिर्ययौ ॥४४५॥

ततः सैदेष्वनष्टेषु प्रजानाशनकारिषु।
आशङ्क्यानिष्टमात्मीयं युक्त्या राजाग्रमाययौ ॥४४६॥

---

442 b) S_8 A सेनायां.

443 a) $S'_{3\cdot6}$ C बद्धारागा°; I_1 B (evid. emend.) बाह्दुरागा°. —c) $S'_{6\cdot8}$ A ज्यलृच्यान (S'_8 ण)–; I_{1-3} ज्यलृशान–; I_4 ज्यल्यूपान–; C (submetric) श्यान् (for ज्युलृच्याण-); B (evid. emend.) ज्युलृचाण–. —d) S'_8 A K दधुः (for गताः).

444. b) MSS and C B -लब्धिता: (emended as in text with M).

445. c) MSS and C B तद्दर्शनो (emended as in text).

446 a) $S'_{3\cdot6-8}$ $I_{2\cdot3\cdot5}$ D B सैदेषु (mislec. for S'ār. ष्व) न°; I_1 K सैदेषु नि°; I_4 सैदेष्वनि°.

एकदा रहसि क्ष्मापमब्रवीत् स ज्यहाङ्गिरः।
राजन् सैदा यदानीता अमी निष्कासिता अपि
सोऽयं निष्कण्टके देशे स्वस्यानर्थः स्वयं कृतः ॥४४७॥

यथैव राज्ययोग्यस्त्वं पौत्रः श्रीजैनभूपतेः।
दौहित्रोऽपि तथैवास्य प्राप्तो मेयामहम्मदः ॥४४८॥

सैदास्ते सर्वदा शङ्कयास्तुरुष्काश्वस्तमानसाः।
गृध्रा इवामिषे राज्ये ये लुब्धाः सन्ति संततम् ॥४४९॥

न युक्तैकप्रियासक्तिर्बहुभार्यस्य ते विभो।
एकवल्लीरतो भृङ्गः सततं केन शस्यते ॥४५०॥

यदि जायाविधेयत्वं न स्यात् तव महीपते।
सर्वं सिद्ध्यति कार्यं तत् स्त्रीजितो मा भव प्रभो ॥४५१॥

मया त्वद्राज्यरक्षार्थं स्वरक्षार्थं च गम्यते।
बहिर्देशो ह्यतः स्वात्मा रक्षणीयो यथा तथा ॥४५२॥

इति श्रुत्वा तथेत्युक्त्वा राजा रात्रौ प्रियान्तिके।
तदुक्तमब्रवीत् सर्वं स्नेहमोहवशीकृतः ॥४५३॥

तेन मार्गपतेः क्रुद्धा भोगिनीव भयावहा।
अनिष्टं चिन्तयन्त्यासीत् पितृपक्षमतादृता ॥४५४॥

---

447 c) S'_3 त्वया° (for यदा°)-. —d) C निष्काशिता. —f) S'_7 C I_{1-5} D B स्वस्त्रा (I_5 C स्त्रा) नर्थः.

448 S'_3 om. 448. —d) B (evid. emend.) मीया-.

449 a) S'_8 K सर्वथा.

450 b) MSS and CB -भाव (mislec. for S'ār. र्यं)स्य.

451 K hapl. om. 451ab; I_{1-5} hapl. om. 451cd, 452ab.

452 c) हतः.

पुरुषानवधीर्य यत्र नारी
प्रभवत्येव जितप्रिया स्वतन्त्रा।
कुपितेव तदीक्षणाद् विशिष्टा
न चिरं तिष्ठति तत्र राज्यलक्ष्मीः ॥४५५॥

अमुञ्चद् वल्लभापार्श्वे तत्पक्षानुग्रहग्रहः।
मल्लेकाह्लदवद्राज्यं तदायत्तं ततोऽकरोत् ॥४५६॥

सैदेभ्योऽनिष्टमाशङ्क्य त्रस्तो राज्ञ्या विरुद्धया।
कार्कोटद्रङ्गमार्गेण मार्गेशः सबलो ययौ ॥४५७॥

सर्वां कुटुम्बसामग्रीं भाङ्गिलान्तरतो नयन्।
गच्छन् दुर्गममार्गेण न स धैर्याद् व्ययुज्यत ॥४५८॥

तद्राज्यसिन्धुर्विपुलः समृद्धया
व्यलक्षि यः संभृतवाहिनीकः।
परस्परामात्यविरोधवात्या-
विक्षोभितोऽभूत् स विकीर्णरत्नः ॥४५९॥

साम्ना दैन्यमुदारदानविधिना वित्तप्रकर्षक्रिया
भेदात् पैशुनकर्म मर्मदलनं युद्धेन नाशो विशाम्।
इत्यालोच्य विरोधिषु प्रतिदिनं वर्धत्स्वशक्ते प्रभौ
देशत्यागमुपायमेकमुचितं कोऽप्युत्तमो गाहते ॥४६०॥

आयुक्तपक्षनाशेन पश्चात्तापाहतो नृपः।
मार्गपत्यादिनाशेन क्षते क्षारमिवान्वभूत् ॥४६१॥

---

456 c) B (evid. emend.) मल्लिका°.

457 b) S'_3 (after corr.)$_6$ $I_{3\cdot5}$ A C राज्ञा.

460 c) MSS and C B -दिने (mislec. for S'ār. नं); D B वर्धत्सु (mislec. for S'ār. त्स्व) श°.

461 a) S'_3 K C B अयुक्त-. —d) S'_7 *sup. lin.* gloss व्रणे (for क्षते).

मार्गेशाद्यैर्विना राजा सर्वसैदान्वितोऽपि सन् ।
स्वात्मानं गणयामास यूथभ्रष्टमिव द्विपम् ॥४६२॥

मार्गपत्यन्वये जाताः प्रतीहारान्वये च ये ।
ठक्कुरान्वयजाः कोशाध्यक्षजा अपरे च ये ॥४६३॥

स्वस्वपक्षोर्जिताः पूर्वे ये भवन् विजयोर्जिताः ।
नष्टमन्त्रविरोधेन शतैकीयोऽवशिष्यत ।४६४॥

तस्मिन् याते बहिर्वर्षत्तुषारं प्रसभं नभः ।
भाग्याधिकोऽयं सर्वेभ्यो विशां चिच्छेद संशयम् ॥४६५॥

हिमानीपातभारेण येऽवसन्नत्र मण्डले ।
ययुर्निश्छायतां वृक्षा भग्नशाखा जना इव ॥४६६॥

प्राक्चेत् पतेद्धिमं तावन्म्रियेरन् त्रुडिताः क्षणात् ।
पिष्टातकान्तर्गर्तांटाः प्रविष्टा इव तद्भटाः ॥४६७॥

तेनैकेन विना सर्वहृदयाह्लाददायिना ।
नाशोभत सभा राज्ञश्चन्द्रेणेव कुमुद्वती ॥४६८॥

---

462 cd) K om. 462cd.

464 a) S'_6 (before corr.) सर्वे. —c) M (evid. emend.) -मन्त्रि- —d) C B °शिष्यते.

465 ab) $S'_{3.6.7}$ C I_{1-4} D B वर्षतुषारं; K वहिर्वत्तु···षारं; I_5 बर्हिर्वष्मतुषारं; S'_8 वर्षत्तुषारं (as in text).

467 b) $S'_{3.6}$ A C ध्रि (mislec. for S'ār. म्रि) ये°. —c) $S'_{7.8}$ पिष्टाभ (mislec. for S'ār. त) कात्त (mislec for S'ār. न्त)गर्तांटा: (S'_8 ट्टा:); $S'_{3.6}$ A C $I_{1.3}$ पिष्टराभ्यन्तगर्ताट्टा:; S'_7 (*sup. lin.*) $I_{4.5}$ D B पिष्टराद्यन्त (S'_7 न्तं) ग° (D *sup. lin.* पिष्टाभकांतर्ग°); K पिट्यभकांतगर्ताट्टा:; M (evid. emend.) पिठरादिषु ग°.

468 c) S'_3 (before corr.) C नाशोभवत् (corrupt).

तटस्थो भृत्यकार्येषु सैदभार्याविधेयधीः ।
विसूत्रव्यवहारत्वं निन्द्यत्वं चागमन्नृपः ॥४६९॥

स्वराज्यरक्षणाचारलक्षणाक्षमशासनः ।
निन्दन् दाक्ष्यं सदैवासीत् प्रियेक्षणकृतक्षणः ॥४७०॥

निग्रहानुग्रहव्यग्राः सूत्कोचग्रहतत्पराः ।
अन्तरङ्गाः स्त्रियोऽभूवन्न मन्त्री न च सेवकः ॥४७१॥

भोगलोभोज्झितौचित्या अमी विन्दन्ति साम्प्रतम् ।
तुरुष्कपुष्कलाश्वासाः स्वार्थमर्थं न च प्रभोः ॥४७२॥

अनायका विनश्यन्ति नश्यन्ति शिशुनायकाः ।
स्त्रीनायका विनश्यन्ति नश्यन्ति बहुनायकाः ॥४७३॥

स्त्रीविधेयं समालोच्य राज्यं तस्य महीपतेः ।
इति श्लोकं पठंल्लोकः सशोकः समदृश्यत ॥४७४॥

ध्यायन् स मार्गपत्यादींस्तत्प्रत्यानयनाक्षमः ।
शयनीयविमुक्ताङ्गस्तप्यते स्म दिवानिशम् ॥४७५॥

अत्रान्तरे स मार्गेशो लोहरान्तरसंश्रयः ।
स्वामिचिन्ताकुलो लेखशिक्षामित्थं व्यसर्जयत् ॥४७६॥

राजन् पुंरत्नकोशस्ते योऽभूत् सर्वार्थसाधकः ।
उत्पाट्योत्सारितः सैदैर्यद्दारिद्र्यं सुदुःसहम् ॥४७७॥

निसर्गगुरवो नान्यसङ्गमिच्छन्ति चञ्चलाः ।
अमी परस्परं भिन्नाः पारदस्य कणा इव ॥४७८॥

---

471 b) S′$_6$ A C D (before corr.) सोत्कोच–.
473 Quoted from Cāṇakya-Rājanīti, see CNTT vol. II, No.54.
475 a) MSS and C B ध्यायतो (prob. mislec. for S′ār. न्स).
476 a) S′$_3$ A C तत्रान्तरे.
477 c) S′$_{3\text{-}7}$ C I_{1-5} K D B उत्पाद्यो (mislec. for S′ār. द्यो)त्सा°.
478 c) MSS and C B परस्परा (emended as in text).

हरिचन्दनवद् राजन् सर्वसौख्यप्रदो भवान्।
किंतु फूत्कारकारिण्या भोगिन्या वेष्टितो ह्यसि ॥४७९॥

यस्मिन् स्फूर्जद्विषज्वाला व्यालाः सन्ति परासहाः ।
निधानमिव तद्राज्यं त्याज्यं कस्य न सन्मतेः ॥४८०॥

प्रदीप्तापि न या स्पृश्या दृश्यापि भयकारिणी।
श्मशानाग्निशिखेवासौ लक्ष्मीः सा केन सेव्यते ॥४८१॥

स मेयाहस्सनस्तत्तद्दुर्ग्रहग्रस्तवासनः ।
आप्तैरुक्तोऽपि सन्मार्गे न तिष्ठतीव रावणः ॥४८२॥

मेराख्या ताटकेवात्र सूत्कोचामिषभक्षिणी।
पौलस्त्येव ते सर्वनाशार्थं निकटे स्थिता ॥४८३॥

तिष्ठन्त्वभ्यन्तरे सैदा यदीष्टा भवदन्तिके।
तुरुष्ककरगं देशमिहस्थः साधयाम्यहम् ॥४८४॥

राजद्रोही न कोऽप्यस्मत्कुलेऽभूद् भक्तिवर्जितः।
त्वदेकशरणः सोऽहं स्थामस्थो द्वाःस्थवद् वसे ॥४८५॥

वयमेव सदाचारा विचारविशारारवः ।
उन्मार्गे यदि गच्छामः कोऽप्यस्मासु न विश्वसेत् ॥४८६॥

---

479 c) S'_3 A C $I_{1.3.4}$ फोत्कार–; I_5 हो (mislec. for S'ār फो)त्का°.

480 d) S'_3 सम्मतम् (for सन्मतेः).

482 a) B (evid. emend.) मीया–. —b) I_5 °दुर्ग्राह–; S'_3 °दुर्ग्रह'स्त.

483 a) B (evid. emend.) मीरा°; C B ताडके°. —b) $S'_{3.6}$ A C सोत्कोचा°.

484 c) $S'_{3.6}$ A C करवीन्देशम्.

485 b) S'_3 (before corr.)$_6$ C I_5 K D भुक्ति–. —d) S'_7 (*sup. lin.*) $I_{1.4}$ D B स्कन्द– (for स्थाम–); A C द्वास्थ–.

486 b) MSS and C B -विशरारयः (emended as in text). —c) S'_{6-8} I_{3-5} K D दुर्मा (mislec. for S'ār. उन्मा)र्गे.

कल्पान्तमपि जीवित्वा कृत्वापि धनसञ्चयम्।
हत्वाप्यरीन्न कोऽप्यत्र भवे भवति सुस्थिरः।
नष्टेऽन्यस्मिन् भवांस्त्राता त्वयि नष्टे परोऽस्ति कः ॥४८७॥

इति लेखं नृपस्याग्रे बुद्ध्वा मार्गपतेर्द्रुतम्।
स मेयाहस्सनः क्रोधाच्छ्वसन्नहिरिवाब्रवीत् ॥४८८॥

सोऽयं स्थानच्युतस्तत्र स्वजीवनविवर्जितः।
नूनमस्मत्प्रतापेन शुष्यतीवाब्जषण्डवत् ॥४८९॥

ग्रीष्मोष्मणा विशुष्कस्य पङ्कमात्रावशेषिणः।
भृत्यास्तस्य न तिष्ठन्ति तडागस्येव पक्षिणः ॥४९०॥

किं करोतु स्थितस्तत्र तत्रत्यैर्विहितादरः।
मदीयदासमात्रोऽपि तं जेतुं क्षमते युधि ॥४९१॥

अथवाहं स्वयं यामि तं निष्कासयितुं ततः।
स तुरुष्कैः समं तत्र ग्रथनं कुरुतेऽन्यथा ॥४९२॥

अथोचे सैदहसनः पूर्वमैत्रीमनुस्मरन्।
किं नस्तेन हृतं राष्ट्रं दीयतामानयाम्यहम् ॥४९३॥

आयुक्तोपप्लवे पूर्वं कृतदिव्याः परस्परम्।
अनिष्टं चिन्तयामश्चेत् तत् कथं सहते विधिः ॥४९४॥

---

487 e) S′₃ नम्रे (for नष्टे).
488 c) B (evid. emend.) मीया–.
492 b) S′₃ (before corr.) C B °ष्काश°.
493 c) K न (for नः).
494 a) C B अयुक्तो° (corrupt).

तच्छ्रुत्वा नृपतेरग्रे तद्वैरैकाग्रमानसः ।
तूर्णं दौलतयानं स्वं नौशहाराधिपं व्यधात् ॥४९५॥

बाह्यस्थः साधयत्येष कार्यं सद्भृतकाग्रणीः ।
द्रव्यकोटिं ददामोऽस्मै सैन्यसङ्ग्रहसिद्धये ॥४९६॥

इत्युक्त्वा प्रतिमुक्तं तमेधराजानकं पथः ।
द्रुतं निवर्तयामास दत्तद्रव्यमपि स्वयम् ॥४९७॥

श्रुत्वा परशुरामाद्या मद्राः कश्मीरदेशतः ।
स्वानिष्टशङ्कया गन्तुमाज्ञां तेभ्यो ययाचिरे ॥४९८॥

ऊचुस्तान् प्रतिमुञ्चामो युष्मान् पाथेयसंयुतान् ।
कियद्दिनानि तिष्ठध्वं तद्यूयं दत्तवेतनाः ॥४९९॥

तेषु स्ववसतिं यात्सु सैदास्तेऽन्योन्यमब्रुवन् ।
निष्कास्याः सर्वथैतेन तुरुष्कैकविरोधिनः ॥५००॥

अत्रान्तरे नरेन्द्रस्य तत्तद्भृत्यादिचिन्तनात् ।
जाताधिबाधितं वक्त्रं पौषे पद्ममिवाभवत् ॥५०१॥

---

495 [c]) S′[8] K D दौल्व (D लु) त–; $S'_{3\cdot6}$ A C $I_{1\cdot3}$ डौलत–; MSS and C B -यानं S'_3 (*sup. lin.*) -खानं (for या[c]). —[d]) $I_{3\cdot4}$ K B नौशाहा°.

496 [b]) I_5 K सद्वृतका°; B °गृणी: (corrupt).

497 [c]) S'_7 $I_{3.5}$ K D न्यवर्त°.

498 [c]) $I_{1\cdot2\cdot3\cdot5}$ D B सा° (for स्वा). —[cd]) S_6 (before corr.) $I_{1\cdot2}$ C B गन्तुं साज्ञं. —[d]) $I_{1\cdot3\cdot4}$ D यथाचिरे; S'_3 and S'_6 (before corr.) A C B यथोचिरे.

499 [b]) MSS and C B -संयुता: (emended as in text).

500 [c]) S'_3 (before corr.) C निष्काश्या:; S'_3 न: (for °न).

मृगयारसिकाः सैदा निन्युस्तं तादृशं नृपम् ।
माद्ये विषयराष्ट्राद्रिगतान् हन्तुं मृगव्रजान् ॥५०२॥

यत्र यत्रावसद्रात्रौ ससैदः कटकोत्कटः ।
पीड्यमानजनाक्रन्दमुखरास्तद्दिशोऽभवन् ॥५०३॥

पङ्क्तीः प्रसार्य परितोऽद्रिषु दिग्विभागं
यत्रोपवेशमकरोत् कटको नृपस्य ।
तत्रोदतिष्ठदतिनिष्ठुरवाग् जनानां
द्राक्षालताच्छिदि शुचा रुदितस्वनौघः ॥५०४॥

गिरयोऽत्युन्नतास्तत्र सुखदाः सान्त्वनिर्भराः ।
आक्रान्ताः कटकैर्हिंस्रैर्दुर्जनैरिव साधवः ॥५०५॥

प्रालेयपूरमग्नाङ्गाः कुरङ्गा गिरिशृङ्गतः ।
श्रुत्वा कोलाहलं त्रस्ताः सकुटुम्बाः समाययुः ॥५०६॥

कृष्टजिह्वान् स्फुरद्रक्तसिक्तास्याञ् श्वगणावृतान् ।
तांस्तत्राग्रागतान् दृष्ट्वा सैदास्ते तुतुषुर्भृशम् ॥५०७॥

हरास्मान् पीवरानेतान् पोतान् मा हर दुर्बलान् ।
इतीव वक्तुं भूपाग्रे प्रापुस्ते सार्भका मृगाः ॥५०८॥

---

502 c) I_1 विमय–; $S_{3.6}$ A C I_{1-5} K D B -राष्ट्रादि– (D द्रि mislec. for S'ār. द्रि as in text)ग°.

503 b) $S'_{3.7.8}$ A C $I_{1.3.5}$ K स सैदक°; S'_6 $I_{2.4}$ D B ससैदः (as in text).

504 a) $S'_{3.6.8}$ A C I_{1-5} K D B तद्विभागं.

505 b) S'_8 सत्त्व–; I_5 D संत्व (<सन्त्व mislec. for S'ār. त्व)नि°.

507 b) $S'_{3.6}$ (before corr.) C सिक्तास्यांश्च (<स्यान्श्च mislec for S'ār. श्व)ग°.

508 c) A K [ए]व (for इ°).

सिद्धाध्युषितशृङ्गस्थत्रस्तैणवधदर्शनात् ।
क्रुद्धाः स्युर्देवता राजन् मा कृथा मृगयामिमाम् ॥५०९॥

इत्याद्युक्तोऽपि बहुशस्तत्रत्यैः सकलैर्जनैः ।
शृङ्गारीवाङ्गनासङ्गान्न व्यरंसीन्मृगग्रहात् ॥५१०॥

आस्थानमृगयोग्रेयं नान्यदा क्रियते त्वया ।
मुनिर्वैश्रवणाद्रिस्थो नृपमेत्याब्रवीदिति ॥५११॥

साक्रन्दमागता हत्वा मृगीस्ता रुधिरोक्षिताः ।
तद्गर्भनिर्भरां भूमिं सैदाश्चक्रुर्दयोज्झिताः ॥५१२॥

अतृप्तस्तद्वधात् कृत्वा निर्मृगांस्तान् गिरीश्वरान् ।
सायं श्रान्तः स घोषौघान् वसतीरादिशन्नृपः ॥५१३॥

भव्या स्नुषास्य तनया तरुणी च जाया
कादम्बरं प्रसरके पशवश्च मीनाः ।
तिष्ठाम्यमुष्य सदनेऽहमिहैव रात्रौ
ध्यात्वेति कोऽपि न्यविशद् यमकिङ्कराभः ॥५१४॥

धानुष्कपुष्कलबला बलिनस्तुरुष्काः
षट्कर्मधर्मनिरताग्र्यगृहोपविष्टाः ।
तद्भाण्डपक्कहतकुक्कुटमांसभक्ष्या
यक्षा इवात्र विदधुर्मधुपानलीलाम् ॥५१५॥

---

510 d) S'_6 (before corr.) -व्रजात् (for ग्रहा°).

511 a) $S'_{3.6-8}$ A C I_{1-5} D B मृगगो (emended as in text with K) ग्रे°. —b) MSS and C B [अ]न्यथा (emended as in text.) —c) $S'_{3.6}$ (before corr.) C वैश्रवणो.

512 a) S'_{6-8} A C I_{1-5} K D B आहता (emended to °ग° as in text with S'_3). —d) $S'_{3.6-8}$ A C I_{2-5} K D B दशो ($S'_{6.8}$ marg. यो as in text) ज्झि°; I_1 दशर्जिताः.

513 c) M (evid. emend.) घोषौघ-. —d) M (evid. emend.) आविशत.

514 b) M (evid. emend.) कादम्बरी.

515 c) $S'_{3.6}$ A C $I_{1.3.5}$ -भक्षा.

पशुतण्डुलमद्यादि हृत्वा वास्तव्यलोकतः ।
लुब्धास्तत्सेवकाः केऽपि स्वगृहे भरणं व्यधुः ॥५१६॥

मान्यदागमनं भूयाद् युष्माकं जनपीडया ।
इत्याद्यार्ताशिषः शृण्वन्नशक्तो विव्यथे नृपः ॥५१७॥

मृगया व्यसनं राज्ञो धिक् फलं भुज्यते न यैः ।
मृगापदेशाल्लोकानामेव सा क्रियते स्फुटम् ॥५१८॥

पशुवच्छतशो बद्ध्वा मृगौघो यत्र मार्यते ।
मृगया सा विनोदाय यदि सौनिककर्म किम् ॥५१९॥

श्रमस्त्वयं चले लक्ष्ये स्पृहणीयोऽस्ति सादिनाम् ।
कोऽयं बद्धे मृगे श्लाघ्यः शराभ्यासो धनुष्मताम् ॥५२०॥

क्षत्रियैर्मृगया कार्या निरवद्या तृणाशिनाम् ।
नैकान्तव्यसनं युक्तं ह्यति सर्वत्र गर्हितम् ॥५२१॥

महापद्मसरस्तीरगिरिगांश्च मृगव्रजान् ।
आगतो नृपतिस्तद्वन्निःशेषानकरोद् वधात् ॥५२२॥

इत्याद्यनुचितं किञ्चिन्मृगयादूषणं कृतम् ।
विलोक्य यद् भवेद्भीतिर्भाविनां मृगयाजुषाम् ॥५२३॥

आखेटिकां नृपः कृत्वा राजधानीं समागतः ।
अस्वास्थ्यमवहद् देहे ग्रहणीगदसम्भवम् ॥५२४॥

---

517 c) $S'_{3.6}$ A C इत्यादि चाशि°; S'_{8} इतयाद्युताशष; K D इत्याद्यताशिषः
518 b) I_2 B (evid. emend.) [अ] नघैः; S'_7 *sup. lin.* gloss दुष्टैः (for यैः).
519 d) S'_3 (before corr.) C I_{2-4} B शौनिक-.
521 b) MSS and C B निरवद्यतृणाशनात् (emended as in text).
523 d) C -युषाम्.
524 c) $S'_{6.8}$ अवदत्; A D अभवत् (for °वह°).

केऽप्यूचुर्मृगयादोषात् कुपिता देवतास्ततः ।
अतीसारगदारम्भस्तत्रैवास्य विलोकितः ॥५२५॥

केऽपि प्रच्छन्नराज्येच्छाः सैदाः स्वातन्त्र्यकाङ्क्षिणः ।
व्यधुः किमपि भूपाले तुरुष्कादृतमानसाः ॥५२६॥

केऽपि मन्त्रिवियोगोत्थचिन्तासन्तापितात्मजाम् ।
रुजमाहुर्न तद्व्याधेर्निश्चयः कस्यचित्त्वभूत् ॥५२७॥

भूपस्तादृगवस्थः सन्नववर्षादिवासरे ।
ययौ सर्जप्रदेशं तद् व्यर्थया शकुनीच्छया ॥५२८॥

तद्दिने गच्छतस्तस्य राज्ञो नौकान्तरस्थितेः ।
जैनवाटविहाराग्रात् सर्पस्तुत्रोट पद्धतिम् ॥५२९॥

तद्दुर्निमित्तभीशान्त्यै हत्वा तं सायकैर्नृपः ।
अहरद्धृदयाशङ्कां न शरीराद् रुजं पुनः ॥५३०॥

किमर्थं निर्गतो वासि चिरं त्वं सुकृतं कुरु ।
इतीवाग्रतो वायुः सवेगस्तं न्यरुद्ध्यत ॥५३१॥

अस्मिन् गते प्रजापीडा भविष्यत्यत्र मण्डले ।
अकम्पत शुचेवोद्यत्तरङ्गतरलं सरः ॥५३२॥

---

525 c) S'_3 C °रम्भाः. —d) S'_3 C °किताः.

527 b) MSS and C B °त्मजम् (emended as in text). —d) MSS and C B -चिद (*contra metrum*) भूत् (emended as in text).

528 a) MSS (except S'_8) C B स; S'_8 सन् (as in text). —c) $I_{1.3.4}$ मर्ज–; $I_{3.4}$ marg. gloss वं(I_4 न)डो मर्ज इति प्रसिद्धः; M (evid. emend.) तं (for तद्). —d) S'_3 (after corr.)$_6$ शकुनेच्छया.

530 b) C शायकैः.

531 d) MSS and C B सवेगं तं (<गन्तं mislec. for S'ār. स्तं).

तत्र सर्जोत्सवे भुक्त्वा सैदमन्त्रिसभावृतः।
अपुनर्दर्शनायेव सर्वेषां दर्शनं ददौ ॥५३३॥

नौकारूढस्ततस्तूर्णं सभृत्यः स दिनावधि।
उत्कण्ठाखण्डनायैव श्येनैः पक्षिवधं व्यधात् ॥५३४॥

अद्यैवेमं विनोदं नः करोति न पुनः प्रभुः।
इत्येव श्येनाः पक्ष्यालीं गृहीत्वोपायनं व्यधुः ॥५३५॥

प्रत्यावृतस्ततो राजा सैदांस्तान् प्रतिमुच्य च।
नाहं स्वस्थोऽस्मि तल्पस्थो देवीं ज्ञातरुजं व्यधात् ॥५३६॥

तत्पथ्यपरिचारिण्या स्वयं देव्यावृतो नृपः।
दिवसेन्दुरिव क्षीणरुचिर्विच्छायतामगात् ॥५३७॥

कपाटविकटं वक्षः श्यामगौरं तदाननम्।
कट्यूरुजानुपादाश्च पीनाः पद्मदलोपमाः ॥५३८॥

सुन्दरं नयनद्वन्द्वं ललाटं भ्रूमनोहरम्।
तद्रुजा नृपतेः सर्वं विवर्णं समपद्यत ॥५३९॥

एकदा सोऽवदद्राजा तं मेयाहस्सनं रहः।
नाहं जीवामि राज्यार्हाः न सुताः शिशवो मम ॥५४०॥

बह्रो बह्रामखानीयो न पाति मम बालकान्।
वरमादमखानीयं युक्त्यानीयाभिषिच्यताम् ॥५४१॥

---

533 a) $I_{1.3.4}$ मर्जोत्सवे; M (evid. emend.) सरोवरे (for °र्जोत्सवे). —d) $I_{1.3-5}$ ययौ (for ददौ).
534 c) I_1 D [इ] व (for ए°).
535 b) $S'_{8.6}$ A पि (evid. emend.) तु: (mislec. for S'ār.) भु:. —c) $S'_{6.8}$ A पक्ष्या (S'_6 A क्षा) लीगृ°; C पक्षालीं.
537 d) C B -रुचिं वि°.
538 a) $S'_{3.6.8}$ A C D कवाट–.
540 b) B (evid. emend.) मीया–.
541 c) I_5 A आधम–; S'_8 $I_{1.2-4}$ C D आधाम–.

अथवेयं भवत्कन्या यद्वक्ष्यति करोतु तत् ।
श्रुत्वेति भव धीरस्ते स्वास्थ्यं स्यादिति सोऽब्रवीत् ।
केवलं सैदहसनो रुरोद भृशदुःखितः ॥५४२॥

अथ राज्ञ्यवदत् पित्रे रहो मेरामुखादिदम् ।
सन्देहितासु राजायं राज्ये किं क्रियतेऽधुना ॥५४३॥

वरं बह्रामखानीयो युवायमभिषिच्यताम् ।
यौवराज्ये च ज्येष्ठोऽयं दौहित्रः स्थाप्यतामिति ॥५४४॥

द्वित्रा द्विष्टाश्च बध्यन्तां सर्वे स्युरविनश्वराः ।
श्रुत्वेति मेयाहसनः सक्रोधस्तामभर्त्सयत् ॥५४५॥

तच्छ्रेयःप्राप्तिसंकल्पकल्पितद्रव्यसंचयान् ।
मौसुलेभ्यो ददुः सैदा द्विजभक्तिविवर्जिताः ॥५४६॥

प्रभुं द्रष्टुं न यच्छन्ति गच्छन्त्यभ्यन्तरं स्त्रियः ।
मन्त्रपाठं निषेधन्ति तत्तद्गारुडिकोदितम् ॥५४७॥

चिकित्सां वैद्यकोक्तां तामन्यथा रचयन्ति च ।
तत्रापि गुलिकां भोक्तुं रचयन्ति स्वसाधिताम् ॥५४८॥

किमप्यनिष्टं कर्मेति कृतमित्यादिवादिनः ।
वर्चो विवर्णं पश्यन्तोऽप्यन्तरङ्गा महीपतेः ॥५४९॥

---

542 f) $S'_{3\cdot6-8}$ A C I_{1-5} रुरोध (mislec. for S'ār. द). MSS and C ins. कुलकं after -दुःखितः.

543 b) C मेर–; B (evid. emend.) मीरा–.

545 a) K द्विजा (for °त्रा); C द्विष्टाच्च (mislec. for S'ār. श्च); K वद्धर्यन्तां. —c) B (evid. emend.) मीया–. —d) A सम् (for ताम्).

547 d) MSS and C B °कोचि (mislec. for S'ār. दि) तम्.

वैद्यो गारुडिकश्चाहं दृष्टकर्मेति कत्थयन् ।
तथाभूद् रुप्यभट्टः स श्रीवैद्यककृतार्थनः ॥५५०॥

मुमूर्षुः सेवकैः पृष्टः का रुक् किं चेक्षसे विभो ।
सण्डो निवार्यतामग्रादित्यूचे तान् महीपतिः ॥५५१॥

कृतान्तमहिषो दृष्टो दिवमद्यैव यात्ययम् ।
इत्युक्त्वा शुशुचुः सर्वे साक्रन्दं साश्रुलोचनाः ॥५५२॥

संरुद्धवसनः साश्रु घूर्णयन् दृष्टिमण्डलम् ।
तस्यामेव रजन्यां स मुमूर्षुरभवन्नृपः ॥५५३॥

वर्षे षष्टितमे कृष्णनवम्यां मासि माधवे ।
पञ्चाहं द्वादशाब्दांश्च राज्यं कृत्वा दिवं ययौ
आक्रन्दमुखरा रात्रिः सर्वा सा जनताप्यभूत् ॥५५४॥

प्रातर्यानं समारोप्यच्छत्रचामरसंयुतम् ।
सैदाः ससेवकाः सर्वे निन्युः पितृशवाजिरम् ॥५५५॥

---

550 c) $S'_{6\cdot8}$ A K तदा (for °था); A C रूय्य–; S'_6 रय्य–; $I_{1\cdot2}$ B (evid. emend.) रूप्य–; K (corrupt) °भ्रूहुय– (for °भूद्रुय्य–).

551 a) I_{1-5} D (evid. emend.) मुमुक्षुः. —b) I_5 भ (mislec. for S'ār. रु) कृ; S'_3 C रुः (for रुक्). —c) $S'_{3\cdot6}$ C $I_{1\cdot3-5}$ D म (mislec. for S'ār. स) ण्डो; S'_7 *sup. lin.* gloss माहिषः (for सण्डः).

552 d) $S'_{3\cdot8}$ A I_5 K D सास्तु–.

553 a) M (evid. emend.) -वदनः; $S'_{3\cdot6\cdot8}$ A I_1 D सास्तु. —b) MSS and C B -मण्डले (mislec. for S'ār. लं).

554 e) S'_7 रात्रिः (*sup. lin.* त्रौ).

555 a) D B याने.

श्रीजैनभूपप्रमये दुःखिता नाभवत् प्रजा ।
तादृशी यादृशी तस्य मरणे शरणोज्झिता ॥५५६॥

तद्गर्ताश्मनि वस्त्राढ्ये तस्य मस्तकवेष्टनम् ।
उद्बन्धरचनं टुप्पिकोज्ज्वलं मन्त्रिणो व्यधुः ॥५५७॥

तदालोक्य जनः सर्वो दर्शनोत्कण्ठिताशयः ।
स्मारं स्मारं नृपं मेने निषण्णमिव मध्यगम् ॥५५८॥

प्रातःप्रातः समागत्य सैदाः सप्तदिनावधि ।
स्ववेदाध्ययनं चक्रुर्मिश्रितं रुदितस्वनैः ॥५५९॥

विहितरतयो दृष्टा येऽन्यैर्महाविभवोज्ज्वला-
स्तरुणवयसो बालालीलाविलासमदालसाः ।
कतिपयदिनैस्तेऽमी रिक्ता व्रजन्ति शुचान्विता
विरसमनसो राज्याद् वेश्यागृहादिव कामुकाः ॥५६०॥

देशो मेऽयं रचितरचना राजधानी ममेयं
कोशो मेऽयं युवतिरपि मे मे सुता मे च भृत्याः ।
इत्येवान्तः कलयति नृपो यावदेत्यन्तकस्तं
त्यक्त्वा सर्वं व्रजति सुशिरः पुण्यपापैकभागी ॥५६१॥

सप्ताङ्गसुभगं राज्यं ममेदमिति योऽब्रवीत् ।
तदीयो नाभवत्तस्य स्वदेहोऽन्ते पृथक् स्थिते ॥५६२॥

---

557 [a]) S'_8 A गृहा°; S'_6 $I_{1.2.5}$ K ग्रहा°; $S'_{3.7}$ C D गुहा° (emended as in text with M); $I_{2.3}$ B गहा° (corrupt) (for गर्ता°). —[c]) MSS and C B त (mislec. for S'ār. उ) द्ब°; S'_3 *sup. lin.* gloss टोपी (for टुप्पिका).

559 [d]) S'_3 C I_{1-3} B रुदितैः .

560 [d]) $S'_{3.6}$ (before corr.) K D राज्यद्°; C रज्यद्°.

561 [d]) D B सुशिराः; I_3 स्वशिपु°; M (evid. emend.) स शिरःपु°.

562 [d]) MSS and C B स्वदेहान्ते (emended as in text with M).

इत्थं शवाजिरे लोकः शुशोच नृपसंहतिम्।
अश्मैकरचनामात्रावशिष्टां तत्र संस्थिताम् ॥५६३॥

राज्यदानाय राज्ञी सा म्लेच्छसम्पर्ककर्कशम्।
बहामखानजं पुत्रं दुःखोदर्कमतर्कयत् ॥५६४॥

इति जैनराजतरङ्गिण्यां पण्डितश्रीवरविरचितायां
हस्सनशाहिराज्यवृत्तान्तवर्णनं नाम
तृतीयस्तरङ्गः ॥३॥

563 [b]) D B -सन्ततिम्; K -संहितं.

564 [c]) K भहाम-.
Colophon.—$S'_{2\cdot4}$ fol. missing. $S'_{7\cdot8}$ A C I_{1-5} K ins. श्री- before जैन-; $S'_{7\cdot8}$ K om. -जैन-; D श्रीवर- (for जैन); $S'_{7\cdot8}$ K om. नाम-; $S'_{3\cdot6-8}$ A C I_{1-5} D conclude with इति हस्सनशाहिस्वर्यानम् (before इति I_2 शुभमस्तु; after -स्वर्यानम् S'_6 सं ८९ पौ वदि त्रयोदश्यां गुरौ चित्रितम्); Before colophon K B ins. इति हस्सनशाहिस्वर्यानम्.

चतुर्थस्तरङ्गः

तृतीयेऽहनि सैदास्ते मिथः संमन्त्र्य सत्वराः ।
व्यधुर्मह्मदखानाय राज्यदानाय निश्चयम् ॥ १ ॥

प्रतीक्षाक्षममालोक्य कालं सैदास्त्वराकुलाः ।
राज्याभिषेकदानेच्छामकुर्वन्नृपसूनवे ॥ २ ॥

अथ राज्ये व्यधीयन्त तत्सुतं सप्तवार्षिकम् ।
कृत्वा मह्मदशाहाख्यां गोनन्दमिव सुन्दरम् ॥ ३ ॥

तस्य सिंहासनस्यान्ते स्थापिता वस्तुसंततिः ।
त्यक्त्वा भोजनसामग्रीं पूर्वं शार्ङ्गेऽपतत् करः ॥ ४ ॥

एतद्राज्ये सदा युद्धं भविता मण्डलान्तरे ।
दृष्ट्वा शकुनविज्ञाः केऽप्यूचुस्तत्रान्तिकस्थिताः ॥ ५ ॥

रौप्यसिंहासने छत्री विबभौ बालभूपतिः ।
दत्तानन्दः पयःपूरैर्बालेन्दुरिव सुन्दरः ॥ ६ ॥

सैदाः शुभ्रांशुकन्यस्तकुङ्कमालोहितत्विषः ।
भाविद्रोहकृतोद्गच्छद्रक्तसिक्ता इवाबभुः ॥ ७ ॥

भ्राता होस्सनखानोऽस्य कनीयान् रुचिराकृतिः ।
बभौ बालनृपस्याग्रे शुक्रस्येव बृहस्पतिः ॥ ८ ॥

---

1 b) I_{1-3} C सत्वरः (<स् mislec. for Sar. म्). —c) M (evid. emend.) -खानस्य.

2 b) S'_6 त्वरान्विताः.

3 c) MSS and C B °ख्यं (emended as in text).

6 a) S'_{6-8} A -सिंहासनी.

7 c) $I_{1.3.5}$ -रुतो°; S'_3 C -रुजो° (for -कृतो°)

8 a) B (evid. emend.) हुस्सन–.

शोकहर्षान्वितो लोकस्तद्दिने पितृपुत्रयोः ।
दधौ तमःप्रकाशाढ्यां लोकालोकाचलश्रियम् ॥ ९ ॥

दौहित्राभ्युदये सैदाश्चेरुरानन्दसुन्दराः ।
सुगन्धिमकरन्दाढ्ये मधौ मधुकरा इव ॥ १० ॥

वाद्यमानोत्सवातोद्यप्रोद्यत्प्रतिरवच्छलात् ।
अकुर्वन्निव वृद्ध्यर्थं राज्ञस्तस्याशिषो दिशः ॥ ११ ॥

राजधान्यङ्गने सैदाः परिधानप्रसादनैः ।
अतोषयन्नुत्सवान्तः सर्वं नृपपरिच्छदम् ॥ १२ ॥

एकस्मिन् कीर्तिशेषेऽन्या दिग्द्वयाद्वस्सनद्वयी ।
तादृशी ददृशे पौरैः स्फूर्जत्सादिशतावृता ॥ १३ ॥

राज्यसम्पत् ससप्ताङ्गा तद्गृहे समलक्ष्यत ।
तत्कन्योद्वेजितेवाप्ता वक्तुं रिपुपराभवम् ॥ १४ ॥

राज्ञः सेवकसामन्ताः प्राप्नुवन्तस्तदन्तिकम् ।
प्रवेशं लेभिरे नान्तर्लडन्तः कुक्कुरा इव ॥ १५ ॥

देश्यसंस्कृतशास्त्रज्ञविद्वत्कृतविडम्बनाः ।
गृहे स्त्रीषु बहिः श्येनलीलासु व्यसनं दधुः ॥ १६ ॥

विगुणव्यवहारेषु क्रूराचारेषु दर्पिषु
दुःसहान्तकदूतेन लोभेन क्षोभितेषु च ।
दौःशील्यानभिगम्येषु प्रसरन्मत्सरेषु च
विरागं तेषु सैदेषु सप्रजाः सेवका ययुः ॥ १७ ॥

---

13 c) I_{1-5} C D B तादृशे.
14 c) I_5 तर्कन्येद्रे° (sic).
15 d) $S'_{3\cdot 6}$ C I_{1-5} K B लुठन्तः.
16 a) $S'_{3\cdot 6}$ C I_2 देश–.
17 b) S'_8 A °सहातङ्क–. —c) $I_{1\cdot 3}$ D दौशी°. —d) $I_{3\cdot 5}$ C विराग– (sic).

हितानामपि सैदानां केचिद् भूपालसेवकाः ।
नाभ्यनन्दन् परिचयं काकानामिव कोकिलाः ॥ १८ ॥

द्विजस्थितिः सुखं यासीत् सतीसरसि निश्चला ।
तेषां श्येनैश्च भृत्यैश्च भ्रामिता च पलाशया ॥ १९ ॥

स्फीतगीतोल्लसन्नादा येऽभवन् वृन्दगायनाः ।
शोकमूका इवाभ्यर्णे माघे भृङ्गा इवाभवन् ॥ २० ॥

अथ प्रथममेवैते गृहीत्वा नवभूपतिम् ।
शाकुनापेक्षिणो नावा वितस्तानाडमभ्ययुः ॥ २१ ॥

स्वपक्ष्यावर्जकास्तत्र पृष्ठभोज्यान्नसम्पदः ।
स्वातन्त्र्यप्राप्तिदर्पान्धाः काश्मीरानादरं व्यधुः ॥ २२ ॥

अपुनर्गमनायेव विधाय शाकुनिक्षयम् ।
एकदा स्वीयसंयुक्ता व्यधुः किमपि मन्त्रणम् ॥ २३ ॥

तेषां तत्केवलतया श्रुत्वा षाड्गुण्यमन्त्रणम् ।
काश्मीरिकाश्च मद्राश्च शङ्किता नगरेऽभवन् ॥ २४ ॥

ततः परशुरामाद्यैस्तद्द्विष्टैः सह तद्दिने ।
मिलिताः पञ्चषास्तीक्ष्णाः सैदद्रोहमचिन्तयन् ॥ २५ ॥

---

19 [a]) S'_3 marg. gloss द्विजानां पक्षिणां विप्राणां च (for द्विज–). —[d]) S'_8 त्रासि (mislec. for S'ār. भ्रामि)ता.

21 [c]) M (evid. emend.) °वेक्षिणः. —[d]) $S'_{3\cdot6\cdot8}$ C I_2 B -तटम् (for नाड°. Thus *sup. lin.* in S'_6); $I_{1\cdot3}$ नानु (mislec. for S'ār. ड)म्.

22 [b]) S'_8 प्रेष्ठ–; S'_8 A I_{1-5} D -सम्पदा.

23 [a]) K A [ए]व (for इ°).

25 [b]) S'_3 C तद्दि (mislec. for S'ār. द्द्वि)ष्टैः. —[c]) MSS and C B पञ्चशः (emended as in text). —[d]) S'_3 C I_{1-5} D B सैदा.

जिघांसतामथैतेषां वैजन्यावसरेक्षिणाम् ।
न भेदमगन्ममन्त्रो गुप्तस्तद्दुष्कृतैरिव ॥ २६ ॥

एकदा तत्सुताभीष्टा मेराख्या मेरहस्सनम् ।
मूर्तेव दुर्दशा गेहमागत्येत्यब्रवीद्रहः ॥ २७ ॥

राज्ञ्याः क्वापि क्रिया साध्या तूर्णमागम्यतां प्रभो ।
इत्युक्त्वानिष्टमप्येनं सा निनाय गृहान्तरात् ॥ २८ ॥

द्रोहस्ते सूर्यवारे स्यान्न गन्तव्यो नृपालयः ।
पित्रेत्युक्तोऽपि स स्वप्ने ययौ दैवविमोहितः ॥ २९ ॥

तावत् स सैदहसनोऽप्यायययौ स्वगृहाद् द्रुतम् ।
पादच्छेदोऽस्ति ते द्रोहान्मा पल्ययनमारुह ।
इत्येव पादकटकच्छिन्नोऽश्वादपतद् भुवि ॥ ३० ॥

प्रतोल्यां सैदसाद्यश्वाः खुरोत्कीर्णरजोमिषात् ।
नैते पुनर्विशन्तीति शुचेवोच्छ्वासमक्षिपन् ॥ ३१ ॥

तत्तारखानलेखेन त्वदनर्थादिहेतवे ।
प्राप्तेनाद्य मिथो मन्त्रं विधाय कृतनिश्चयाः ॥ ३२ ॥

---

27 b) B (evid. emend.) मीराख्या मीर–.

28 a) $S'_{3,7}$ C I_{1-5} K D B राज्ञः; $S'_{6,8}$ A राज्ञ्याः (as in text); A साध्व्या.

30 d) S'_{3} I_{5} C B पलायनम्; $I_{3,4}$ पलाय्यनम्. —e) M (evid. emend.) [इ]व (for ए°).

31 a) $S'_{3,7}$ C I_{1-5} K D B -साद्यश्व- (emended as in text with $S'_{6,8}$ A).

32 a) A K D उ (mislec. for S'ār. त)त्ता°.

आक्रान्तमण्डलाः सैदा युष्मच्छेषविशङ्किताः ।
प्रातर्बध्नन्ति वस्तस्मादुपायः कोऽपि चिन्त्यताम् ॥ ३३ ॥

मिथ्येति बोधिता मद्रा जोनराजानकादिभिः ।
हन्मस्तान् वयमेवादौ संमन्त्र्येति समाययुः ॥ ३४ ॥

सर्वानमृतवाव्यन्तः समेतानवगम्य तान् ।
अन्तः परशुरामाद्या विविशुः शस्त्रधारिणः ॥ ३५ ॥

रक्ष्यो द्वारस्त्वया तैरित्युक्तो द्वारेशताजकः ।
मन्त्रे प्रवृत्तिरित्युक्त्वा सैदभृत्यान्न्यवारयन् ॥ ३६ ॥

कुर्वन्ति भोजने लुण्ठिं त्वद्भृत्या इति तद्गिरा ।
सैदाः सशस्त्रान् स्वान् भृत्यान् स्वसमीपान्न्यवारयन् ॥ ३७ ॥

जोनराजानकस्तावत् पथान्येनागमद् द्रुतम् ।
गृहीत्वा राजभृत्यौघं जिघांसुर्वाटिकान्तरात् ॥ ३८ ॥

ताजदौवारिकोऽप्यश्वमारुह्याप्तो नृपाङ्गनम् ।
बभ्रामाभ्यन्तरेऽन्यत्र तन्मतेन जिघांसया ॥ ३९ ॥

वाटिकान्तश्चतुष्खण्डमण्डपोपरि संस्थिताः ।
सैदा मद्रान् समालोक्य साशङ्का इव तस्थिरे ॥ ४० ॥

किं न गच्छत देशं स्वं प्रतिमुक्ताः किमागताः ।
इत्यागतांस्तान् दृष्ट्वैव सेर्ष्यं सिंहद्विजोऽभ्यधात् ॥ ४१ ॥

---

36 d) C B °वारयत् .
37 c) C (evid. emend.) स्वश° .
38 c) B (evid. emend.) -भृत्यौघान् .
39 b) MSS and C B नृपाग्रगम् (emended as in text).
41 c) S'_8 A दृष्टैव. —d) $S'_{3.6}$ C $I_{1.3.5}$ K सेर्षं.

मार्गमुक्त्यक्षरो नाप्तस्त्वत्तो यामः कथं वयम् ।
अद्य वः प्रतिमोक्ष्यामः सत्यार्थमिति तेऽभ्यधुः ॥ ४२ ॥

वैजन्यं वीक्ष्य पाथेययाच्ञादम्भादुपागतः ।
परशुः सिंहभट्टं तं न्यवधीत् प्रथमं रुषा ॥ ४३ ॥

चतुष्मण्डपिकाप्रान्ते प्रक्षरत्क्षतजोक्षितः ।
सिंहोऽपि वित्रुटच्छालः सृगाल इव सोऽपतत् ॥ ४४ ॥

किं द्रोहो द्रोह इत्युक्त्वा यावद् भीताः समुत्थिताः ।
तावत् खड्गप्रहारैस्ताञ् जघ्नुर्मद्राः समेत्य ते ॥ ४५ ॥

निर्यातः प्रस्फुरन्मेदा द्वाराग्रे सैदहस्सनः ।
हतो मुष्ट्यायुधस्तत्तत्प्रहारशतविह्वलः ॥ ४६ ॥

तं दृष्ट्वा मेयहस्सनं सभयं विद्रुतं द्रुतम् ।
प्राकारारूढमवधीत् कोऽपि च्छिन्नपदद्वयम् ॥ ४७ ॥

गदायामीनकासीममल्लजाद्यास्तदन्तिके ।
त्रिंशन्मात्रा हतास्तत्र पुत्रमित्रसमन्विताः ॥ ४८ ॥

---

42 a) $S'_{3\cdot6}$ C -मुकाक्षरो. —b) S'_6 स्वयम् (for व°).

43 a) S'_{6-8} A I_{1-5} K D B ईक्ष्य; S'_3 C एक्ष्य (emended as in text). —b) C उपाजत: (corrupt).

44 a) S'_6 C चतुष्खण्ड°; S'_3 चतुर्खं (*sup. lin.* ष्ख). —c) S'_3 C वित (sic) टश्छा (mislec. for S'ār. च्छा) ल:; $I_{1\cdot3\cdot5}$ विक्रटश्छाल:. —d) S'_8 C $I_{2\cdot4}$ B शृगाल.

47 a) B (evid. emend.) मीय–.

48 a) S'_7 गदाय (before corr. या as in text); S'_6 (befor corr.) गजया–; S'_8 A C I_{1-5} K D B गदया–; S'_3 मदाय–. $S'_{6\cdot8}$ A -मीम-; M (evid. emend.) -मीर– (for मीन); S'_3 C I_{1-5} -यासीम–. —b) S'_7 D A -मल्ला–; MSS and C B °ला (mislec. for S'ār. जा) द्याः.

वदन्तो हाल-हालेति रक्तसिक्ताक्तपाणयः ।
चेरुस्ते तद्वधोद्युक्ताः कृतान्तस्येव किङ्कराः ॥ ४९ ॥

गृहेषु गोवधात् तेषां पापभीर्नाभवद् यथा ।
तथा तत्र घ्नतां सैदान् मद्राणां नाभवद् घृणा ॥ ५० ॥

मृगयान्ते कुरङ्गादींश्छिन्नाङ्गान् व्यदधुर्यथा ।
तथा सैदाः कृता मद्रैः क्षुद्रैस्तद्वाटिकान्तरे ॥ ५१ ॥

द्विषद्धृतांशुका नग्ना महार्हशयनोचिताः ।
अनाथा इव लोकस्य प्रययुः प्रेक्षणीयताम् ॥ ५२ ॥

केचिद्धैभतखानाद्या निष्कृष्टच्छुरिकास्ततः ।
तूर्णं प्राकारमुल्लङ्घ्य गृहीत्वाश्वान् पलायिताः ॥ ५३ ॥

तद्दृष्ट्वा तुमुले जाते बहिस्तदनुजीविनाम् ।
कस्यापि निश्चयो नाभूदन्तरे के हता इति ॥ ५४ ॥

भयत्यक्ताभिमानेषु विद्रुतेष्वनुजीविषु ।
चकर्ष शस्त्रं तन्मध्यात् कोऽपि नैवाङ्गनान्तरे ॥ ५५ ॥

मल्लजादात्मजाहूतस्तावन्मेयामहम्मदः ।
गृहादेत्य द्रुतं प्रादादास्कन्दं राजमन्दिरे ॥ ५६ ॥

प्रतोलीपालकः सोऽयं द्रोहीत्यग्रागतं द्रुतम् ।
राजमार्गान्तरे क्रुद्धो नोरोल्लाहमघातयत् ॥ ५७ ॥

---

52 b) M (evid. emend.) महार्घ-.

53 a) I_2 D B हैबत-.

56 a) C °हूताः. —b) B (evid. emend.) मीया-; $S'_{7\cdot8}$ A I_5 D -महाम (mislec. for S'ar. हम्म) दः.

57 d) I_3 B (evid. emend.) नूरो°.

बद्धाररिपुटां दृष्ट्वा द्वारधानीं नवीकृताम् ।
ज्ञात्वान्तःस्थान् रिपून् प्राग्वत् क्षोभेनाग्निमदापयत् ॥ ५८॥

न शक्रोपद्रवं द्रष्टुं स्वर्गं मद्रक्षको गतः ।
शुचेवेति द्वारधान्या जुहुवे ज्वलने वपुः ॥ ५९ ॥

सौधप्राप्तलसद्धूमस्तोमव्याजान्नृपश्रियः ।
क्व मां खला नयन्तीति निःश्वासौघा इवास्फुरन् ॥ ६० ॥

अत्रान्तरेऽग्निमालोक्य द्रोग्धारो धारितायुधाः ।
राजधान्यङ्गनं प्रापुर्निर्गता वाटिकान्तरात् ॥ ६१ ॥

जोनराजानको गच्छन् रुद्धः केनापि पत्तिना ।
वीरः खड्गप्रहारेण द्वित्रांस्तत्राङ्गनेऽवधीत् ॥ ६२ ॥

समारुह्याथ राजाश्वान् सर्वे मद्रसमन्विताः ।
मुक्तामूलकनागान्ते प्राप्ताः प्रोचुः क्षणं मिथः ॥ ६३ ॥

वरमत्रैव तिष्ठामः सैदैर्युद्धं विदध्महे ।
स्वल्पावशिष्टैः शत्रूणां न शेषः परिरक्ष्यते ॥ ६४ ॥

ज्यल्लालठक्कुरः श्रुत्वा तानूचे नयकोविदः ।
न युद्धसमयोऽस्तीह गत्वानेन पथा द्रुतम् ॥ ६५ ॥

वितस्तापारमासाद्य तिष्ठामः सपरिच्छदाः ।
तत्रोपायान् विधास्यामो येन नश्यन्त्यमी स्वयम् ॥ ६६ ॥

---

58 b) $I_{3.5}$ C B राज- (for द्वार). —c) I_1 C °न्तस्थान्.

62 a) C [अ]गच्छत्. —d) $S'_{3.6-8}$ A C I_1 क्रुद्धः.

65 a) $I_{2.4}$ B (evid. emend.) जल्लाल-.

अभिनन्द्येति तद्वाक्यं सर्वे साहसशालिनः ।
जुहिलामठमार्गेण वितस्तापारमासदन् ॥ ६७ ॥

अत्रान्तरेऽन्तरं प्राप्तः क्रुद्धो मेयामहम्मदः ।
अवधीद् भ्रातरौ ताजपाजकौ द्वारपालकौ ॥ ६८ ॥

राजधान्यङ्गनात् कृष्टौ श्वपचैर्गुल्फदामभिः ।
अमेध्यमध्यमग्नाङ्गौ ययतुस्तौ श्वभोज्यताम् ॥ ६९ ॥

आजन्म कृपणौ ग्राम्यपीडोत्कोचार्जितश्रियौ ।
प्राणदानक्षणे तस्मिन् गतौ सर्वस्वदातृताम् ॥ ७० ॥

संचितं ग्राम्यपीडाभिर्लुब्धैर्यत् परवञ्चनैः ।
तेषां सद्रूप्यकुप्यादि सर्वं तद्राजसादगात् ॥ ७१ ॥

कृपणस्य गृहं विशन्ति येऽर्था
न बहिः क्रष्टुमतो जनाः क्षमन्ते ।
बिलमध्यगता इव द्विजिह्वा
यदि निर्यान्त्यसुभिः सहैव सर्वे ॥ ७२ ॥

भिक्षोः प्रसृतिमात्रं यैर्न दत्तं तद्गृहान्तरात् ।
शतं तण्डुलखारीणां भिक्ष्वाद्यैरेव तद्धृतम् ॥ ७३ ॥

---

67 b) I_1 C सर्व-. —c) S'_{6-8} A C I_{1-5} D B जुहिला (prob. mislec. for S'ār. णा) म°; S'_3 जुलिला-; K जहिला-.

68 b) S'_7 $I_{1.3.5}$ D -महाम (mislec. for S'ār. हम्म) दः. —d) K -याजकौ; S'_6 -पाल (prob. mislec. for S'ār. ज) कौ.

69 c) D -सर्वाङ्गौ (for मग्ना°).

70 a) S'_3 $I_{1.3}$ C कृपण-.

71 a) S'_8 A ग्राम-. —c) $S'_{6.8}$ A D सद्रुप्य-.

73 d) C इक्ष्वाद्यैर् (for भि°).

गोधूमपिष्टं पूपैकपर्याप्तं नाप्तमार्थिभिः ।
यत् तल्लुण्ठिपतच्चूर्णैर्हिमपातायितं पथि ॥ ७४ ॥

अत्रान्तरे गृहादाप्तोऽप्यालिखानो भटोद्भटः ।
प्राग्वाटिकाप्रतोलीं तामदहत् तज्जिहीर्षया ॥ ७५ ॥

एदराजानकाद्याश्च तावद् बह्रामखानजम् ।
उन्मुच्य बन्धनात् तूर्णमपमार्गेण निर्ययुः ॥ ७६ ॥

अग्रे दृष्ट्वारिसैन्यं च पश्चादपि हुताशनम् ।
क्षमो यातुं न च स्थातुं मृगशाव इवाभवत् ॥ ७७ ॥

कृष्टोऽरिष्टाय सोऽयं नो विरुद्धैरिति तं विदन् ।
अलिखानः समाश्वास्य सिंहो मृगमिवावधीत् ॥ ७८ ॥

महाराज्ञ्यैव कृष्टोऽयं पाजभट्टमतस्थया ।
राज्यार्थमिति सैदास्तं चुक्रुशुः केचनावदन् ॥ ७९ ॥

उपायो बन्धनात् क्रष्टुं चिन्तितस्तस्य योऽपरैः ।
अपायः प्रत्युतास्याभूद् दैवं केन विलङ्घ्यते ॥ ८० ॥

तस्य मीरादयो भृत्याः पापास्तेन प्रचोदिताः ।
प्रहारविवशं चक्रुः शशकं शबरा इव ॥ ८१ ॥

राजपुत्रवधोत्पातविवशं पृष्ठपातिनम् ।
अवधीत् पाजभट्टं तं स्वपक्षमपि राक्षसः ॥ ८२ ॥

---

74 e) I_2 B (evid. emend.) °लुण्ठिततच्चू°.

75 c) S'_3 C °वालिका–.

79 b) K याज–.

82 b) S'_{6-8} K -पिहितं; $S^{\wedge}_3$ A C I_{1-5} D B विवशं (as in text).
—d) MSS and C B इव (S'_7 *sup. lin.* अपि as in text).

भुक्तं किमपि नो राज्यान्निर्हेतुः किमयं हतः ।
शुचेवारोदि तद्दृष्ट्वा वृक्षैः पिकरवच्छलात् ॥ ८३ ॥

मा मा वधीरिमं खानं सुचिराद् बन्धनोद्गतम् ।
रुरुदुस्तच्छुचेवेत्थं मरुता कम्पिता लताः ॥ ८४ ॥

केऽमी तुरुष्का दुष्कार्यकराः पुष्कलपातकाः ।
इत्येव तरवः कम्पमापुर्वायुविघट्टिताः ॥ ८५ ॥

चतुर्विंशतिवर्षोऽयं मात्रा प्राप्तश्चिराच्छवः ।
त्र्यहं रुद्ध्वान्तिके स्नेहात् कृतोऽन्त्यक्रियया ततः ॥ ८६ ॥

यवान्नभक्षणी तस्य जननी विधवा सती ।
सोबाणदेवी साजीवमवसत्तच्छवाजिरे ॥ ८७ ॥

राजसैदद्विजानेतान् हतान् वीक्षाम्यहं कथम् ।
इतीव तत्क्रुधा रक्तः सूर्यो लोकान्तरं ययौ ॥ ८८ ॥

परितो राजधान्यास्तान् दृष्ट्वा नग्नान् महत्तरान् ।
न शेकुः केऽपि वस्त्रैकखण्डं दातुं त्रपाहृते ॥ ८९ ॥

सरस्तीरगता भेका अविच्छिन्नरवच्छलात् ।
साक्रन्दाः सर्वरात्रं ते तच्छुचेवाभवंस्तदा ॥ ९० ॥

---

83 b) S'_3 C निर्हेतु. —c) S'_3 तं (for तद्).

84 c) K रुरुधुः.

85 c) M (evid. emend.) [इ] व (for ए°).

86 c) S'_{6-8} A K श्रुत्वा (for रुद्ध्वा).

87 c) $I_{1\cdot3}$ C K सोवाण–; B (evid. emend.) सुल्हाण–.

88 c) K [ए] व (for इ°).

89. b) S'_{6-8} K मग्नान् ; S'_3 A C I_{1-5} D B नग्नान् (as in text). —d) $I_{1\cdot3\cdot4}$ त्रपाहृतं (mislec. for S'ār. ते).

90 a) S'_{6-8} A I_2 K भी (sic) का.

ये राजवेश्म विविशुः सुभगाः सुवेशा-
स्त्वङ्गत्तुरङ्गखुरधूलिकृतान्धकाराः ।
ते द्वित्रवोढशिबिकाधृतजीर्णवस्त्रा
निष्कासिता नृपगृहात् स्रुतरक्तधाराः ॥ ९१ ॥

इत्थं षष्टितमे वर्षे भाव्युपद्रवकारणम् ।
वैशाखस्य चतुर्दश्यां सैदानां विप्लवोऽभवत् ॥ ९२ ॥

नूनं हसननाम्नां सभृत्यानां तत्र वत्सरे ।
अन्तकः संनिविष्टोऽभूद् येनैते प्रलयं गताः ॥ ९३ ॥

सामान्यवेश्मनि वरं जनिरस्तु पुंसां
मा मास्तु राजनिलये बहुदुःखकर्त्री ।
ते शेरतेऽत्यरुचिरेऽल्पपटैकमध्ये
नो माति राजयुगलं विपुले सुदेशे ॥ ९४ ॥

अथालिखानमेयाद्याः क्रुद्धाः पश्चादवालगन् ।
नदीपारगतान् श्रुत्वा द्रोहिणस्तान् विरोधिनः ॥ ९५ ॥

नौसेतुबन्धानुच्छिद्य माद्रैः काश्मीरिकैः समम् ।
ज्यल्लालठक्कुराद्यास्ते मतं चक्रुर्जिगीषया ॥ ९६ ॥

---

91 c) S′$_{3\cdot6\cdot8}$ C K द्वित्रि-. —d) I$_2$ C B निष्काशिता; S′$_{6-8}$ -भा (sic) राः.

93 a) S′$_8$ C I$_3$ K -नाम्ना. —b) D B कृत्यानां. —d) S′$_{6\cdot8}$ K ययुः (for गताः) —After गताः S′$_{7\cdot8}$ महादेवाय नमः.

94 c) I$_{2\cdot4}$ D B (evid. emend.) तु समभेत्य (for ऽत्यरुचिरेऽल्प-). —d) S′$_{6\cdot8}$ A K पा (mislec. for S′ār. मा) ति; S′$_{6-8}$ A K नृपतेः; S′$_8$ C I$_{1-5}$ D B विपुले (as in text); S′$_{6-8}$ A C K स्व (mislec. for S′ār. सु) दे°.

95 a) B (evid. emend.) -मीया°.

96 c) B (evid. emend.) जल्लाल-.

विंशप्रस्थान्तरे सैदाः प्राप्तसंनाहवाहनाः ।
तत्तत्पटकुटीषण्डमण्डिताः शिविरं व्यधुः ॥९७॥

पुरमात्रावशिष्टास्ते सैदा द्वैधानिवर्तिनः ।
वाजिवर्मासिभूयिष्ठां राज्यलक्ष्मीं विभेजिरे ॥९८॥

येषां वराटिकैकापि नाभूत् करगता क्वचित् ।
स्वर्णरूपकहस्ताङ्काश्चेरुस्ते वेशभूषिताः ॥९९॥

तेषूत्तुङ्गतुरङ्गेषु सर्वतो वसुवर्षिषु ।
अकारि शस्त्रग्रहणं शिल्पिशाकटिकैरपि ॥१००॥

मन्दुरासुन्दरा येऽश्वा राज्ञोऽभूवन् महागुणाः ।
तानारुह्याधमाश्चेरुस्तद्भृत्या नित्यदुर्लभान् ॥१०१॥

ततो हस्सनराजानकाद्यैरन्यैश्च संयुताः ।
षाड्गुण्यं विदधुः सैदाः काश्मीरिकजिगीषवः ॥१०२॥

ते मेयामत्तनाराचमुख्यानां यन्त्रणोज्झिताः ।
स्वसेवकानां विदधुरधिकारसमर्पणम् ॥१०३॥

अत्रान्तरे पारगताष्ठक्कुराद्या महाधियः ।
सैन्यानां संग्रहं चक्रुस्ते जालद्रगरान्तरे ॥१०४॥

श्रुत्वेति साहसोदन्तं नगरे मद्रनिर्मितम् ।
आययुः सर्वराष्ट्रेभ्यो लोकास्ते शस्त्रधारिणः ॥१०५॥

---

98 b) S'_3 C I_{1-5} B द्वै (I_1 द्वे) धान्निव°; D द्वैध–. —d) S'_6 D राज–.

100 a) S'_3 C (evid. emend.) तेऽप्यु° (for °षू); S'_3 K -तरङ्गेषु.

102 b) A सेविताः (for संयु°). —d) K काश्मीरिविजि°.

103 a) B (evid. emend.) मीया–; K -सुत– (for मत्त); S'_7 -नाराब– (*sup. lin.* च); S'_6 -नारार्ध–.

105 a) S'_{6-8} A C I_{1-5} D B °दात्तं; S'_3 °दन्तं (as in text); K °दातुं (mislec. for S'ār. न्तं).

प्रवृत्ते च पुरक्षोभे पुरे ग्रामे च पत्तने।
अत्युल्बणजनः सर्वो धावति स्म धृतायुधः ॥१०६॥

शमालाबाङ्गिलीयाद्याः क्रमराज्यगताश्च ये।
स्थामार्थं क्षिप्तिकातीरे शिबिरं समकल्पयन् ॥१०७॥

दरड्डिश्चक्कवाडाद्यैर्दरड्डिः सुभटैः समम्।
वैडूर्यभट्टः स्थामस्थो युद्धसंनद्धतां दधौ ॥१०८॥

नीलाश्वलोकं संगृह्य पम्मराजानकादयः।
दुग्धाश्रमान्तिके सिन्धोः पारं स्थामार्थमासदन् ॥१०९॥

सर्वतो धान्यसंभारानानीयानीय नाविकैः।
प्रवासवेतनं कोशाभावात् काश्मीरिका व्यधुः ॥११०॥

क्वचिल्लुण्ठि क्वचिद्दाहं परदेश इवात्र ते।
पारावारगताश्चक्रुर्नदीं तीर्त्वा पुरद्वये ॥१११॥

धनुर्यन्त्रशरैर्मुक्तैः प्रतितीरं पुरद्वये।
पञ्च सप्त मृता युद्धे प्रत्यहं कटकद्वये ॥११२॥

खशाश्चोपान्तसामन्ताः क्षीणप्रेष्या गृहोज्झिताः।
नामावशेषाः खानाश्च शूरा दारिद्र्यपीडिताः ॥११३॥

चौराः कृतप्रमोषाश्च चिरबन्धनयन्त्रिताः।
तत्तद्राजविरुद्धाश्च पिशुनाश्च श्ववृत्तयः ॥११४॥

---

106 a) M (evid. emend.) विपुल- (for च पुर-). —c) $S'_{6\cdot8}$ $I_{3\cdot5}$ अत्युल्ल्बणो. I_{1-5} D om. 106[ab].
107 a) C -वाङ्गिना° (corrupt).
108 a) K दरिड्डिः; $I_{1\cdot3}$ वरड्डिः; S'_3 C चक्कवाकचैः; B (evid. emend.) चक्रवाकाद्यैः. —b) MSS and C B द (prob. mislec. for S'ār. च)रं. —c) C वैदू (mislec. for S'ār. डू) र्य-. —d) K ददौ; $I_{1\cdot4\cdot5}$ ययौ.
114 a) $S'_{6\cdot8}$ A -प्रदोषाश्च.

हृताधिकारास्तत्कार्यन्यायप्रत्यायनाक्षमाः ।
एते चान्ये च तुतुषुर्देशेऽस्मिंस्तदुपद्रवे ॥११५॥

नौसेतुबन्धान्नावश्च सर्वा मडवराज्यतः ।
आनीय वामतीरस्था विदधुः स्वोपयोगिनीः ॥११६॥

देवाभिधः शाकुनिको नाविकाधिपतां भजन् ।
प्रतीर्य नौकायुद्धेन विदधे सुभटक्षयम् ॥११७॥

सैदा डल्लसरस्तीरस्थितान् शाकुनिकान्नवान् ।
सपोतान् व्यसृजन् योद्धुं तत्तन्नन्दपुरस्थितान् ॥११८॥

मेयावफाकनामापि पुररक्षाधिकारभाक् ।
विचार्य चौरांस्तत्काले द्वित्रान् शूले न्यरोपयत् ॥११९॥

आसमुद्रमठाज्जैननगरान्तं सडिण्डिमम् ।
तस्मिन् स्फुरति पौराणां न भीश्चौरकृताभवत् ॥१२०॥

छिन्नेषु सेतुबन्धेषु तत्तन्नौपुरकादिषु ।
पूर्दुर्गरचनेवाभूद् दुर्गमा तद्विरोधिनाम् ॥१२१॥

---

115 [b]) C B °नयनक्षमाः.

116 [a]) $S'_{6.8}$ A K -बन्धा(S'_6 न्ध)ना°. —[b]) $I_{1.3.5}$ मनु (mislec. for S'ār. ड) व–.

118 [a]) I_4 (gram. assim.) सैदान् ; $S'_{6.8}$ A डल–; $I_{1.3-5}$ नु (mislec. for S'ār. ड) ल्ल–; C दु (mislec. for S'ār. ड) ल्ल–. —[d]) $I_{4.5}$ -पुरे; S'_6 marg. gloss नन्दपुर (for नन्दपुर–).

119 [a]) B (evid. emend.) मीया–; $S'_{3.6.8}$ A C $I_{1.3.4}$ -वहाक–; M (evid. emend.) -वहाब–. —[b]) D -रक्ष्या°.

120 [b]) S'_{6-8} सादि (sic) ण्डिमम्.

121 [b]) S'_6 marg. gloss नावपुर् (for नौपुर–).

आस्कन्दं स्कन्दभवनादाशङ्क्योपनृपाङ्गनम् ।
पञ्चहस्तमितां सैदाः परिखां समकल्पयन् ॥१२२॥

द्वारधानीसमीपेऽपि रुद्रराजानकान्तिके ।
तादृशीं परिखामन्यां चक्रुर्वैरिभयच्छिदे ॥१२३॥

विरुद्धवेश्मलुठनं कुर्वन्तो हृततद्धनाः ।
सैदभृत्या भयं चक्रुः प्रजानां गोवधादिना ॥१२४॥

विरुद्धमुक्तलुण्ठितगृहदारुसमाप्तितः ।
दिद्दामठे रुद्रवने वासेन्धनहृतोऽभवन् ॥१२५॥

अनभिज्ञतयाल्पानां तद्विरुद्धगृहश्रियः ।
व्ययीचक्रुर्वृथा सैदा गावो हत्वा शुनामिव ॥१२६॥

निकृष्टशस्त्राः संनाहममुञ्चन्तो दिने दिने ।
राजधान्यङ्गने साश्वास्तद्भृत्याः प्राविशन् मदात् ॥१२७॥

मल्लामीनगृहांश्चुन्दकायस्थसदनानि च ।
राजानको हस्सनः स ददाह स्वगृहं क्रुधा ॥१२८॥

काकतालीयकन्यायः सैदकाश्मीरसैन्ययोः ।
परस्परभयभ्रश्यद्धैर्ययोरभवत् तदा ॥१२९॥

---

122 a) S'_{6-8} A मु (sic) वनात्. —b) S'_{3} C °पगृहाङ्ग°.

123 b) $S'_{3.8}$ A $_{1-5}$ B रुद्ध–.

125 a) $S'_{6.8}$ A K विरोध–; I_3 निरुद्ध–; $S'_{6.8}$ A K -लुठित–. —c) S'_{3} C -मठो; $S'_{3.7}$ C I_{1-5} D B -वन–; $S'_{6.8}$ A K -वने (as in text). —d) I_{1-4} C D B -कृतो (for हृ°); $S'_{3.6.8}$ A C I_1 K B [अ]भवत्.

126 a) I °ज्ञात°. —b) I_5 प्रि (mislec. for S'ār. श्रि) यः.

127 a) S'_{3} I_3 निःकृष्ट–; $S_{6.8}$ A निष्कृप्य (mislec. for S'ār. ष्ट).

128 d) S'_{3} A स्वं.

पारावारगता वीरास्तीर्त्वा साहसिनो द्रुतम् ।
हत्वा तांस्ताञ्छिरश्छित्वा तीरे दण्डे न्यरोपयन् ॥१३०॥

लोलाश्वारोहिणि हते तीर्त्वा सैदभटद्वये ।
लुण्ठ पर्वजखानाद्याश्चक्रुः पद्मपुरान्तरे ॥१३१॥

जोनराजानकाद्यास्तच्छ्रुत्वा तीर्णा भटोद्भटाः ।
ओवाणादिषु तद्रोषादुत्पिञ्जं चक्रुरञ्जसा ॥१३२॥

तेन सैदा अपि ग्रामे जन्मभूमौ गृहावलेः ।
जोनराजानकस्यैव क्रोधादग्निमदापयन् ॥१३३॥

तच्छ्रुत्वा स तदीयस्य वडवीविषयान्तरे ।
ताजिभट्टस्य सदने तद्वदग्निमदापयत् ॥१३४॥

गृहान् पदातिमात्रः स दग्ध्वा लहरमध्यगः ।
दुग्धाश्रमादिस्थामस्थान् पलायनपरान् व्यधात् ॥१३५॥

अथ लोहरकोटस्थं श्रीमार्गेशज्यहाङ्गिरम् ।
ज्यल्लालठक्कुराद्यास्ते लेखमित्थं व्यसर्जयन् ॥१३६॥

यत्प्रमादभिया देशात् सकुटुम्बो गतो भवान् ।
समद्रैर्विहितोऽस्माभिर्युक्त्या तद्वधसाहसः ॥१३७॥

मेयामहम्मदाद्यैस्तत्पुत्रैरसज्जिगीषुभिः ।
वितस्तादक्षिणो भागो वामोऽस्माभिः समाश्रितः ॥१३८॥

---

131 [a]) S'_{6-8} A K लौला°.
132 [c]) S'_3 C ड्वाणा°; $S'_{6\cdot8}$ A तव (S'_6 बा) णा°; I_1 ओवण°; I_5 औवणा°.
134 [b]) $I_{1\cdot3\cdot5}$ वन (prob. mislec. for S'ār. ड) वी–.
136 [c]) B (evid. emend.) जल्लाल–.
138 [a]) B (evid. emend.) मीया–; I_3 A D -महाम (mislec. for S'ār. हम्म) द–. —[c]) $I_{2\cdot3}$ C B वैतस्तो दक्षिणो वामो. —[d]) $I_{2\cdot3}$ C B भागो (for वामो).

जिगीषवो वयं सर्वे क्रान्तकश्मीरमण्डलाः ।
पुरमात्रावशिष्टास्ते सैदास्तिष्ठन्ति वेष्टिताः ॥१३९॥

तद्विलम्बधियं त्यक्त्वा तूर्णमागम्यतां यतः ।
प्राप्ते त्वयि जयोऽस्माकं तव स्युः कीर्तिसम्पदः ॥१४०॥

राजभक्ताश्च शक्ताश्च यूयमेवात्र मण्डले ।
तदनागमनात् कीर्तिं मा कार्षीः स्वां कलङ्किताम् ॥१४१॥

बद्धे रणादालिशाहे पूर्वं मल्लेकजस्रथात् ।
राज्यरक्षां व्यधादत्र यथा मार्गेशमह्मदः ॥१४२॥

तद्वद्राज्यं त्वया रक्ष्यं तूर्णमागत्य साम्प्रतम् ।
अन्यथास्य शिशो राज्यं स्थापयन्ति न सैदजाः ॥१४३॥

इति लेखं विचार्याशु स्वदेशोत्कण्ठिताशयः ।
तूर्णं पर्णोत्समार्गेण स मार्गपतिराययौ ॥१४४॥

प्राप्ते तस्मिन् दिनैर्द्वित्रैः कुद्दीनपुरान्तरम् ।
चकम्पुः शिविरे सैदाः प्रदीपा इव वायुना ॥१४५॥

अथ संमन्त्र्य सैदास्ते भयात् सन्धातुमिच्छवः ।
इत्थं शिखशहाबार्दींल्लेखहस्तान् व्यसर्जयन् ॥१४६॥

प्रधानपुरुषाः सन्तः कृतसैदवधाः कथम् ।
भवन्तो वत कुर्वन्ति कार्यं लोकविगर्हितम् ॥१४७॥

---

143 [a]) MSS and C B तद्वत्प्राणं (emended as in text). —[c]) MSS C B राज्ये (mislec. for S'ar. ज्यं).

145 [b]) C कुब्र–; B कुद्ब–.

146 [c]) S'_7 -हवा (*sup. lin.* शहा as in text) बा°; S'_8 A -हबीबा°; S'_6 -हभेभा°; $I_{1.3-5}$ D -बहाबा°; K -श्हद्रावा° (corrupt).

दैवाद्यदि मृतो भूपस्तत्सुतस्तत्पदे कृतः ।
कस्य किं वो हृतं येन सर्वे छेदार्थमुद्यताः ॥१४८॥

न सर्वे द्रोहिणः सन्ति यूयं काश्मीरिका जनाः ।
वैदेशिकैर्हता यैस्तु द्वित्रांस्तान्नः प्रयच्छत ॥१४९॥

अथ वा परदेशांस्तान्निष्कास्य सपरिच्छदान् ।
यूयमेवात्र देशे स्थ मुख्या मन्त्रिषु पूर्ववत् ॥१५०॥

या यस्य पदवी पूर्वमासीत् सा तस्य तिष्ठतु ।
संभूय सर्वे भुञ्जामो नास्माकं विग्रहे ग्रहः ॥१५१॥

मरणं नियतं जन्तोर्यथैव विधिकल्पितम् ।
तथैवावश्यभावीति को निवर्तयितुं क्षमः ॥१५२॥

इति लेखार्थमालोच्य मार्गेशाद्या महत्तमाः ।
यवनाक्षरसम्बद्धमिति लेखं व्यसर्जयन् ॥१५३॥

रक्षारत्नं नृपस्तादृग् रक्षितो न दुराशया ।
किमर्थं स हतो राजपुत्रो बहामखानजः ॥१५४॥

नोरोलोहादिवधतः कस्याश्वासो भवत्विह ।
तत्राप्यस्य शिशो राज्ञः सर्वः कोशो विलुण्ठितः ॥१५५॥

लौही सा घटिकैवैका द्वारि तिष्ठति भूपतेः ।
सैदैः शिष्टाहमेवेति ब्रुवन्तीव ध्वनिच्छलात् ॥१५६॥

---

148 d) $S'_{6\cdot8}$ A सर्वोच्छे°.
149 c) MSS and C B ते (emended to तु as in text).
150 a) S'_{8} A परदेशं; $S'_{3\cdot6\cdot7}$ C I_{1-5} K D B परदेशात्ता (mislec. for S'ār. शांस्ता) न्. —c) S'_{8} A स्त (for स्थ).
151 c) D B मुञ्जाना.
152 d) C B के; क्षमाः.
155 a) B (evid. emend.) नूरुलाहा°.
156 d) B ब्रुवतीव.

गच्छन्त्वनिष्टा मद्रास्ते बहिर्युक्त्या निवारिताः ।
सन्तोषवृत्त्या तिष्ठन्तु यूयं पैतामहे पदे ॥१५७॥

इत्यादि श्रुत्वा सैदैः स समाहूतोऽप्यनागतः ।
तदग्रे व्यसृजद् दूतं स च प्राप्तोऽब्रवीदिदम् ॥१५८॥

स्थापयन्तु धनं कोशे यद्धृतं बालभूपतेः ।
शस्त्रं त्यजन्तु मन्त्रादौ तिष्ठन्तु भयवर्जिताः ॥१५९॥

अत्रत्या एव कुर्वन्तु राज्यकार्याणि पूर्ववत् ।
किञ्चिन्नश्यति नो देशे दोषाः शान्तिं व्रजन्ति च ॥१६०॥

यद्गतं गतमेवात्र मृता जीवन्ति नो पुनः ।
अन्योन्यशुद्धिर्वैरस्य जातान्योन्यकृताद् वधात् ॥१६१॥

इत्यादि युक्तमुक्तं तद्वाक्यं श्रुत्वा मदोद्धताः ।
सैदास्तदुक्तिजनितक्रोधदग्धा इवाभवन् ॥१६२॥

नृपः कोशश्च शस्त्रं च युद्धदक्षास्तथा भटाः ।
सर्वमित्यस्मदायत्तं किं कुर्वन्ति विरोधिनः ॥१६३॥

इति हैभतखानोक्ता युद्धसन्नद्धबुद्धयः ।
अभूवंस्ते कृतोद्योगाः कौरवाः पाण्डवेष्विव ॥१६४॥

अथैकदा सैफडारजोनराजानकादयः ।
पुरे नौसेतुमुत्तीर्य सैदयुद्धार्थमाययुः ॥१६५॥

उपायैः सर्वदा जेयाः समयो न रणस्य वः ।
इति मार्गपतेर्वाक्यं नागृह्णंस्ते रणोद्यताः ॥१६६॥

---

158 c) MSS and C B तदग्रं (mislec. for S'ār. ग्रे).
164 a) B (evid. emend.) हैभत–. —d) D इह (for °व).
165 a) S'_3 C I_5 -ढार–.

दावोदनामा मार्गेशपुत्रो धामाकरो द्रुतम् ।
प्रतीहारादिभिर्युक्तो नगरान्तरमासदत् ॥१६७॥

समुद्रामठमार्गेण प्रविष्टा पृतनाथ सा ।
प्रापल्लोष्टविहारं तं कर्तुं सैदभटक्षयम् ॥१६८॥

रणं संत्यज्य डोम्बाद्या येऽन्ये लुब्धा महाभटाः ।
सर्वस्वहरणव्यग्रा बभूवुर्नगरान्तरे ॥१६९॥

डोम्बाद्याः सुभटाश्चान्ये घ्नन्तोऽन्योन्यमुदायुधाः ।
प्रसिद्धपौरवेश्मभ्यो भाण्डागाराद्यलुण्ठयन् ॥१७०॥

भूमौ निखन्य यन्न्यस्तं पौरैर्गुप्तं गृहे धनम् ।
क्षिप्त्वा प्रतिपदं शङ्कून्नीतं तत् तैरिवार्पितम् ॥१७१॥

मद्राहते भटे दृष्ट्वा सैदा दिक्पतितं शिरः ।
नाद्यास्माकं जयोऽस्तीति तूर्णं जग्मुर्यथागतम् ॥१७२॥

अथ सैदचमूः श्रुत्वा तान् प्रविष्टान् पुरान्तरे ।
अग्रे जगाम युद्धाय सायकायुधवर्षिणी ॥१७३॥

अग्रागतं पद्मभटं हत्वा स्वशिबिरान्तरे ।
तद्रक्ततिलकं चक्रुः सैदाः स्वायुधसिद्धये ॥१७४॥

आलिखानः स तत्रस्थस्त्रस्तः श्रुत्वागतां चमूम् ।
लुद्रभट्टविहारेऽग्निं मार्गरोधायादापयत् ॥१७५॥

---

167 [a]) B (evid. emend.) दावूद–.

168 [c]) B -विहारान्तं is suggested (for -विहारं तं). —[d]) S'_{6-8} K (evid. emend.) कृत्वा (for कर्तुं).

171 [c]) S'_{3} $I_{1.5}$ K C शङ्कुः.

175 [c]) S'_{2} रुद्र–; S'_{3} C लब्धभट्ट– (C ब्ध mislec. for. S'ar. ट्ट). —[d]) C B (evid. emend.) -रोधार्थमार्पयत्.

ज्वालाजटाकुले मार्गे प्राप्तो दावोदमार्गपः ।
सह्योसनप्रतीहारः स वीरो रणमग्रहीत् ॥१७६॥

सेतुसङ्कटमार्गेण पतितः परिखान्तरे ।
स मार्गपतिदावोदो युध्यन् प्राणैर्व्ययुज्यत ॥१७७॥

तत्राह्मदप्रतीहारमुख्या वीरा रणाङ्गने ।
ययुः शौर्यं प्रदर्शन्तो दिव्यस्त्रीसुखभागिताम् ॥१७८॥

रूपं तस्य मृतस्यापि स्मृत्वा पौराङ्गनाः पुरे ।
वदन्ति नैव पश्यामस्तादृशं सुभगं क्वचित् ॥१७९॥

सुरूपो मानुषीयोग्यो नायं तन्नीयते दिवम् ।
इतीव देवताभिः किं मृतस्तत्र न्यधीयत ॥१८०॥

तावद्धैभतखानाद्यैः पश्चादन्यपथागतैः ।
विदधे खानगाहाग्रे तत्तत्सुभटसङ्क्षयः ॥१८१॥

भूताविष्टैरिव प्राप्तविजयैरुद्धतायुधैः ।
रणप्रेक्षागताः पौरास्तद्दिने केऽपि तैर्हताः ॥१८२॥

किमन्यत् परदेशीया दूता विप्रगृहे स्थिताः ।
एते मद्रा इति प्रोक्ता लोभाद् द्वित्रा निपातिताः ॥१८३॥

---

176 [b]) B (evid. emend.) दावूद-. —[c]) B (evid. emend.) -हुसन-.

177 [b]) MSS and C B -°खान्तरं (mislec for S'ār. रे). —[c]) B (evid. emend.) -दावूदो.

178 [b]) I_{1-3} रणाङ्गणे. —[c]) C B (evid. emend.) दर्शयन्तो.

180 [a]) S'_3 मानुष्यो; S'_{6-8} A C I_{1-5} K D B मानुषो (emended as in text). —[d]) $S'_{3.6-8}$ A C $I_{1.4}$ K D मृतंत (<तन्त mislec. for S'ār. स्त) त्र.

181 [a]) B (evid. emend.) हैबत-.

182 [b]) B (evid. emend.) उद्यता°.

183 [b]) $S'_{6.8}$ K गृह-. —[c]) S'_{6-8} A I_{1-5} K D B प्रा[क्त्वा]; S'_3 C प्रोक्ता (as in text). —[d]) S'_6 लाभा (marg. क्रोधा) द्.

विमुच्य बन्धनस्थान् स्वान् युध्यन् सैदभटैः सह ।
स सैफडामरः पौरान् सैदांश्चोत्फलकान् व्यधात् ॥१८४॥

अस्मद्वैरिहितः सोऽयमिति सैदभटा रुषा ।
जघ्नुर्गृहस्थितं वैद्यपण्डितं यवनेश्वरम् ॥१८५॥

अत्यन्तानुचितं सैदाश्चक्रुर्यत् तस्य मस्तकम् ।
छित्त्वा चन्दनलिप्ताङ्गं न्यधू राजपथान्तरे ॥१८६॥

प्रविष्टा राक्षसाः केऽपि तद्दिने ते पुरान्तरे ।
अविचार्य क्षयं चक्रुः सर्वेषां यत् कृपोज्झिताः ॥१८७॥

तस्य चन्दनलिप्ताङ्गं मस्तकं वीक्ष्य नागराः ।
न के निन्दां व्यधुः सैददुष्कर्माधर्मनिश्चयात् ॥१८८॥

आ मल्लेकपुराल्लोष्टविहारान्तं पुरान्तरे ।
शवा इन्धनगण्डाल्य इवासन्निहिताः पथि ॥१८९॥

आसन् येषु वपूंषि तूलशयनन्यस्तोपधानोद्गत-
स्पर्शोत्कर्षसुखावमर्षविलसच्छृङ्गारसाराण्यलम् ।
नग्नास्ते भुवि काककुक्कुरवृकैः संभक्षिता लक्षिता
मेदोमांसवसावमत्क्रिमिलसन्निष्ष्यन्ददुर्गन्धिनः ॥१९०॥

जयेन तावन्मात्रेण तुष्टाः सैदाः परस्परम् ।
विंशप्रस्थान्तरे चक्रुर्वाद्यैस्ते विजयोत्सवम् ॥१९१॥

---

185 c) S′7 (*sup. lin.*) K D वैड्य-.
187 b) I3 B (evid. emend.) तत् (for ते).
189 a) C लोष्ट्-.
190 b) S′3 A C I3 °मर्श-; I5 °मल्ल- (for °र्ष); S′6 A [अ]मा (for °लम्).
—d) S′8 A K -क्रामि-; C B -निष्पन्द-

हतावशिष्टान्नष्टांस्तांस्तद्दिने चलितान् बहून् ।
पश्चाच्चेद्गलिष्यन्त सर्वसंहरणं भवेत् ॥१९२॥

किंतु प्राग् लुठिता देवा ज्वलिताः केऽपि देशगाः ।
तां बुद्धिं विजयायैषामदास्यन् कुपिताः कथम् ॥१९३॥

अहंपूर्विकया यातततरङ्कटभरासहः ।
नौसेतुबन्धस्तुत्रोट तावच्छ्रीनगरान्तरे ॥१९४॥

संनाहभरमग्नाङ्गाः सेतुभङ्गात् परिच्युताः ।
शतसङ्ख्या दिने तस्मिन् वितस्तायां विपेदिरे ॥१९५॥

नूनं सा शारदा देवी वितस्तारूपधारिणी ।
तदधर्मक्रुधा ग्रासं विदधे कटकद्वये ॥१९६॥

प्रेक्षागता हताः पौरा इति निन्दानिवृत्तये ।
तत्क्षणोत्कृत्तशिरसां सैदैः राशिः कृतोऽग्रतः ॥१९७॥

तत्तत्कील्यर्पितमुखैस्तैर्वितस्तातटान्तरात् ।
काष्ठमेकं न्यधुः सैदा भीत्यै दीपधरोपमम् ॥१९८॥

वितस्तायां शवाः केचित् सलिलोच्छूनविग्रहाः ।
विसस्रुर्विस्रगन्धाढ्या महापद्मसरोन्तरे ॥१९९॥

अत्रान्तरे समानीयावशिष्टान् परितो भटान् ।
काश्मीरिकाः पुनश्चक्रुः पूर्ववत् सैन्यसंग्रहम् ॥२००॥

श्रीज्यहाङ्गिरज्यह्लालसैफडामरकादयः ।
मुख्यान् सैदान् पुनर्जेतुं रणोपायं व्यचिन्तयन् ॥२०१॥

---

192 d) $I_{3\cdot5}$ D सर्वस्वह°.
193 b) K ज्वालिताः.
196 c) K C ग्रामं (mislec. for S'ar. सं).
201 a) B (evid. emend.) जहाङ्गिरजह्लाल–.

स सैफडामरः प्राप्तसिद्धादेशपदस्ततः ।
उच्चावचेषु व्यभजद् विषयान् सप्तविंशतिम् ॥२०२॥

काष्ठागता लसत्पक्षास्तीक्ष्णाश्च सफलीकृताः ।
यन्त्रेषवश्च योधाश्चाघटंस्तेषु दिने दिने ॥२०३॥

क्षुभ्यद्वैतस्ततीरद्वयजयघटनारब्धयन्त्रेषुयुध्य-
त्कुध्यद्वीरेक्षणाप्तप्रचुरपुरजनस्वान्तसंक्रान्तशौर्यम् ।
धावत्संनाहिताश्वोत्कटसुभटघटाघातजाताग्निवर्षं
चक्रुः क्रोधात् पुनस्ते प्रवरपुरवरे युद्धमत्युद्धतं तत् ॥२०४॥

यामदुन्दुभिवाद्यानां ध्वनिः सर्वैस्तदा श्रुतः ।
पूर्वं राजगृहे पश्चात् सैदकाश्मीरसैन्ययोः ॥२०५॥

अवतीर्णा जलार्थं याः पारावारपुराङ्गनाः ।
यन्त्रेषुभिर्विदीर्णाङ्गा बह्वयस्तत्र विपेदिरे ॥२०६॥

स नासीद् दिवसो यत्र द्वित्रा वीराः पतत्रिभिः ।
विद्धा मुमूर्षवस्तीरान्न नीताः स्वगृहान् प्रति ॥२०७॥

वह्निदानस्फुरद्योधसंहाराद्यैरुपद्रवैः ।
एकमेकं दिनं तत्रानेहस्याभूद् भयावहम् ॥२०८॥

अश्लीलालापिनोऽन्योन्यं रहस्योद्घाटनोद्यताः ।
तटद्वये भटाः क्रूरा अवाच्यमपि तेऽब्रुवन् ॥२०९॥

---

203 c) C यत्रे°. —d) S'_{6-8} Aतोकं (sic) (for तेषु).
204 a) K -रांध-; A -रन्ध्र- (for °ब्ध).
206 c) S'_3 °दीर्णाङ्गयो.
207 c) C विद्ध्वा.
208 d) S'_3 (after corr.) न कस्य (for [अ] नेहस्य); $S'_{6\ 8}$ A C I_{1-5} K D B [अ] ने (prob. corrupt for नी) ह°
209 a) $S'_{7\cdot 8}$ $I_{1\cdot 3-5}$ D अश्ले (sic) ला°.

राजसैदद्विजद्रोहरोहत्पापादिवादिनः ।
मिथो गालीं वदन्तस्ते किं नावाच्यं बभाषिरे ॥२१०॥

प्राप्ता दौलतसीहाद्याः कष्टवाटादिदेशतः ।
शिष्टाः मल्हणहंसाश्च शाहिभङ्गनृपात्मजाः ॥२११॥

पञ्चगह्वरजाः केचित् सिन्धुपत्यन्वयोदिताः ।
खशा म्लेच्छास्तथान्येऽपि रुरुधुः सर्वतो दिशः ॥२१२॥

काश्मीरिकाः स्वभेदेन बलाप्राप्त्या तथापरे ।
ययुस्त्रासविसूत्रत्वमज्ञातान्योन्यनिश्चयाः ॥२१३॥

अत्रान्तरे नभस्युल्का सायं दीप्तोदभूत् स्फुटम् ।
उदीच्या दक्षिणां याता प्रज्वलद्द्रुमस्तका ॥२१४॥

दृष्ट्वा तामद्भुतां सर्वे सैन्ययोरुभयोरपि ।
संग्रामाशङ्कितानिष्टा बभूवुर्भयविह्वलाः ॥२१५॥

अत्रान्तरे सैदलेखैः प्रेरितो देशलिप्सया ।
तत्तारखानो व्यसृजत् तौरुष्कं पुष्कलं बलम् ॥२१६॥

प्राप्ताः शस्त्रगलस्थानं तुरुष्कास्ते सुदुष्कराः ।
हता भोडनराजाद्यैः प्रालेयैः शलभा इव ॥२१७॥

---

210 c) M (evid. emend.) ददन्तः; S'_8 K तु (for ते).

211 a) B (evid. emened.) दोलत-. —c) MSS and C B स (mislec. for S'ār. म) ल्हण-; $S'_{6.8}$ हंसाश्च (marg. श्चाः).

212 b) C D B सिन्ध्व (mislec. for S'ār. न्धु) प°.

213 b) MSS and C B बल (emended as in text) प्रा°.

214 c) K उदीच्यां दक्षिणा.

217 c) I_{3-5} C हभा (mislec. for S'ār. ता); D B बोडन-; S'_3 -राञ्जा. (*sup. lin.* जा) द्यैः.

कालीधारापदेशेन काली भगवती क्रुधा ।
व्यधात् तद्भक्षणं नूनं सतीदेशहितेच्छया ॥२१८॥

आदामखानजस्तस्मै विसृज्य इति चोदितः ।
निवर्त्य तं तुरुष्कः स स्वान्तिके समरक्षत ॥२१९॥

तदीयाश्वपदार्थौघप्राप्त्या तद्देशवासिभिः ।
अनन्यसुलभां प्राप्य श्रियं वैश्रवणायितम् ॥२२०॥

अथ काश्मीरिकाः श्रुत्वा तद्वधं वाद्यवादनम् ।
चक्रुर्येनाभवन् सैदा विच्छायवदनाः श्रुतेः ॥२२१॥

गतावशिष्टदुर्निष्ठदुष्टतत्कटकान्तरात् ।
सहस्रद्वितयी तत्र शवानां निहिताभवत् ॥२२२॥

विशुद्धपार्ष्णिसंत्यक्तभयाः प्राप्तबलोद्धताः ।
काश्मीरिका मतं चक्रू रणार्थं हृष्टमानसाः ॥२२३॥

मध्ये ससैन्यास्तिष्ठन्तु मार्गेशाद्याः पुरान्तरे ।
राजानकाद्या मद्राश्च स्यामस्था यान्तु दिग्द्वयम् ॥२२४॥

एकतश्चेज्जिताः सर्वे नश्यन्त्यल्पबलाः पुनः ।
इत्येकमतानिष्ठास्ते संमन्त्र्य कृतनिश्चयाः ।
स्यामार्थमादिशंल्लोकं स्वप्रदेशादुपर्यधः ॥२२५॥

---

219 a) B (evid. emend.) आदम–; S′8 A I3.5 K D आधाम–. S′7 K -खानजं (sic).

220 a) S′6 8 A तदीयां च.

221 b) S′3 marg. gloss —तौरुष्कप्रेषितबलवधं (for तद्वधं).

222 a) I1.2.4 D B वशिष्टा.

223 b) S′3 blank with dots for प्राप्तबलोद्धताः.

225 c) S′3 C इत्येव (for क°).

नावा सिन्धुं प्रतीर्याथ जोनराजानको द्रुतम् ।
स्थामस्थान् पञ्चषान् हत्वा पलायनपरान् व्यधात् ॥२२६॥

वस्त्रवाजितनुत्रादि हृत्वा सैदबलान्तरात् ।
काश्मीरिका व्यभाव्यन्त प्रयाताः प्रतिवासरम् ॥२२७॥

किमन्यत् स्फुटमेवाह्नि येऽवसन् सैदसंनिधौ ।
निर्लज्जास्ते व्यलक्ष्यन्त काश्मीरिकबलान्तरे ॥२२८॥

इतो याति ततश्चैति लोको विगतयन्त्रणः ।
बाले राजनि मन्दाज्ञे कोऽप्यजृम्भत विप्लवः ॥२२९॥

गृहेषु लुण्ठ्यमानेषु विटैर्विहितपेटकैः ।
निरुद्धमार्गसञ्चारो देशोऽभूद् भयविह्वलः ॥२३०॥

मासद्वये व्यतीतेऽपि पारावाररणोद्यमैः ।
जिगीषां नात्यजंस्तत्र सैदाः काश्मीरिका अपि ॥२३१॥

पूर्वमङ्कुरितः सैदवधे पल्लवितः क्रमात् ।
परस्परं वैरतरुस्तदागाच्छत शाखताम् ॥२३२॥

दक्षिणे राजकोशादि वामे सेनाद्यवेक्ष्य च ।
बलद्वयेऽपि विजयः संदिग्धः प्रत्यभाद् विशाम् ॥२३३॥

पुंसां निरुद्धे सञ्चारे नावा नद्यास्तटद्वये ।
स्त्रिय एव तदाकुर्वन् पारावारगतागतम् ॥२३४॥

पारादेत्य विटैर्लुब्धैर्मुषिते पथिकव्रजे ।
अधिष्ठानादिदेशेषु मार्गः प्रचलितोऽभवत् ॥२३५॥

---

226 c) S'_{6-8} A K पञ्चशा (sic) न्.
229 a) I_{1-3} A B यतो (for इ°).
230 b) A -पीटकैः. I_5 om. 230[cd] and 231[ab].
234 d) $S'_{6,8}$ A K -गमागमम्.
235 a) C पारान्.

पारावारगतान् कांश्चिदन्योन्यच्छलनोद्यतान् ।
निरुध्य प्रत्यहं द्वित्रान् क्रोधाच्छूले न्यरोपयन् ॥२३६॥

अवोचन्नेकदा सैदा भटान् काश्मीरमन्त्रिणः ।
आयान्तु यदि शक्तिर्वो युध्यन्तु पुनरप्यलम् ।
सीमा वा दीयतां तावत् प्रतीक्षामो रणं प्रति ॥२३७॥

नित्यं जनवधे लोका उद्विग्नाः शरवर्षणैः ।
भजतां विभवं सोऽत्र विधिर्यस्मै प्रयच्छति ॥२३८॥

निशम्येति पुरप्रान्ते सीमार्थं वामपार्श्वगैः ।
चिच्छिदुः सन्धितां रज्जुं तूर्णं सैदभटास्तटात् ॥२३९॥

तितीर्षून् वैरिणो ज्ञात्वा सैदाः काष्ठीलतस्ततः ।
न्यधुर्हस्सनराजानकादीन् स्थामार्थमाकुलाः ॥२४०॥

छिन्नेषु सेतुबन्धेषु सैदैर्नौपुरकादिषु ।
नगरीं दुर्गमां दुर्गतुल्यां चक्रुर्द्विषद्भयात् ॥२४१॥

अथ काश्मीरिकाः प्रोचुः सैदांस्तीरान्तिकस्थितान् ।
नौसेतुबन्धरज्जुर्यद्दत्तश्छिन्नो भयेन नः ॥२४२॥

पुरमात्रावशिष्टत्वादुत्तिष्ठध्वं कियच्चिरम् ।
पर्याप्तं भुज्यते धान्यं किं कुरुध्वं पुनः पुरे ॥२४३॥

---

236 c) S'₃ C निरुद्धः; S'₃ C I₃ K द्वित्राः. —d) S'₃ C I₃.₅ °ऽभ्य (mislec. for S'ār. न्य) रो°.

237 a) M (evid. emend.) सैद–. —b) S'₃ C भटाः. —f) K प्रतीक्षाम; M (evid. emend.) प्रतीक्षा नो.

239 b) I₅ -पार्श्वगाः.

240 a) C D (before corr.) तितीर्षु (evid. emend.) वैं (mislec. for S'ār. न्वै) रि°. —c) C हसन–.

242 d) Prob. या दात्ता च्छिन्ना.

243 d) B परे.

श्रुत्वेति सैदास्तांस्तारमूचुरित्थं स्वसेवकैः ।
अन्नाभावाद् बुभुक्षार्त्या न चलामो भयादितः ॥२४४॥

का जुगुप्सा तुरुष्केषु सर्वमांसभुजो वयम् ।
यावत् पुंपशुगोमांसपर्याप्तिस्तावदास्यते ॥२४५॥

पुरश्चेद् गम्यतेऽस्मान् कः शक्तो रोद्धुं तदन्तरात् ।
श्रुत्वेत्युत्पुलकास्तीरे उयह्लालमल्लिकादयः ॥२४६॥

एकत्र मिलिताः सर्वे चक्रुः संमन्त्र्य निश्चयम् ।
सैन्यं स्थामविभागेन विभज्य पथिभिस्त्रिभिः ॥२४७॥

उत्तीर्य यामः शीर्यन्ति सैदाः कटकभेदतः ।
अन्यथैकत्र सन्नद्धा दुर्जेयाः सैदपक्षगाः ॥२४८॥

एकतश्चेज्जिताः सर्वाञ् जेष्यामोऽल्पबलानमून् ।
अस्माकं प्रबलं सर्वं न विलम्बोऽधुनोचितः ॥२४९॥

श्रुत्वेति मद्रसंयुक्ता जोनराजानकादयः ।
मृत्युर्वा नो जयो वेति युद्धसन्नद्धतां दधुः ॥२५०॥

अथैकं मतमाश्रित्य स्थामस्थाः सैन्यनायकाः ।
पुराणतक्षकस्थानात् तीर्त्वा पर्वतमासदन् ॥२५१॥

प्रौलभट्टादयो हस्तवालिकाख्यप्रदेशतः ।
नौभिस्तीर्णा धृतोत्साहाः सोत्सेकान् स्वभटान् व्यधुः ॥२५२॥

दृष्ट्वा धैर्यं द्विजस्यापि रणाग्रे सरतः क्षणात् ।
गक्कादयो भटाः सर्वे शशंसुर्वीरमानिनः ॥२५३॥

---

244 c) C बुभुक्षार्ता.

246 a) $S'_{6\cdot8}$ A C पुन (mislec. for S'ār. र) श्चे°. —b) $S'_{3\cdot7}$ A C I_{1-5} K D B त्व (emended as in text with $S'_{6\cdot8}$) द°. —d) B C evid. emend.) जह्लाल-.

248 a) M (evid. emend.) शीर्यन्ते.

252 c) K नौभिस्ता···धृतो.

अन्योन्यप्रहृतिर्माभूदिति काश्मीरिका भटाः ।
पत्रशाखा न्यधुर्मूर्ध्नि हर्तुं निजपरभ्रमम् ॥२५४॥

सफडारादिवीरेषु शक्तयः कारगा बभुः ।
निर्गतास्तान् रिपून् हन्तुं मूर्तिमत्य इवान्तरात् ॥२५५॥

तानुत्तीर्णान् समाकर्ण्य सैदाश्चकितमानसाः ।
हाशिमं व्यसृजंस्तूर्णं प्राग्जयोद्धतमानसम् ॥२५६॥

स प्राप्तोऽभिवनायुक्तमठं तीराध्वना व्रजन् ।
गिरिशृङ्गगतैर्दृष्टस्तैः शिलाभिरवार्यत ॥२५७॥

तच्छिलावर्षणत्रस्तस्तुरङ्गात् पतितः क्षितौ ।
पदातिः स चलन् कृच्छान्निस्तीर्णो रणसङ्कटात् ॥२५८॥

तदीयं तुरगं बद्धखड्गं संनाहभूषितम् ।
काश्मीरिकाः करगतं मूर्तं जयमिवासदन् ॥२५९॥

तं पराभूतमालोक्य तद् युद्धार्थं भटान्वितान् ।
सैदाः पिरुजखानादीन् रात्रावेव व्यसर्जयन् ॥२६०॥

दुग्धाश्रमागता मेयाभाकराद्याश्च तत्क्षणात् ।
वर्षौघा इव गर्जन्तः प्रापुः पूपामठान्तिकम् ॥२६१॥

तावन्मद्रप्रतीहारडामराद्या महाभटाः ।
संनद्धाः सुमनोवाटप्रदेशान्तं समासदन् ॥२६२॥

---

256 c) B (evid. emend.) आशिषं (for हाशिमं); C हाशिसं.

257 a) MSS and C B संप्राप्तो (emended as in text); C आयुर्थ (mislec. for. S'ar. क्त) म°.

261 a) S'_8 मेधा– (for °या). —b) $S'_{3.6}$ न C I_{1-5} D B -भाकेरा°; $S'_{6.8}$ तत्क्षणम्.

262 d) S'_{6-8} K समागमन्.

सैदखानादयः सैदहोसनादिसमन्विताः ।
सैदानां सुभटाश्चान्ये प्रापुस्तत्रैव ते प्रगे ॥२६३॥

करवालाः स्फुरज्ज्वाला बभुः श्यामलकान्तयः ।
भूपीडनादिव व्यालाः पातालविवरोद्गताः ॥२६४॥

अथोदतिष्ठत् तुमुलः समरः सैन्ययोर्द्वयोः ।
सखङ्गफलकक्षुद्रमद्रव्यूहसुदुःसहः ॥२६५॥

भो वीराः समरेऽत्र युध्यत मुदा मा यात पश्चादमी
जेतारो यदि तद्धरन्ति सकलं सैदाः क्रुधा निर्घृणाः ।
प्राप्तश्चेद्विजयः सुखं स्वविभवात् स्वर्गेऽपि तच्चेन्मृता
युद्धादाविति मद्रपः स परशुः काश्मीरिकानब्रवीत् ॥२६६॥

पूर्वं पिर्वजखानोऽग्रे निर्ययौ रणगर्वितः ।
तं पिर्वजप्रतीहारो रामो राममिवाभ्यगात् ॥२६७॥

अनभिज्ञतया युद्धे स्फुरन्तं वीक्ष्य तं द्रुतम् ।
स्वभटान् प्रैरयन् मद्रास्तत्तुरङ्गखुरच्छिदे ॥२६८॥

खड्गकृत्तखुराश्वोद्यत्प्लुतिनष्टरणक्रियम् ।
गक्काद्याः प्राहरन् सर्वे शक्त्या शक्तिसमन्वितम् ॥२६९॥

---

263 [b]) B (evid. emend.) -हुसना°.

265 [b]) $S'_{7\cdot8}$ K समरे (S'_7 marg. ये).

266 RSs_2 quotes 266 entirely. —[a]) $S'_{3\cdot7}$ (marg.) I_{3-5} C K RSs_2 समये (for °रे); RSs_2 वध्यत; $S'_{6\cdot8}$ A हृदा (for मु°). —[b]) D उ (mislec. for S'ār. त) द्ध°; $S'_{6\cdot8}$ सकलान् . —[c]) S'_8 A RSs_2 प्राप्ते चेद् (RSs_2[अ]था) विजेय; S'_8 A RSs_2 सुखं (for[अ] पि तत्). —[d]) RSs_2 मद्रः स (for °द्रपः).

267 [a]) B (evid. emend.) परोज–; S'_3 पर्व (*sup. lin.* रु) ज–; A पिच (mislec. for Sār. वं) ज–; C (evid. emend.) पेरोज–; K पिरुजढ्यानो (corrupt). —[c]) $S'_{6\cdot8}$ A C I_{1-5} K पिरुज–; B (evid. emend.) परोज–.

269 [a]) D B -खुराश्चो° (mislec. for S'ār. श्वो). —[c]) I_4 B गक्काख्याः.

तद्भृत्याः शाहिभङ्गीया भ्रमरा इव सारवाः ।
ददंशुः कटकं क्रुद्धा स्फुरन्तः खड्गकण्टकैः ॥२७०॥

पतितं संमुखे दृष्ट्वा तं काश्मीरा रणाङ्गने ।
जयोऽद्य वर्ततेऽस्माकमित्युक्त्वोत्साहमादधुः ॥२७१॥

व्याहन्यमानाः काश्मीरैर्भटैर्मद्रसमन्वितैः ।
भृत्यास्ते शाहिभङ्गीयाः कृत्यं सत्त्वोचितं दधुः ॥२७२॥

एहि तिष्ठात्र युध्यस्व क्व गच्छस्यधुना मम ।
इत्यन्योन्यं भटास्तत्रातर्जयन् रणगर्जितैः ॥२७३॥

काश्मीरपृष्ठगः सूर्यः खड्गान्तःप्रतिबिम्बितः ।
जयोऽद्य युष्मास्वित्येव वक्तुं व्योम्नोऽवतीर्णवान् ॥२७४॥

अहंपूर्विकया सर्वे ते वीरभ्रमरास्तदा ।
रणोद्याने स्फुटं चेरुर्यशःकुसुमलम्पटाः ॥२७५॥

तद्रणाङ्गनरङ्गान्तःसङ्गतास्ते भटा नटाः ।
त्वङ्गदङ्गविभङ्गाढ्या नाट्यभङ्गिमदर्शयन् ॥२७६॥

ज्यहाङ्गिराद्यास्तद्भृत्याः प्रविष्टाः संमुखे रणे ।
विधाय युद्धं संनद्धा वीरवृत्त्या विचक्रिरे ॥२७७॥

---

270 c) S'_{8} दद्दशुः .

271 a) MSS and C B सम्मुखं (mislec. for S'ār. खे).

272 a) S'_{6-8} A K व्याघात्यमा°.

274 b) S'_{8} C खड्गान्तप्र°.

275 d) S'_{8} K -लु (by syll. contam.) म्पटाः.

276 b) K ते न…भटाः; $S'_{6.7}$ (by transp.) नटा भटाः. —c) $S'_{6.8}$ A -विहृ (S'_{6} भ) ङ्गाङ्गा.

277 K hapl. om. 277-80.

ववर्ष शरधाराभिः स सैन्यकटकाम्बुदः ।
स्फुरच्छस्त्रतडिज्ज्योतिर्हन्ताः गम्भीरगर्जितः ॥२७८॥

सैदेषु भाकरस्तत्र संमखस्थविभाकरः ।
शौर्यशोभाकरः प्रापदग्रे भाःकरवालभृत् ॥२७९॥

त्वङ्गत्तुङ्गतुरङ्गस्थो रणरङ्गान्तरे स्फुरन् ।
सोऽङ्गहारसमासङ्गो नाट्यभङ्गिमदर्शयत् ॥२८०॥

प्रहारविक्षतं सर्वे मिलित्वापि रणान्तरे ।
शेकुः संनाहिताश्वस्थं चिरात् पातयितुं क्षितौ ॥२८१॥

द्वित्रान् हत्वा भटान् वीरो वीक्षितः श्लाघ्यविक्रमः ।
अभजद् वीरशय्यां स रक्तस्यन्दोत्तरच्छदाम् ॥२८२॥

येषां प्राणपरित्यागे निर्णयं बध्नतामपि ।
रणयोग्ये क्षणेऽपेक्षा नास्ति किं तैः पशूपमैः ॥२८३॥

सैदहोसनमुख्या ये काश्मीराः सैदपक्षगाः ।
भाकरादीन् हतान् दृष्ट्वा रणं त्यक्त्वा पलायिताः ॥२८४॥

ततः काश्मीरसेनान्या वात्ययेव तटद्रुमाः ।
भग्नास्तन्नीडनिःसृता भृत्याः शावा इवाहताः ॥२८५॥

---

278 [d]) S'_3 C B युक्तो (for हन्ता); S'_{6-8} A गाम्भीर्य-.

279 [a]) $I_{2.4}$ B (evid. emend.) भास्करः (for °क°). —[b]) C B संमुख°.

281 [a]) S'_{6-8}. A सर्वैः (sic). —[c]) S'_6 K °हिताः (evid. emend.) स्व (mislec. for S'ār. श्व) स्थं; S'_8 A °हितास्वस्थं.

282 [b]) S'_8 A वीक्षित-. —[d]) I_{1-4} B -स्पन्दो°; S'_{6-8} K °च्छदे (sic).

283 [c]) S'_3 C $I_{2.4}$ C B क्षणोपेक्षा.

284 [a]) B (evid. emend.) -हुसन-.

285 [a]) S'_7 K -सेनाण्या (K ण्यां). —[c]) M (evid. emend.) तन्नीडनिःसृता भग्नाः; S'_8 -निसृ°.

न खड्गी न हयारोहो न चापी न च शक्तिमान् ।
व्यावृत्य प्रेक्षितुं कश्चिन्नाशकद् विद्रुताद् बलात् ॥२८६॥

हठलुण्ठितविध्वस्ताः समस्तास्ते विरोधिनः ।
वृक्षारूढानपि घ्नन्तः प्रापुस्ते नगरान्तरम् ॥२८७॥

आ समुद्रामठात् पूर्वाधिष्ठानान्तं निरम्बराः ।
मार्गेष्विन्धनगण्डौघा इवासन्निहिताः शवाः ॥२८८॥

केचित् कुल्यान्तरे मग्ना भग्नाः केऽपि रणान्तरे ।
केचित् प्रमुषिता नग्ना भयोद्विग्ना दिशोऽचलन् ॥२८९॥

तच्छरीरावयवैः कृत्तैः पूरिता विपुलैर्मही ।
तद्ग्रासार्थं प्रवृत्तस्य मृत्योरिव महानसः ॥२९०॥

ये सुन्दरा विपुलभोगपुरन्दराभा-
श्चेरुर्नरेशविभवप्रथितप्रपञ्चाः ।
नग्नान् विलोक्य भुवि तान् कृतदुष्टगन्धान्
कस्यापि शाम्यति न देहभवोऽभिमानः ॥२९१॥

वरं मरणमेवास्तु रणे स्वर्गसुखप्रदम् ।
न सहेऽद्यतनस्वामिवृत्तियाच्ञाकदर्थनाम् ॥२९२॥

इत्युक्त्वा प्रविशन् युद्धे धीराश्वस्थोऽप्यकातरः ।
हभेभमेरः शस्त्रेण स श्लाघ्यमरणोऽभवत् ॥२९३॥

---

286 c) D C B व्यावृत्य. —d) C विद्रुतान्.

288 a) $S'_{6\cdot 8}$ A C समुद्र–.

289 b) S'_{6-8} K परिखा (for [अ] पि रणा) न्त°.

290 d) I_{1-5} D महानसा.

291 c) MSS (except D) C B धृत–; D कृत– (as is text).

292 d) S'_8 A C $I_{1\cdot 8}$ B -कदर्थनाः.

293 b) S'_8 A वीरा° (for धी°). —c) B (evid. emend.) हबीबमेरः.

अन्यान् प्रचलितान् दृष्ट्वापीक्षिताग्रात्तवैरिणः ।
पलायनेच्छा नैवाभूद् युयुत्सोर्यस्य मानसे ॥२९४॥

छिन्नाङ्गुलिकरोऽप्यश्वमारुह्य स्वसुतान्वितः ।
अकरोत् क्षणमात्रं यः शस्त्रप्रचारणं रणे ॥२९५॥

स्थामस्थितः पुरस्यान्ते स राजानकहस्सनः ।
हतः सेरङ्गमेराद्यैर्मारीकुल्यातटान्तगः ॥२९६॥

प्रच्छिन्नाङ्गुलिहस्तेन सममस्य शिरो भटैः ।
नीत्वा न्यदर्शि हर्षार्थं मार्गेशादिसभान्तरे ॥२९७॥

किमाकारनिकारेण कुर्वन्त्वस्यान्त्यसत्क्रियाम् ।
इत्युक्त्वास्मै श्मशानार्थं शवमुक्तिमकारयत् ॥२९८॥

योऽभूच्चिरं नृपगृहेऽखिलमन्त्रिवर्यो
धुर्यः पदेषु विभवोचितदानमानः ।
शोच्यां दशामितरवत् स गतः किलान्ते
धिग् वासनां भविषु शाम्यति या न भोगैः ॥२९९॥

स चेत् प्राप्तखलीकारस्तिष्ठेत् स्वसदने शमी ।
सर्वो मन्त्रिगणस्तस्य भवेच्चाटुपरो न किम् ॥३००॥

पुनर्विभवलोभेन सैदपक्षं समाश्रयन् ।
आगामिकम्पनेशाधिकारतां प्रार्थयन् निजाम् ॥३०१॥

---

294 b) $S'_{6\cdot8}$ A D (befor corr.) [अ] पेक्षि°.
295 b) I_{1-4} C स्वसभान्वि°. —d) S'_3 I_3 C प्रहरणं.
296 c) $I_{3\cdot5}$ C से ($I_{3\cdot5}$ मे mislec. for S'ār. से) राङ्ग–; B (evid. emend.) -मीरा°.
298 c) S'_3 C I_{1-5} K D B स मार्गेशः (for श्मशानार्थं).
299 a) $S'_{7\cdot8}$ A K धु (S'_7 *sup-lin.* व)र्यो.
300 b) S'_3 C I_{1-5} K D B स (for स्व).
301 d) S'_3 C I_{1-5} D °कारितां.

अज्ञातदैववृत्तान्तो ययौ लोकेषु हास्यताम् ।
अथवा नाशकाले स्याद् बुद्धिः कुपथगामिनी ॥३०२॥

कुर्वन्ति ये परशरीरनिकारमाजौ
दर्पान्धलोचनयुगाः स्वविचारबाह्याः ।
ते प्राप्नुवन्ति वधमाशु तथा यथामी
लोका वदन्ति नरकोचित एष मर्त्यः ॥३०३॥

धिग्धिग्घैभतखानं तं वीरंमन्योऽपि यो रणात् ।
निर्गत्य सभयः प्राप्तः फाखुवाविषयान्तरम् ॥३०४॥

त्यक्तोत्तुङ्गतुरङ्गः स निःशस्त्रिर्भृतकोज्झितः ।
तत्र प्राकृतवेशेन जुगोप स्वं भयादटन् ॥३०५॥

क्रुद्धैर्दावोदमार्गेशवधान्मार्गपतेर्भटैः ।
स चौर इव वाट्यन्तर्हतोऽप्यार्तगिरोऽब्रवीत् ॥३०६॥

छित्त्वोत्तमाङ्गं तस्याशु निन्युर्मन्युनिवृत्तये ।
मृतमार्गेशपुत्रस्य शवारात्रिकतां भटाः ॥३०७॥

स चेत् पलायितः सैदशिबिरं प्राप्नुयान्निशि ।
तद्वत् तज्जीवरक्षा स्यात् सुबुद्धिः पापिनां कुतः ॥३०८॥

तद्भृत्यैर्लुण्ठितो देशो गोवधो यत् पुरे कृतः ।
जाने भृत्यापराधेन प्राप्तान्ते तादृशी दशा ॥३०९॥

---

303 b) S'_8 A I_5 D B -बाह्या: .
304 a) B (evid. emend.) हैबत–. —d) S'_3 C फखुवा -.
305 b) S'_{6-8} A K निःशस्त्रिभृ°; S'_3 C I_{1-5} D B निःशस्त्रिर्भृ° (as in text); M (evid. emend.) निःशस्त्रो. —d) D B भयाकुल: .
306 a) B (evid. emend.) दावूद–. —c) S'_3 वाढ्य (*sup-lin.* ट्य)न्तर् . —d) S'_3 C I_{1-5} D B [आ]त्तशिरोऽभवत् (for °र्तगिरोऽब्रवीत्); S'_6 (conflated) [आ]त्तशिरोऽब्रवीत् ; M (evid. emend.) [आ] त्तशरो.
309 c) M (evid. emend.) तेना° (for भृत्या°). —d) S_3 I_5 C प्राप्तास्ते (I_5 प्तां ते) तादृशीं (I_5 शी) दशाम् .

दौहित्रोऽपि महीभर्तुर्जातो वीरकुलादपि ।
तत्पापेनाभवत् तस्य चित्तं वीररसोज्झितम् ॥३१०॥

विप्रा राजसुताः सैदाः काश्मीरा अपरेऽपि ये ।
सहस्रसङ्ख्याः समरे तद्दिने प्रलयं ययुः ॥३११॥

निहतानीकसुभटसमूहान्तरलक्षितान् ।
भूमिदाहाय निष्क्रष्टुं नाभूत् कस्यापि पौरुषम् ॥३१२॥

ये सर्वचङ्गाः पीनाङ्गा भोगैर्मण्डलवर्धिताः ।
याता घर्मोत्थदुर्गन्धास्ते श्ववायसभोज्यताम् ॥३१३॥

रक्ताक्तकर्तरीशक्तिमुद्गरद्रुघनादिभिः ।
शाल्मलिद्रुमवत् पुष्पैर्बभुर्युद्धगता भटाः ॥३१४॥

स्मृत्वा रुद्रविहाराग्निदाहं सैदकृतं क्रुधा ।
अलाभपुरदाहाय मार्गपोऽग्निमदापयत् ॥३१५॥

ज्वालाजालकरालोऽसावग्निर्वेश्मोष्मदारुणः ।
अलाभदीननगरं दग्धारण्यमिवाकरोत् ॥३१६॥

श्रीमत्सैदहमादानखानगाहोदितानलः ।
राजप्रजापचारोत्थतत्क्रोधाग्निरिवाद्युतत् ॥३१७॥

---

312 a) S'_8 A निहतानेक-.

313 a) I_4 सर्वदां (mislec. for S'ār. चां) गाः; M (evid. emend.) चार्वङ्गाश्च (for सर्वचङ्गाः).

314 b) M (evid. emend.) -द्रुघणा°. —c) S'_7 I_{1-5} D शल्मालि-.

315 c) S'_{6-8} A अहलामठ-; K अहल्या (corrupt) मठ-; S'_8 C I_{3-5} D B अलाभपुर- (as in text).

316 b) S'_8 K D B वेश्मोत्थदा°.

317 c) S'_8 A K [अ]भूत् (for °त्थ).

हतेषु भाकराद्येषु पलाय्यान्येषु यात्स्वपि ।
विदधुर्नगरे लुण्ठि तद्भृत्याः श्वपचादयः ॥३१८॥

आसन् जन्मदरिद्रा ये ते महाढ्यत्वमाययुः ।
सदैवाढ्या दरिद्रत्वमुत्पिञ्जोपप्लवे तदा ॥३१९॥

केचिच्छ्वान् विचिन्वन्तो यत्र कुत्रापि तिष्ठतः ।
प्रीतिं प्रातैस्तदीयार्थैर्ययुः कापालिका इव ॥३२०॥

विरुद्धसञ्चयापूर्णगृहलुण्ठिविधायिनाम् ।
अभूत् परस्परं युद्धं समांसास्थि शुनामिव ॥३२१॥

आदावेकेन यन्नीतं तस्मादन्येन तद्धृतम् ।
तस्मादप्यपरेणेत्थं मात्स्यो न्याय इवोत्थितः ॥३२२॥

द्विधा जयप्रवाहो यस्तद्वाहिन्योरभूत् पुरा ।
एकपार्श्वागमात् सोऽत्र शाख्युन्मूलनमातनोत् ॥३२३॥

आढ्यान् द्विजवणिक्प्रायान् पौरान् नित्यसुखोर्जितान् ।
मुष्णन्तस्तद्भटाश्चक्रुर्दरिद्रान् दुःखभागिनः ॥३२४॥

दारुणोष्मचयात् तत्तद्वस्तुनाशार्दितान्यपि ।
पौराणां समदह्यन्त सदनानि मनांसि च ॥३२५॥

नगरान्तः कुलीनानां पुण्याः कन्याश्च योषितः ।
विटाः केऽप्यधमाश्चक्रुर्हठसंभोगदूषिताः ॥३२६॥

318 a) S'_8 A $I_{2\cdot4}$ B भाष्करा°.

320 b) M (evid. emend.) तत्र (for कु°).

321 d) $S'_{3.6-8}$ A C $I_{1\cdot2}$ K B -मांसास्थि (emended as in text with I_{3-5} D).

322 d) S'_{6-8} A K (evid. emend.) क्षणम् (for [उ]त्थित:).

323 c) S_{6-8} A K (evid. emend.) तत्र (for सो°).

324 d) S'_{6-8} A $I_{1\cdot35}$ K दरिद्रा; S'_3 C $I_{2\cdot3}$ D B दरिद्रान् (as in text).

व्यधायि यत्र निर्माणं कल्पान्तस्थिरताशया ।
कोटिकोटिधनं दत्त्वा दग्धं तद् भस्मसादगात् ॥३२७॥

आसदन् केऽपि केऽप्युच्चैरनदन् केऽप्यलुण्ठयन् ।
दस्यवो दक्षिणे पारे क्षीबा इव जयोद्धताः ॥३२८॥

न शीधुचषकोऽप्यास्त येषामुत्सवतर्पणे ।
सहस्रसङ्ख्याः कुम्भानामम्भोवन्नगराद्धृताः ॥३२९॥

केचिद् बन्धुवियोगार्ताः केचित् सञ्चयवञ्चिताः ।
विरुद्धत्वक्कृताक्षेपा जितरुद्धभुवः परे ॥३३०॥

बहवो दुःखिताश्चेरुः शतैकीयोऽभवत् सुखी ।
तत्तद्व्रणविपक्वैश्च क्षतैः प्रेतैः स्ववेश्मनि ॥३३१॥

उच्चावचैर्जनैः सार्धं सहस्रद्वितयी मृता ।
इत्थं षष्टितमे वर्षे श्रावणप्रतिपद्दिने ।
एकान्तविजयात् तेषां तत्तल्लोकक्षयोऽभवत् ॥३३२॥

पूर्वमङ्कुरितः सैदवधात् पल्लवितः क्रमात् ।
परस्परं वैरतरुस्तद्दिने फलितोऽभवत् ॥३३३॥

पौराणां वीरवर्गः प्रतिदिनमहरत् सञ्चयं वञ्चयित्वा
दुःस्थावस्थः समस्तः कृषिफलहृतिभागास्त वास्तव्यलोकः ।
उच्छेदष्षाटवाटावनिसफलतरुष्विन्धनार्थं दुरन्तः
सैदद्वैधात् समुत्थः प्रवरपुरवरोपप्लवोऽभूत् समन्तात् ॥३३४॥

---

327 c) $S'_{6\cdot 8}$ A तत्र (for दत्त्वा). —d) $S'_{3\cdot 6-8}$ A C K मृद°; I_{1-5} D B तद् (as in text).

328 a) I_5 आमदन्.

330 d) S'_3 जिताः.

331 d) S'_{6-8} A K प्रेक्ष्य; S'_3 C I_{1-5} D B प्रेतैः (as in text).

334 c) S'_3 C उच्छेदस्याट्ट– (for °दष्वाट–); $I_{2\cdot 4}$ D B शाट– (for षा°); M (marg., evid. emend.) शाकवाटा°. —d) $S'_{3\cdot 7\cdot 8}$ A C K -वरपुरो°; S'_6 $I_{1\cdot 3-5}$ D -पुरवरो° (as in text); I_2 B -मुखपुरो°.

अत्रान्तरे वधं श्रुत्वा सैदाः काश्मीरिकोज्झिताः ।
आलिखानमुखास्तस्थुर्दासमात्रावशेषिणः ॥३३५॥

द्वित्रान् निहत्य नगरे निवृत्तः सेत्वभावतः ।
मेयामहम्मदः प्रापत् तावत् स्वशिबिरान्तरम् ॥३३६॥

भाकरादीन् हतान् श्रुत्वा सैदा भीता अपि व्यधुः ।
द्वित्रान् निहत्य नगरे पुनर्युद्धाय निश्चयम् ॥३३७॥

पश्चात् प्रतीर्य मार्गेशो हन्याम्नस्तद्रणोऽस्त्विह ।
इत्युक्त्वा ताजभट्टस्तान् निन्ये त्रासविसूत्रताम् ॥३३८॥

अस्मिन्नवसरे पारादागतो युक्तिपूर्वकम् ।
सैदान् गदायरावत्रः स्वालयं तान् व्यसर्जयत् ॥३३९॥

कृत्वा बालनृपेन्दुं तं सैदाभ्रपटलोज्झितम् ।
पौरानानन्दयामासुर्मन्त्रिणो मरुतो यथा ॥३४०॥

दुर्योधनैकशरणाः कृतशल्ययोगा
ये धर्मजातिविरसाः कलिदत्तकर्णाः ।
अन्यायवृत्तिधृतराष्ट्रकृतावसादा-
स्ते कौरवा इव रणे न जयं लभन्ते ॥३४१॥

राजधानीं समानीय नवां पद्मपुरान्तरात् ।
खानगाहं नवीचक्रुर्दग्धं श्रीनगरान्तरे ॥३४२॥

भाभासैदहमादानखानगाहो नदीतटे ।
पूर्णस्तत्पुण्यसंभारस्तदाकार इवोत्थितः ॥३४३॥

---

335 b) S'_3 C I_{1-5} D ° कैर्जिताः (for °कोज्झि°).
336 c) B (evid. emend.) मीया-.
339 c) S'_3 C $I_{1\cdot2\cdot4}$ K B सदाना (mislic for न्ग)दा°; S'_6 A -राबुत्रः.
340 a) S'_3 C -नृपे मन्त्रं.
343 a) B (evid. emend.) बाबा-; S'_3 C -हमादाम- (S'_3 *sup-lin.* न).

सर्वस्वमपहृत्याथ सैदास्ते सकुटुम्बकाः ।
मण्डलादालिखानाद्या निरवास्यन्त मन्त्रिभिः ॥३४४॥

एकमत्येष्वमात्येषु काश्मीरेष्वविशङ्किताः ।
ययुः परशुरामाद्याः स्वदेशं प्राप्तसत्क्रियाः ॥३४५॥

शिशौ दत्त्वा राज्यं वयमिह भजामः सुखमिति
व्यधुः स्वार्थं शिष्टा गलितमतयः सैदपतयः ।
हतेष्वेवं तेषु प्रसभमभजन् मन्त्रिपदवीं
परे तत्तज्जुष्टां विधिरिह बलीयान् न पुरुषः ॥३४६॥

मेयाहस्सनसामग्रीं नाग्रामादिप्रमेयजाम् ।
ज्यल्लालठक्कुरोऽगृह्णात् तत्पुत्रो लहरादिकम् ॥३४७॥

गृहीत्वा बाङ्गिलं राष्ट्रं स्वकं मार्गेशनिक्रुजात् ।
स खूयादिप्रमेयांश्चाभजच्छ्रीमान् ज्यहाङ्गिरः ॥३४८॥

माक्षाश्रमादिराष्ट्रेषु स्वाम्यभूत् सैफडामरः ।
अन्यां च ग्रामसामग्रीं सोदरेषु यथोचिताम् ॥३४९॥

---

344 b) $S'_{6\cdot8}$ A K तैः (for ते).

345 a) M (evid. emend.) ऐक–.

347 a) B (evid. emend.) मीया–. — c) B (evid. emend.) जल्लाल–; S'_{6-8} A K गृह्णन्; S'_3 C I_{1-5} D B[अ] गृह्णात् (as in text). — d) I_1 लोहरा°.

348 b) S'_7 K मार्गेशनिक्रुजात् [K न्] (as in text); S'_8 मार्गेशनिक्क्रत्; A मार्गेशनिक्रंत्; $I_{2\cdot4\cdot5}$ D मार्गेश···; $S'_{3\cdot6}$ C $I_{1\cdot3}$ B (evid. emend.) मागेशमागतः. —c) I_3 C B म (mislec. for S'ār. स) खू°; I_4 सा···यादि–; S'_7 ख (*sup-lin.* स) खू°; K खरव्यूयादि°.

349 a) B सा (mislec. for S'ār. मा) क्षा°. —d) I_{3-5} D यथोचितम्. I_4 after यथोचितां blank for four inches.

परिहासपुराधीशो जोनराजानकोऽभवत् ।
सैन्याधिकारनिर्दैन्यस्वातन्त्र्योज्झितयन्त्रणः ॥३५०॥

एभ्राहिमश्च मार्गेशो द्वारपालाधिकारभाक् ।
चक्रे सैदादिभृत्यानां रक्षामक्षामपौरुषः ॥३५१॥

राज्ञोऽधिकारसामग्रीं भूमेर्द्रव्यावलीमिव ।
महाभूता इवामात्याः संभूय व्यदधुर्नवाम् ॥३५२॥

एको मार्गपतेः पक्षष्ठाक्कुरो डामरोऽपरः ।
राजानकीयो दीप्तास्ते सर्वेऽग्नय इवाद्युतन् ॥३५३॥

आत्मेव निष्क्रियः साक्षिमात्रं बालनृपोऽभवत् ।
सर्वं प्रकृतिनिष्पन्नं राज्यतन्त्रमभूत् तदा ॥३५४॥

विभजन्तो भुवं सर्वां यथेच्छं स्वेषु केवलम् ।
अलेखयन् नृपं पत्रे स्वाङ्गीकाराक्षरत्रयीम् ॥३५५॥

कष्टप्रदाः प्रजानिष्टा दुष्टभृत्यविचेष्टिताः ।
यथेष्टं समचेष्टन्त हृष्टास्तेऽरिष्टचेष्टया ॥३५६॥

स्वपक्षरक्षणे दक्षाः परपक्षेष्टखण्डनाः ।
तार्किका इव ते तस्थुर्वितण्डावादशिक्षिताः ॥३५७॥

मण्डलं तापयन्ति स्म सर्वे तीक्ष्णकरा न के ।
कल्पान्तकाले भुवनं द्वादशार्का इवोदिताः ॥३५८॥

श्वाक्रन्दितोल्कादाहैश्च भूरिभूकम्पसंपदा ।
वेपमानो जनो जज्ञे प्रत्यावृत्तमुपद्रवम् ॥३५९॥

---

351 [a]) B (evid. emend.) इभ्रा°. —[d]) S'_{6-8} A K अक्षतलां क्षणात् ; S'_3 C I_{1-5} D B अक्षामपौरुषः (as in text).

353 [b]) D C B ठक्कुरो. —[b]) B (evid. emend.) डामरोपमः.

355 [d]) $S'_{6\cdot 8}$ A K त्व (mislec. for S'ār. स्वा)ङ्गी°; S'_3 C साङ्गी°; I_3 -त्रयम्.

शिशौ नृपे व्यधुः पीडां विशां चैतन्नियोगिनः ।
आमया इव देहानां वार्द्धके शक्तिवर्जिते ॥३६०॥

नृपतेर्यदि मत्सरात् सहाया
रचयन्ति प्रबला मिथो विरोधम् ।
कुपिता इव धातवः शरीरं
क्षपयन्ति प्रसभं महर्द्धि राज्यम् ॥३६१॥

ये सर्वकण्टकास्तीक्ष्णाः परेषां छिद्रकारिणः ।
करभाणामिवैतेषां ते तेऽप्यासन्नतिप्रियाः ॥३६२॥

पैशुनोपायनाद् भेदं नयद्भिः प्रतिवासरम् ।
चाक्रिकैः कृतसञ्चारैर्वैरः प्रौढिमनीयत ॥३६३॥

उक्तं यन्नैव केनापि स्वबुद्ध्या परिकल्पितम् ।
तेषां तद्भृत्यपैशुन्यं हृद्यं काव्यमिवाभवत् ॥३६४॥

इत्थं मन्त्रिहृदादर्शा वैषद्यान्योन्यबिम्बिताः ।
तद्भृत्यपैशुनश्वासैर्मालिन्यमभजन्त ते ॥३६५॥

अथ मार्गपतेरुच्चपदवीं प्राक्क्रमागताम् ।
नासहन्तापरे रम्यां चक्रवाका इवैन्दवीम् ॥३६६॥

इहास्माभिर्हताः सैदा यद्भीत्या विद्रुतोऽप्ययम् ।
नृपस्यास्य सभाज्येष्ठः स्थापितः कुरुते मदम् ॥३६७॥

---

362 c) $I_{1\cdot3-5}$ D करभानाम्.
363 a) S'_8 पैशुन्यो° —d) S'_8 C B वैरं.
365 a) $S'_{8\cdot6-8}$ A C I_2 K B -हृदादर्शं (emended as in text with $I_{1\cdot3-5}$ D). —b) S'_8 C I_{1-5} D B वैशद्या° —c) -पैशुना°.
366 c) S'_{6-8} A K [अ]सहन्तां (S'_8 C I_{1-5} D B °न्त as in text).
367 c) S'_{6-8} A K हत (sic) स्य (for नृप°).

इत्यादि शृण्वंस्तद्भृत्यवर्गान्मार्गपतिस्ततः ।
ताटस्थ्यं राजकार्येषु विरक्तः सोऽभजद् रुषा ॥३६८॥

बह्वाभखानयनोत्पाटनेन निजं वपुः ।
विशामनाशिषां पात्रं जोनराजानकोऽनयत् ॥३६९॥

शास्त्राधिपत्यानौचित्यनिग्रहानुग्रहक्रमैः ।
ग्रहाणामिव तेषां स क्रूरो राहुरिवाभवत् ॥३७०॥

छुन्दानकादिदेशस्थग्राम्याणामनियन्त्रणः ।
लोत्रभूम्यपहारेण तद्देशेशोऽपि सोऽभवत् ॥३७१॥

सैदद्वैधान्तरे लुब्धैः सर्वत्र मुषितप्रजः ।
तत्पदार्थैर्गृहे पूर्णां कोष्ठागारावलीं व्यधात् ॥३७२॥

यत् कष्टेनार्जितं लोकैर्बलात्कारहृतं धनम् ।
स्वं ब्रह्मदेयमिति तत् परस्वं वेत्ति लुब्धधीः ॥३७३॥

संगृह्य वाहिनीः सर्वास्तदीयैर्हृतजीवनैः ।
और्वाग्निरिव तृप्तोऽसौ न बभूव कदाचन ॥३७४॥

---

369 b) S'_{6-8} A K °त्पाटनार्थं (sic).

371 a) S'_{8} कु (prob. mislec. for S'ār. छु)न्दा°. —c) S'_{3} C $I_{1\cdot3}$ लोद्र–. —d) S'_{6-8} A K तद्देशस्थो; S'_{3} C I_{1-5} D B तद्देशेशो (as in text).

372 a) $S'_{3\cdot7}$ A C K ल (mislec. for S'ār. लु) ब्धैः. —b) S'_{3} $I_{1\cdot2}$ K D B मुषिताः प्रजाः. —d) $S'_{6\cdot8}$ K D °रावलिं. I_{3-5} om. 372.

373 b) $S'_{3\cdot6}$ (after corr.) $_{7\cdot8}$ A C I_{1-5} K D B धृतं (S'_{6} before corr. धनं as in text). —c) $S'_{3\cdot6-8}$ A C $I_{1\cdot4}$ K B यत्; $I_{2\cdot3\cdot5}$ D तत् (as in text); M (evid. emend.) यः (for तत्); —d) $I_{1\cdot3\cdot5}$ इति (for वेत्ति).

374 b) MSS and C B तदीया (emended as in text.)

द्वेषाग्निरर्थकाक्षेपे ग्रामे वा नगरान्तरे ।
नाशकद् रक्षितुं कश्चिद् बलिना तेन पीडितम् ॥३७५॥

यदि धर्मधिया कश्चित् प्रवृत्तो दीनरक्षणे ।
स तद्दुरुत्तरै राजसदस्याप खलीकृतिम् ॥३७६॥

स्वप्रमेयेषु वास्तव्यांल्लुब्धा निरपराधिनः ।
अन्येऽपि पीडयामासू रोगा इव नियोगिनः ॥३७७॥

राजा शिशुर्गतवया बहवः सहाया
यत्रातिमत्सरभृताश्च मिथः स्वतन्त्राः ।
राज्याङ्गभङ्गमसमं नृपतेर्दिशन्त-
स्तत्राचिरात् समुदयन्ति न के ह्यनर्थाः । ३७८॥

अत्रान्तरे बाह्यदेशे यात्रार्थं यौ विसर्जितौ ।
एदराजानकछक्कुराह्लदश्चापतुः पुरम् ॥३७९॥

तद्दर्शनापदेशेन श्रुत्वा किमपि मन्त्रणम् ।
नगरे नागमद् दूतैर्मार्गेशः शङ्कितो भृशम् ॥३८०॥

स सैफडामरेणाशु गत्वा स चकितो गृहे ।
वैदेशिकभटाह्वानात् साशङ्कः सोऽनयन्निशाम् ॥३८१॥

शङ्कथेषु सदनान्तेषु प्रातस्तन्मतमास्थितः ।
अह्लादठक्कुरो जोनराजानकमथावधीत् ॥३८२॥

---

376 c) S'_3 C I_5 तन्मह (mislec. for S'ār. दुरु)त्त°. – A om. 376[ab].

377 b) $S'_{3\cdot6}$ A C B (gram. assim.) लुब्धान्.

380 b) S'_7 K मन्त्रिणम्; S'_3 C I_{1-5} D B मन्त्रिणाम्; $S'_{6\cdot8}$ A मन्त्रणम् (as in text).

382 b) $S'_{3\cdot6-8}$ A I_{2-5} K D B प्राप्त:; I_1 C प्रात: (as in text). —c) K आह्लाद–; S'_3 C I_{2-5} D B अह्मदष्ठकुरो; I_1 अह्मदठक्कुरो.

शस्त्रव्रणमुखोद्गच्छद्रक्तसंसिक्तमण्डपम् ।
तद्गृहे तं शवं दृष्ट्वा न को रोमाञ्चितोऽभवत् ॥३८३॥

दत्तकन्यमयं जन्यमवधीद् गृहमागतम् ।
दिव्यं कृत्वापि साश्वस्तं धिग् भोगाभ्यासवासनाम् ॥३८४॥

मिथोऽसहिष्णवो भेदान्मन्त्रिणः प्रभविष्णवः ।
विनश्यन्त्यचिरेणैवं द्रोहेणेत्यपि केचन ॥३८५॥

केऽप्यूचुः स यथा सैदानवधीन्मद्रपैः सह ।
वर्षेणैकेन तन्मासे तद्वद् व्यापादितोऽरिभिः ॥३८६॥

भृत्या वृथैव रक्ष्यन्ते पोषिता ये सहस्रशः ।
नैकोऽपि तेभ्यस्तस्यान्ते प्राणत्राणक्षमोऽभवत् ॥३८७॥

अर्जितं यद् यथैवाशु तत् तथैव हृतं परैः ।
न तिष्ठन्ति चिरं गेहेष्वन्यायोपार्जिताः श्रियः ॥३८८॥

पापं पुण्यं बलं दाक्ष्यं परं स्वं दूषणां स्तुतिम् ।
नो वेत्ति राजपुरुषः कदाचिद् विधुरे विधौ ॥३८९॥

वैदेशिकभटैः किं नस्त्याज्या सैन्याधिकारिता ।
इत्युक्तोऽपि स पुत्रेण नाग्रहीद् भाग्यवर्जितः ॥३९०॥

विपरीता मतिः पुत्रे विश्वासः परसेवके ।
जायते गतभाग्यानां विनाशे प्रत्युपस्थिते ॥३९१॥

---

385 b) S'_{6-8} A K मार्गेशाः; S'_3 C I_{1-5} D B मन्त्रिणः (as in text).

386 a) I_2 किमूचुः. —c) S'_3 C I_{1-5} D B तत्पापात् (for तन्मासे).

387 a) K वृ···व.

389 b) S'_3 C $I_{1\cdot2}$ B दूषणं. —c) S'_{6-8} A K जानाति; S'_3 C I_{1-5} D B नो वेत्ति (as in text).

391 b) S'_7 K पु (sic) र– (for पर-).

वैदेशिकभटान् मेने यत् सज्जातीनिवान्वहम् ।
अत्रत्याञ् शस्त्रिणो वीरान् मेने भीरून् परानिव ॥३९२॥

स सैफडामरो वीरवरस्तच्छौर्यशङ्कितः ।
भीतः समार्पिपच्छस्त्रं वीरवृत्तेर्न निश्चयः ॥३९३॥

ज्यल्लालठक्कुरस्तावद् राजधान्यङ्गने स्थितः ।
बद्धोऽन्तः स्वैर्द्वारपालैर्गतिः क्व विधुरे विधौ ॥३९४॥

भास्वानपि प्रतिदिनं मृदुतौष्ण्यभिन्न-
स्तां तां बिभर्ति गगनान्तरगोऽप्यवस्थाम् ।
नित्याकुलस्य मनुजस्य बलप्रभावे
को निश्चयो भवति तत्र विचित्रवृत्तौ ॥३९५॥

मसोद्डामराद्यास्ते छिन्ननौसेतु बन्धनाः ।
प्राग्वत् ते जालद्रगड्डे विदधुः सैन्यसङ्ग्रहम् ॥३९६॥

शृंगारसीहनिकटं ययुः शूरपुराध्वना ।
ठक्कुराः सालियाद्यास्तेऽप्यसक्ताः स्वयमागताः ।
कारागारान्तरं प्रापुः कस्य स्युः सम्पदः स्थिराः ॥३९७॥

जेराकनामा तद्भृत्यः साहसी नगरान्तरात् ।
ठक्कुराह्लादतुरगान् हृत्वा राजपुरीं ययौ ॥३९८॥

---

392 b) S'_7 D स ज्ञा (S'_7 marg. ज्जा) तीन्; S'_3 C I_{2-5} K B सजातीन्.

394 a) B (evid. emend.) जल्लाल–. —b) $S'_{3.6-8}$ A C $I_{1.3-5}$ K °ङ्गन–; I_2 D B °ङ्गने (as in text).

395 b) S'_{6-8} जठरा°; (S'_3 A C I_{1-5} K D B गगना° as in text).

396 a) B (evid. emend.) मसूद–. —c) S'_6 A C °गड्डे; K °गरे.

397 a) $I_{1.3-5}$ C -सीफ (mislec. for S'ār. ह). —c) S'_{6-8} A ठक्कुरैः (sic).

398 a) $I_{3.5}$ जेरक–; S'_3 जोराक–; B (evid. emend.) जीराक–. —b) S'_7 (by syll. hapl.) नगरात् (for नगरान्तरात्).

इत्थं तत्सैदवधतो जोनराजवधोऽधिकः ।
पाददाहादिवासह्यो गलरोगो व्यथावहः ॥३९९॥

यावन्नरस्त्यजति कार्यकृदेकचिन्तां
चिन्तान्तरं सृजति तावदमुष्य धाता ।
याते क्रशिम्नि शशिनः किल पूर्णिमातौ
सञ्जायते द्युतिहरो ग्रहणप्रचारः ॥४००॥

निष्प्रतिद्वन्द्वि नैश्चिन्त्यं मार्गेशो यावदाप सः ।
तावच्छुश्राव संप्राप्तं पुत्रमादमखानजम् ॥४०१॥

स यथाभ्यन्तरं प्राप्तो यथा राज्यं गृहीतवान् ।
बाल्यात् प्रभृति वृत्तान्तं तत् खानस्य ब्रवीम्यहम् ॥४०२॥

पितुः श्रीजैननृपतेः प्रमये निर्गतो बहिः ।
आदामखानो वित्राणः प्रपेदे मद्रमण्डलम् ॥४०३॥

भावीश्वरांशतैश्वर्यप्राप्तिसूचकपर्वणि ।
शिवरात्र्यन्तरे तस्य तत्रस्थस्य सुतोऽजनि ॥४०४॥

जनकेऽस्य दिवं याते तुरुष्कसमरान्तरे ।
मातामहगृहे चन्द्रो ववृधेऽम्बुनिधाविव ॥४०५॥

काले तात्तारखानेन रक्षितः स गतः स्वयम् ।
जालन्धरमहापीठे निनाय कतिचित् समाः ॥४०६॥

---

399 a) S′$_{3\cdot6-8}$ A C सैन्य (S′$_7$ *sup.lin.* द as in text); D सैध–. —d) M (evid. emend.) भया° (for व्यथा°).

400 d) S′$_{6\cdot8}$ A -प्रपञ्च: (for °चार:).

401 a) S′$_3$ C निश्चिन्त्यं. —d) S′$_{6-8}$ A I$_{1\cdot3-5}$ K D आधाम–; S′$_3$ C I$_2$ B आदम– (as in text).

403 c) S′$_{6-8}$ A I$_{1-5}$ K D आधा (mislec. for S′ār. दा)म–; S′$_3$ C B आदम–.

406 c) M (evid. emend.) जालन्धरे; MSS and C B -मह्री (emended as in text).

ज्यहङ्गिरोऽस्य मार्गेशः सैदभीत्या गतो बहिः ।
सोपधं व्यसृजल्लेखं धर्तुं पैतामहं पदम् ॥४०७॥

तत्तारखानप्रमये ततः खानमिमं पुनः ।
सुतो हस्सनखानोऽस्य कश्चित् कालमपालयत् ॥४०८॥

तुरुष्कान् वञ्चयित्वाथ विहितोत्साहसाहसः ।
खानोऽमितपरीवारः प्रापद् ग्रहणमण्डलम् ॥४०९॥

इतः काश्मीरिका दूता मार्गेशेन विसर्जिताः ।
शृङ्गारसीहेनानीतस्तावद् राजपुरीं प्रति ॥४१०॥

ततो राजपुरीनाथो मार्गेशद्वेषनिष्ठितः ।
फताहखानमानिन्ये स्वान्तिकं स्वाश्रयेच्छया ॥४११॥

जोनराजानकवधात् कश्मीरेभ्यो विनिर्गतैः ।
डामरैरेधराजानठक्कुरदौलतादिभिः ॥४१२॥

तत्रस्थैः शिश्रिये खानस्तरुर्मधुकरैरिव ।
प्रथां निन्ये यथा पूर्वं वुप्पेदेवात्मजोऽभवत् ॥४१३॥

यौनसम्बन्धबद्धोऽपि मार्गरक्षाधिकारभाक् ।
मसोदनायकः सोऽपि खानपक्षं समाश्रयत् ॥४१४॥

दीनो ग्राम्यजनो दुष्टबहुनायकताडितः ।
तदागमनवार्तां तां क्षते क्षारमिवाविदत् ॥४१५॥

---

407 [a]) B (evid. emend.) जहांगिरो. —[c]) $S'_{3.6-8}$ A C K B सोपधिं; I_{1-5} D सोपधं (as in text). —[d]) S'_{6-8} A K क (sic) र्तुं.

409 [d]) K वहण– (for ग्र°).

410 [c]) $I_{2.3-5}$ B [आ]नीताः.

412 [c]) S'_3 एबु– (for °ध). —[d]) I_2 D B -दौलुता°.

413 [d]) S'_3 A बुप्ये–; I_1 C K B वुप्ये; S'_8 बुप्य–; I_5 वुपे–.

414 [c]) B (evid. emend.) मसूद–.

415 [b]) I_5 रुष्ट– (for दु°); $S'_{3.6-8}$ A C I_{1-5} K D B -तार्दि (S'_7 *sup. lin.* डि as in text)तः.

सापराधर्णिकन्यायप्रेष्यवद्भुद्धसेवकाः ।
चौरा विटा दरिद्राश्च तुतुषुः खानवार्तया ॥४१६॥

ग्रामे वा नगरे वापि त्यक्त्वा गृहकुटुम्बकम् ।
बद्धाशो राजविभवे न कः प्राप तदन्तिकम् ॥४१७॥

तांस्तान् देशाद् विनिर्यातान् खानो गृह्णन् समृद्धिमान् ।
ऐच्छल्लब्धप्रतिष्ठः स राज्ञः प्रत्यभियोगिताम् ॥४१८॥

पौत्रः श्रीजैननृपतेर्योग्योऽयमिति सर्वतः ।
त्यक्त्वान्यान् सर्वराष्ट्रेभ्यस्तमेवाशिश्रियज्जनः ॥४१९॥

तद्वार्ताश्रवणात् तुष्टाश्चौराद्याश्छन्नमास्थिताः ।
तत्कालमुत्प्लवन्ति स्म मत्स्या इव तडागगाः ॥४२०॥

न मम महती सेनैकोऽरिर्जितोऽस्त्यपरो महान्
क्षितिरतिबलै रुद्धा भिन्नाः परैश्वरसेवकाः ।
स वरतुरगोऽस्वस्थः कोशे न चाधिकृतो हित-
स्तरुमिव घुणास्तास्ताश्चिन्तास्तुदन्ति विभुं न कम् ॥४२१॥

तुष्टो ज्यहाङ्गिरो यावत् तत्प्राप्त्या प्रेषितोपधिः ।
तावत् तन्मतगं ज्ञात्वा सचिन्तः समपद्यत ॥४२२॥

अहितोन्मूलनोद्भूतदेशैकविभवान्वितः ।
सुखेच्छुः प्रत्युत प्राप दुःखमुद्भूतविप्लवः ॥४२३॥

---

416 a) I_{1-5} D B °र्णिका°. —b) I_{1-5} D B -विरुद्ध- (for वद्ध°).

418 b) C [अ]गृह्णत् .

419 d) $S'_{6.8}$ अशिश्रयत् .

420 d) I_{1-5} D तडा ($I_{1.3}$ टा) कजाः .

421 c) S'_{3} हितः (*sup. lin.* नः). —d) K D B किम् (for कम्).

422 a) MSS and C B °ङ्गिरस्तावत् (emended as in text). —c) D तावन्मत•••ज्ञा°; $I_{1.3.5}$ तावन्मतगं ज्ञा°; I_{4} तावन्मग ज्ञा°.

423 c) $S'_{6.8}$ A C प्रापत् .

प्रवर्धमानया नित्यं खानागमनवार्तया ।
वेपमानोऽभवल्लोको वात्ययेव वनावलिः ॥४२४॥

चाक्रिकाश्चतुराः खानमन्त्रिणोऽथ जिगीषवः ।
इत्थंलेखाङ्कितं दूतं व्यसृजन् मार्गपं प्रति ॥४२५॥

भो भो मार्गपते गर्वपर्वखर्वितविक्रमः ।
काश्मीरान्तः सुपर्वेव भवांश्चर्वितसद्यशाः ॥४२६॥

सोऽयं खानस्त्वयानीतो लेखैस्तौरुष्कदेशतः ।
उपेक्ष्यते कुलस्वामी कथं मार्गपतेऽधुना ।
स्वयं कृतं कथं कार्यं पश्चात्तापाय जायते ॥४२७॥

शिशौ राज्यं परिस्थाप्य भुज्यते मण्डलं परैः ।
व्यवहारोचितः शुद्धः सोऽयं किं तिष्ठते बहिः ॥४२८॥

अथवा पितृभागं चेत् प्रयच्छस्यस्य मण्डलात् ।
बहिरेवास्त्वयं राजाप्ययमस्त्वन्तरे स्थितः ॥४२९॥

अथ किं बहुनोक्तेन मान्यो यदि न तेऽस्त्ययम् ।
रणोभयबलवधात् पापं ते परिणंस्यति ॥४३०॥

श्रुत्वेति लेखं मार्गेशः खानदूतोपदर्शितम् ।
प्रत्युत्तरमयं पत्रं तस्मै दत्त्वाब्रवीदिति ॥४३१॥

भो भो मण्डलगोप्तारो भोक्तारो नृपसम्पदाम् ।
सर्वथा हितकर्तारः पुराणोक्तं विचार्यताम् ॥४३२॥

---

424 d) S'_7 K वनावनि: (sic).

426 ab) MSS and C B गर्वस (prob. mislec. for S'ār. प) र्वं-; M (evid. emend.) -विक्रम.

427 c) I_{1-5} D उपेक्ष्यत.

429 b) S'_{6-8} A $I_{1.2.5}$ D °यच्छस्यास्य (prob. mislec. for S'ār य). —c) $I_{1.3-5}$ D [अ]स्ति (for °स्तु).

कश्मीराः पार्वती तत्र राजा ज्ञेयः शिवांशजः ।
नावज्ञेयः स दुष्टोऽपि विदुषा भूतिमिच्छता ॥४३३॥

देशेऽस्मिंस्तपसा राज्यं प्राप्यते न पराक्रमैः ।
अन्यथादमखानाद्यैः किं नाप्तं स्वक्रमोदितम् ।
अन्यथाप्येतन्न चिरादनौचित्यचितं फलम् ॥४३४॥

क्रमेण येनायातोऽसौ तं त्यक्त्वा त्वद्बलार्थिनः ।
सति राज्यस्य विज्ञाय प्रवेशो दीयते कथम् ॥४३५॥

न मयायं धृतो राज्ये बालोऽप्यन्याभिषेचितः ।
कः शक्नोत्यधुना हन्तुं मयि सन्निहिते स्थिते ॥४३६॥

खानोऽयं सर्वथा पूज्यो यद्यस्मन्मतमिच्छति ।
अग्रेसरारुणः सूर्यः पूज्यते ह्युदयोन्मुखः ॥४३७॥

श्रियः कृतघ्नभावाप्ता न सुखाय चिरं नृणाम् ।
भोगा रोगाय देहानामपथ्याशनसंभृताः ॥४३८॥

किं वान्यत् सैदहस्तस्थो यद्वद् राजा विमोचितः ।
तद्वत् त्वद्धस्तगः सोऽयं प्राप्यते तद् विधेर्मतम् ॥४३९॥

---

433 RSs$_2$ quotes 433 entirely. —a) S'$_{6\cdot8}$ A C I$_{1-5}$ K D B om visarga in कश्मीराः. —c) S'$_{6-8}$ A K सुदुष्टो; S'$_3$ C I$_{1-5}$ D B स (as in text) दु°; RSs$_2$ बालो (for दुष्टो). —d) RSs$_2$ स्वहितेच्छुना (for भूतिमिच्छता).

434 c) S'$_{6-8}$ A I$_{1\cdot3-5}$ K D [आ]धाम-; S'$_3$ C I$_1$ B [आ]दम (as in text). —d) I$_{1\cdot3-5}$ D (gram. assim.) [आ]प्तैः; MSS and C B -क्रमोचि (mislec. for S'ār. दि) त° —e) M (evid. emend.) एतदचि° (for °न्न चि°).

435 b) I$_{1\cdot3}$ तद्° (for त्व°). —c) I$_{1\cdot3-5}$ राज्ञो (for °ज्ञि); B (evid. emend.) राज्ये (for °ज्ञि).

438 b) S'$_3$ marg. संमुखा इति वा. —d) S'$_{6\cdot7}$ A C I$_{3-5}$ सम्भृतः (sic).

439 c) S'$_3$ C B तद्ध° (for त्वद्ध°).

इति लेखं विसृज्यैतत्पक्षपातात् क्रुधान्वितः ।
रथ्याधिकारं जग्राह मसोदस्य ज्यहाङ्गिरः ॥४४०॥

बहामनायकादीनां दत्त्वा तन्मार्गरक्षणम् ।
शृङ्गारराजानकादीन् स्थामार्थं व्यसृजद् द्रुतम् ॥४४१॥

अथ खानं पुरस्कृत्य नायकोऽसुखदायकः ।
क्रुद्धः पथोऽपहरणात् प्रापच्छूरपुरान्तरम् ॥४४२॥

तद्भृत्याः खशडोम्बाद्यास्तद्विसृष्टाः पदे पदे ।
देशे मडवराज्यान्तश्चक्रुरुत्पिञ्जमञ्जसा ॥४४३॥

एकतो नृपतेः सेना कष्टा खानस्य चान्यतः ।
दंष्ट्राद्वयी यमस्येव लक्षिता सर्वभक्षिका ॥४४४॥

प्राक्सैदविप्लवात् खानविप्लवः सोऽधिकोऽभवत् ।
पाददाहादिवासह्यो गलरोगो व्यथावहः ॥४४५॥

तस्कराक्रान्तपथिको बलवन्निहताबलः ।
अराजक इवानीशो देशः कष्टां दशामगात् ॥४४६॥

जग्मुर्दक्षिणपारादीन् प्रमेयांस्तद्दिगाश्रिताः ।
गृहीत्वा गोधनं सर्वं त्यक्त्वा स्ववसतीर्भयात् ॥४४७॥

खेरीं चार्धवनं राष्ट्रं भ्राष्ट्रमग्निशिखेव सा ।
अतापयन्महोष्माढ्या प्रविष्टा कटकद्वयी ॥४४८॥

---

440 d) B (evid. emend.) मसूदस्य.

441 b) I_{2-5} D -लक्षणम्.

444 b) I_1 D B काष्टा.

445 d) K गण्ड- (for °ल).

448 b) MSS and C B भ्रष्टम् (emended as in text).

राजसैन्यं समालोच्य प्रसुप्तं चारचक्षुषा ।
एकदा जेरकाद्यास्ते स्वास्कन्दं शिविरे ददुः ॥४४९॥

प्रजागरचरन्यासशस्त्राभ्यासविवर्जिताः ।
सर्वे पशूपमास्त्रासाद् विदद्रुः शिविरान्तरात् ॥४५०॥

सेनापतेर्निजाः केऽपि युद्धादौ भेदिताः परैः ।
चक्रुस्तत्कटकं त्यक्त्वा द्रोहं वैरिसमाश्रयात् ॥४५१॥

राज्यं नश्यति हृष्यति प्रतिदिनं बाह्या खशाली न का
लोकः क्लिश्यति लुण्ठदाहकरणैश्चौरः स्वकं पश्यति ।
सेना भ्रश्यति धीरवीरसहिताप्यन्विष्यति स्वं रिपुः
काश्मीरप्रभविष्णुषु प्रभवति द्वेषात् स्वभेदो यदा ॥४५२॥

द्रोग्धॄंस्तानवलोक्यैव स्रस्तां ज्ञात्वा स्ववाहिनीम् ।
सेनानीश्चकितः सैन्यात् पलायनपरोऽभवत् ॥४५३॥

हतेऽथ विद्रुते तस्मिन् पश्चादेत्य महाभटैः ।
सर्वस्वाप्त्या जहर्षाथ खानस्तत् प्रथमं जयात् ॥४५४॥

तुरुष्कदेशाद् यद्बुद्धया खानः प्राप्तो निरर्गलः ।
स भागसीहस्तत्पक्षः केनापि प्रचलन् हतः ॥४५५॥

---

449 c) B (evid. emend.) जीराका°.

450 d) S'_3 C $I_{1.4.5}$ K M विदधुः; S'_{6-8} A $I_{2.3}$ D B विदध्रुः (mislec. for S'ār. द्रुः); M (evid. emend.) °न्तरम्.

451 c) I_2 D B हत्वा; M (evid. emend.) हित्वा (for त्य°).

452 c) S'_6 वपुः (for रि°).

454 d) M (evid. emend.) प्रथमात्.

455 c) S'_3 C $I_{1.2.3.5}$ सुभाग–. —cd) $S'_{3.7}$ C I_{1-5} K D B तत्पक्षात्के (mislec. for S'ār. क्ष × के) ना°.

अथ मल्लशिलास्थाने तुष्टः खानो जयोन्मदः ।
स्वसैन्यसंग्रहं कुर्वञ् जिगीषुः शिविरं व्यधात् ॥४५६॥

विकरालान् भटान् क्षिप्त्वा करालविषयावनौ ।
मुमुषुर्निष्करालम्बान् वास्तव्यान् तस्य शस्त्रिणः ॥४५७॥

अत्रान्तरे मार्गपतिर्गृहीत्वा बालभूपतिम् ।
तज्जयाय बलोद्युक्तो निर्ययौ नगरान्तरात् ॥४५८॥

प्राक्सैदकदनाभ्यस्तन्यस्तवस्तुविलुण्ठनाः ।
पुराद् गृहरमां भीताः पौरा ग्रामेषु न्यक्षिपन् ॥४५९॥

निष्कृष्टवस्तुभारा सा मुषितेव वराङ्गना ।
अभवद् राजरहिता नगरी न गरीयसी ॥४६०॥

वैदेशिकटकाटोपकोपोत्कररटद्भटः ।
गुसिकोड्डारभूवाटे पाटवाच्छिविरं व्यधात् ॥४६१॥

संस्थाप्य तत्र भूपालं त्रिधा कृत्वा स्ववाहिनीम् ।
कल्याणपुरगं श्रुत्वा खानं योद्धुं विनिर्ययौ ॥४६२॥

द्राभगामान्तसीमान्ते समासन्नोऽधिकार्तधीः ।
तस्थौ खानान्तिकं प्राप्य स खानमरुगान्तरे ॥४६३॥

क्रमराज्यस्फुरत्प्राज्यचक्रवाडादिदुःसहाम् ।
वैडूर्यभट्टः पाश्चात्त्यां जग्राह गिरिपद्धतीम् ॥४६४॥

---

456 a) B (evid. emend.) मह्लि–.
457 a) S'_7 C $I_{1.3-5}$ K क्षित्वा (corrupt). —c) MSS and C B निष्करालम्भा (mislec. for S'ār. म्बा)न् .
460 a) MSS and C B -भावा (mislec. for S'ār. रा).
461 c) B गुस्ति (mislec. for Dev. सि)कौ°.
462 c) $I_{1.3-5}$ कल्यान–; RSs_2 notices कन्याण-.
463 a) S'_3 C I_{1-5} K (after corr.) D -ग्रामा°.
464 b) S'_3 C B चक्र–; S'_3 C I_{1-5} B -वाटा°; MSS and C B -दुःसहम् (emended as in text with M). —c) C वैदू (mislec. for S^aār. डू)र्य–.

सपिर्वजप्रतीहारा गक्कराजसुतादयः ।
चतुरङ्गोपमां लीलां क्षणं चक्रुः पुरोगताः ॥४६५॥

अथैकतः स्वकाश्मीरवैदेशिकबलान्विताः ।
मसोदनायकसुता योद्धुं व्यूहात् समाययुः ॥४६६॥

फलकासिस्फुरत्पक्षा नदन्तोऽन्तिकमागताः ।
चेरुः पङ्क्तया भटास्तत्र हंसा इव नभोन्तरे ॥४६७॥

यावत् प्रवृत्तो योद्धुं तांस्तावद् वीक्ष्याग्रमागतान् ।
अह्लादठक्कुरव्यूहो निरीहः समपद्यत ॥४६८॥

चेलाह्निकाभुजः केऽपि गर्जन्तो जलदा इव ।
स्फुरच्छस्त्रतडिज्ज्वालाः सोत्फाला निर्ययुर्मृधे ॥४६९॥

विषमा पङ्कसंकीर्णा जाड्यदुर्मार्गदूषिता ।
तेषामापततां साध्या वासनेव निजाजिभूः ॥४७०॥

वैदेशिकभटान् दृष्ट्वा नटत्खेटकपीटकान् ।
चटका इव जग्मुस्ते विदूरं पाटवोज्झिताः ॥४७१॥

न संस्तम्भयितुं सेनामशकत् तां पलायिनीम् ।
अह्लादठक्कुरो दीर्णां सेतुभङ्गान्नदीमिव ॥४७२॥

अहमहमिकायातजातघातव्रणार्दिताः ।
प्राणत्यागेन ते केऽपि चक्रुर्वेतननिष्कृतिम् ॥४७३॥

---

465 a) I_5 सु (for स); B (evid. emend.) पेरोज– (for पिर्व°); MSS and C B -प्रतीहार– (emended as in text).

466 c) B (evid. emend.) मसूद–.

470 d) C वसनेव.

471 b) I_5 जेटक– (for खे°); S'_6 I_4 -पेटकान्; I_2 -पीडकान्.

472 c) $S'_{3.7}$ C I_{1-5} K D B -ठक्कुरोद्दी (S'_7 द्री)र्णां (emended as in text with $S'_{6.8}$ A). —d) S'_3 C $I_{1.2}$ B -भङ्गां न°.

स्रवच्छोणितसिक्ताङ्गाः शालिक्षेत्रगताः शवाः ।
यागोपहारपशुतां ययुः कार्षिकभूमिषु ॥४७४॥

सेना खानस्य वात्येव सा नैर्ऋतदिगागता ।
तत्तल्लोकक्षयं चक्रे वेगभग्नभटद्रुमा ॥४७५॥

केऽपि काश्मीरिकास्तत्र वैदेशिकभटानले ।
शस्त्रज्वालावलीदीप्ते जुहुवुः श्रीफलं वपुः ॥४७६॥

किं नामोदीरणैस्तेषां दृष्ट्वा व्यूहं समागतम् ।
तिर्यग्भिरिव पातुं स्वं भीत्या यैर्यैः पलायितम् ॥४७७॥

प्रमेयभाजो मुख्या ये दृष्टा राजसभान्तरे ।
अदृष्टपूर्वं सन्त्रासं तेऽप्यशास्त्रिवदाययुः ॥४७८॥

वीरवृत्या त्यजन् प्राणान् केवलः श्लाघ्यतामगात् ।
तस्य त्रिचतुरास्त्यक्तप्राणा अनुचरा रणे ।
दिवं यियासोर्भोगार्थे बभूवुस्ते पुरःसराः ॥४७९॥

हतावशिष्टान् विद्राव्य ते खानस्य महाभटाः ।
निवृत्ता मार्गपत्यग्रे स्वीयभ्रान्त्या समाययुः ॥४८०॥

मसोदखानः केत्येवं वदन्तो विजयोद्यताः ।
वीरा हस्सनमेराद्या ज्ञाता मार्गपतेर्भटैः ॥४८१॥

पञ्चषास्तस्य सम्बन्धिभृत्यास्ते नौरुजादयः ।
सगौरभट्टाश्चान्ये च हता मार्गपतेः पुरः ॥४८२॥

---

476 c) $S'_{6\cdot8}$ अस्त्र–.
477 a) I_2 D B नामोद्दी°. —c) $I_{1,4}$ C पातं. —d) S'_3 C I_{3-5} K D पलायितुम्.
478 I_1 om. 478[bcd] and 479[ab].
479 b) S'_3 I_4 C B केवलं.
481 a) M (evid. emend.) मसूद–. —c) C B -मीरा°.
482 I_{1-5} om. 482. —a) MSS and C B पञ्चशः (emended as in text.) —c) B -पौ (mislec. for Dev. गौ)र–.

विमुखोऽभूत् कियत्कालं यः स सांमुख्यमाययौ ।
बालभूभृत्प्रभावेण कश्मीरकटके विधिः ॥४८३॥

मार्गेशस्याथवा स्तुत्यं धैर्यं तस्यात्र संयुगे ।
सन्नद्धः सबलस्तस्थौ जयस्तम्भ इवाचलः ॥४८४॥

पदैकमात्रं पश्चाच्चेदगमिष्यच्च तत्स्थलात् ।
काश्मीरकटकस्यास्य नावशिष्येत किञ्चन ॥४८५॥

भिन्नप्रकृतिसन्धानकौशलं श्रीज्यहाङ्गिरे ।
भिषजीव तदा दृष्टं भैषज्यं सांनिपातिके ॥४८६॥

प्रागल्भ्यमप्रतिहतं प्रतिभानमोज-
स्तत्तत्प्रयोगचतुरत्वमसंभ्रमश्च ।
एतानि यस्य समयेऽप्यतिसङ्कटे स्यु-
स्तुष्टेव तं प्रति समेति रणे जयश्रीः ॥४८७॥

खानोऽस्मत्करमात्तोऽत्र मिथ्योद्घोष्यात्र संयुगे ।
रणात् प्रचलितान् दूरं युक्त्या सर्वानुपानयत् ॥४८८॥

मार्गेशमधुसान्निध्ये तद्रणोपवनान्तरे ।
ते वीरभ्रमराश्चेरुः स्फुरत्पक्षरवोद्धताः ॥४८९॥

अथ खानस्य शिविरे गक्काद्या जयदुर्मदाः ।
नीतावशिष्टां सामग्रीं हृत्वा भूरीनलुण्ठयन् ॥४९०॥

एभराहिममार्गेशः सभृत्यः समराग्रगः ।
मसोदनायकमुखान् विमुखांस्तर्जनैर्व्यधात् ॥४९१॥

485 a) B पश्चाश्चे (mislec. for Dev. च्चे)त् ।
486 d) B (evid. emend.) सांनिपातके.
491 a) B (evid. emend.) इबरा°. —c) B (evid. emend.) मसूद–.

Indologisches Institut der Universität Wien

अन्ये शृङ्गारसीहाद्या दृष्ट्वा तत्सैन्यमद्भुतम् ।
भेडावनपथात् तूर्णं विद्रुताः स्वां भुवं ययुः ॥४९२॥

सर्वं राजपुरीसैन्यं सदैन्यं वेष्टितं भटैः ।
दत्त्वाभयं ररक्षाजौ गक्को गणपतिर्यथा ॥४९३॥

त्यक्त्वा सन्नाहसामग्रीं केऽप्येते विद्रुता द्रुतम् ।
मुषिताः सखशौर्डोम्बैः पृष्ठलग्नपदातयः ।
वृक्षानपि वने जज्ञुररयोऽनुलगन्त्यमी ॥४९४॥

वैदेशिकैर्हृतं यत्तत् ग्रामेषु जनपीडया ।
काश्मीरिकेभ्यो मुषिता निक्षेपमिव ते ददुः ॥४९५॥

शीतज्वरार्दिताः केचित् केचिच्छ्रान्ता बुभुक्षया ।
वैदेशिकाश्च काश्मीराः शतसङ्ख्याः क्षयं ययुः ॥४९६॥

संरूढं कमपि निपातयत्यकाण्डे
पातार्हं नयति च काञ्चन प्ररूढिम् ।
सङ्कल्पाविषयविचित्रकाकताली-
वार्यौघस्तरुमिव पूरुषं विधाता ॥४९७॥

यादृक् सुवासनः खानस्तादृशस्तस्य चेद् भटाः ।
भवेयुः किं न जायेत किं तु धर्मानुगो जयः ॥४९८॥

इत्थं फतहखानेऽस्मिन् प्राप्ते कश्मीरमण्डलम् ।
एकषष्टितमे वर्षे परुद्व्च्छ्रावणान्तरे ॥४९९॥

---

494 [d]) S'_7 (orig.) °ञ्ञाः पृशा (after corr. पदा) तयः; S'_3 C I_2 B °ञ्ञा प्रशान्तयः; I_1 °ञ्ञा पृष्कातयः; I_{3-5} D °ञ्ञाः ($I_{3.4}$ ञ्ञा) पृषातयः; K °प्राः प्रशातयः; M (evid. emend.) °ञ्ञैः प्रशान्तयः. —[e]) S'_3 C B जक्षुः.

497 [b]) $S'_{3.6-8}$ A C I_{2-4} K B कंचन; $I_{1.5}$ D काञ्चन (as in text.) —[d]) S'_8 (after corr.) A वार्योधः; S'_3 C वाय्वौघः.

499 [d]) I_{1-5} C D B पुरु°.

कटकद्वयसंयोगे कल्याणपुरसन्निधौ ।
अत्रत्यानां च बाह्यानां तत्तल्लोकक्षयोऽभवत् ॥५००॥

मैत्रर्क्षशनिसंयोगं मीलापं शनिजीवयोः ।
भौमाब्दं तत्क्षये हेतुं देशे दैवविदो विदुः ॥५०१॥

श्रीजैननृपते राज्ये षड्दर्शनरताः प्रजाः ।
दृष्टाः स्वधर्मनिरता निरातङ्का निरीतयः ॥५०२॥

तस्मिन् स्वर्गं गते राज्ञि नष्टाचारेऽत्र मण्डले ।
प्रजापचाराल्लोकानां क्षयोऽभूदिति मे मतम् ॥५०३॥

तथा हि वणिजः केचित् स्वाचारं हिन्दुकोचितम् ।
त्यक्त्वा पुरान्तरे चक्रुर्हत्वा गोमांसभक्षणम् ॥५०४॥

येनैव पितरो याता येन याताः पितामहाः ।
तद्दर्शनेऽत्र तत्पुत्रास्त्रपन्ते मौसुलप्रियाः ॥५०५॥

प्रत्यब्दं तिथिकार्याणि पुराणोक्तानि कानिचित् ।
विस्मृतानि दुराचारात् कथं न स्युर्दुरापदः ॥५०६॥

मण्डलेऽस्मिन् पुराचारचातुर्वर्ण्यविराजिते ।
प्रसङ्गपतिताचारविपर्यासादितीरितम् ॥५०७॥

राजाक्रान्तः परैर्मिथ्यावार्तयेति विसूत्रितः ।
मार्गेशस्ताजभट्टादीन् धृत्वा स्वशिबिरं ययौ ॥५०८॥

---

500 d) S'_{6-8} C I_{1-5} K D युगलकं after [अ]भवत्.

501 a) K मैत्रर्क्षं; RSs_2 मेत्र (sic)र्कं–. —b) S'_3 C मिलापं.

506 c) S'_3 C I_{1-5} दुराचाराः. K om. hapl. words beginning with कथं and ending with पुराचार in 507[a].

507 a) I_{1-5} C D B दु (mislec. for S'ar. पु)राचार (D रा); —b) S'_7 D चातुर्वर्ण्यं (sic).

508 c) A तात– (for °ज). —d) S'_3 C वृत्वा; $I_{1\cdot3}$ कृत्वा; M (evid. emend.) गतः (for ययौ).

पश्चाच्चेदलगिष्यत् स नष्टांस्तान् बलवर्जितान् ।
न किञ्चिदवशिष्येत खानस्य चलतः पथि ॥५०९॥

मार्गानभिज्ञो मार्गेशः सर्वेऽप्युभयवेतनाः ।
दायादुःस्थितिं लोके काङ्क्षन्तः स्वार्थलिप्सया ।
प्रैरयंस्तद्रणाद् गन्तुं मार्गेशं चाप्यदीदरन् ॥५१०॥

सनृपं सैन्यमुत्थाप्य ततो जिष्णुर्ज्यहाङ्गिरः ।
ज्यमालमरुगास्थानं ययौ स विजयोर्जितः ॥५११॥

किमेते मिलिताः खानमिति तेन विसर्जितः ।
ददाह ताजभट्टः स ग्रामान् मङ्गल्यनाडगान् ॥५१२॥

तत्तद्दग्धगृहोज्ज्वालधूमजालाकुलं नभः ।
घनकालोद्भवोद्दीप्ततडिदभ्रोपमां दधौ ॥५१३॥

कृतं यद् बाह्यदेशेषु काश्मीरैर्दिग्जयक्षणे ।
दाहलुण्ठ्यादिकं तद्वद् दृष्टमत्रैव मण्डले ॥५१४॥

अकिञ्चनान् जनान् नग्नान् विज्ञप्त्यै समुपागतान् ।
अद्यैव जातान् दृष्ट्वा तान् न कोऽप्याच्छादनं ददौ ॥५१५॥

तत्रत्यास्तद्धृतं कुप्यं रूप्यं धेनूः पशूनपि ।
दृष्ट्वोच्छ्वासाकुलाश्चक्रुराक्रन्दमुखरा दिशः ॥५१६॥

सर्वस्वहरणं यद्वत् कृतमस्मास्वहेतुकम् ।
युष्मास्वपि तथा भूयादचिरेण विरोधिभिः ॥५१७॥

---

509 [a]) $I_{1.3-5}$ D अलघिष्यत्. —[d]) $I_{1-3.5}$ D चलितः.

511 [c]) D ज्यमाला–; B (evid. emend.) जमाला.

512 [b]) MSS and C B विसर्जिताः (emended as in text.) —[d]) C B (evid. emend.) माङ्गल्य–; I_{1-5} D -नादु (mislec. for S'ar. ड)गान्; C B (evid. emend.) -नाद– (for °ड).

513 [b]) S'_6 K -ज्वाला° (for जा°). —[c]) $S'_{7.8}$ A $I_{3.5}$ K D B -कालोद्भवात्; $S'_{3.6}$ C $I_{1.2.4}$ (evid. emend.) -कालोद्भवो° (as in text).

तत्पापफलमेतेषु त्रिषु तन्मरणक्षणे ।
फताहशाहराज्याप्तौ दृष्टं लोकैर्विगर्हितम् ॥५१८॥

उत्पिञ्जोत्पादनाद् देशे शृण्वन्नित्यादि दूषणम् ।
प्रजापापादसन्धित्सुमार्गेशः स न्यवर्तत ॥५१९॥

सनृपो नगरं प्राप्तो विधाय विजयोत्सवम् ।
उच्चावचान् खानपक्षगतान् सर्वानदण्डयत् ॥५२०॥

एकं खानाग्रगं ज्ञात्वा शिष्टं तस्य कुटुम्बकम् ।
अबाधत न को देहे दुष्टरोग इवोल्बणः ॥५२१॥

कदाचित् सुप्रीतो जनयति सुखं सार्वजनिकं
कदाचिद् वक्रेच्छः सृजति जनतामीतिचकिताम् ।
फलं नीचं चोच्चं भविषु परिवृत्त्या विदधतो
ग्रहस्येवाकाशे गतिरिह विचित्रा बत विधेः ॥५२२॥

कंचित्कालं दरत्रस्तः खानस्त्राणविवर्जितः ।
ययावकिञ्चित्करतां सावग्रहः इवाम्बुदः ॥५२३॥

अत्रान्तरे स्थितः खानः स भैरवगलान्तरे ।
अचिन्तयत् पुनर्देशप्रवेशं नायकोर्जितः ॥५२४॥

मासद्वयमतिक्रम्य कश्मीराभिमुखस्ततः ।
आययौ स पुनः खानः सत्राण उद्भटैर्भटैः ॥५२५॥

---

518 b) S'_3 त्रितत् (for °षु); S_7 *pr.m. int. lin.* gloss मार्गेशताजभट्टेन मरुजा(sic)चेषु; MSS and C B -क्षणं (mislec. for S'ār.णे) —c) I_5 ह (mislec. for S'ār. फ)ता°; C -साह–.

519 a) I_{3-5} उत्पिञ्ज्यो°. —b) $I_{1.3.5}$ K D दूषणाम् .

522 a) $S'_{6.8}$ I_{2-5} K D सर्व–. —b) S'_3 C वक्रेच्छुः ; $S'_{6.8}$ A I_4 भीति– (for ई°); S'_7 *pr. m.* marg. gloss आतङ्कभीतां (for ईतिचकिताम्).

523 c) B यायाव°(corrupt). —d) I_{2-4} C B अवग्रह.

तस्मिन् शूरपुरं प्राप्ते सन्नृपोऽथ ज्यहाङ्गिरः।
निर्ययौ नगरात् तूर्णं संपूर्णः सैन्यसम्पदः ॥५२६॥

प्राग्वत् स गुसिकास्थाने निषण्णः शिविरान्तरात्।
गक्कराजसुतं रात्रौ सोऽशृणोद् विद्रुतं द्रुतम् ॥५२७॥

आरोहणक्षणे तस्य तुरङ्गस्यासमग्रहीत्।
क्षणं स शकुनज्ञोऽपि नातिष्ठन्निष्ठुरः क्रुधा ॥५२८॥

गृहीतभूरिवित्तोऽपि यत्रैष द्रोहितामगात्।
कोऽन्यस्तिष्ठति तत्रेति त्रस्तः प्रत्यागतोऽभवत् ॥५२९॥

सुलग्ने निर्गतो भूयो मार्गेशः शिविरान्तरात्।
उपायांश्चिन्तयाञ्चक्रे खानस्य बलभेदने ॥५३०॥

अत्रान्तरे शूरपुराज् जेरकाद्या महाभटाः।
प्रविश्य नगरं रात्रौ बन्धनस्थानमोचयन् ॥५३१॥

ते सर्वे बन्धनान्मृत्युद्वारादिव विनिर्गताः।
सैफडामरमुख्यास्ते संप्रापुर्विजयेश्वरम् ॥५३२॥

स सैफडामरः पूर्वं बन्धने स्वप्नमैक्षत।
केनाप्येत्य पदद्वन्दं छिन्नं शस्त्रेण तन्निशि ॥५३३॥

वीरस्य बन्धने ह्यस्य स्फूर्जत्पक्षस्य रक्षणम्।
सोष्मणः पतितं मेने वह्नेर्वस्त्रावगूहनम् ॥५३४॥

---

527 [a]) B गुप्ति (mislec. for Dev. सि)का-.

530 [c]) S'_8 A चिन्तयंश्चक्रे. —[d]) MSS and C B -भेदनं (mislec. for S'ar. ने).

531 [b]) B (evid. emend.) जीराका°. —[c]) B नगरे (mislec. for रं).

533 [c]) D B [अ] न्य-; $S'_{3\cdot6}$ A C एतत् (for °त्य).

434 [a]) I_{1-5} C B बन्धनं (mislec. for S'ār. ने). —[b]) S'_3 hapl. om. स्फूर्जत्पक्षस्य. —After 534 MSS (except A) C B ins. तथापि रक्षणं वह्नेरिव वस्त्रावगूहनम् v. l. for 534[cd].

जयापीडपुराद् दुर्गाद् बन्धनं नगरे कथम्।
इत्यपायोऽप्युपायोऽस्य जातो मार्गपतेर्यतः ॥५३५॥

एभ्राहिमः स मार्गेशस्तावत् पश्चाद्विनिर्गतः।
शंशनायकमुख्यानां बहूनां कदनं व्यधात् ॥५३६॥

ठक्कुराह्मदजेराकप्रतीहारान्वयादयः ।
इत्थं तत्साहसं चक्रुर्लङ्घितक्रोशषष्टयः ॥५३७॥

विपदि समनुभूय कोऽपि कष्टं
भवति पदं नृपसम्पदां नितान्तम्।
कनकमनलपातघातमाप्त्वा
शिरसि विभाति नृपस्य मौलिरूपम् ॥५३८॥

कारापञ्जरनिर्मुक्तः पक्षीवाक्षतपक्षतिः।
पुनर्जातमिवात्मानममन्यत स डामरः ॥५३९॥

पूर्वं जयपुरे दुर्गे योऽभूद् बद्धः सहोदरः।
काराप्राकारमुल्लङ्घ्य रज्जुनैकोऽपि निर्गतः ॥५४०॥

रुद्धः सुप्तः पुनर्बद्धो नगरे बन्धनालये।
निश्चितोऽस्य वधस्तत्र द्विष्टैर्द्वित्रदिनान्तरे ॥५४१॥

---

535 K om. hapl. 535[cd]. —[c]) MSS and C B [अ] प्युपायस्य (emended as in text).

536 [a]) B (evid. emend.) इभ्रा°. —[c]) $S'_{3\cdot6\cdot8}$ A C शंष–; K शे (mislec. for S'ār. शं) ष–.

537 [a]) B (evid. emend.) -जीराक–.

540 [b]) M (evid. emend.) रुसोदरः.

541 [c]) MSS and C B ानश्चिन्तितं (S'_8 A C त) (emended as in text with M). —[d]) $S'_{6.8}$ A C $I_{1\cdot2\cdot4}$ -द्वित्रि–.

एवं कष्टात् ततो मुक्तः प्राप्तः खानान्तिकं क्रमात् ।
प्रधानपुरुषाख्यातिं प्रापत् प्रकृतिमध्यगः ॥५४२॥

रामो रावणवञ्चितो यदि गृहान्नैवागमिष्यद् वनं
सुग्रीवः स च वालिना हृतपदो नैवाघटिष्यद् रुषा ।
लङ्कां प्राप्य रिपून् निहत्य समरे जेताभविष्यत् कथं
संयोगं सुखदुःखयोः प्रतनुते धातैव भूत्यै द्वयोः ॥५४३॥

राज्यार्थी विच्युतो देशात् खानो वीराप्तिलम्पटः ।
डामरो मार्गपक्रुद्धः सर्वनाशात् पदच्युतः ॥५४४॥

एवमन्योन्यसापेक्षं नाभविष्यत् स्वयं यदि ।
प्रविश्य देशे राज्याप्तिः कथमस्य भविष्यति ॥५४५॥

राजा विभाति बहुवीरसमाश्रयेण
वीरा भजन्ति च तदाश्रयणेन शोभाम् ।
अन्योन्यसंगतिरभङ्गुरभङ्गिरेषां
बालाङ्गनाकनकभूषणवद् विभाति ॥५४६॥

तेन प्राप्तेन सा खानसभा तत्र व्यराजत ।
मुक्तालतेवाङ्गनाङ्गे नायकेन शुभात्मना ॥५४७॥

अत्रान्तरे मार्गपतिश्चकितस्तत्समागमात् ।
सन्धित्सुः शिखवाहाबमुखान् खानं व्यसर्जयत् ॥५४८॥

---

542 After 542 MSS and C B ins. स सैफडामरस्तत्र यथासङ्कथमत (S'_6 A त:) स्थितः । कुलकम्.

543 b) $S'_{3.6-8}$ A C $I_{1.4}$ K B कृत–; $I_{2.3.5}$ D हृत– (as in text).

544 c) B डामरा. —I_5 om. 544-545.

547 c) S'_3 (by syll. hapl.) लतेवाङ्गे... (for लतेवाङ्गनाङ्गे).

548 c) I_3 C सन्धित्सु–; S'_6 A शिखि–; B (evid. emend.) शेख–; S'_6 A C -वाहार्थ– (mislec. for S'ār. ब). —d) S'_3 C -मुखं; D B -मुखात् (mislec. for Dev. न्).

एधराजानको रिगडामरः केशवो बुधः ।
राजाग्रमेत्य सन्ध्यर्थं निन्यू राजपुरीपतिम् ॥५४९॥

तावद् गदायरावुत्रमुखादाश्वास्य मार्गपः ।
शृङ्गारसीहं तं भेदमनयद् द्रविणार्पणैः ॥५५०॥

नीत्वा मार्गपतेः पुत्रं सन्धित्सुः स बलद्वयम् ।
न्यवारयद् रणक्षोभं यावद् राजपुरीपतिः ॥५५१॥

तावन्मार्गेशपुत्रं तं रोद्धुमन्यैर्विनिश्चितम् ।
नामन्यत स यत्तेन साशङ्का मन्त्रिणोऽभवन् ॥५५२॥

यावत् प्रजासु सनृपासु विधिर्विरुद्धो
दायाददुःस्थितिरुपायशतैर्न याति ।
देहे दुराधिनिहते भिषजां प्रयुक्त्या
रोगाः कथं प्रविगलन्ति कृताधिकाराः ॥५५३॥

खानान्तरङ्गैराक्षिप्ते भिन्ने राजपुरीपतौ ।
अकस्मादुदभूत् क्षोभः सर्वसैन्यभयावहः ॥५५४॥

गङ्कशृङ्गारसीहाद्यास्त्रस्ता राजपुरीं ययुः ।
खानोऽपि सबलो भीतो ययौ प्राग्वद् यथागतम् ॥५५५॥

केचिज् जेराकमेराद्याः प्रापुर्मार्गेशसन्निधौ ।
ज्यल्लालठक्कुरप्रेम्णा कृतमाध्यस्थ्यसंविदः ॥५५६॥

---

549 d) S'_3 C I_{2-4} D B निन्ये.

550 a) S'_3 $I_{3\cdot5}$ -रावत्र-.

551 b) MSS and C B -द्वये (mislec. for S'ār. यं).

552 c) MSS and C B यत्ने (mislec. for S'ār. त्ते) न.

553 b) S'_3 C K -दुस्थितिः.

556 a) B (evid. emend.) जीराकमीरा°. —c) B (evid. emend.) जल्लाल-; C प्रेम्ना.

एवं क्षोभेण सा सेना खानस्याङ्ग तरङ्गिता।
ययौ सहस्रधा दीर्णा सेतुभङ्गादिवापगा ॥५५७॥

अथ मार्गपतिः श्रुत्वा तद्वृत्तान्तमनुद्रुतः।
युयुत्सया ससैन्यः स प्रापच्छूरपुरान्तरम् ॥५५८॥

तत्र दूतमुखाच्छ्रुत्वा क्रामराज्यमुपद्रवम्।
शाहिभङ्गबलप्राप्त्या चिन्ताद्वैगुण्यमादधे ॥५५९॥

निवृत्त्य स ततो राज्ञः प्राप्तः सुय्यपुरान्तरम्।
बबन्ध नौरुजं खानं युक्त्या यत् साधु तद् व्यधात् ॥५६०॥

स हि तद्दिवसे प्राप्स्येन्मुष्णञ् श्रीगरं विटैः।
किं तु तत्काङ्क्षितं क्रूरं न सिद्धं पौरपुण्यतः ॥५६१॥

सोऽपेक्ष्य मार्गपं तत्र ढौकितं क्रमराज्यतः।
पदार्थराशौ दत्त्वाग्निं तद्रुषा भस्मसाद् व्यधात् ॥५६२॥

अन्यायतः प्रतिदिनं समुपार्ज्य वित्तं
यद्दानभोगरहितं निहितं गुहान्तः।
तत् संप्रयाति कृपणेषु कृतानुतापं
भूपालसादनलसादरिदस्युसाच्च ॥५६३॥

ततस्तत्सहितः प्राप्तो नगरं स ज्यहाङ्गिरः।
जयेन तावन्मात्रेण नगरे स व्यजृम्भत ॥५६४॥

---

557 a) $I_{1.3.5}$ D क्षोभेन.

559 b) S'_3 C $I_{1.3}$ B क्रम–; M (evid. emend.) °राज्य उप°.

560 a) C B निवृत्य. —c) S'_6 नोरुजे (mislec. for. S'ar. जं); $I_{3.5}$ D (after corr.) B नौरुजा.

561. a) $S'_{3.6}$ A C प्राप्ते. —b) S'_3 C [अ] मुष्णात्.

562 c) M (evid. emend.) -राशिं.

सैदान् निष्कासितान् देशात् स्वपुत्रवधकानपि ।
लेखैरानाययामास स्वोपयोग्यतया स तान् ॥५६५॥

तदन्तरे जम्भवाटे वसन् खानो बलोर्जितः ।
मृगानिव हरिस्तत्र विदधे दुर्दशान् खशान् ॥५६६॥

सप्तविंशतिसङ्ख्यान् स कश्मीरविषयान् यथा ।
तावतीः सिन्धुरीस्तत्र व्यधाद् दुःस्थः पराक्रमैः ॥५६७॥

सार्धं मल्हानहंसैस्तत्कटकः सुभटोत्कटः ।
मद्रमण्डलमुल्लङ्घ्य तुरुष्कांश्चकितान् व्यधात् ॥५६८॥

स ब्रह्ममण्डलं जित्वा दत्त्वा राजपुरीपतेः ।
जिष्णुश्चैत्रे पुनः प्राप तद्युतो नायकालयम् ॥५६९॥

गृहं दैवतवत् प्राप्तं खानं तं मानयन् गुणैः ।
मसोदनायकोऽमुष्मिन्नाभवद् भक्तिखण्डितः ॥५७०॥

सागरस्त्यजति चेन्निजां स्थितिं
पश्चिमोदयमुपैति चेद्रविः ।
क्षत्रियः शरणमागतेऽर्थिनि
प्रायशश्चलति न स्वधर्मतः ॥५७१॥

स सैन्यसंग्रहं कृत्वा छयिल्लकटकान्वितः ।
तस्थौ खानो गिरेः शृङ्गे वैरिभङ्गविधित्सया ॥५७२॥

---

565 a) S'$_8$ A C I$_{1\text{-}4}$ B निष्काशि°. —d) S'$_3$ I$_{1-4}$ C K D B सो° (for स्वो); M (evid. emend.) [उ]पयोग°.

566 a) C जन्म– (for °म्भ).

568 c) S'$_3$(*sup. lin.*) $_{6-8}$ C$_{1-5}$ K D B उल्लुष्ठ्य; S'$_3$ A उल्लङ्घ्य (as in text).

569 a) S'$_3$ C I$_{1-5}$ D B मद्र– (for ब्रह्म); RSs$_2$ also notices ब्रह्म–.

570 c) B (evid. emend.) मसूद–.

572 b) S'$_7$ *int. lin. pr. m.* gloss छिडा इति देशभाषया (for छयिल्ल–). —c) S'$_{3\text{-}7}$ C I$_{1-5}$ K D B गिरि– (emended as in text with S'$_{6\text{-}8}$ A).

रोगैरिव भटैर्ध्वस्तसमस्तगृहवस्तुभिः ।
वास्तव्यानां स्थितिर्दुःस्था गेहे देहे यथाभवत् ॥५७३॥

अत्रान्तरे बन्धनान्तर्गतं पृष्ठकवाटितम् ।
भीतो व्यापादयामास जेराकं नगरेऽध्वपः ॥५७४॥

तच्छ्रुत्वा राजलोकश्च सर्व एव विरागभाक् ।
आश्वासघातकत्वेन दुरुक्तिमुखरोऽभवत् ॥५७५॥

ज्येष्ठे मासि श्रुतानिष्टो मार्गेशः कष्टनिष्ठितः ।
अतिष्ठत् सनृपो मल्लशिलापृष्ठेऽतिनिष्ठुरः ॥५७६॥

द्रङ्गमार्गनिरोधेन सर्वोऽप्युभयवेतनः ।
जनो बलद्वयं गन्तुं निराशः समपद्यत ॥५७७॥

विशां निर्लवणं भोज्यमश्नतामत्र मण्डले ।
मार्गेशव्यञ्जनं नाम श्रुतं हास्यावहं न कैः ॥५७८॥

सार्धे पले सैन्धवस्य क्रयोऽभून्नगरान्तरे ।
दीनारपञ्चविंशत्या दुरापं नागरैरपि ॥५७९॥

द्वाषष्टितमवर्षेऽपि कश्मीरागमनोत्सुकम् ।
खानं श्रुत्वा मार्गपतिर्नीतिकौटिल्यमादधे ॥५८०॥

दौहित्रं हाज्यिखानस्य खानमेस्कन्दराभिधम् ।
कम्पनाधिपतिं कृत्वा स्थामार्थं स व्यसर्जयत् ॥५८१॥

---

573 c) $S'_{6\cdot8}$ C दुस्था.
574 b) S'_7 *int. lin. pr. m.* gloss तौकसहितं (for पृष्ठकवाटितम्). —d) B (evid. emend.) जीराकं; S'_7 *int. lin. pr. m.* gloss मार्गपतिः (for अध्वपः).
575 a) M (evid. emend.) राजा.
576 a) S'_{6-8} A C ज्यैष्ठे. —c) $S'_{6\cdot8}$ $I_{2\cdot3\cdot5}$ K D पल्ल–.
579 d) C K D नगरैः.
581 b) B (evid. emend.) इस्क°.

मसोदनायकीयं च राष्ट्रं दत्त्वा स्वगुप्तये ।
यश्शराजानकं चापिससैन्यं प्रत्यमुच्यत ॥५८२॥

समं देशसुखेनाथ प्रालेये तनुतां गते ।
स्वसैन्यसहितः खानो राजपुर्याः समाययौ ॥५८३॥

प्राप्तं खानं समाकर्ण्य तं भैरवगलान्तरे ।
मार्गे शूरपुरे रोद्धुं मार्गेशः सनृपो ययौ ॥५८४॥

प्रवेशरोधः खानस्य तदूर्ध्वगलवर्तिनः ।
राहुदेहेऽमृतस्येव देशेऽभूच्चक्रभीतितः ॥५८५॥

पशुपादिष्टमार्गेण परुद्धच्छ्रावणान्तरे ।
ततोऽगाद् गिरिमुल्लङ्घ्य खानः काचगलान्तरात् ॥५८६॥

ताजभट्टादिसैन्यौघो गुसिकोड्डारभूतले ।
क्षुब्धं वायुरिवागत्य चक्रे खानबलार्णवम् ॥५८७॥

ध्वनिदुन्दुभिनादेन तर्जयन् परितो जनान् ।
खानः सकटको भीत्या नगरं व्याकुलं कृतम् ॥५८८॥

उड्डीयेवागतं श्रुत्वा साश्चर्यो मार्गपस्ततः ।
ससैन्यः सनृपस्तूर्णं तद्युद्धाय समाययौ ॥५८९॥

---

582 a) B (evid. emend.) मसूद–. —b) C स्वगप्तये. —c) S'_6 A याश– (mislec. for S'ār. यश्श). D B यःश–.

585 b) C B (evid. emend.) -वर्तितः.

586 b) I_5 B पुरुद्ध°. —d) $S'_{3.7}$ A I_{1-5} D B (by syll. contam.) खाच - (for का°).

587 b) $S'_{6.8}$ A K D -डार–. I_{1-5} om. 587.

588 c) M (evid. emend.) [अ]भ्येत्य (for भीत्या). —d) $I_{2.5}$ क्षतम् (for कृ°).

589 d) S'_3 वधाय (for युद्धा°).

उड्डामरो डामरः स शौर्यश्रीगरुडामरः ।
रणे डामरयागेऽन्तर्बभावुच्छुष्मरुद्रवत् ॥५९०॥

केचित् सैदभटास्तत्र युध्यन्तः सुभटैः सह ।
अनिवर्तितया याता दिव्यस्त्रीसुखभागिताम् ॥५९१॥

श्वभ्रपातरणाघातक्षतानां तत्समागमे ।
शवानां राशयस्तत्र पतिताः समरान्तरे ॥५९२॥

न सैदयुद्धे नो खानागमप्रथमसङ्गरे ।
भटक्षयोऽभवद् यादृग् गुसिकोड्डारसङ्गरे ॥५९३॥

प्रमेयभाजोऽप्यासन् ये रणे मुख्या निजोचितम् ।
शौर्यं नादर्शयन् केचित् साक्षिभूता इव स्थिताः ॥५९४॥

पातनेनेव वृक्षस्य पक्षिशावा इव च्युताः ।
गता हताः क्षताश्चासन् यत्र तत्र शवव्रजाः ॥५९५॥

पूर्वापकारी यो यस्य ग्रामे वा नगरेऽभवत् ।
स तस्य बाधां कृतवान् दुर्बलस्य बली तदा ॥५९६॥

मसोदनायकस्तत्र सायकायुधवर्षणे ।
रुद्धाश्वो विजहौ प्राणान् भावि केन विलङ्घ्यते ॥५९७॥

कृत्वान्यान् युद्धगान् यत्र मार्गेशोऽगात् स्वरक्षया ।
श्रीसैफडामरो वीरयुतस्तत्रैव सोऽभवत् ॥५९८॥

---

590 c) B (evid. emend.) -योगे-.

593 d) $S'_{6\cdot8}$ A K D °डार-. I_2 hapl. om. 593cd.

596 c) S'_3 I_{3-5} C B बाधं.

597 a) B (evid. emend.) मसूद-.

यो गवेष्यः स चावाप्त इति तुष्टो भटावृतः ।
प्रथमं प्राहरत् तस्य मूर्ध्नि श्रीसैफडामरः ॥५९९॥

अलंशिरो हैधरश्च स च क्रूरा इव ग्रहाः ।
मुखे भुजे कपाले च घ्नन्तस्तं विवशं व्यधुः ॥६००॥

अथ मार्गपतेः स्वर्णमयीं मङ्गलमालिकाम् ।
सचामरां डामरेशो जयश्रियमिवासदत् ॥६०१॥

उपेक्षितं तं तत्रस्थैर्निजैराश्वस्तमानसम् ।
ररक्ष केवलं प्रीतो जात्यश्वः समराच्चलन् ॥६०२॥

विहितारित्रप्रसराः सचिवाः सममेकपार्श्वगताः ।
यत्र सुशस्त्रप्रचिता मज्जति नौकेव राजश्रीः ॥६०३॥

वैदेशिकभटैर्द्रोहे विहिते समरागमे ।
तावत् ते कत्थवाडाद्या निन्युः खानं यथागतम् ॥६०४॥

खानो राजभटैर्बद्धो रणे मिथ्येति वार्तया ।
स सैफडामरो युद्धात् स्रस्तधैर्यो न्यवर्तत ॥६०५॥

तत्तद्वराश्वसामग्रीं गृह्णन् शूरपुराध्वना ।
समरोड्डामरः सैफडामरः खानमासदत् ॥६०६॥

---

599 a) $S'_{6\cdot8}$ A I_{1-5} एवाप्तः.

600 a) B (evid. emend.) हैदरः.

601 a) S'_7 $I_{1\cdot2\cdot5}$ K D B स्वर्णमयी (emended as in text); I_4 om. °मयीं; S'_3 C I_3 (evid. emend.) -वर्ण- (for °मयीं). —ab) $S'_{6\cdot8}$ A °मयीमङ्गद- (for मयीं मङ्गल).

603 d) $S'_{6\cdot8}$ A राज्यश्रीः.

604 a) $I_{1\cdot3-5}$ D (gram. assim.) द्रोहैः. —c) $I_{4\cdot5}$ A K करू (I_4 र्थ) (mislec. for S'ār. त्थ) वा°.

इत्थं तृतीयवारं स प्रविष्टो मण्डलान्तरात् ।
वधं कृत्वा विनिर्गत्य खानः पर्णोत्समागतः ॥६०७॥

अधर्मबहलः कालः सर्वे द्रोहपरायणाः ।
राजा शिशुतरश्चायं स्वतन्त्रं मन्त्रिमण्डलम् ॥६०८॥

अविधेया निजाश्चामी खानपक्षप्रतीक्षिणः ।
पौरा निरनुरागाश्च निष्कोशं नृपमन्दिरम् ॥६०९॥

सत्ता नाम न वृद्धस्य सर्वसामर्थ्यवर्जिता ।
इति स्वं चिन्तयन् शस्त्राघातजातव्यथाकुलः ।
मासौ द्वौ गमयामास मार्गेशोऽपि स्ववेश्मनि ॥६१०॥

दृष्ट्वा महार्धमणिमौक्तिकविद्रुमौघान्
रत्नाकरं श्रयतु सोऽपि सुलाभलोभात् ।
यस्तान् महाभयकरान् मकरांस्तदीयान्
वीर्येण वारयितुमुज्झितभीः समर्थः ॥६११॥

अत्रान्तरे पुनः खानश्चटिकाशारपर्वतात् ।
इतो यातैर्भटैः सार्धं लब्धत्राणः समाययौ ॥६१२॥

तस्मिन्नभ्यन्तरं प्राप्ते मुदितैरिव पर्वतैः ।
तदहःपतितं दध्रे तुषारं सुसिताम्बरम् ॥६१३॥

---

607 [b]) I_{1-5} (evid. emend.) °न्तरं; K °न्तरे (mislec. for S′ār. रं).
—[d]) RSs_2 notices पलो (prob. mislec. for S′ār. र्णो) त्स°.

608 [a]) S'_6 D -बहुलः.

610 [a]) M (evid. emend.) नु (for न); S'_8 A युद्धस्य. —[c]) C (evid. emend.) B सञ्चिन्तयन्. —[d]) K -भीति- (for जात).

611 [a]) A महार्थ-. —[b]) $S'_{6\cdot8}$ A स्व- (for सु).

612 [b]) B चटिकासार-.

613 [a]) S'_7 $I_{3\cdot5}$ C D B °भ्यन्तरे (mislec. for S′ār. रं).

ग्रामान् प्रज्वलितान् दृष्ट्वा तद्वार्ताचकितस्ततः ।
मार्गेशो बाङ्गिलं त्यक्त्वा सबलो योद्धुमभ्यगात् ॥६१४॥

तावन्मितपरीवारो बहुरूपान्तराद् गतः ।
प्रापद् दामोदरोड्डारभूमिं डामरसंयुतः ॥६१५॥

सनृपो मार्गपः पश्चात्तनवायुरिवोर्जितः ।
सैन्यं न्यवेशयत् तत्र सातदैवतसन्निधौ ॥६१६॥

सव्यूहो जातयुद्धेहो निशान्ते सैफडामरः ।
बभञ्ज मार्गपानीकं दामोदर इवोत्थितः ।।६१७॥

चित्रं हैधरशाहस्य यन्न सिद्धं त्रिधागमैः ।
अहो हीनबलस्यापि सिद्धमस्य विधेर्वशात् ॥६१८॥

किमन्यदल्पसैन्योऽपि खानः कश्मीरकुञ्जरान् ।
हतविद्रुतविध्वस्तयूथान् सिंह इव व्यधात् ॥६१९॥

प्राग्वत् सोऽनिष्टमाशङ्क्य मार्गपः सैफडामरात् ।
अन्येषां वीक्ष्य ताटस्थ्यं प्रपेदे नगरान्तरम् ॥६२०॥

छिन्नेषु सेतुबन्धेषु प्राक्सैदद्वैधवत् तदा ।
पारावारगताः पौरा द्वैराज्याकुलतां दधुः ६२१॥

पिर्वजप्रतिहाराद्याः प्राप्ता मडवराज्यतः ।
नृपपक्षं परित्यज्य खानपक्षं समाश्रयन् ॥६२२॥

---

614 a) C (evid. emend.) प्रचालतान् (for प्रज्व°). —c) K भाङ्गिलं.
615 c) $I_{1\cdot3\cdot4}$ B प्राप; S'_6 A °डार–.
617 a) S'_8 मात–.
618 a) S'_3 C I_{1-5} D B हैदर–.
621 d) A ययु: (for दधु:).
622 a) B (evid. emend.) पेरोज–.

स्वभेदजर्जरं ज्ञात्वा सैन्यं द्विता निशोऽनयत् ।
सैदवत् स्कन्दभवने किंकर्तव्यतयाकुलः ॥६२३॥

एकदा सर्वसैन्येशं कृत्वा मेयामहम्मदः ।
नोसराजानकयुतो द्रोहं स्वामिनि तद्व्यधात् ॥६२४॥

यथा चित्तं तथा कायो यस्य स्यात् साहसक्षमः ।
तस्यात्मनिरपेक्षस्य कर्तव्यं किं न सिध्यति ॥६२५॥

भागिनेयं नृपपदेऽप्युपेक्ष्य स्वार्थलुब्धधीः ।
द्रोग्धाभूद् यत् स तेनाभूत् सर्वनाशस्य कारणम् ॥६२६॥

नष्टसैन्यः सदैन्योऽथ मार्गेशः शरणं भयात् ।
ज्यल्लालठक्कुरं प्रायात् खूयाश्रमस्थितं हितम् ॥६२७॥

यथैव स विरुद्धानामकरोच्छसनादिकम् ।
तादृशीं स दशां प्रापद् धिक् चला राजसम्पदः ॥६२८॥

सप्तग्रहानुगुणधारितसप्तवार-
वर्णांशुकोपचितवेशविशेषभूषः ।
बहामभूप इव योऽभवदष्टभोगः
प्राप्तो दशामितरवत् स धिगस्तु लक्ष्मीम् ॥६२९॥

---

623 b) B °नयन् (mislec. for Dev. त्).

624 b) S′$_{7\cdot8}$ I$_{2\cdot5}$ D -महाम (mislec. for S′ār. हम्म)दः. —c) S′$_7$ I$_{1-5}$ K D B नस– ; S′$_{3\cdot6\cdot8}$ A C नोस– (as in text).

625 a) S′$_{6\cdot8}$ A K यथा (for त°).

626 a) B भोगिनेयं (corrupt).

627 d) A ख्य (mislec. for S′ār. खू) या°; S′$_{6-8}$ ख्यर्वा°; S′$_3$ I$_{1-3\cdot4}$ C खर्वा°; K ख्यवी°; I$_5$ जर्वा°; D B पूर्वा° (for खूया).

628 b) MSS and C शासना°; B (evid. emend.) शसना° (as in text).

629 a) A (evid. emend.) -ग्रह– (for गुण). —c) C -भोग–.

क नृपः क मदीयं तत्सर्वस्वं क परिच्छदः ।
नास्मरत् तद्दिने किञ्चित् प्राप्तो मुनिगुहान्तरम् ।६३०॥

राजदारापहारोत्थपापभारादिवार्दितः ।
तद्भ्राता नाशकद्गन्तुं नावं स्त्रीसहितोऽविशत् ॥६३१॥

अन्ये सैन्याः सदैन्याः गिरिबिलविगलद्वासरा धूसराभाः
तिष्ठन्तो दिष्टरिष्टोद्गतघनविलसद्वृष्टिनिर्नष्टचित्ताः ।
द्विष्टैर्दुष्टैर्गरिष्ठैः परिहृतवसनाः पृष्ठलग्नैर्निकृष्टाः
कारागारान्तराले पशव इव बलात् ते निरुद्धा विरुद्धाः ॥६३२॥

गर्जन्तो मुमुषुः परे जनपदान् दुष्टाः खशा दस्यव-
स्तद्भीत्या परिहृत्य सर्वमचलन् नग्ना नरा वा स्त्रियः ।
मार्गेष्वप्यबला हता बहुबलैः पूर्वापकारस्मृतेः
सोऽभूद् राज्यविपर्ययोऽतिभयदः कल्पान्तकालोपमः ॥६३३॥

सर्वस्वोल्लुण्ठने तस्मिन् धनिनां दुःसहे पुरे ।
आसन् दरिद्रा अत्याढ्या आढ्या दारिद्र्यभागिनः ॥६३४॥

ये स्युर्द्रुमाः सदलपुष्पफलाभिरामा
नद्यस्तरङ्गतरलाः सरवाः पिकाद्याः ।
ते शीर्णशुष्कजलमूकमुखा हिमर्तौ
किं तत्र यद् भवति कालविपर्ययेण ॥६३५॥

---

630 b) A सर्व. —d) A -गृहा°.

632 a) S'_6 (before corr.). $_8$ A K सैन्यान्; $S'_{7\cdot8}$ A D सदैन्यान् (A त्); A -विलसद्° (corrupt) (for °गल°). —b) $S'_{7\cdot8}$ A I_{1-5} K D B संतिष्ठत् (S'_8 A K न्); C तिष्ठन्ता; S'_3 तिष्ठन्तो (as in text); S'_6 (evid. cmend.) सन्ति (for तिष्ठन्तो); S'_6 A -निर्ण(A लु)ष्ट- .

633 a) M (evid. emend.) जनपद°. —d) $S'_{6\cdot8}$ A -बल ($S'_{6\cdot8}$ marg. भय)दः .

634 b) S'_6 A धन्विनां.

635 b) $S'_{6\cdot8}$ पिकाद्याः (marg. द्याः). —c) A शील- (mislec. for S'ār. र्ण).

ते राजवल्लभा रम्यास्ताः स्त्रियस्ते च सेवकाः ।
कथावशेषतां यातास्तस्मिन् नष्टदले नृपे ॥६३६॥

इत्थं वर्षद्वयं सप्त मासान् भूत्वा नृपासने ।
नृपो द्वाषष्टिवर्षे स द्व्याश्विने भ्रंशमाप्तवान् ॥६३७॥

राजा मल्लदखाहः स विंशप्रस्थान्तरात् ततः ।
आनीय फिर्यपालेन शत्रुपक्षे समर्पितः ॥६३८॥

राजधान्यङ्गने राजवासे तं मनुजैः सह ।
विधाय वृत्तिं संपूर्णां ररक्षुर्डामराधिपाः ॥६३९॥

राज्यप्राप्त्या सुखं तादृक् तस्य नासीत् सुदुःस्थितेः ।
यादृक् तद्भ्रंशतस्तस्य नृपमन्त्रिप्रसादतः ॥६४०॥

सैदद्वैधवधाल्लुण्ठिः पुरेऽभूत् त्रिगुणा तदा ।
खशैः कृता दाहवर्जं तस्मिन् राजविपर्यये ॥६४१॥

प्रधानवणिजः केचित् कोटिसञ्चयवञ्चिताः ।
तृणमात्रावृतैरङ्गैस्तस्थुस्ते रक्षितासवः ॥६४२॥

दिनत्रयं ददामो वो मोषणं यदि जीयते ।
इति वैदेशिकोत्कोचे सापेक्षा मन्त्रिणोऽभवन् ॥६४३॥

---

636 d) S'_3 नष्टब (after corr.) ले; A -दशे (for °ले).

637 b) I_2 हृत्वा (for भू°). —d) S'_3 C I_2 B द्वि (for द्वि); $I_{1.4}$ हि (I_1 ध्या) शिने.

641 a) $S'_{3.7}$ C I_{1-5} K D B -वधे ($I_{1.2}$ धो); $S'_{6.8}$ A -वधात् (as in text); $S'_{3.6.8}$ C I_{1-5} लु(I_2 ल)ब्धिः ($S'_{6.8}$ marg. ण्ठिः). —b) $S'_{3.7}$ C I_{1-5} K D B ततः; $S'_{6.8}$ A तदा (as in text).

643 b) S'_{6-8} A C I_{1-5} K मेषणं (emended as in text with S'_3

काश्मीरिका यथा लुण्ठि बहिर्यात्रागता व्यधुः ।
तथा वैदेशिकाश्चक्रुः काले किं किं न दृश्यते ॥६४४॥

प्रतिपदभ्रमणैः सपरिश्रमा
मधुकरी तनुते मधुगोलकम् ।
निहितधूमतया विनिवार्य तां
तमुपलभ्य परः सुखमश्नुते ॥६४५॥

कष्टैः षण्मासपर्यन्तं महद्भिः सञ्चितं गृहे ।
अयत्नमपरैर्भुक्तं सर्वं तत् खानसंश्रितैः ॥६४६॥

रक्ताक्ततृणपूगान्तः क्षिप्तं कैरपि यद्धनम् ।
न नीतमशुचिस्थानसूतिकास्तरणभ्रमात् ॥६४७॥

सद्युम्ननिम्नकुम्भाम्भःपक्षिपुष्करिणीकृतैः ।
रक्षितं कैरपि द्रव्यं नीतं ताडित्रदर्शनात् ॥६४८॥

सत्यं ब्रवीमि धनिकाः शृणुतास्मदुक्तं
यत् सञ्चितं वसु गृहे परवञ्चनाद्यैः ।
तद् भोगदानसफलं कुरुताविलम्बं
नो चेद् वृथा स्मरत राज्यविपर्ययेऽस्मिन् ॥६४९॥

D B); S'_3 A C I_2 B जायते. —[c]) S'_7 $I_{2.4.5}$ D °त्कोचाः; S'_3 C $I_{1.3}$ K B °त्कोच ($I_{1.3}$ K चा); $S'_{6.8}$ A °त्कोचे (as in text). —[d]) $S'_{6.8}$ A $I_{1.4}$ सोप ($I_{2.4}$ पे)क्षाः .

645 [b]) I_2 -रौ (prob. mislec. for S'ār. गो)लकम् ; B -गोकुलम् (corrupt).

648 [a]) MSS and C B °म्भः: (prob. mislec. for S'ār. न्तः). —[d]) $S'_{3.6.8}$ A C K B ताडित (K भ mislec. for S'ār. त)द°.

भग्नभाण्डकरण्डालीः प्रसार्य परितो गृहे ।
मुषिताः स्म इति व्याजात् खशाः कैरपि वञ्चिताः ॥६५०॥

जलान्तरशवागारान् शून्यानापूर्य वस्तुभिः ।
ररक्षुर्नागराः केऽपि शून्यीकृतगृहा धनम् ॥६५१॥

तैर्निर्वर्तितगर्तान्तः क्षिप्तैः पौरधनैर्धनैः ।
तस्मिन् काले प्रतिपदं सत्यार्थाभूद् वसुन्धरा ॥६५२॥

मार्गरोधोद्यतैः सर्वैः क्षेपणीयाश्मवर्षिभिः ।
राजानवाटिकीयैस्तैस्तत्कालं साहसं कृतम् ॥६५३॥

कर्मस्थाननिधानसर्पसदृशप्रोत्सारणादिण्डिमो
द्विष्टप्राक्तनसेवकाम्बुजघटाहेमन्तकालोदयः ।
भूपक्ष्मामधुगोलकस्थसरघासङ्घातधूमोद्गमः
सोऽभूद् राज्यविपर्ययो नवसभोद्यानद्रुमालीमधुः ॥६५४॥

किं स्वाचारविपर्ययात् किमु धनस्यान्यायतोपार्जनात्
किं वा द्रोहितया सतां किमथवा सद्वर्णसाङ्कर्यतः ।
निःसामर्थ्यतया यथा शिशुविभोर्द्वेषेण वा मन्त्रिणां
राज्ये सुस्सलभूपतेरिव बभूवायं प्रजोपद्रवः ॥६५५॥

---

653 c) B (evid. emend.) -वाट-.

654 a) S′$_3$ A C I$_2$ B -डिण्डिमो. —MSS S′$_{7\cdot8}$ end with -घटाहेमन्तकालोदय: in 654[b], and MS S′$_8$ is copied by a different hand from this place onward. —d) S′$_3$ C I$_3$ K D B राज्य- (for °ज).

655 b) S′$_{6\cdot8}$ A द्रोहतया.

येनादौ सैदवैरे रणरसिकतया मोचिता बन्धनस्थाः
सिद्धादेशाधिकारी व्यधित जितरिपुः स्फूर्जितं च प्रयातः ।
प्राज्यं राज्यं व्यधाद् यः फतिहनरपतेर्नाशयित्वारिचक्रं
जीयाच्छ्रीडामरेन्द्रो वरसचिवपतिः सैफमल्लेक एकः ॥६५६॥

इति जैनराजतरङ्गिण्यां पण्डितश्रीवरविरचितायां
फतिहशाहराज्यप्राप्तिर्नाम
चतुर्थस्तरङ्गः ॥ ४ ॥

---

656 b) $S'_{6\cdot8}$ A °धिकारी (as in text); S'_3 C I_{1-5} D B °धिकारो; K °धिकारात्.

Colophon.—$S'_{2\cdot4\cdot7}$ fol. missing. $S'_{3\cdot6\cdot8}$ A C I_3 K D B ins. श्री before जैन– (K D before राज); K D om. -जैन–; I_2 परिह (mislec. for S'ār. ण्ड)त–; K -प्राप्ति ना (<तिन्ना mislec. for S'ār. र्ना)म.—K D conclude with समाप्तेयं पण्डितश्रीवरविरचिता राजतरङ्गिणी (after -तरङ्गिणी D समाप्ता । शुभमस्तु सर्वजगताम्); S'_8 C I_{2-5} B with समाप्तेयं श्रीवरराजतरङ्गिणी (after तरङ्गिणी I_3 अत: परं श्रीकह्लणकृतराजतरङ्गिणी; I_4 शुभम् ; I_5 शुभमस्तु । संवत् १८६१ शुभम्); A concludes with श्रीवरकृतिः समाप्ता; S'_6 with समातेयं श्रीवरविरचिता राजतरङ्गिणी संवत् ४९८९ फा वदि नवम्यां बुधे श्रीवररचिता राजतरङ्गिणी पज्ज्यनोपाधिमता पण्डितमधुसूदनेन स्वात्मचर्वणकृते चित्रिता ॥ श्रीशाकः (=Vikrama) १९७०.

नन्दाष्टताने सप्तर्षौ सौम्ये कृष्णे च फाल्गुणे ।
नवम्यामलिपद्यां पज्ज्यनः श्रीमधुसूदनः ॥

I_1 with अत: परं श्रीकल्हणकृतराजतरङ्गिणी । शुभमस्तु सर्वजगताम् ॥

अथ

श्रीशुक-कृता

राजतरङ्गिणी

अथ

श्रीशुकक्कृतायां राजतरङ्गिण्याम्

प्रथमस्तरङ्गः

नमश्चराचराकारधारिणे चन्द्रमौलये ।
शिवाय स्वच्छस्वच्छन्दपरमात्मस्वरूपिणे ॥ १ ॥

विलोक्य मिश्रं शिवयोः स्वरूपं
सर्पाधिराजो मिलितोऽतिभक्त्या ।
गौर्या भुजावर्तनकङ्कणेन
यत्रावताद्वो गिरिजाशिवार्धः ॥ २ ॥

विरतं मोहान्धतमो यदनुग्रहरोचिषा शुकस्यापि ।
वन्दे तं गुरुतरणिं बुद्ध्याश्रयहृत्सरोजदीप्तिकरम् ॥ ३ ॥

वन्द्यं तर्कवितर्ककौशलमतेर्वाक्यं प्रमाणान्वितं
यत्कान्त्या नृपकीर्तिवस्तुरचना देदीप्यते सर्वतः ।
श्लोकैः सत्पदशोभनैरविरलानुप्रासयुक्तैः शुभै-
र्नानार्थानुगतैर्मतैः सुकविनां लालित्यभावान्वितैः ॥ ४ ॥

[Before st. 1, S'_2 ins. ओं नमो राजराजस्निग्धाय श्रीशिवाय । अथ पण्डितशुकविरचिता चतुर्थी राजतरङ्गिणी लिख्यते; $S'_{6\cdot7}$ ओं स्वस्ति । ओं नमो गुरवे सरस्वतीरूपाय । श्रीगणेशाय नमः ओं (before first ओं S'_6 marg. ओं नमः सरस्वत्यै); K ओं नमो गणेशाय ओं; D ओं स्वस्ति । श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ओं; I_1 श्रीगणेशाय नमः । ओं नमः शिवाय; I_2 नमः शिवाय ओं]

2 [c]) I_2 -कङ्कनेन.

4 [a]) S'_6 तत्क (mislec. for S'ar. र्क.); I_2 D -विकर्म- (for °तर्क-); S'_7 -कौसल–; $S'_{2\cdot6\cdot7}$ A K D -वाक्यप्र°; S'_3 C $I_{1\cdot2}$ B वाक्यं प्र° (as in text). —[d]) C सुकविना.

श्रीकल्हणद्विजप्रोक्तश्रीमद्राजतरङ्गिणीम् ।
आलोक्योद्यमिताभ्यां स्वं वपुः कर्तुमखण्डितम् ॥ ५ ॥

श्रीजोनराजविबुधश्रीवराभ्यां मनोरमम् ।
कृतं द्वाषष्टिवर्षान्तं ग्रन्थं राजावलिद्वयम् ॥ ६ ॥

गङ्गाभगवतीतीर्थस्नाने धन्यः सुभूषितः ।
कविः श्रीप्राज्यभट्टाख्यः समग्रगुणभूषितः ॥ ७ ॥

राजावलिपताकां स्वां राज्ये फतिहभूपतेः ।
एकोननवतिं यावद्व्यक्तीचक्रे ततः परम् ॥ ८ ॥

अथ देशादिदोषेण दुष्टलुब्धकभीतितः ।
नाग्रहीद् राजवृत्तान्तशेवालं मानसे कविः ॥ ९ ॥

तदाप्रभृति तद्वृत्तवर्णनं क्रियते मया ।
बुद्धयाश्रयात्मजेनात्र शुकाख्येनात्मचापलात् ॥ १० ॥

पूर्वेषां राजसंमानं निशम्य पृथुसंपदाम् ।
तद्भारशान्तये वाहं न कुर्वे कविवाञ्छया ॥ ११ ॥

क्व पूर्वकविवक्तृत्वं क्वेदं मन्दधियो मम ।
वर्णमात्रेण रीत्यंशः स्वर्णखण्डायते कथम् ॥ १२ ॥

राजोदन्तमरुं सन्तः श्रुत्वा योजनपूर्वकम् ।
अनुगृह्णन्तु मद्वाक्यसुधावृष्टिनिबर्हणैः ॥ १३ ॥

---

6 d) $S'_{6.7}$ (after द्वयम्) figure 2.
7 b) $S'_{6.7}$ A K D धन्य-; $I_{1.2}$ B (evid. emend.) धन्यः (as in text); S'_2 धन्यवि°; S'_3 C धन्यस्व°; K सुदू (mislec. for S'ār. भू) स्तः (evid. emend.). —c) I_2 -पुण्य- (mislec. for S'ār. -प्राज्य-).
8 d) $I_{1.2}$ व्यर्थी (mislec. for S'ār. क्ती).
9 d) $S'_{2.3}$ A C I_1 B -शैवालं.
10 a) I_2 तद्वर्तु (mislec. for S'ār. द्वृत्त).
11 a) MSS and C B -संमान्यं (emended as in text with M). —b) S'_2 निषम्य. —c) C -श्रान्तये.

कश्मीरेषु महाराजजैनशाहकुलाङ्कुरः ।
फताहशाहभूपालः प्रशासन्नभवन्महीम् ॥ १४ ॥

तस्मिञ् शासति तत्क्षोणीं प्रजाः सर्वसुखावहाः ।
आसन् स्वधर्मनिरता दयादाक्षिण्यभूषिताः ॥ १५ ॥

श्रीद्यूतमद्यव्यसनेष्वसक्तः सचिवाग्रणीः ।
मोसराजानकश्चन्द्रान्वयोऽभूत्तस्य भूपतेः ॥ १६ ॥

आसुरोपलवरोर्जितश्रिया-
मन्त्रवायप्रभवोऽस्य मन्त्रिराट् ।
धार्मिकोऽध्वपतिर् एब्रहेमकः
सन्मतिः शुभरतिः परोऽभवत् ॥ १७ ॥

प्रतीहारपतिर्हाज्यमेयोऽमेयो गुणैस्तदा ।
तृतीयः सचिवो दैवात् कालधर्ममुपागतः ॥ १८ ॥

सामात्येन महीभर्त्रा पुत्रो मल्लेकज्यङ्गिरः ।
पैत्रिकैर्ग्रामराष्ट्रौघैर्मानेनास्य नियोजितः ॥ १९ ॥

---

14 c) S′$_7$ (*sup. lin.* -शाहो); S′$_{2\cdot3\cdot6}$ (marg.) C श्रीमान् फताह–; I$_{1\cdot2}$ श्रीमत्फताह– (for फताहशाह–).

15 a) C क्षौणीं. —c) S′$_{2\cdot3}$ I$_1$ C सुधर्म–.

16 c) I$_{1\cdot2}$ C सोम– (mislec. for S′ār. मोस); B (evid. emend.) मूस–. —The variants सोम– and मूस– (for मोस–) are not recorded onward.

17 a) S′$_{2\cdot3}$ I$_{1\cdot2}$ C आस°; K आस्व (sic); S′$_7$ (*sup. lin.*) gloss असुर-गणपतेः (for आसुरोपल–). —c) B (evid. emend.) इब्रहीमकः (This emendation is not recorded onward). —d) A -रतिपरो.

18 ab) B (evid. emend.) हाजीमीयो.—S′$_2$ om. 18ab. —d) S′$_{6\cdot7}$ (*sup. lin.*) gloss निधने(?नं) (for कालधर्मम्).

19 a) S′$_{2\cdot3\cdot6}$ (marg.) A C D B सामान्ये (mislec. for S′ār. त्ये)न– —b) B (evid. emend.) -जङ्गिरः. —d) D (after नियोजितः) figure 4.

नयज्ञः सर्वविद्दीर्घदर्शी बन्धुः सहानुजः।
मोसचन्द्रस्य राजानशृङ्गारोऽभूत् सदा प्रियः॥ २०॥

वृष्टिकालः सुहृत्क्षेत्रे सदाकालश्च वैरिणाम्।
वैकर्तनोऽर्थिनामास्ते मल्लेकालोऽस्य सत्सुतः॥ २१॥

न्यूनाधिकतुलादण्डवृत्तिरध्वेशमार्गगः।
समोऽभूत् पूर्णरावुत्रो मोसचन्द्राध्वपेशयोः॥ २२॥

ब्राह्मणाः स्वक्रियाचारहीनाश्चासंस्तदा भुवम्।
यदेषां मोसचन्द्रोऽभूत् क्रियालोपप्रवर्तकः॥ २३॥

सर्वविज्ञानविन्मेरशंष इराकदेशजः।
शाह्कासिमस्य च्छात्रोऽस्य ह्युपदेशं विना गुरुः॥ २४॥

मोसचन्द्रस्तदादेशाद्धृत्वा देवालयस्थिताम्।
भूमिं द्विजेभ्यो नीत्वा तद्भृत्यांस्तृप्तान् व्यधात्तया॥ २५॥

सुफाख्यैर्मेरशंषस्य च्छिन्ना इन्धनवाञ्छया।
बोधखान इति व्याजादत्युच्चास्तरवोऽनुगैः॥ २६॥

संनिधानं तदात्याजि दैवतैः प्रतिमासु हि।
कथं विधत्ते मनुजस्तत्स्थानेषु विलुण्ठनम्॥ २७॥

दुराचारोऽथ साचारो भट्टो भुट्टो नटो विटः।
इत्येवमासीत् तत्काले सभासाम्यं कलेर्बलात्॥ २८॥

---

20 $S'_{2\cdot3}$ A $I_{1\cdot2}$ C om. 20, 21 and 22. $S'_{6\cdot7}$ D read these three st. marg. *pr. m.*

21 c) $S'_{6\cdot7}$ आस्त; D B S'_6 (*inf. lin. pr. m.*) आस्ते (as in text).

24 a) B (evid. emend.) मीर°. —b) S'_3 C B -शे (mislec. for शं)ष:. —c) B शाह्वा (corrupt) सि°.

25 b) S'_3 C B -स्थितान् (S'_3 *sup. lin.* म्).

26 a) B (evid. emend.)मीर–; $S'_{2\cdot3}$ A K C B -शे (mislec. for शं)स्य.

27 c) S'_3 विदत्ते।

28 b) S'_2 भोट्टो (for भु°).

मोसचन्द्रात्मजस्याथ दानमानौ च गौरवम् ।
असहिष्णुभिरध्वेशपुत्रैर् अब्दालकादिभिः ॥ २९ ॥

विभेद्य होसराजानं प्रतीहारादिचक्रिणः ।
अवधूय स्वजनकं यौनसंबन्धयन्त्रितम् ॥ ३० ॥

श्रीजैनोल्लाभदीनस्य पुण्यराशिरिवोच्छ्रितः ।
मज्जितः श्रीवितस्तान्तश्चिरकालमभूत्तु यः ॥ ३१ ॥

राजानमोसचन्द्रेण प्लावितो निर्मलैर्धनैः ।
श्रीजैनकदलः सेतुः पारावारप्रतारणे ॥ ३२ ॥

बलाढ्यमठमल्लेकपुरान्तरसमाश्रयैः ।
प्लोषितो वेश्मभिः साकं रात्रौ वैरिजिगीषया ॥ ३३ ॥

दग्धारण्यनिभे जाते नगरे कदले तथा ।
नावशिष्टं विटैर्लुण्ठ्या स्नानवासो जनस्य च ॥ ३४ ॥

स संवृत्तः क्षीणकलो मोसचन्द्रस्तदूष्मणा ।
स्वसैन्यसंग्रहं कृत्वा निविष्टो जालद्रागडे ॥ ३५ ॥

शतैकीयोऽवसत् कोऽपि ब्राह्मणो ब्रह्मवर्चसा ।
युक्तो येनाभवत्तस्य राजानस्यारिनिग्रहः ॥ ३६ ॥

---

30 a) S'_2 होस्स–; S'_3 (after corr.) K -राजान–.

31 a) S'_3 $I_{1\cdot2}$ C जैनलाभदेनस्य; A B °बदीन°; S'_2 °देन°. —c) S'_3 *sec. m.* marg. मज्जितः; C स (mislec. for S′ār. म)ज्जि°; S'_3 °वितस्तातटा···श्चि°; I_2 °वितस्तानुः (mislec. for S′ār. न्तः). —d) K न (for त्तु).

32 d) A -वितारणे.

33 a) $S'_{2\cdot3}$ बल्लाढ्य–. —c) A सार्धं (for साकं). —d) $S'_{2\cdot3\cdot6\cdot7}$ I_2 K C D (after -जिगीषया) कुलकम्.

34 a) S'_7 I_2 D याते; S'_6 या (marg. *pr. m.* जा)ते.

35 a) S'_3 I_2 K C समं (K म) वृतः; I_1 यं (for सं°); $S'_{2\cdot3}$ C $I_{1\cdot2}$ -काले. —d) S'_2 C जालद्र°; K जलदृग्गडे.

36 b) I_1 hapl. om. ब्राह्मणो.

प्रतापाग्नेर्नरेशस्य पुरस्य दहनार्चिषः ।
राजानमोसचन्द्रेण स्ववपुः श्रीफलायितम् ॥ ३७ ॥

राज्ञा दत्ते बहिर्गन्तुं धर्मद्वारे दिनैः पथि ।
विप्रशापाख्यस्वर्भानुर्मोसचन्द्रमथागिलत् ॥ ३८ ॥

मलेकालादयः पुत्रा विद्रुताः समराङ्गयात् ।
विधाय मोसचन्द्रस्यान्त्यक्रियां नृपशासनात् ॥ ३९ ॥

मार्गेशैभ्राहिमो मन्त्री स्वान्परान् समतोषयत् ।
सिद्धादेशं महातन्त्रं ज्येष्ठपुत्राय मार्गपः
मल्लेकपिरुजायादान्मल्लेकाब्दालकाय च ॥ ४० ॥

शास्त्राधिकारं दत्त्वाथ विभज्यान्यप्रमेयकान् ।
मल्लेकलुहरादिभ्यः स्वात्मजेभ्यो ददौ महान् ॥ ४१ ॥

ह्रोसराजानज्यङ्गेरप्रतीहारौ तु चक्रिणः ।
बाह्यानीतान् डामरांश्च राष्ट्रेशान् विदधेऽश्वपः ॥ ४२ ॥

मृते प्रशान्ते सचिवे चेरुरुत्पिञ्जटास्ततः ।
कर्णगोचरदुर्दण्डाः शिङ्गभर्तृव्यदायिनः ॥ ४३ ॥

---

38 b) I_1 -ह्रारे (for -द्वारे). —d) K [अ] गिरत्.

39 a) K मल्लेका°. —b) A समरे.

40 e) $I_{1\cdot 2}$ मलेक–; I_1 B -पेरुजाय.

41 c) A -लहरा°.

42 a) S'_2 ह्रोस्स–; B (evid. emend.) -जाङ्गेर– (This emendation is not recorded onward). —e) $S'_{2\cdot 3}$ I_2 C बाह्यान् एतान्.

43 e) A कल्पगेचर– (corrupt); $S'_{6\cdot 7}$ K visarga om. in -दुर्दण्डाः; I_1 (evid. emend.) -निर्दंडा.— For दुर्दण्ड– see *Jonarāja*, 622. —cd) $S'_{2\cdot 3}$ I_1 C -दुर्दण्डशिर्ग–; I_2 शिंगा; K शिङ्ग–. —For शिङ्ग– see *Jonarāja*, 376. S'_2 A -विधायिनः.

यामेवाश्रयते रज्जुं नदीं तर्तुमहो नरः ।
छिनत्त्यकस्मात् तस्मै तां विधिर्विधुरतां गतः ॥ ४४ ॥

मोसचन्द्रवधायैते बाह्यानीता हि डामराः ।
मार्गेशेनास्य तैः सर्वैर्द्रोहोऽकारि नृपाज्ञया ॥ ४५ ॥

नौसेतुच्छेदं कृत्वा ते प्रतीहारादिडामराः ।
नाशयित्वा मार्गपतिं विदेशमनयंस्ततः ॥ ४६ ॥

डामरा उत्समल्लेकदौलुताद्या नृपास्पदे ।
अभजन् मन्त्रिपदवीं षट्पदा इव माधवीम् ॥ ४७ ॥

आस्थाने डामरेन्द्रेषु सम्यङ्निर्णयकारिषु ।
बलिनो दुर्बला आसन्नबला बलवत्तराः ॥ ४८ ॥

सुवृत्तं डामरेन्द्रीयं शिज्ञानां प्रत्यभान्न तत् ।
तामिस्रासक्तघूकानां सत्प्रकाश इवावनौ ॥ ४९ ॥

नृपान्तरङ्गाः कारायां क्षिप्तास्तैर्डामरैर्निशि ।
आलेमेरादयो द्रोहकर्तारः स्वभयादमी ॥ ५० ॥

---

44 [a]) C B यम् (sic); S'_2 °श्रियते. —[b]) S'_6 (before corr.) 7 $I_{1.2}$ तीर्तुं; $S'_{2.3}$ A C K D B तर्तुं (as in text). —[c]) I_2 भिनत्ति.

46 [d]) $S'_{6.7}$ A $I_{1.2}$ D अनयत्त (mislec. for S'ār. स्त)तः.

47 [a]) A C डामर. —[b]) $S'_{2.3}$ C $I_{1.2}$ D B -दौलत (S'_3 C त्या) द्या. —[d]) $I_{1.2}$ A साट (mislec. for S'ār. माध) वीम्; $S'_{2.3}$ C ते (evid. emend.) ऽटवीम्; K ताटवीम्.

49 [a]) $S'_{6.7}$ A C $I_{1.2}$ K D B डामरे (S'_7 री) न्द्रीये (mislec. for S'ār. यं); S'_2 °न्द्रीषु. —[c]) S'_3 K तामिस्रा°. —[cd]) S'_3 C K °नामप्रकाश.

50 [c]) B (evid. emend.) आलिमीरा°.

ज्यहाङ्गिरप्रतीहारहोसराजानकादयः ।
दुद्रुहुरवमानात्ते दिनैस्तान् डामरान् प्रति ॥ ५१ ॥

आस्थानासीनयोर्गाजखानमल्लेकदत्तयोः ।
शस्त्र्या गदायमेराख्यो जघानोरो द्वयोर्द्रुतम् ॥ ५२ ॥

श्रुत्वा तदुत्समल्लेको राजाग्रादगमद्बहिः ।
चिरं युद्ध्वारिभी राज्ञा नीतः स्वान्तिकमादरात् ॥ ५३ ॥

तद्वधाद्राजधान्यन्तर्हाहाकारो महानभूत् ।
उदभूत् पौरलोकास्तु नृपतेश्चायशस्तदा ॥ ५४ ॥

डामरो होसमल्लेकः सुय्यभोगान्तरादथ ।
श्रुत्वा ज्ञातिवधं धैर्यान्न चचाल महाभटः ॥ ५५ ॥

प्रयुध्य वैरिभिः सोऽथ डामरस्तत्र सङ्गरे ।
वीरः स्वःसुन्दरीयोगं समरोड्डामरोऽगमत् ॥ ५६ ॥

शाहाभदेनकुलजः खान एब्राहिमस्ततः ।
ज्यहाङ्गिरप्रतीहारज्ञातेयः कुशलो महान् ॥ ५७ ॥

---

51 a) B (evid. emend.) जहाङ्गीर– (This emendation is not recorded onward) —b) $S'_{2\cdot3}$ C -होस्स–; I_1 -हास्स–. —c) I_2 °नांते (<नान्ते mislec. for Sār. त्ते).

52 a) I_1 राज– (mislec. for S'ar. गाज). —c) B (evid. emend.) -मीराख्यो.

54 c) S'_2 पारलोकेऽस्तु; B -लोकास्तु (corrupt).

55 a) S'_2 होस्स–. —b) S'_2 सुर्य (mislec. for S'ar. य्य); S'_3 C सु (sic)र्य–. —c) A जाति– (for ज्ञाति–).

56 c) S'_7 anusvāra om. in -योगं. —d) $S'_{2\cdot6\cdot7}$ A $I_{1\cdot2}$ K D B समरो डा°; S'_3 C समरोड्डा° (as in text).

57 a) A B °भ(B व)दीन–. —b) I_1 इब्राहिमः. —d) B -ज्ञातीयः.

विभागीकृत्य राष्ट्राणि यथार्हं पञ्चषैर्दिनैः ।
प्रददौ होसराजानमुख्यानां नृपतेः पुरः ॥ ५८ ॥

आशङ्क्य नृपतेः पार्श्वस्थं तमुत्सवमल्लिकम् ।
अकरोद्बन्धनं नीत्वा दुर्गमे तु खशालये ॥ ५९ ॥

विभवं मासमात्रं ते गन्धर्वनगरोपमम् ।
विधाय द्वेषादध्वेशभीत्या चेलुरिवाधमाः ॥ ६० ॥

वृत्तान्तमुत्समल्लेकदुग्धभ्राता विश्रुत्य तत् ।
रावुत्रदेवको गत्वा खशालयमवेष्टयत् ॥ ६१ ॥

खशैर्गङ्गामठोपान्ताद् भीतैरुत्सवमल्लिके ।
विमुक्ते ह्युदभूत् कोऽपि हर्षोऽन्योन्याश्रयात्तयोः ॥ ६२ ॥

अथाध्यश्रयतां तौ द्वौ नृपकल्पतरुं दृढम् ।
विपत्तीव्रातपक्लिष्टौ मार्गेशागमनोत्सुकौ ॥ ६३ ॥

एकोननवतौ शुक्लाषाढादाश्वयुजावधि ।
वधादिवृत्तं राजानडामराणामभूदिदम् ॥ ६४ ॥

शरत्काले बहिस्तीर्त्वा मार्गेशः पुनराययौ ।
विभागीकृत्य कश्मीरान् सर्वेषां दत्तवानसौ ॥ ६५ ॥

राजाधिकारान् संस्थाप्य स्वात्मजेभ्योऽभवदभीः ।
योगीव कतिचित्कालं स्वदेशे विगतज्वरः ॥ ६६ ॥

---

58 b) $S'_{2\cdot6\cdot7}$ A K D पञ्चशै(sic)र्. —c) S'_2 I_1 होस्स–. —d) $S'_{6\cdot7}$ D (after पुरः) figure 2.

59 ab) I_1 पार्थस्थं; S'_2 पाश्वे सन्तमु°. —d) $I_{1\cdot2}$ खलाशये (corrupt).

60 c) S'_2 विहाय; $S'_{2\cdot3}$ देशात्; $I_{1\cdot2}$ द्रेष्यात् (for द्रेषात्). —d) S'_2 इवा: (sic).

61 b) M (evid. emend.) तत् (for तम्). —c) A राबुत्र–; $S'_{2\cdot3}$ C रावत्य– (mislec. for S'ār. त्र).

63 c) S'_3 -भ्रा (mislec. for S'ār. व्रा)त–.

उत्समल्लेकराजानशृङ्गारौ निरदाहयत् ।
गृहानब्दालमेरस्य नावतेऽब्दे जिगीषया ॥ ६७ ॥

निरोधवेश्मदाहादि श्रुत्वा पुत्रस्य मार्गपः ।
भाङ्गिलात् क्षुय्लमार्गेण हिन्दुवाटं समागमत् ॥ ६८ ॥

तस्मिन् दिगन्तरं याते मल्लेकाब्दालकोऽरिभिः ।
बन्धनाय निनायोग्रैर्दुर्गं लद्दखशालयम् ॥ ६९ ॥

उत्समल्लेकराजानशृङ्गारौ नृपसंयुतौ ।
यातौ विभक्तुं कश्मीरोत्पत्तिं वाराहमूलकम् ॥ ७० ॥

तत्र राजाज्ञयानीतैः सिद्धादेशाधिकारिभिः ।
देशोत्पत्तिविभागज्ञैस्तज्ज्ञैर्लेखककर्मभिः ॥ ७१ ॥

कायस्थैर्बुधकाश्वीशसंख्येशजुगकादिभिः ।
भागत्रयं विधायोर्व्यां राष्ट्रदेशेषु सर्वतः ॥ ७२ ॥

---

67 c) B (evid. emend.) -मीरस्य.

68 a) S'_7 A K D B निरोधं (sic). —c) A कैल–; C क्षुम्य–; I_2 क्षयम्य; K क्षुप्ल–; RSs_2 notices क्षह्म–; B (evid. emend.) क्षुण्ण–; M (evid. emend.) खुय्य–. —d) RSs_2 हिन्मु (mislec. for S'ār. न्दु) वाटं.

69 d) I_1 लग्र–; S'_7 K D लद्ध–; B (evid. emend.) लब्ध–; S'_6 लद्द (marg. *pr. m.* ब्ध)ख°.

70 c) S'_7 I_2 विभक्तुं ··· क°; S'_7 *sec. m.* °मैच्छत् in blank space; $S'_{2.3}$ A C I_1 K विभ(S'_2 भो)क्तुमैच्छत् (I_1 °न्)क°; D B यातौ विभक्तुं क° (as in text); S'_6 विभक्तुमैच्छत्क (marg. *pr. m.* यातौ विभक्तुं क) श्मी°.

71 d) S'_7 K D तज्ञैः (sic).

72 a) $S'_{2.3}$ -कश्मीर– (S'_3 *sup. lin.* श); C -कश्मीश–; I_1 काश्मीश- (for -काश्वीश–). —b) I_2 -जग°.

भागः फताहशाहस्य मल्लेकोत्सस्य चापरः ।
तृतीयोंऽशश्च राजानशृङ्गारस्येत्यलिख्यत ॥ ७३ ॥

विभज्य भुक्ता देशोऽत्र देशोत्पत्तिः पुरा त्रिभिः ।
हुष्कजुष्ककनिष्काख्यैस्तथैवैतैर्महात्मभिः ॥ ७४ ॥

ततो नगरमारुह्य राजराजानडामराः ।
नात्यजन् हृदयाद्वैरं गूढं नकुलसर्पवत् ॥ ७५ ॥

मुख्यं मन्त्रिपदमुत्समल्लेकस्य ददौ नृपः ।
सिद्धादेशं च राजानशृङ्गारस्य महत् पदम् ॥ ७६ ॥

आस्थान उत्समल्लेके स्थिते निर्णयकारिणि ।
सृगालैडिकसंयोगः श्रुतोऽभूल्लक्षितस्तदा ॥ ७७ ॥

कर्तितोर्णालडिङ्क्यर्थं वादिनोः प्राप्तयोर्द्वयोः ।
प्रादात् स उत्तरं द्रष्टुं स्वाभिज्ञामावृताश्रयाम् ॥ ७८ ॥

तदा ह्याहितसद्द्वेषः सुवेशो मन्त्रिणां वरः ।
मसोदशाहिसहित एब्राह्मोऽध्वेश आययौ ॥ ७९ ॥

वराहमूलं संप्राप्ते तत्सैन्ये राजसैनिकैः ।
उत्समल्लेकमुख्यास्ते योद्धुं सुय्यपुरे विशन् ॥ ८० ॥

---

73 S′$_{6\cdot7}$ K (after °लिख्यत) figure 3.

76 b) M (evid. emend.) मल्लेकाय.

77 c) S′$_{2\cdot3}$ C शृगाले°.

78 a) S′$_3$ C °र्णोडडि°; B °र्थ°. —d) S′$_{2\cdot3}$ °ज्ञामा(S′$_2$ ना)वृताश्रयम्.

79 S′$_2$ om. 79, 80 and 81. —a) S′$_3$ K -सद्वेषः. —c) B (evid. emend.) मसूद-. मह्माद- (=मह्मद) is suggested for मसोद- —d) S′$_3$ I$_{1\cdot2}$ C (hypermetric) एभ्राहे(S′$_3$ हि)मो (for एब्राह्मो).

80 a) C B वाराह-.

पारावारस्थितं सैन्यद्वयं वीक्ष्य नराधिपः।
फताहशाहो मन्त्रीशमुत्समेल्लकमब्रवीत् ॥ ८१ ॥

मन्त्रिन्नब्धाधिपेनेयं परिणीतेव भामिनी।
अस्मान् कापुरुषाञ् ज्ञात्वा राज्यलक्ष्मीः कृतामुना ॥ ८२ ॥

श्रुत्वा तद् उत्समल्लेको नृपमूचे महीपते।
एकाकिनमबन्धुं मां दृष्ट्वा किं न करोत्ययम् ॥ ८३ ॥

कदाचिद् दृश्यते चिन्तामणिः खकुसुमादि च।
राजप्रतापदग्धा हि नोत्पद्यन्ते नरर्षभाः ॥ ८४ ॥

उत्तिष्ठ राजन् युध्यस्व दैवाधीना विभूतयः।
श्रुत्वैवं मन्त्रिणो वाक्यं योद्धुं नृपबलं ययौ ॥ ८५ ॥

अध्वेशो भवतुङ्गं तत्पथा याते ससैनिके।
सबल उत्समल्लकः केशनोत्से न्यविक्षत ॥ ८६ ॥

मध्ये भूत्वा गिरिं तत्र स्थितात् सैन्यद्वयाद्भटाः।
एत्याम्योन्यं शरासारं पारावारादथाक्षिपन् ॥ ८७ ॥

प्रयुध्य वैरिभिस्तत्र मार्गेशात्मजशिर्यकः।
स्वप्राणैः पद्मनागस्य प्रादाद्बलिं महत्तरम् ॥ ८८ ॥

हते तस्मिन् रणे तत्र शिर्यमार्गपतावतः।
बन्धुत्वादुत्समल्लेको जेता शिथिलतां ययौ ॥ ८९ ॥

---

81 c) S′$_7$ फत्ताह–.

82 d) S′$_{2.3.6}$ (before corr.) A C B हृता°.

84 d) S′$_7$ *Kākapada*, thus +, (after नरर्षभा:) signifies lacuna.

86 a) S′$_{6.7}$ (*inf. lin.*) gloss ग्राम– (for भवतुङ्गं). —d) S′$_{2.3}$ C I$_{1.2}$ कोशनत्सो; A केशनोत्सो; B कोशनोत्सो.

88 a) S′$_{6.7}$ -प्रबु(sic)ध्य. —d) S′$_7$ महत्तराम् (sic).

शैथिल्यमस्य दृष्ट्वा ते वीरा मार्गेशसैनिकाः ।
खृयाश्रमाध्वना यातस्यानुसस्रुर्महौजसः ॥ ९० ॥

फताहशाहो राजानशृङ्गारान्वित एव तत् ।
श्रुत्वा सुय्यपुराद्धिन्दुवाटं शूरपुराद्ययौ ॥ ९१ ॥

अनुयातैरथाश्वेशसैनिकैरुत्समल्लिकः ।
अरोधि न्योवाग्रामान्ते केसरीव गुहामुखात् ॥ ९२ ॥

नवाब्दान् पालयित्वा क्ष्मां याते फताहभूमिपे ।
मह्मादशाहः संप्रापद्राज्यं मार्गेशसंश्रयः । ९३ ॥

मार्गेशप्रीत्या नृपतिर्महान्तं स्वाततायिनम् ।
सेहएस्कन्धरं खानं यौवराज्यपदोर्जितम् ॥ ९४ ॥

महामार्गपतिर्भूयो राजलक्ष्मीविराजितान् ।
स्वपुत्रानकरोत् कारागृहे शत्रुनिधानतः ॥ ९५ ॥

दत्तकन्योऽप्ययं जाल्म इव मां घातयेत् कथम् ।
निश्चिन्त उत्समल्लेको यावदास्ते स्म बन्धने ॥ ९६ ॥

---

90 b) S'_2 वीर-. —c) $S'_{2\cdot3}$ C सर्वा(C वा)श्र°; $I_{1\cdot2}$ खर्वाश्र°; M (evid. emend.) यातम्.

92 c) D न्यीवा-; $I_{1\cdot2}$ K -ग्रामान्ताः; A -ग्रामार्ताः (mislec for S'ār. न्ताः); C B ग्रामान्ते (as in text). —cd) S'_7 -ग्रामान्ता ⌄ के° (prob. mislec. for S'ār. न्के). —d) C B केशरीव; S'_3 C -मुखे.

93 b) S'_3 I_2 D फत्ताह-. —c) $S'_{2\cdot3\cdot6}$ (marg.) A C $I_{1\cdot2}$ B मह्मद-.

94 c) B C -एस्कन्दरं-.

95 a) $S'_{6\cdot7}$ A I_2 K D महान्; $S'_{2\cdot3}$ C I_1. B महा° (as in text).

96 a) $S'_{6\cdot7}$ A C $I_{1\cdot2}$ K D B जन्य; S'_3 जल्प (sic); S'_2 जाल्म (as in text); M (evid. emend.) अन्य.

मार्गेशपुत्रो बलिनं सद्वेषस्तं कुकर्मणा ।
अयःशृङ्खलबद्धाङ्घ्रिमवधीत् पञ्चषैर्दिनैः ॥ ९७ ॥

युद्धं भटार्जुनस्याजौ कारायाः शंषचक्रिणः ।
बद्धस्य तादृग्वीरस्य तस्याभूच्छस्त्रिभिः परैः ॥ ९८ ॥

बलिना कलिराहुणा नृचन्द्रे
ग्लपिते कोऽप्युदभूद्बलान्धकारः ।
जनताप्यनिशं भृशं रुरोद
कलयन्ती पितरीव पक्षपातम् ॥ ९९ ॥

विरते चोत्समल्लेके लोके रात्रिश्चराः खलाः ।
विचेरुरन्धतमसा विस्फुरद्दीर्घदृष्टयः ॥१००॥

भोग्यांशो द्विगुणो यातो ग्राम्याणां तत्र वत्सरे ।
विज्ञप्तिश्रवणे मूका बधिरा मन्त्रिणोऽभवन् ॥१०१॥

नवमासान् नवाहानि राज्यं कृत्वा महम्मदे ।
बहिर्याते कृतोत्साहः शाहः फतिह आययौ ॥१०२॥

---

97 b) I_1 -द्वेषस्थं —d) $S'_{2\cdot6\cdot7}$ K D पञ्चशै(sic)र्; $S'_{6\cdot7}$ K (after दिनैः) figure 2.

98 a) $S'_{2\cdot3}$ C $I_{1\cdot2}$ D B भट्टा–. —b) कारायां (for °याः) is suggested; $S'_{2\cdot3}$ A K शे(mislec. for S'ār. शं)ष–.

99 b) $S'_{2\cdot3}$ $I_{1\cdot2}$ C गालितेर्के (I_2 °को). —c) $S'_{6\cdot7}$ A I_2 K D रुरोध (mislec. for S'ār. द).

100 b) I_1 om. hapl. लोके. —c) M (evid. emend.) -तमसे.

101 a) S'_2 I_2 K भाग्यांशो; $S'_{2\cdot3}$ C B जातो.

102 b) $S'_{6\cdot7}$ $I_{1\cdot2}$ K D मह्हाम (mislec. for S'ār. हम्म)दे. —d) S'_2 फताह.

प्रतीहारज्यहाङ्गेरस्यादान्मन्त्रिपदं नृपः ।
सिद्धादेशं च राजानशृङ्गारस्य महत् पदम् ॥१०३॥

स्वयंभूचण्डचण्डांशुमहसः शौर्यशालिनः ।
काचचक्रस्य शस्त्राधिकारं राजा स्वयं ददौ ॥१०४॥

नूनं नाकेशचक्रेशावतारः काचमल्लिकः ।
आजीवमभवद्यस्य राजश्रीललितं वपुः ॥१०५॥

श्रीमद्बोसनचक्रस्य क्रमराज्याजिजन्मनः ।
प्रोद्भूतः काञ्चनो वीरो रामो दशरथादिव ॥१०६॥

प्रजापुण्योदयाद्राज्ञो धार्मिका धीरजायत ।
अथवात्यल्पकालोऽस्य राज्यस्याज्ञायि भूभुजा ॥१०७॥

तथाहि प्रेष्यवद्बुद्धव्यापाराधिपतां नृपः ।
अकरोत् ताम्रपट्टान्तर्गणनाक्षेपवारणम् ॥१०८॥

मृतहिन्दुकजन्तूनामस्थीन्यादाय भूमिपः ।
गङ्गां यातुं समादिक्षन्म्लेच्छोपद्रवशान्तये ॥१०९॥

क्षिप्त्वास्थीन्यत्र स्वर्णद्यां प्रत्यायाता जनाः पथि ।
अकस्माद्वातवृष्ट्या तेऽयुतसंख्या विपेदिरे ॥११०॥

---

103 a) S'_7 A प्रतिहार–; C ज्यहाङ्गीर°.

104 a) $S'_{2\cdot3}$ I_1 C स्वयंभूश्; D B -हुतभुग्दीप्त– (for -चण्ड- चण्डांशु–). —S'_7 gloss *sup. lin. pr. m.* स्वै (?स्वय) मग्निवद्दीप्ततेजसः (for स्वयं°). —d) K (by transp.) ददौ स्वयम्.

106 b) I_2 -राज्याणि(sic)ज°.

108 d) S'_7 (before corr.) गणनां; S'_2 -क्षेम–.

109 a) S'_6 (*pr. m.* marg.).$_7$ (*sec. m.* marg.) gloss हिन्दुकाः हिन्दुस्थानीयाः हिन्दे इति भाषया (for -हिन्दुक–).

110 a) $S'_{6\cdot7}$ A स्वर्नद्यां. —c) M (evid. emend.) -वृत्त्या (for °ष्ट्या).

चिरेण गङ्गया भुक्तान्यस्थीनीति क्षुधार्तया ।
मन्येऽस्थिप्रातृलोकोऽपि निगीर्णो ह्यनया ध्रुवम् ॥१११॥

आयुःशेषंसमाश्रित्य पादत्राणसमाश्रयाः ।
मृता गृहेषु ये प्राप्ताः केचिन्नियतियोगतः ॥११२॥

अस्मिन्नेकनवत्यब्दे शरत्काले च मार्गपः ।
मह्मोदशाहिसहितो बाङ्गिलात् पुनरायर्यौ ॥११३॥

ससैन्यो बाङ्गिले ग्रामे निविष्टोऽभून्महीभुजः ।
फताहशाहेः प्रबलं बलं युद्धाय निर्ययौ ॥११४॥

प्रयुध्य वैरिभिर्गाढं धार्मिकोऽश्वेशनायकः ।
गतः स्त्रःकामिनीयोगं सात्मजोऽत्र रणाजिरे ॥११५॥

कलौ धर्मस्य पादैको वर्ततेऽस्मिन् भुवस्तले ।
महामसोदस्तम्भैः स चतुष्पाद्येन योजितः ॥११६॥

नूनं कार्कोटनागेन निगीर्णो मार्गपः क्रुधा ।
प्रत्यब्दं तद्गिरिस्थानाद्गमागमचिकीर्षया ॥११७॥

---

111 c) MSS and C B -प्राप्त- (emended as in text with M). —d) S'_{2} तया; S'_{3} [ए] तया (for [अ] न°); S'_{6} (marg. *pr. m.*).$_{7}$ (*sec. m.*) gloss सम्भावनायां (for ध्रुवम्).

113 b) $S'_{6\cdot7}$ A I_{2} व (mislec. for S'ār च); B (evid. emend.) [अ]थ (for च). —c) मह्मोद- (=मह्मद-); B (evid. emend.) मह्मूद-. —d) M (evid. emend.) बाह्यतः (for बाङ्गिलात्).

114 c) $S'_{2\cdot3\cdot6\cdot7}$ (after corr.) A C $I_{1\cdot2}$ K D B -शाहः; $S'_{3\cdot6\cdot7}$ I_{2} K प्रबले (mislec. for S'ār. लं).

115 a) S'_{7} I_{2} D प्रबु (mislec. for S'ār. यु)ध्य; S'_{7} I_{2} गाढ्यं (sic). —cd) C -योगमात्मजो.

116 b) $S'_{6\cdot7}$ $I_{1\cdot2}$ K D -स्थले (for स्त°). —c) B (evid. emend.) -मसूदा-; $S'_{6\cdot7}$ *sec. m.* marg. gloss बडू मषेद् इति म्लेच्छधर्मशाला.

117 b) M (evid. emend.) निगीर्णे.

अन्येऽप्यब्दालमल्लेकल्लुहराद्या हि तत्सुताः ।
गता दिगन्तरं भूभृद्युक्ता व्यर्थमनोरथाः ॥११८॥

वितस्तिः पूर्यते जीर्णवस्त्रे हस्तो विशीर्यते ।
इत्येवमादिका दोषा जायन्ते पापिनां विशाम् ॥११९॥

सम्यगन्तकनारीव व्याध्युपद्रवधारिणी ।
उदभूत् सर्वतो मारी जनताक्षयकारिणी ॥१२०॥

मृतानां नाभवत् संख्या ग्रामेषु नगरेऽपि वा ।
अन्त्यकर्पटवासोऽपि येषामास्ते स्म दुर्लभम् ॥१२१॥

बान्धवा नैव चक्रन्दुः प्रलापस्य कथैव का ।
प्राणरक्षापराः केचिदायुःशेषेण रक्षिताः ॥१२२॥

जजृम्भे शमिते मारीदोषे देशेऽथ दैवतः ।
वार्ता मह्मदशाहस्य कश्मीरागमनं प्रति ॥१२३॥

त्वा मह्मदशाहः स नौशाहारात् सलोहरात् ।
एस्कन्दराद्गजपतेः संप्राप्य महतीं चमूम् ॥१२४॥

प्रत्यायातोऽब्वपसुतैः सहितो राज्यवाञ्छया ।
प्राप्तो राजपुरीदेशमिति दूतान्नृपोऽशृणोत् ॥१२५॥

त्रस्ता दुर्वार्तयाप्यासन् पूर्ववैरा महीभुजः ।
समस्ता मन्त्रिणः शाहमह्मदागमनेप्सवः ॥१२६॥

---

118 d) $S'_{6\cdot7}$ A C K व्यक्त (mislec. for S'ār. र्थ).

120 b) $S'_{2\cdot3\cdot6}$ (marg.) C $I_{1\cdot2}$ B -कारिणी.

121 b) B (evid. emend.) नगरेषु.

124 c) B (evid. emend.) इस्क°. —d) S'_3 C स प्राप; $I_{1\cdot2}$ संप्राप्य (as in text); $S'_{2\cdot6\cdot7}$ A K D B स (for सं°).

125 d) $S'_{6\cdot7}$ K (after अशृणोत्) figure 2.

126 d) K -गदादः ग° (for -मह्मदाग°); S'_7 (before corr.) °गमनोत्सवः.

काचचक्रेशराजानशृङ्गारौ स्वबलैर्वृतौ ।
गतौ प्रतीक्षितुं शूरपुरं नवनृपस्य तौ ॥१२७॥

विधुरे हि विधौ भृत्य आलेमेरोऽस्य भूपतेः ।
श्रीमत्फताहशाहस्य शत्रुपक्षमथाश्रयत् ॥१२८॥

वैदेशिको निःशरणः शाहिभङ्गीय इत्यसौ ।
पुत्रवद्वर्धितो राज्ञा ग्रामहेमाद्यनुग्रहैः ॥१२९॥

प्रतीहारज्यहाङ्गेरमन्त्रिणैकेन संश्रितः ।
श्रीमान् फताहशाहः स पुराद्योद्धुं विनिर्ययौ ॥१३०॥

त्रोषाणकं फतिहशाहबले निविष्टे
गूढक्षणैः प्रतिभटैर्विदितारिवृत्ताः ।
पत्यारिमध्यमथ शूरपुराद् युयुत्सु-
कामाः प्रवीरशयनान्यधिजग्मुरत्र ॥१३१॥

फताहशाहो वीक्ष्यैतद्युद्धमश्वादथापतत् ।
मन्त्रिभिः प्राक्तनस्नेहात् प्रभुत्वादपि रक्षितः ॥१३२॥

एवं समासं वर्षैकं भुक्त्वा भूमिं स भूमिपः ।
वर्षे द्वानवते मास इषे राज्यादथापतत् ॥१३३॥

ततः फतिहशाहः स निरस्तो बाह्यमण्डलम् ।
मन्त्रिभिश्चटिकाशारगिरिमुल्लङ्घ्य लोहरम् ॥१३४॥

---

127 d) M (evid. emend.) -नृपं च (for -नृपस्य).
128 b) S'2 आस्तेमेरो.
130 d) A समाययौ (for विनिर्य°).
131 a) S'7 *sup. lin. pr. m.* gloss ग्रामं (for त्रोषाणकं); C क्रोषा°. —c) S'2 I1 युयुत्सा (I1 °त्सुः); M (evid. emend.) प्रयोद्धु- (for युयुत्सु-).
134 a) S'2 फताह-. —c) M (evid. emend.) चट°; B (evid. emend.) °सार-.

श्रीमान् महामदोत्साहः शाहो महम्मदः पुनः ।
समं गजपतेः सैन्यैः कश्मीरानविशज्जयी ॥१३५॥

गजेशदत्तमत्तेभा व्यधुः सेनाजनस्य ते ।
जङ्गमाद्रिभ्रमं मार्गे कालीधाराधिरोहणे ॥१३६॥

वाजिनां हेषया हस्तिकर्णतालैश्च चुंक्रुतैः ।
पटहैर्जयशब्दोऽभूद् द्विगुणो नृपतेर्विशाम् ॥१३७॥

बद्ध्वा राजानशृङ्गारमब्दालं मार्गपं बहिः ।
कर्तुं मन्त्रिपदे राज्ञश्चिन्ता काप्युदभूद्धृदि ॥१३८॥

नृपादेशान्महामन्त्रिपदं चक्रेशकाञ्चनः ।
आलेमेराद्यनुज्ञातोऽप्यग्रहीत् स महाबलः ॥१३९॥

स्वामात्यान् देशरक्षायै स्थापयित्वागते भुवम् ।
विभज्याटविकं लोकं प्रतिमुक्ते बहिर्नृपे ॥१४०॥

नाग्रामकोटं छुहराथ्वेशराजाननोत्सकौ ।
प्रविष्टौ सैन्यसंनद्धौ शत्रुकार्यचिकीर्षया ॥१४१॥

हिमार्तोऽराजको देशोऽपरिज्ञाताश्च मन्त्रिणः ।
देशो दुर्वार्तयाशेषश्चकम्पेऽन्वहमित्यतः ॥१४२॥

चक्रेशो विह्वलस्तूर्णं वीरं मल्लिकज्याङ्गिरम् ।
साहायकार्थमानिन्ये राष्ट्रघोषैः कृतार्हणम् ॥१४३॥

---

135 a) C -महोत्साहः.

136 d) S′$_{2\cdot3}$ C कालेधा (S′$_2$ ध)रा°.

137 b) S′ टत्कृतैः; S′$_3$ घुत्कृतैः; I$_1$ वुं (mislec. for चुं)कृतैः; K चुत्कृतैः; C घुत्कृतैः; A B धुकृतैः.

139 c) B (evid. emend.) आलिमीरा°. —d) S′$_3$ [अ] थ (for °पि); B [अ]गृहीत्.

140 b) S′$_{2\cdot3}$ A C I$_1$ K गतो. —d) S′$_2$ -मुक्तो; I$_2$ बहित्रिपे (sic).

141 a) S′$_2$ -कोट्टं. —b) S′$_2$ -नोसकौ. —d) S′$_{6\cdot7}$ K (after चिकीर्षया) figure 2.

मासमात्रमुषित्वात्र कोटे ते वैरिणां क्रुधा।
प्रभाते नगरं वीरा ययुर्युद्धचिकीर्षया ॥१४४॥

निर्याते काचचक्केशसैन्ये रिपुबलं प्रति।
परस्परमभूद्युद्धं वीराणां जालद्रागडे ॥१४५॥

युद्ध्वा लुहरमार्गेशे याते राजाननोसकः।
हुत्वा रणाग्नौ स्वप्राणानाश्लिक्षन्नाकयोषितः ॥१४६॥

छित्त्वा तत्राङ्गुलीः काचचक्केशस्यार्ययोऽथ ते।
नाजोकमार्गपत्याद्याः प्रययुः शलभायिताम् ॥१४७॥

प्रवीरो देवरावुत्रश्चलितः समराङ्गणात्।
हतो मारीनदीतीरे चक्रसैन्यैर्निरायुधः ॥१४८॥

तादृशात् समरान्मुक्तः काचचक्रोऽखिलैर्जनैः।
देशरक्षाकरोऽज्ञायि राधेयार्जुनसन्निभात् ॥१४९॥

सचिवः काञ्चनश्चक्रः प्रवीरः काञ्चनश्रियम्।
अङ्गुल्या सह संप्राप छिन्नया तत्र संयुगे ॥१५०॥

संतोष्य नृपतिर्दानमानाद्यै राजमण्डलम्।
प्रतिमुच्यागतोऽकार्षीत् सौराज्यं राष्ट्रमण्डले ॥१५१॥

---

144 b) S'_2 कोट्टे; $S'_{2\cdot3}$ C तै: (for ते).

145 d) $S'_{2\cdot3}$ C जालद्रगडे; I_2 ज्वालद्रागडे; K जालद्रग्गाडे.

146 a) A -मार्गेशं. —b) A यातो; K -ह्रोसक: ; D B -नोस्सक: . —cd) $S'_{6\cdot7}$ A D -प्राणान्ना (sic)श्लि°; $S'_{6\cdot7}$ A $I_{1\cdot2}$ काक- (by syll. contam. for °ना).

147 d) M (evid. emend.) शाक्रभीं गतिम्.

148 a) $S'_{2\cdot3}$ C $I_{1\cdot2}$ K -रावत्र°.

149 d) MSS and C B -सन्निभ: (emended as in text with M).

151 K om. hapl. 151[cd]. —d) D राष्ट्र- (*pr. m. sup. lin.* ज्य); B राज्य-.

वर्षेण शाहिमल्लिकलद्द्भट्टादयोऽखिलाः ।
चक्केशमन्त्रिणा कारागारे क्षिप्ता महौजसः ॥१५२॥

अङ्गुलीसूत्रनिर्देशं स्थापिते भूपतौ ततः ।
चतुर्नवतिवर्षे तु श्रावणे काचचक्रपः ॥१५३॥

मल्लिकज्याङ्गिरप्रीत्या खानमेव्राहिमं व्यधात् ।
सिद्धादेशाधिकारेऽस्य स्वजनं धीमतां वरम् ॥१५४॥

क्रियालतायां मूलानि पूर्वं शिर्यद्विजन्मना ।
रोपितानि च कालेन सिक्तान्यमृतवारिणा ॥१५५॥

श्रीमन्निर्मलकण्ठेन वैकुण्ठेनेव भास्वता ।
कलौ गृहीतदेहेन कश्मीरेषु द्विजातिना ॥१५६॥

श्रीमन्निर्मलकण्ठेन द्विजेन्द्रेण हिमागमे ।
मोसराजानकालोद्यन्म्लेच्छोपद्रवजो महान् ॥१५७॥

संमन्त्र्य कण्ठभट्टाद्यैर्दुष्कलङ्को निवारितः ।
प्रलोभ्य काचचक्रेशं स्वप्राणेन धनेन च ॥१५८॥

तत्कार्यत्रस्तचक्रेशानुमतो म्लेच्छचोदितः ।
खुज्यामेराह्वदो भट्टान्निर्मलाद्यानघातयत् ॥१५९॥

---

152 [a]) K अर्षेण; S'_7 शा (*pr. m. sup. lin.* सा)हि–; $S'_{2.3}$ C स हि. —[b]) A $I_{1.2}$ D -लद–. —[d]) $S'_{3.6.7}$ A C $I_{1.2}$ K D B °गार– (S'_7 D रा) (emended as in text with S'_2).

153 [c]) S'_2 चतुर्ण°; $S'_{2.3}$ C [अ]त्र (for तु).

154 [d]) MSS and C B सु (mislec. for S'ār. स्व) जनं; M (evid. emend.) सुतं स (for स्वजनं).

156 $S'_{2.3}$ C I_1 om. hapl. 156^{b-d}, 157^{a}.

159 [c]) C B (evid. emend.) खुज्जामे (B मी)रा°. —[cd]) C भट्टनिर्म°.

ब्राह्मं तेजः क्व ते विप्राः क्वाचारोऽद्यतने युगे।
इत्येव खिन्नो वित्रस्तांस्तन्मुखानवधीद् द्विजान् ॥१६०॥

आसूत्रितः सैदकाले मोसचन्द्रेण व्यञ्जितः।
प्रफुल्लः काचचक्रेण मौसुलोपद्रवक्रमः ॥१६१॥

ततोऽब्दे पञ्चनवते श्रावणे बाह्यमण्डले।
फताहशाहराजेन्दुरस्तं यातो नृपाधिपः ॥१६२॥

श्रुत्वा मह्मदशाहेन तद्दिने नाशि नास्वपि।
नास्नायि राजराजं तं स्मारंस्मारं दिवानिशम् ॥१६३॥

नयज्ञो दीर्घदर्शी च सत्यवाग् गुणिवत्सलः।
प्रशान्तः प्रियभृत्यश्च क्व तादृग्लभ्यते प्रभुः ॥१६४॥

संप्राप्तं नरदेवेन जन्म बाह्येऽत्र मण्डले।
प्रमयोऽस्याभवत्तत्र विधिकार्यं हि दुर्घटम् ॥१६५॥

कर्णीरथमथारोप्य स्वभृत्यैर्नरनायकैः।
शवीभूत इहानीतः कर्तुमन्त्यक्रियां दिनैः ॥१६६॥

कश्मीरेन्द्रः समारोप्य सामात्यस्तं शवं नृपम्।
बृहन्मृताजिरे श्रीमज्जैनशाहादिभूभुजाम् ॥१६७॥

गोगतैः स्फटिकावर्तैर्मूर्तैः कार्यैरिवाश्रिते।
राजोचितक्रियां कृत्वा भूगर्ताभ्यन्तरेऽक्षिपत् ॥१६८॥

---

160 a) $S'_{2\cdot3}$ C वो (for ते). —d) $S'_{6\cdot7}$ A तन्मुखाद् (sic).
161 c) $S'_{6\cdot7}$ प्रफुल: (sic). —d) A मोसु°.
166 a) A आरुह्य (for °रोप्य). —b) $S'_{3\cdot6\cdot7}$ A I_2 K D B -नायकः; S'_2 C I_1 -नायकैः (as in text).
168 a) S'_3 स्फुटिका°. —c) $I_{1\cdot2}$ क्रियाः. —d) $S'_{3\cdot6\cdot7}$ A $I_{1\cdot2}$ B -गर्भा (mislec. for S'ār. र्ता)भ्य°. — $S'_{6\cdot7}$ K after (°क्षिपत्) figure 2.

कर्तुं राज्यमखण्डितं हठधियोद्धर्तुम् अमात्यान् दृढान्
भर्तुं पामरसेवकान् हि नृपतिः किं किं न कुर्याच्छ्रमम् ।
हा दैवं तमपासितुं प्रयततेऽनर्थादिवाभ्याहतो
मूलोत्पाटनमाप्य धिङ् नृपतरुस्तूर्णं पतेदाकुलः ॥१६९॥

क्व सैफडामरेन्द्रादीन् हत्वा स्वसचिवान्नृपः ।
विपत्तौ प्रमयं प्राप हा हा कालविपर्ययः ॥१७०॥

तदैवमेत्य राजानशृङ्गारेण महात्मना ।
अन्वगामि नृपेन्द्रस्य प्रेम्णेव स्वर्गवासिनः ॥१७१॥

तस्मिन् काले बहिश्चक्रवर्ती गजपतिर्दिवम् ।
एस्कन्दराख्योऽप्यगमत् सुरराजदिदृक्षया ॥१७२॥

अभावादथ भूपस्य राजपक्ष्यान् विशङ्क्य तान् ।
मल्लिकज्यङ्गिरमेरखुज्याह्मदमुखान् भ्रुवम् ॥१७३॥

एव्राँहिखानशृङ्गारभट्टादींश्चक्रनायकः ।
वैशाखेऽब्दे षण्णवतौ नगरस्थानरोधयत् ॥१७४॥

---

169 a) $S'_{2\,3.6.7}$ A C °र्तुं स्वमात्या (S'_2 न्या)न्; $I_{1.2}$ K D B °र्तुं म (I_1 D B स, I_2 सा)मात्या (D B न्या)न्. —b) M (evid. emend.) कं कं. —c) MSS and C B तद (mislec. for S′ār. म)पा°; $S'_{2.3.7}$ A C K $I_{1.2}$ [अ] त्याहतो. —d) S'_6 marg. *sup. lin.* gloss निन्दायां (for धिङ्).

170 d) S'_2 (After -विपर्यय:) figure 1. —$S'_{3.6.7}$ A C $I_{1.2}$ D B इति फताहशाह (S'_6 $I_{1.2}$ D हि) स्वर्यानम्.
—Before 171, $S'_{6.7}$ K ins. श्रीगणेशाय नम:; D ओं.

171 d) C $I_{1.2}$ प्रेम्नेव.

172 c) B (evid. emend.) इस्कन्दरा°.

173 b) $S'_{2.3}$ C I_2 -पक्षं; $S'_{6.7}$ A I_1 D B पक्ष्यं (emended as in text); K -पद्दां निशंकि; MSS and C B तम् (emended as in text).

सिद्धादेशातिपदवीं तदीयां चक्रपो ददौ ।
दैवदष्टस्य राजानहोसनस्य महात्मनः ॥१७५॥

तद्गौरवं त्रिभिर्मासैरसहिष्णुः स चक्रिराट् ।
होसराजानकं कारां क्षिप्त्वासीदकुतोभयः ॥१७६॥

मक्षिकचक्रसेरङ्गताजेमेरादिबान्धवान् ।
तोषयित्वा राष्ट्रघोषैः पूर्णकामांस्तदाकरोत् ॥१७७॥

ज्येष्ठेऽथ सप्तनवत एन्राह्माध्वपतेः सुताः ।
मक्षिकाब्दालकाद्यास्ते संधाय देशवासिभिः ॥१७८॥

फतिहशाहजं खानमादायेस्कन्दराभिधम् ।
ससैन्यमाययुर्बाह्यात् स्ववंशैश्वर्यकाङ्क्षिणः ॥१७९॥

श्रुतप्रवेशश्चक्रेशकाचकोऽतिबली ययौ ।
योद्धुं लौलपुरोद्वारं क्ष्माभृद्युक्तोऽध्वपान् प्रति ॥१८०॥

दृष्ट्वा चक्रबलं भूरि जग्मुर्भीत्याल्पसैनिकाः ।
नाग्रामकोटं रात्रौ ते दुर्गमं प्राणरक्षया ॥१८१॥

अथानुसृत्य चक्रेशसैन्येनाध्वपतीन् प्रति ।
कोटभूम्यन्तरे भूरि स्वसैन्यं स न्यवीविशत् ॥१८२॥

चमूद्वयाद्विनिर्गत्य शरासारैरवाकिरन् ।
योधा दिवं च भूमिं च गर्जन्तः समराङ्गने ॥१८३॥

---

175 a) M (erroneously) °शादि-. —c) M (evid emend.) °ष्टाय. —d) M (evid. emend.) -होसनाय महात्मने.

177 a) A -मे (mislec. for S′ār. से)र°. —b) A B -ताजमीरा°. —c) A -कोषैः (for घो°).

179 a) S'_2 फताह–. —b) $S'_{2\cdot3}$ C [ए] स्कन्द (S'_3 न्ध)रा°.

181 c) I_1 वाग्राम–; S'_2 -कोट्टं; $S'_{2\cdot3\cdot6}$ (marg.) C रात्र्यन्ते.

182 c) S'_3 कोट्ट–. —d) $S'_{2\cdot3}$ I_1 C स (for स्व–).

183 d) S'_2 समरान्तरे; B (evid. emend.) °ङ्गणे.

तावत् प्रतीहारपतिर्ज्यहाङ्गेरः ससैनिकः ।
गदायमेरबद्दोरमेराद्यैर् लहरेऽविशत् ॥१८४॥

ऊर्ध्वाधः सहितं शत्रुसैन्यं वीक्ष्य स चक्रपः ।
मसोदचक्रं स्वसुतं व्यसृजल् लहरं प्रति ॥१८५॥

ताजचक्रादिसहितो वीरो मेरमसोदकः ।
शाहाभदेननगरं संप्रापारियुयुत्सया ॥१८६॥

दृग्गोचरं गते चक्रिसुते युयुधिरे भटाः ।
आगच्छ प्रविशेत्युच्चैर्नदन्तः समराङ्गने ॥१८७॥

मसोदमेरसंक्षिप्तां वीरो मेरगदायकः ।
शरावलीं चकर्तास्य वैजयन्तीमिव श्रियः ॥१८८॥

पार्थपुत्रोपमे तस्मिन् रणं कुर्वति चक्रिणि ।
अरिमध्यात् सुसन्नद्धो नासीत् कोपि धनुर्धरः ॥१८९॥

मा पलायन्त समराद्वीरा वीरगुणोज्झिताः ।
जिताः शत्रुसमूहेन व्यूहेनागम्यतामिति ॥१९०॥

---

184 c) A -बह्योर–; I_2 -बह्रुदोर–; K -बह्योर–; B -बहुर– corrupt (for बह्दोर–). —d) $S'_{2\cdot3}$ A C B लुहरे corrupt.

185 d) $S'_{2\cdot3}$ C B लुहरं (corrupt).

186 b) C B मीर-; B (evid. emend.) -मसूदकः. —c) B (evid. emend.) शाहावदीन–. —d) B (evid. emend.) स (for सं); K संप्राप्य.

187 b) I_1 भट्टाः. —d) B (evid. emend.) °ङ्गणे.

188 a) B (evid. emend.) मसूदमीर–. —b) B -मीर– —c) $S'_{2\cdot3}$ A B °वलिं; M (evid. emend.) [अ] थ (for °स्य).

189 b) $S'_{2\cdot3}$ A C $I_{1\cdot2}$ B (by transp.) चाक्रिणि कुर्वति.

190 b) A वीरान् (corrupt). —c) $S'_{6\cdot7}$ A $I_{1\cdot2}$ K D जितः; S'_3 C B (evid. emend.) जिताः (as in text); S'_2 जित्वा. —d) A व्यूढेन.

इत्युक्तेऽर्जुनराजानकेऽनेकेनागता भटाः ।
युद्धाय विविशुस्तूर्णं शलभा इव पावकम् ॥१९१॥

प्रत्यायाते स्वसैन्येऽथ प्रयुध्यैतैर्महारथैः ।
गदायमेरः स्वर्नारीप्रणयित्वमथाश्रयत् ॥१९२॥

स्वस्रेयश्चक्रिणो दत्तनायकः पुष्पसायकः ।
दृष्ट्वैव नीतस्तूर्णं स स्वःस्त्रीभिः समराङ्गनात् ॥१९३॥

सेनान्यं निहतं वीक्ष्य वीरास्तदनुयायिनः ।
मसोदमेरं धावित्वा जघ्नुरक्ष्णि शरेण ते ॥१९४॥

शरनिर्भिन्ननयनो न्यपतन्निहतो भुवि ।
मसोदमेरः प्रवरो धन्विनां चक्रिणः सुतः ॥१९५॥

विशीर्णे रिपुभिश्चक्रिसुते तरलसंनिभे ।
अनीकिनी पदं लेभे मुक्ताहारा न कुत्रचित् ॥१९६॥

ह्रोसराजानको गाजमेरः शृङ्गारभट्टकः ।
पेते विरुद्धास्तत्राजौ बद्धाः पापिजनैर्हताः ॥१९७॥

---

191 b) S'_2 K D केन क; $S'_{3\cdot6}$ A C I_2 B केनैके (for °केऽनेके°).

192 a) A C स° (for स्व°). —b) S'_7 (after corr.) K I_1 प्रयुद्धये; S'_2 -भटैः (for रथैः). —c) B (evid. emend.) -मीरः. —d) $S'_{6\cdot7}$ A $I_{1\cdot2}$ D प्रणय°; $S'_{2\cdot3}$ C K B प्रणयि° (as in text).

193 a) $I_{1\cdot2}$ दंत (mislec. for S'ār. दन्त <त्त). —b) K -सायकः (for -ना°). —d) S'_3 A C I_2 स्व° (corrupt) (for स्वः°). —d) B (evid. emend.) °ङ्गणात्.

194 c) B (evid. emend.) मसूदमीरं. —d) $S'_{3\cdot6\cdot7}$ A C $I_{1\cdot2}$ K D B जघान (emended as in text with S'_2); M (evid. emend.) तम् (for ते).

195 c) B (evid emend.) मसूदमीरः.

197 a) A गास–; B (evid. emend.) राज– (for गाज–). —c) A राजानो (sic) (for तत्राजौ).

प्रतीहारपतेः सेना प्रतुष्टा पुरमाविशत् ।
दिनद्वयमथोषित्वा सा प्रयाता यथागता ॥१९८॥

तादृशे तनये वीरे निहते संगरेऽरिभिः ।
काचचक्रस्य तद्दुःखात् कालुष्यमगमन्मनः ॥१९९॥

सेनान्यं दुःखितं वीक्ष्य ताजचक्रादयो निजाः ।
अवोचन् समये चास्मिन् दैन्यं मा संश्रयेश्वर ॥२००॥

निर्ययावथ चक्रेशो योद्धुं मार्गेशसैनिकान् ।
पारावारस्थितान् कोट्टे पुत्रशोकादविह्वलः ॥२०१॥

युयुत्सौ काचचक्रेशसैन्ये रिपुबलैश्चिरम् ।
ग्राम्या दीनतयाभूवन् किंकर्तव्यतयाकुलाः ॥२०२॥

मार्गेशाः ख्यातवीर्यास्ते वैरिनिष्ठस्य चक्रिणः ।
पौरुषं वीक्ष्य खानेन युक्ता याता दिगन्तरम् ॥२०३॥

यथागतं गतेष्वेषु ससैन्येषु नृपान्वितः ।
विजयी नगरं प्राप चक्रेशः शोकविह्वलः ॥२०४॥

वीरं धीरं गुणज्ञं तं महायोधपुरःसरम् ।
मल्लेकदौलुतं ज्ञात्वा चक्रेशोऽभूद्भयोज्झितः ॥२०५॥

समस्तं ग्रामराष्ट्रादि पुत्रसम्बन्धि धन्विने ।
ददौ दौलतुचक्राय भ्रातृपुत्राय स प्रभुः ॥२०६॥

---

198 [b]) $S'_{2\cdot6\cdot7}$ D प्रण ($S'_{6\cdot7}$ D *pr. m. sup. lin.* तु)ष्टा; C प्रनष्टा; A प्रविष्टा. —[c]) K उपोषित्वा. —[d]) S'_2 दिगन्तरम् (for यथागता); C °गतम्.

203 [c]) S'_3 C B पौरुष्यं. —[d]) S'_2 C युता (for °क्ता).

205 [c]) S'_3 C $I_{1\cdot2}$ K D B -दौलतं.

206 [c]) S'_3 C $I_{1\cdot2}$ D B -दौल्लत-.

वर्षेऽष्टानवते राजपुत्रमाजग्मुरध्वपाः ।
इभेभखानमादाय चटिकाशारपर्वतात् ॥२०७॥

तामसीमरुगास्थाने स्थापिते सैनिकेऽध्वपैः ।
मल्लेककाचचक्रस्य बलं संधपुरेऽविशत् ॥२०८॥

विज्ञातचक्रिवीर्यास्ते मार्गपा अल्पसैनिकाः ।
गिरिमार्गादवारोहन्नधोग्रामेषु केषुचित् ॥२०९॥

अध्वेशसैन्यात् तद्दैन्यान्निर्गत्याशिश्रयद् द्रुतम् ।
मोसराजात्मज एदराजानश्चक्रिणश्चमूम् ॥२१०॥

तच्छ्रुत्वा तेऽध्वपाः प्रत्यागतास्तत्पर्वताध्वना ।
आशापिशाचिकात्यक्ता मित्रद्रोहात् सुविह्वलाः ॥२११॥

मार्गेशवाहिनी मित्रद्रोहाख्यानशिलोच्चयात् ।
विशीर्णा शतधा यातासंबद्धा बालपल्वले ॥२१२॥

इभीभखानः सोऽस्वस्थो मार्गे पञ्चत्वमागतः ।
आरोप्य शिविकां तूर्णमानीतो निजपार्श्वगैः ॥२१३॥

---

207 c) B (evid. emend.) इबीब–.

208 a) RSs_2 gloss तापरमरुस्थित– (for तामसीमरुगा–). —d) RSs_2 सन्धुपुर–.

209 a) K -चक्र–; I_2 -वीटा (S′ār. for Dev. र्या)स्. —b) S'_7 $I_{1\cdot2}$ D अन्य (mislec. for S′ār. ल्प)सै°. —cd) $S'_{3\cdot7}$ A C B °रोहन्नाधर्ग्रा° S'_2 °रोहन्नाधोश्रा°; I_1 °रोहन्नाधर्ग्रा°; I_2 °रोहन्नाधग्रा°. —d) M (evid. emend.) °धोग्रा° (as in text).

210 a) S'_7 K दैत्या (mislec. for S′ār. न्या)त्. —b) A [अ] शिश्रि°.

211 d) $S'_{6\cdot7}$ C K D B visarga om. in -विह्वला: .

212 d) $S'_{6\cdot7}$ A बाल ($S'_{6\cdot7}$ *sup. lin.* द्य)प°; $S'_{2\cdot3}$ C $I_{1\cdot2}$ K D B वा (C वा)द्य–.

213 a) B (evid. emend.) इबीब–. —c) MSS and C B आरुह्य; RSs_2 notices आरोप्य (as in text).

कश्मीरानथ कृत्वास्य चान्त्यकर्म मृताजिरे ।
शायितः पितृपार्श्वेऽधोगतैऽमात्यैर्महात्मभिः ॥२१४॥

शस्त्रेण ये वारयितुमशक्या वैरिणोऽभवन् ।
नखैरपास्ता भाग्यानामुदये काचचक्रिणः ॥२१५॥

प्रतीहारकुलोदन्वच्चन्द्रो मल्लेकजाङ्गिरः ।
ज्वालाभिर्बाह्यदेशेऽत्र तत्काले पञ्चतां ययौ ॥२१६॥

आनीताश्चक्रिणा मार्गपाब्दालल्लुहरादयः ।
यौनसंबन्धन्यायेन कश्मीरान्विविशुस्ततः ॥२१७॥

तथाहि ल्लुहराध्वेशः स्वसुतां परिणीतवान् ।
मल्लेककाचचक्राय शक्रायेव पुलोमजाम् ॥२१८॥

मल्लेकाब्दालकायाथ चक्रेशः स्वसुतां ददौ ।
परिणीय चिरोत्सन्नामिव स्नेहतरङ्गिणीम् ॥२१९॥

श्रीमता ताजचक्रेण स्मरेणेव रतिर्यथा ।
उद्वाहिता मार्गपतेरब्दालस्यात्मजा तदा ॥२२०॥

ततः काञ्चनचक्रेण राष्ट्रघोषैः क्रमागतैः ।
महद्भिर्दानमानैश्च मार्गेशानां कृतार्हणा ॥२२१॥

---

214 c) MSS and C B शयितः (emended as in text with M).
215 b) $S'_{2\cdot3}$ C -शक्ता. —c) S'_3 C B °स्तभाग्या°.
216 a) S'_7 K कुलोदात्-च° (K °त्च°). —b) MSS and C -ज्याङ्गिरः (emended as in text with B).
218 b) M (evid. emend.) स हि दत्तवान् (for परिणीत°).
219 c) $S'_{2\cdot3\cdot6}$ (before corr.).$_7$ C I_1 K D परिणीत्य (D *sup. lin.* य).
220 b) M (evid. emend.) हि (for [इ] व). —d) S'_2 तथा (for °दा). —$I_{1\cdot2}$ om. 220^{b-d}, 221^a.
221 b) $S'_{6\cdot7}$ A K D B -शेषैः (emended as in text with $S'_{2\cdot3}$ C $I_{1\cdot2}$).

अन्वहं वर्धिते प्रेम्णि मार्गेशैः सह चक्रिणाम् ।
बन्धुना रिगचक्रेण वैराद् दूरीकृतस्तु सः ॥२२२॥

काम्भोजयवनेशेन बाभोलेन विपाटितः ।
तदैव हस्तिनापुर्याम् एब्राहेमो नृपेश्वरः ॥२२३॥

तद्रणोत्थरजोध्वस्ता न प्राकाशन्त कुत्रचित् ।
आशा गजपतेर्वीररत्नानामनुयायिनाम् ॥२२४॥

मार्गेशदीपश्चक्रेशस्नेहपूर्णो विकारितः ।
कर्णजपाम्बुपूरेण रिगचक्रालिमेरयोः ॥२२५॥

तद्रुषोत्थानलज्वलन्मनसश्चक्रिणः कृता ।
रिगचक्रनिरोधाख्यजलाप्यायेन शैत्यता ॥२२६॥

तृतीयेऽब्देऽध्वपास्ते तु निःस्नेहाश्चक्रिणं प्रति ।
आलेमेरकृताश्वासाश् चिरोड्डारे न्यवीविशुः ॥२२७॥

विदित्वा तादृशं वृत्तं मन्त्रयित्वा महीभृता ।
न्यविक्षश्चक्रपः सैन्यं योद्धुं स्वं जालद्रागडे ॥२२८॥

---

222 a) $I_{1\cdot 2}$ C प्रेम्नि (sic). —c) B (evid. emend.) गिरि– (for रिग). —d) MSS and C B दैवा (mislec. for S′ār. वैरा)द्.

223 b) S'_2 C बा(C वा) भोरेण; B (evid. emend.) बाबुलेन; I_2 बलोलेन–.

224 b) S'_2 प्राकाश्यन्त.

226 b) S'_7 I_2 K °न्मानसश्च ; $S'_{2\cdot 3}$ C B कृताः. —MS S_7 ends with °ख्यजलाप्यायेन शैत्यता in 226[cd]. —d) M (evid. emend.) शीतता.

227 b) S'_3 C $I_{1\cdot 2}$ K D निस्ने°. —c) B (evid emend.) आलिमीर–. —d) MSS and C B चिरोड्डारं (mislec. for S′ār. रे); I_2 चिरोत्सा° (mislec. for S′ār. ड्डा)रं.

228 a) MSS and C B तादृशैः (emended as in text with M); —c) $S'_{2\cdot 3\cdot 6}$ A C $I_{1\cdot 2}$ K न्यविशत्; D B न्यविक्षत् (as in text); MSS and C B सैन्ये (mislec. for S′ār. न्यं). —d) S'_2 जालद्रगते (mislec. for S′ār. डे); I_2 B जालदा (B द)गेडे; S'_6 C जालद्रगडे.

असाध्याः सामदानाद्यैस्तद्भटा उद्भटा रणे ।
न शेकुश्चक्रिसैन्यान्तः केनापि विनिवर्तितुम् ॥२२९॥

शलस्थलपालडादिदेशेष्वश्वेशसैनिकैः ।
प्रयुध्य शतशोऽह्नानि निर्भयश्चक्रिपोऽभवत् ॥२३०॥

रात्रौ चक्रबलाद्याते लहरेयाटिकातलम् ।
भूपाले काचचक्रेशो बाह्यदेशं भयाद्गतः ॥२३१॥

विरोधमाषा उप्ता या आलेमेरेण धीमता ।
ताः पुष्पिताः पल्लविताश्चक्रेशाश्वेशभूमिषु ॥२३२॥

हिन्दुवाटं प्रयातेऽस्मिन्नुग्रे मन्त्रिणि भूमिभृत् ।
साम्राज्यमकरोद्देशेऽश्वेशमन्त्रिभिरावृतः ॥२३३॥

बहिश्चक्रेश्वरेणात्र सामन्ताः करदायिनः ।
श्रीजैनशाहवद् रीत्या कृताः स्वबलशालिना ॥२३४॥

ताजचक्रादयो वीरा भ्रातरो लोहरादिषु ।
आहवे मुग्गुलान् हत्वा चक्रुः स्वं सफलं वयः ॥२३५॥

---

229 c) A चक्र-.

230 a) K शलस्पल-; S'_2 -मालडा°; RSs_2 -पाडल- .

231 a) C B -बलाघा (mislec. for Dev. द्या)ते; S'_2 याता. —b) A लहरो वा°; S'_6 B (evid emend.) लहरी (S'_6 before corr. रे) वा°. —d) S'_3 C $I_{1\cdot 2}$ K -देशे; D अया (*pr. m. sup. lin.* गा)त्; S'_6 (marg.) I_1 K B अगात् (for गतः).

232 a) $S'_{3.6}$ A C K -मर्वा (for -माषाः); S'_3 A C K त (mislec. for S'ār. उ)प्ता. —In Kaś. the word m[a]h[a] (=माष) is feminine, so याः and ताः in 232c. —b) B (evid. emend.) आलिमीरेण. —d) M (evid. emend.) ते (for ताः).

233 d) D B आदृतः (for °वृ°).

234 c) D B -शाहि- .

235 c) A D मुग्ग°; B (evid. emend.) मुग°.

दुश्चेष्टितं विचिन्त्याथ युवराजस्य चक्रपः ।
खानमेस्कन्दरं तं स रुरोधाजगरमिव ॥२३६॥

तादृक् साहसिकं वीक्ष्य चक्रेशं भूमिपोऽनयत् ।
चतुर्थेऽब्दे शुचौ मासे कश्मीरांस्तं दिगन्तरात् ॥२३७॥

पिता भ्राताथवा पुत्रो राज्ञां राज्यजिहीर्षया ।
शत्रवः कथिता लोके किं करोत्यपरो रिपुः ॥२३८॥

इत्थं विदितभूपालचरिता अध्वपास्ततः ।
ससैन्याः प्रययुर्बाह्यदेशं कीचाश्रमाध्वना ॥२३९॥

शत्रुश्येनं समादाय प्राप्ते चक्रिपतौ नृपः ।
राज्यं निष्कण्टकं मेने परितोषमुपाययौ ॥२४०॥

खान एस्कन्दरो राजभृत्यैर्नीतो नृपालयम् ।
अपुनर्दर्शनाः कुर्वञ् श्यामा नेत्रोत्पलैर्दिशः ॥२४१॥

नृपादेशादथ क्रूरा नेत्रोत्पाटनमञ्जसा ।
श्येना इव कुरङ्गाय व्यधू राजात्मजाय ते ।
तत्क्षणे या व्यथा तेन प्राप्ता वक्तुं न पार्यते ॥२४२॥

---

236 a) C K D B दुश्चेष्टिते (mislec. for S'ar. तं); S'₃.₆ A C I₁.₂ K D B [अ]त्र (for °थ). —c) B (evid. emend.) इस्क°.

239 b) K अभयाः (corrupt) (for अध्वपाः). —d) D केचा°.

240 c) M (evid. emend.) मत्वा (for मेने).

241 a) B (evid. emend.) इस्क°. —c) S'₂ D B -दर्शनात् कु° (mislec. for S'ār. नाःकु).

242 d) M (evid. emend.) राजात्मजस्य.

—After 242d S'₃.₆ C I₁.₂ D B ins.:

1* व्यधू राजतनूजाय कुरङ्गायेव सारसाः.

[I₁.₂ D (after सारसाः) इति पाठः].

तं विना वृषनिर्दैन्यांस्तान् क्रूरान् राजसेवकान् ।
पित्रोः शापो नु फलितो धनलुब्धस्य तस्य वा ॥२४३॥

ज्ञात्वा कृत्याश्रमासीनानध्वेशांश्चक्रिराट् ततः ।
गत्वा बराह्मूलान्ताच्छ्रीनगर्यां न्यवीविशत् ॥२४४॥

पारावारात् समागत्य तत्रान्योन्यबलद्वयम् ।
व्यधाज्जनक्षयं घोरं जयाजयपरीक्षया ॥२४५॥

गिरीनुल्लङ्घ्य यातोऽथ चक्रिभ्रातृसुतो निशि ।
मल्लेकदौलतो मार्गपेशान् देशान्न्यवारयत् ॥२४६॥

असमर्थोऽध्वना यातुं मेयामेरोऽध्वपाग्रणीः ।
मार्गे पञ्चत्वमायातश्चलिताः केऽपि सायुधाः ॥२४७॥

अथाध्वपेषु नष्टेषु यातेष्वेवं बहिर्भयात् ।
स महम्मदशाहोऽगान्नगरं चक्रिभिर्वृतः ॥२४८॥

धत्ते मुदं जडमतिः शमितारिवह्नि-
स्तावद्ध्युदेति निलयाद्विषमोऽग्निरस्य ।
मह्मोदशाहनृपतिः स्वसुतादवापत्
साम्राज्यभङ्गमहहो घटना विधातुः ॥२४९॥

---

243 a) K जं (for तं); M (evid. emend.) वृषलान् दैत्यान् (for वृषनिर्दैन्यान्). —Prob. वृष is a mislec. for S'ār. व्यथ.

244 a) S'_3 I_1 K ज्ञात्या (corrupt). —b) S'_2 °ध्वेशा (for °शान्); K गतः (for ततः). —c) I_1 गता. —cd) M (evid. emend.) -मूलान्तं श्री°. —d) B (evid. emend.) °विशन्.

246 c) A -दौलुतो.

247 b) B (evid. emend.) मीयामीरो.

248 c) A महाम (mislec. for S'ār. हम्म)द–.

249 c) B (evid. emend.) मह्मूद–; D B -शाहि–; $S'_{3.6}$ A C $I_{1.2}$ K भवाप. —d) I_1 D -भ्रंशम्; B (evid. emend.) -नाशम् (for भङ्ग°).

तथाहि भूभुजानेन गजाधीशनिवेशने ।
पुत्र एब्राहिमाखानो नीचिर्दत्तोऽभवत्पुरा ॥२५०॥

तुरुष्काहववातेन विधूता शतधा चमूः ।
याता तज्जीवरत्नौघयुता नौरिव सागरे ॥२५१॥

तदाहववधान्मुक्तो भाविराज्योदयात्ततः ।
खानः स प्राप कश्मीरान् पितृस्नेहविवर्जितः ॥२५२॥

प्रादुर्बभूव राजानं प्रति राज्यजिहीर्षया ।
अस्मिन्नवसरे चक्रपतेर्दुष्टविषूचिका ॥२५३॥

राजान्तरङ्गांश्चकेशो दुष्टरोगान् भिषगिव ।
मल्लिकलद्दभट्टादीन् कारागारे रुषाक्षिपत् ॥२५४॥

ताजचक्रालये बद्ध आलेमेरो निजानुगैः ।
विमुह्य रक्षिणो रात्रौ नीत्वा क्षिप्तो दिगन्तरम् ॥२५५॥

तद्वैषम्यादिवाग्दोषोपरागादावृणोत् क्रुधा ।
मह्मोदशाहभानुं तं चकराङ्कुर्मितैर्दिनैः ॥२५६॥

इत्थमेकादशाब्दान् स दश मासान् दिनानि च ।
रक्षित्वा काश्यपीं राजा मह्मोदश्चलितोऽभवत् ॥२५७॥

---

250 c) B (evid. emend.) इब्रा°. —d) MSS and C B नीविंद° (<विन्द mislec. for S'ār दं); $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K दत्त्वा (emended as in text with D B).

252 d) MSS and C B -विवार्द्धित: (emended as in text). —After 253, I_1 D B ins. :

2 * प्रादुर्बभूव राज्ञोऽस्य राज्यभ्रंशाय पूर्वजा: ।

254 c) A -लद्र–; I_2 D -लद्ब–.

255 b) B (evid. emend.) आलिमीरो.

256 c) B (evid. emend.) मह्मूद–.

257 d) B (evid. emend.) मह्मूदश्.

धर्मः फलति कालेन सद्यःपाको हि सोऽभवत् ।
ज्ञानस्यान्ध्याद् व्यथा याभूद्राज्यभ्रंशान्नृपस्य सा ॥२५८॥

गग्गोडाख्यं खशस्थानं प्रहितोऽथ स चक्रिणा ।
दत्त्वा न्यायकसुय्यादीन् क्रूरान् रक्षिजनान् निजान् ॥२५९॥

इति शुकपण्डितकृतौ राजतरङ्गिण्यां
मल्लदशाहराज्यभ्रंशो नाम
प्रथमस्तरङ्गः ॥ १ ॥

---

259 [a]) I_2 गंगो (<गम्गो mislec. for S'ār. गग्गो) माख्यं; K गग्गोड्डा°. —[c]) S'_3 न्या (*sup. lin.* ना)यक–; S'_3 C स्वय्या°.
Colophon: —S'_7 fol. missing. S'_2 as above; $S'_{3\text{-}6}$ A C K B इति मह्म (S'_6 हम, C हम्म, B evid. emend. ह्म)दशाहराज्यभ्रंशः ; $I_{1\text{-}2}$ D महाम (mislec. for S'ār. हम्म)दशाहिराज्यभ्रंशः.

द्वितीयस्तरङ्गः

जगत्सृष्टिस्थितिध्वंसहेतवे वृषकेतवे ।
भवाब्धिसेतवे ब्रह्मविष्णुरुद्रात्मने नमः ॥ १ ॥

अथ काश्चनचक्रेण पुत्रो मह्मदभूभुजः ।
एभ्राह्मशाह इत्याख्यां कृत्वा राज्येऽभ्यषिच्यत ॥ २ ॥

स्वमन्त्रिपदवीं दीप्तां चक्रे चक्रेश्वरस्ततः ।
स्वीकृत्य राज्यतन्त्राणि द्रङ्गाशुल्कोद्भवैर्धनैः ॥ ३ ॥

नाग्रामप्रमुखै राष्ट्रे राजयोग्यैर्न्ययोजयत् ।
अनुजांस्ताजचक्रेशमेयामेरादिकान् स्वकान् ॥ ४ ॥

बाह्ये चाब्दालमार्गेशो ढिल्लीपं मुग्गुलेश्वरम् ।
सेनां मार्गयितुं मेर्जबाभोरं प्रययौ रुषा ॥ ५ ॥

आकारेङ्गितवाक्चेष्टासंपूर्णं वीक्ष्य मार्गपम् ।
क्षणं तुरुष्कराजोऽभूद्विस्मयानतकन्धरः ॥ ६ ॥

तुरुष्कभूपेन ततो ज्ञात्वा मन्त्रिवरं च तम् ।
सहस्रसंख्या वीराणां सेनास्मै प्रतिपादिता ॥ ७ ॥

इत्थं प्रवृद्धां वार्तां तां देशे पञ्चमहायने ।
वैशाखे श्रुतवांश्चक्रपतिर्विक्रमशोभितः ॥ ८ ॥

स्वःक्रीडामिव कुर्वत्सु भूमौ चक्रिषु मार्गपाः ।
मल्लेकाब्दाललुहरमार्गेशाद्या महारथाः ॥ ९ ॥

---

1 [c]) B (evid. emend.) इब्रा°.

4 [b]) A (by contam.) राष्ट्र– (1or राज–). —[d]) B (evid. emend.) -मीयामीरा°; I मेय्यामिरा°; C मेय्या°.

5 [b]) S′$_3$ C दिल्लीप; I.$_2$ ढिल्लेशं; B (evid. emend.) ढिल्लीशं; D मुग्गले°; B (evid. emend.) मुगले°. —[cd]) B (evid. emend.) मिर्जाबाइरं.

गिरीनुल्लङ्घ्य बाङ्गेलात् काश्मीरान्विविशुर्द्रुतम् ।
शिखालभेगमह्मोदखानादिमुग्गुलैर्वृताः ॥ १० ॥

फताहशाहजं खानं नाजोकं चाग्रयायिनम् ।
कृत्वा निविष्टाः संनद्धाः प्रतापपुरधन्वनि ॥ ११ ॥

श्रुत्वैतच्चक्रपः सेनां नीलाश्वे स्वां न्यवीविशत् ।
सैन्यद्वयोद्गता वीराः स्वामिभक्तिमदर्शयन् ॥ १२ ॥

विपक्षपक्षिभिश्छन्ने म्लेच्छसैन्यविहायसि ।
विहाय स्वपदं यातुं नाशक्नुत स पक्षिभिः ॥ १३ ॥

ततश्चक्रपतिं दूतः प्राह मार्गेशवाचिकम् ।
भो भोश्चक्रपते बाह्ये सामन्ताः करदायिनः ॥ १४ ॥

कृता येन स्ववीर्येण लक्षैः पञ्चभिरावृतः ।
हतो गजपतिः श्रीमान् एब्राहेमो बलोत्कटः ॥ १५ ॥

तस्य मेरेजबाभोरराजस्यानुचरा इमे ।
मयानीताः सहायार्थं सन्नद्धोऽस्तु भवान् रणे ॥ १६ ॥

इत्युक्तो लेखहारेण चक्रेशोऽन्ववददमुम् ।
ढिल्ली न देशः कश्मीराः प्रतिष्ठाना वयं न ते ।
फलपाकोऽमुतो देशान्मुग्गुलानां महौजसाम् ॥ १७ ॥

---

10 [a]) S'_2 बार्ङ्गा°. —[c]) I_2 D B शिखालभिग–; B (evid. emend.) -मह्मूद–. —[d]) B (evid. emend.) -मुगलैः.

11 [b]) B (evid. emend.) नाजुकं.

13 [a]) B (evid. emend.) °विच्छिन्ने (for °भिश्छन्ने). —[b]) A -सैन्यं. —[c]) $S'_{2.3}$ C K सम्पदं; I_1 स्वं (for स्व).

15 [b]) S'_2 लक्ष्यैः (sic).

16 [a]) B (evid. emend.) मिरजबाबुर–.

17 [a]) $S'_{2.3}$ C $I_{1.2}$ K इत्युक्ते; S'_6 A D B; इत्युक्तो (as in text). —[c]) D B ढिल्ली; C (evid. emend.) दिल्ली. —[c]) M (erroneously)

अथ वीरा महौजस्का महावीर्या धनुर्धराः ।
एभ्राह्मखानसेरङ्गमेरमल्लेकताजकाः ॥ १८ ॥

तथा मार्गेशपक्ष्यास्तु मल्लेकल्हरादयः ।
रिगचक्रेशमल्लेको म्लेच्छाः शिखभिगादयः ॥ १९ ॥

कुरुपाण्डवसैन्यस्य युद्धं व्यङ्क्तुमिवोद्यताः ।
निर्ययुः समरे वीराः स्वबाहुबलदर्पिताः ॥ २० ॥

रिगचक्रेशवीरेण शक्तिः क्षिप्ता च वैरिषु ।
प्रक्रुत्ताद्भुतवीरेण ताजमेरेण सत्वरम् ॥ २१ ॥

मेरसेरङ्गचक्रेण प्रहिता करवालिका ।
रिपोर्ल्हरमेरस्य याता पुष्पक्षतोपमाम् ॥ २२ ॥

एवं प्रवीरैरन्योन्यं प्रकीर्य समराम्बरम् ।
स्ववीर्यमृगनाभ्युद्यत्सौगन्ध्याकुलितं क्रुतम् ॥ २३ ॥

कश्मरीरान्. —d) M (evid. emend.). प्रतिखाना (for °ह्नाना). —e) MSS and C B मतो (emended as in text). —f) B (evid. emend.) मुगलानां.

18 d) B (evid. emend.) -मीर–; B (evid. emend.) -मल्लीक–.

19 a) $S'_{2.3}$ C K पक्षास्. —c) S'_{2} A -मल्लेक–. —d) B (evid. emend.) शिखबिगा°.

20 b) S'_{3} C व्यक्तुम्; S'_{6} कर्तुम्; K वक्तुम्. —c) $S'_{2.3}$ C $I_{1.2}$ K समरं (mislec. for S'ār. रे).

21 b) $I_{1.2}$ D चिक्षेप (for क्षिप्ता च). —c) $I_{1.2}$ D चकर्त (for प्रक्रुत्ता); S'_{2} -वीर्येण. —d) I_{2} भा (mislec. for S'ār. ता)ज–; B (evid. emend.) -मीरेण.

22 a) B (evid. emend.) मीर–. —b) S'_{6} प्रक्षिप्ता; $I_{1.2}$ D प्राहिणोत् (for प्रहिता). —c) B (evid. emend.) -मीरस्य.

23 a) K (gram. assim.) अन्योन्यैः. —b) K प्रकीर्ण–; S'_{2} समरस्वन (mislec. for S'ār. म्बर)म्; A -स्वरम् (for °म्बरम्).

ततः स्वसैन्यैः सेनान्तस्ताजचक्रेश उद्ययौ ।
वातोद्धूतपताकाभिस्तर्जयन्निव वैरिणः ॥ २४ ॥

रणः प्रववृते तत्र चक्रमार्गेशसैन्ययोः ।
आगच्छ-जहि-तिष्ठेतिशब्दोऽभूद् भटसंक्षये ॥ २५ ॥

समरोद्धतमवेक्ष्य ताजचक्र-
मवदल् लहरमार्गपस्तमेत्य ।
कुरु युद्धं किमतः परं किमन्य-
न्मनुजैः स्वामिदशासु साध्यते यत् ॥ २६ ॥

तन्निशम्य चिरं युद्ध्वा वीरैर्मल्लेकताजकः ।
शिश्रिये वीरशयनं नाकनारीविराजितम् ॥ २७ ॥

कीर्तिशेषं गते तस्मिन् परे चक्रिसहोदराः ।
मेयामल्लकसेरङ्गमेराद्या मुग्गुलैर्हताः ॥ २८ ॥

स्वसैन्यं निहतं दृष्ट्वा चक्रेशोऽल्पबलान्वितः ।
खशालयं ययौ भीत्या शोकेन च समाकुलः ॥ २९ ॥

अथ मार्गेश्वरा जित्वा मल्लेकाब्दालकादयः ।
विविशुर्नगरं लोकानाश्वासन्तो भयाकुलान् ॥ ३० ॥

गत्वा नृपाङ्गने सर्वे छत्रचामरशोभितम् ।
प्रददू राज्यतिलकमध्वेशा राजसूनवे ॥ ३१ ॥

---

25 c) I_2 हन (for जहि). – d) S'_2 -सञ्चये; S'_3 सङ्क्ष (*sup. lin.* ञ्च)ये.

26 a) $S'_{2.6}$ (after corr.) D B ईक्ष्य; S'_3 C K एक्ष्य (for अवेक्ष्य). —d) M (evid. emend.) -सभासु (for दशा°); MSS and C B तत् (emended as in text).

28 c) B (evident. emend.) मीया–. —d) B (evid. emend.) -मीरा°. —d) B (evid. emend.) मुगलैः ; MSS and C B युताः (emended as in text).

29 d) K शोकं (mislec. for S'ār. के)न.

31 a) B (evid. emend.) °ङ्गणे.

अथ नाजोकशाहेन पित्र्ये सिंहासने श्रिते।
प्रहर्षाकुलिता उच्चावचाः सर्वेऽभवंस्तदा ॥ ३२ ॥

गता ज्यमालमरुगां सनृपास्तेऽथ मन्त्रिणः।
मल्लेकाब्दालकस्यांश आलमेरस्य चापरः ॥ ३३ ॥

मार्गेशलुहरस्यांशो रिगचक्रस्य चापरः।
विभक्तार्था चतुर्भागैस्तैश्चतुर्भिरिहत्यभूः ॥ ३४ ॥

खशालयस्थं चक्रेशं विसृष्टस्तैर्महात्मभिः।
लेखहारस्तमाह स्म मार्गेशमुखवाचिकम् ॥ ३५ ॥

भो भोश्चक्रपते स्वामिभक्तिज्योत्स्ना भवादृशैः।
दुर्मन्त्रिभिरमात्यानां विमला मलिनीकृता ॥ ३६ ॥

यस्य बालस्य साम्राज्ये राज्यकार्येषु मन्त्रिणः।
बद्धाञ्जलय एवासन् स रुद्धो भवता कथम् ॥ ३७ ॥

रवेरावरणं मूढः कुण्डेन विदधाति कः।
इत्थं दूतमुखाच्छ्रुत्वा मुमोच नृपतिं त्वसौ ॥ ३८ ॥

ततो मह्मदशाहः स गत्वा लोहरमासदत्।
पूर्वोर्वरेशवद् द्रङ्गाशुल्काद्यमपि चाग्रहीत् ॥ ३९ ॥

नीतिज्ञो मन्त्रयित्वाथ मार्गेशैर्मुग्गुलांस्ततः।
विसर्जयामास नृपः संमान्यैतान् स्वकं पदम् ॥ ४० ॥

---

32 [a]) B (evid. emend.) नाजुक–.

33 [a]) S'_6 (after corr.) A $I_{1\cdot2}$ K D B गत्वा; $S'_{2\cdot3}$ जमा°; S'_2 -मग (sic)गां; I_2 -मड्डुगां. —[d]) B (evid. emend.) आलिमीरस्य.

34 [b]) D वा (mislec. for S'ar. चा)परः. —[c]) S'_3 K विभक्तार्थै; C विभक्ताऽर्थै; B (evid. emend) विभक्तेर्थै; M (evid. emend.?) विभक्तार्थै.

39 [b]) B (evid. emend.) लुहरम्. —[c]) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B °वैरीश°.

40 [b]) B (evid. emend.) मुग्गुलान्.

उल्लङ्घ्य लोहरं प्रापुस्तुरुष्काः स्वनिवेशनम् ।
मह्मोदशाहं संलेभे आलेमेरश्चिरात् प्रभुम् ॥ ४१ ॥

हेमन्तमतिघाह्यात्र वसन्तमिव तं नृपम् ।
काश्मीरोपवने मेरो मार्गेशानुमतोऽनयत् ॥ ४२ ॥

राज्यं कृत्वाथ वर्षैकं दशम्यां नाजुको नृपः ।
ज्यैष्ठशुक्ले नृपात् प्राप यौवराज्यं महम्मदात् ॥ ४३ ॥

षष्ठेऽब्दे मह्मदः शाहोऽभिषिक्तः सचिवैः शुचौ ।
राज्ये खशालयान्मुक्तो भूयोजात इवाहतः ॥ ४४ ॥

दिवं मेरेजबाभोरः स प्रयातः स्वपुत्रयोः ।
दत्त्वा स्वविभवं कामराणहोमाययोस्तदा ॥ ४५ ॥

सप्तमेऽब्देऽध्वपैः सार्द्धं युद्धेच्छुः काचचक्रपः ।
मौर्वारग्रामादगमत् ससैन्योऽथ दिगन्तरम् ॥ ४६ ॥

याति चक्रपतौ वीरे ततः पश्चिमदिग्वधूः ।
रतिहेतुरुषा केतुं मूर्ध्नि नित्यमधार्यत ॥ ४७ ॥

---

41 c) B (evid. emend.) मह्मूद–. —d) B (evid. emend.) आलिमीरश्; $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B चिरं.

42 a $I_{1\cdot2}$ D हिमन्तम्. —c) B (evid. emend.) मीरो.

43 b) S'_2 नाजोको (emended as in text). Other MSS and C B नाजिको. —c) D B ज्येष्ठ–. —d) $I_{1\cdot2}$ D महाम (mislec. for S'ār. हम्भ)दात्.

45 a) B (evid. emend.) मिरजाबाबुरः. —d) I_2 K -राज– (mislec. for S'ār. ण).

46 D B नौ (B नौं)वाॅर–; K मौर्घा (or र्वा)र–; S'_6 मौ (*inf. lin.* न र्वा)र–.

47 c, I_2 रहिते तु (for रतिहेतु–).

तद्वर्षे कार्तिके शुक्ले मह्लोमाख्यश्च भूपतिः ।
मेरेजाकामराणस्य काश्मीरान् जेतुमाययौ ॥ ४८ ॥

शिखालभिगमह्मोदखानादिर्मुग्गुलैः सह ।
कुर्वन् दश दिशः पूर्णा गर्जद्भिः प्रबलैर्बलैः ॥ ४९ ॥

श्रुत्वा मह्मदशाहाद्याश्चक्रेशं शीघ्रमानयन् ।
साहायकार्थमश्वेशै राष्ट्रघोषकृतार्हणम् ॥ ५० ॥

सहस्त्रैरश्ववाराणां म्लेच्छा नगरमाविशन् ।
काश्मीरिकाश्च दुर्गेषु स्वबलानि न्यवीविशुः ॥ ५१ ॥

भयात् पौरजने याते गिरिगह्वरवर्त्मसु ।
वीरेषु सैन्यबाहुल्यात् प्रनष्टेषु च तत्र तु ॥ ५२ ॥

शून्यं पुरवरं दृष्ट्वा मुग्गुलास्तेक्रुधादहन् ।
गृहाणि राजधानीं च कुद्दीनस्य लुण्ठकाः ॥ ५३ ॥

दुर्गेभ्यो निर्गता वीरास्तुरुष्कैराहवेच्छया ।
स्वेच्छया प्राणसर्वस्वं विक्रीय यश आददुः ॥ ५४ ॥

ग्रामेषु नगरेऽरण्ये तुरुष्कैर्निष्कृपैर्हताः ।
सहस्रसंख्या लोकानां जुलुच्यवधकारिभिः ॥ ५५ ॥

---

48 [b]) B (evid. emend.) मह्लूमा°. —[c]) B (evid. emend.) मिरजा-.

49 [a]) B (evid. emend.) -मह्मूद-. —[b]) B (evid. emend.) -मुगलैः.

50 [d]) M (evid. emend.) -घोषैः.

52 [b]) $S'_{2\cdot3}$ (after corr.) -कन्धर- (for गह्वर). —[c]) S'_2 धीरेषु. —[d]) S'_2 $I_{1\cdot2}$ D प्रणष्टेषु (corrupt).

53 [b]) B (evid. emend.) मुगलास्. —[d]) $S'_{2\cdot3}$ K क्रुद्धा (S'_3 K द्व) दीनविलु°; S'_6 A क्रुद्धा देशाविलु°; C कुद्रदीनविलु°; $I_{1\cdot2}$ D B कुद्वदीनस्य; RSs_2 कुद्दीनस्य (as in text).

54 [d]) S'_6 C आदधुः.

55 [a]) $S'_{3\cdot6}$ A C K राज्ये (mislec. for S'ār. रण्ये).

ततः काश्मीरिकैर्वीरैर्मार्गेशेश्चक्किभिश्च ते ।
अर्कांशुभिस्तमांसीव संधायापासिता इतः ॥ ५६ ॥

मुक्तास्ते साहसाद्वीराः स्वगृहेषु स्थितिं व्यधुः ।
मार्गेशानादरत्रस्तः काचचक्रो बहिर्ययौ ॥ ५७ ॥

वर्षेऽष्टमे शुचौ शूरपुरात् सोऽप्यापययौ पुनः ।
शस्त्रं प्रतिहतं ज्ञात्वा बाह्यं यातो यथागतम् ॥ ५८ ॥

मार्गमासेऽत्र शरदि कास्कारीयाश्चमूचराः ।
मेरेजहैदराद्याः श्रीसैदखानमहीभृतः ॥ ५९ ॥

हयारोहसहस्रैर्द्वादशभिः परिवारिताः ।
काश्मीराननायुयुर्जेतुं श्येना इव विहङ्गमान् ॥ ६० ॥

कोटाद्गगनगिर्यन्त आगच्छन्तो नृपालयम् ।
प्रविशन्तो भवन्तीत्थं श्रुत्वा सन्तो विपेदिरे ॥ ६१ ॥

तुरुष्कोपप्लवाल्लोकैः कास्कारोपद्रवो महान् ।
अज्ञायि सूर्यग्रहणं चन्द्रग्रासाद्विशिष्यते ॥ ६२ ॥

चलिते सकले जीवलोके वेश्मावलिस्ततः ।
शवराशिरिवोच्छ्वासशून्याभूद्भयदायिनी ॥ ६३ ॥

तस्या दाहक्रियां कर्तुं तीव्रवह्निप्रदायकाः ।
सेकन्धरपुरीराजधानीं रम्यामतेजयन् ॥ ६४ ॥

—After 56 $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B इति ($I_{1\cdot2}$ D om. इति) तुरुष्कोपद्रवः.

58 [c]) M (evid. emend.) सैन्यं (for शस्त्रं). —[d]) M (evid. emend.) °गतः.

59 [b]) D काष्का°. —[c]) B (evid. emend.) मिरजा–.

61 [a]) S'_2 A कोट्टाद्; S'_3 C -गगण-; B (evid. emend.) -गमन- (for -गगन-); B -निर्यन्त (corrupt).

62 [b]) D काष्कारो°.

63 [c]) $S'_{2\cdot6}$ A C $I_{1\cdot2}$ K शर (mislec. for S'ār. व).

64 [a]) MSS and C B तस्यां (emended as in text with M). —[c]) B (evid. emend.) सिकन्दर–; $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K -महा- (for -पुरी-).

उच्चावचगृहैर्लक्षसंख्यैर्दग्धैः पुरोर्वरा ।
जाता श्मशानभूवत् सा दग्धकाष्ठभयङ्करा ॥ ६५ ॥

राजधानीद्वयं तादृग्लभ्यते कुत्र भूमिपैः ।
सुधादार्विष्टकाचित्रे कोटिसंख्या व्ययीकृताः ॥ ६६ ॥

श्रीजैननगरे दिद्दामठे चाग्निं विनाकृतम् ।
राजधानीद्वयं भूभृत्सुकृतमिव तत् स्थितम् ॥ ६७ ॥

वेतालसाधनायुक्ता इवासन् मुग्गुला भ्रुवम् ।
लब्धं यत् सद्मनिहितं गुप्तं पौरधनं तु यैः ॥ ६८ ॥

जलावरणयुक्तासु भूपभूमिषु शिश्रियुः ।
काश्मीरिकाश्चमूनाथा आश्रयान् म्लेच्छशङ्कया ॥ ६९ ॥

चिरोड्डारं च हाज्येङ्गकोट्टं चक्रधरं तथा ।
श्रित्वात्यवाहयन् मासत्रयं म्लेच्छैः प्रयुध्य ते ॥ ७० ॥

दैत्यरूपेण खुश्शेन स्थितांश्चक्रधरान्तिके ।
काश्मीरिकान् प्रति कृतं युद्धं निष्फलमभ्यगात् ॥ ७१ ॥

---

65 a) S'_3 (after corr.). $_6$ A C $I_{1\cdot2}$ K D B नीचा°. —b) M (evid. emend.) पुरी वरा. —c) $I_{1\cdot2}$ D याता.

66 c) $S'_{2\cdot3\cdot6}$ A C K -चित्रैः (emended as in text with $I_{1\cdot2}$ D B). —d) $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K °कृता; D B °कृताः (asin text).

68 b) B (evid. emend.) मुगला. —c) I_2 D ज्या(for यत्). —d) K प्राप्तं (tor गु°); M (evid. emend.) तैः (for यैः).

70 a) B (evid. emend.) हाजीङ्ग-. —c) MSS and C B श्रुत्वा (emended as in text)भ्य (mislec. for S'ār. त्य)वा°.

71 a) C दैन्य (mislec. for S'ār. त्य)रू°; $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K खःशेन; B खुःशेन. —d) D B अप्य° (for अभ्य°).
—Atter 71 MSS (except S'_2) C B ins.:
3* वन्ध्यमप्यभवद् युद्धं कृतं काश्मीरिकान् प्रति ।
[After प्रति S'_3 C $I_{1\cdot2}$ K D इति वा ($I_{1\cdot2}$ D om. वा) पाठः].

खिलीकृतास्तुरुष्कैस्ता भुवो मडवराज्यगाः ।
हृत्वा फलसमृद्धिं तां हत्वा ग्राम्यजनान् क्रुधा ॥ ७२ ॥

ये याता नौषु तीर्त्वासन् खुयाश्रमादिभूमिषु ।
सबालवृद्धाः सुखिनः स्वायुःशेषेण रक्षिताः ॥ ७३ ॥

जुलुच्योपप्लवे पूर्वं तथा कज्जलसंगरे ।
क्षोभोऽभूत्तादृशो देशे कुकृत्यात् पापिनां विशाम् ॥ ७४ ॥

चक्राधारादेत्य भूपेन्द्रयुक्ता
भीमादेवीसंनिधौ संनिवेशम् ।
चक्रुस्तीर्त्वा लेदरीवामपारं
चक्रेशाद्या मार्गपा आहवाय ॥ ७५ ॥

खान एस्कन्दरो मेर्जाहैदरोऽन्ये महाबलाः ।
काश्मीरिकान् प्रति ययुः संनद्धास्तत्र संयुगे ॥ ७६ ॥

मार्ताण्डपादमूले तत्राहौषुर्बलद्वयात् प्राणान् ।
मल्लेकालकह्लोसनमेरशिखालाः कमाल्मेरश्च ॥ ७७ ॥

कास्कारीयाः प्रवीराश्च केचिद्युद्ध्वा दिवं ययुः ।
सफलं स्ववयः कृत्वा मल्लेकालादिभी रणे ॥ ७८ ॥

---

72 d) A यामि– (for ग्राम्य–).

73 a) S'_3 C सं (for °सन्); S'_3 C K खयाश्रमाजि°; D खोया°.

74 a) S'_2 जलाद्योप° (corrupt). —c) S'_3 A C $I_{1\cdot2}$ K B तादृशे.

75 c) A -पार्श्वं (for पारं). —d) D B °शा वा.

76 a) B (evid. emend.) इस्कन्दरो मिर्जा–. —b) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B रथाः.

77 c) B (evid. emend.) -मीर–. —d) B (evid. emend.) -मीर–.

78 a) D काष्का°; $I_{1\cdot2}$ काश्का°.

रे मूढाः कुरुत खदैवसेवनं तत्
तान्सर्वान्भवविभवान् विहाय लोलान्।
दृष्ट्वा तन्मरणमथालिमेरनाम्नः
सङ्ग्रामे मुगुलवरैर्हि देशहेतोः ॥ ७९ ॥

विदुरोपमिते तस्मिन्निहते दुद्रुवुर्भटाः।
काश्मीरिकाः कृताश्वासाश्चक्रेशाध्वेशनायकैः ॥ ८० ॥

कबन्धनर्तका यक्षनरा वेतालराक्षसाः।
महामांसाशनव्यग्रा जन्यव्याप्ता इवाहवे ॥ ८१ ॥

रणोद्याने वीरपानमदोन्मत्तेषु तेष्वथ।
हतशिष्टं चमूयुग्मं स्वाश्रयेषु न्यविक्षत ॥ ८२ ॥

अथ चक्रेशमार्गेशौ नृपादेशात् समेत्य तैः।
मुग्गुलैः सह संधानमकार्ष्टां पौरुषोर्जितौ ॥ ८३ ॥

नवसंख्यानि वस्त्राणि कतेफसोफसग्लतैः।
तोफं तद्भाषयादाय मुग्गुला भूपतेः पुरः ॥ ८४ ॥

---

79 [a]) $S'_{2.3.6}$ A C $I_{1.2}$ K B सदैव (emended as in text with D); $S'_{2.3.6}$ A C $I_{1.2}$ K देवसेवां (emended to -सेवनं तत् with D B). —[ab]) $I_{1.2}$ भर्ता (mislec. for S'ār. तत्ता)न्. —[c]) B (evid. emend.) -मीर–. —[d]) D B मुगल–.

81 [a]) $I_{1.2}$ D यज्ञ– (for °क्ष). —[d]) M (evid. emend.) प्राप्ता (for व्या°).

82 [c]) MSS and C B -शिष्टे (mislec. for S'ār. ष्टं) चमूयुग्मे (mislec. for S'ār. ग्मं).

83 [c]) B (evid. emend.) मुगलैः. —[d]) B (evid. emend.) अकरोत् (for °कार्ष्टाम्).

84 [b]) B (evid. emend.) कतीफ–; I_1 कतेह– (mislec. for S'ār. फ); I_1 C -सोह– (mislec. for S'ār फ); B (evid. emend.) -सूफ–. —[c]) $S'_{2.3.6}$ A तोकमं; K तोक्खं; I_2 C तोक्सं; I_1 तोकां; D B तोकं (doubtfully emended as in text). —[d]) B (evid. emend.) मुगला; S'_3 C $I_{1.2}$ K पुरा.

नृपमुद्राङ्कितं पत्रं गृहीत्वा मौसुलाक्षरैः ।
प्रत्यायाताः स्वसैन्यं तत् कुर्वन्तो हर्षनिर्भरम् ॥ ८५ ॥

धाटीभिः पामरा नीताः स्त्रीपुंसाः पुष्यदन्तिकाम् ।
मुक्ता हस्सनमेराद्यैरानीताः करुणापरैः ॥ ८६ ॥

ततोऽब्दे नवमे ज्यैष्ठे स्वदेशं मुग्गुला ययुः ।
बलात् पौरश्रियं साम्रादाय राजसुतामपि ॥ ८७ ॥

इत्थं सतीसरोदेशे पीडाभूत् पापिनां विशाम् ।
पूर्वपश्चिमतः केतोरनिशं दिवि दर्शनात् ॥ ८८ ॥

पक्वशालिवरस्फातिपूर्णक्षेत्रेषु सर्वतः ।
नभसस्तारकाः पेतुर्भूयः केतुरदृश्यत ॥ ८९ ॥

सम्यङ् निगीर्णेऽन्नराजे तदुपद्रवरक्षसा ।
उदजृम्भन्महाघोरो दुर्भिक्षोऽन्नपते रिपुः ॥ ९० ॥

निविष्टे मण्डलेऽमुष्मिंश्चेरुस्तत्सैनिकास्ततः ।
क्षुत्पिपासादयो लोकपीडका बलवत्तराः ॥ ९१ ॥

सहस्रदशभिर्निष्कैर्लभ्या मूल्येन खार्यभूत् ।
धान्यस्य गतिमादातुं कान्यस्य धनिनो विना ॥ ९२ ॥

---

85 c) MSS and C B -सैन्यं (mislec. for S'ār. न्ये). —d) K -निर्भयम् (for °रम्).

86 b) MSS and C B -पुमान् (emended as in text with M); $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K °न्तिकात्; D B °न्तिकाम् (as in text). —c) मुक्त्वा; B (evid. emend.) -मीरा°.

87 a) D B ज्यंष्ठे. —b) B (evid. emend.) मुगला:. —After 88 $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B इति ($I_{1\cdot2}$ D om. इति) कास्का (D ष्का, $I_{1\cdot2}$ श्का)रीयोपद्रवः.

89 a) $S'_{2\cdot3\cdot6}$ A $I_{1\cdot2}$ K -स्फीति-; C D B -स्फाति- (as in text).

90 c) M (evid. emend.) व्यजृम्भत.

92 c) S'_{2} $I_{1\cdot2}$ D B गतिर्; $S'_{3\cdot6}$ A C K गतिम् (as in text). —d) M (evid. emend.) कस्यासीत् (for कान्यस्य); A धान्विनो; M (evid. emend.) धनिनं.

भर्तृभक्तिं सुतस्नेहं शुश्रूषां पित्रोरेव च ।
हित्वा स्वप्राणरक्षायै चेरुः स्त्रीपुरुषाः क्षुधा ॥ ९३ ॥

भुक्त्वा द्वित्रिचतुर्वारं क्षुधार्ता दिवसान्तरे ।
अटन्तः प्रेतरूपा हि दृष्टा भोजनवाञ्छया ॥ ९४ ॥

तत्कालेऽब्दालमल्लिकादयः पुण्यरता हि ते ।
प्रत्यहं तण्डुलशतैः पक्वान्नैः पुपुषुर्जनम् ॥ ९५ ॥

ग्रामेषु नगरे राजमार्गेषु गणनास्त न ।
क्षुत्पिपासाप्रमीतानां प्रेतानामिव देहिनाम् ॥ ९६ ॥

संचितं रूप्यकुप्यादि विक्रीय व्यधुरात्मनः ।
प्राणसंधारणं केचिच्छाकेनाक्षोटपिण्यकैः ॥ ९७ ॥

उपद्रवभयादेष दुर्भिक्षोपप्लवो महान् ।
गलनेत्रामयाद् दुष्टविस्फोटो ह्यतिदुःसहः ॥ ९८ ॥

ज्यैष्ठान्तं दशमाब्दस्य नवमाद्वत्सराद् भृशम् ।
घोरे दुर्भिक्षतमसि परितः क्रान्तमण्डले ॥ ९९ ॥

गुण्ठिबीजोद्भवस्नेहधूपैर्दीपैः प्रकाशयन् ।
आशा अन्ननृपामात्यः सुकालो योद्धुमाययौ ॥१००॥

यदा गोधूमकलशा उद्ययुः स्तम्बजा भुवः ।
कुर्वन्तः स्वफलैः शेषजन्तोरारात्रिकामिव ॥१०१॥

---

94 d) S'_3 (before corr.) C दृष्ट्वा.

95 d) M (evid. emend.) जनान्.

96 b) $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K B [अ] स्तु (emended as in text with D).

99 a) D B ज्येष्ठा°.

100 a) B (evid. emend.) गुण्ठी-.

101 a) $S'_{2\cdot3\cdot6}$ C $I_{1\cdot2}$ K D B यथा; A यदा (as in text); M (evid. emend.) तथा गोधूमकलता. —b) MSS and D B स्तम्भ (mislec. for S'ār. म्ब)जा.

स्वबलैर्भृशमाक्रान्तमवेक्ष्यान्नाधिपः स्वयम् ।
आययौ बलिनं जेतुं दुर्भिक्षं घोरराक्षसम् ॥१०२॥

वितत्य महतीं सेनां प्रियङ्गुशालिकोद्रवैः ।
यन्त्राश्मभिरिवाक्षोटैर्जित्वा तं स न्यविक्षत ॥१०३॥

अन्नराजफलैः पुष्टा जन्तवोऽतिकृशास्ततः ।
पुनर्जातमिवात्मानममन्यन्त दिवानिशम् ॥१०४॥

तदा काञ्चनचक्रेशः स्थितिं जैनपुरे व्यधात् ।
मन्त्रित्वमध्वपादेशाद्राज्ञोऽभ्यर्णे विभूषयन् ॥१०५॥

श्वपचाकारकश्चक्रपतिर्मडवराज्यगाः ।
भूमीरदण्डयन्मार्गपानां ताटस्थ्यवीक्षणात् ॥१०६॥

अत्रान्तरे महान् देशो देहो दुष्टैरिवामयैः ।
स्वस्वावासाश्रयैरेतैः पीडया जर्जरीकृतः ॥१०७॥

तदुत्थपापसंतापाच्चैत्रान्तेऽब्दे त्रयोदशे ।
राजा मह्मदशाहोऽभूदस्वस्थो नियतेर्बलात् ॥१०८॥

कान्तं देहं रुजाक्रान्तं शान्तं वीक्ष्य च भूमिपः ।
मल्लिकलद्दभट्टाख्यं सस्नेहं प्राह मन्त्रिणम् ॥१०९॥

राजधर्मोद्भवैः पुण्यपापैः संवर्धितोऽपि सन् ।
तथापि कायः सापाय इति सर्वत्र निश्चयः ॥११०॥

---

102 a) M (evid. emend.) -बलं भृ°. —d) A दुर्बलं (for °र्भिक्षं). —After 103 $S'_{3.6}$ A C $I_{1.2}$ K D B इति (I_2 D om. इति) दुर्भिक्षोपद्रवः.

105 b) S'_3 C $I_{1.2}$ K जन– (for जै°).

106 b) $S'_{2.3.6}$ A C $I_{1.2}$ K B -राज्यगः ; D -राज्यगाः (as in text).

107 a) K महादेशो. —b) M (evid. emend.) दुष्टामयैरिव.

109 b) I_2 C K श्रान्तं (for शा°).

अस्मद्वंशे महीयांसः शंशदेनादयो नृपाः ।
श्रीजैनोल्लाभदेनश्चाप्येते पूर्वपितामहाः ॥१११॥

तद्वंश्योऽहं मदीयः कः कीदृशो मत्परो भवेत् ।
इति चिन्ताकुलं चेतो ज्वरेणाद्यापि दह्यते ॥११२॥

इत्युक्त्वा विरते राज्ञि मार्गेशाब्दालकादयः ।
आगतास्तादृशं वीक्ष्य सास्रुनेत्रास्तमब्रुवन् ॥११३॥

भूपास्मदपचारेण प्रजाभाग्यैरथापि ते ।
कायक्लेशोऽस्ति स्वस्यैव दण्डो भृत्यापराधतः ॥११४॥

श्रुत्वाब्रवीन्नृपस्तेषां वचो मत्तनयाः सदा ।
भवद्भिः पालनीयाश्च वयं यामः पराध्वनि ॥११५॥

आक्रन्दोऽभून्महाराजगृहे श्रुत्वा नृपोदितम् ।
तदह्नि निष्ककोट्यश्च राज्ञा धर्मेण योजिताः ॥११६॥

प्राप्ते पुष्पाकरे मासे व्यथार्तस्यास्य भूभुजः ।
दातुर्जातु विपत्तिः स्यात् कृष्णपक्षे कथञ्चन ॥११७॥

ज्यैष्ठशुक्लादिदिवसे गुरुवारे नरार्यमा ।
वर्षान् पञ्चाशतिं भूपो राज्यं कृत्वास्तमाययौ ॥११८॥

तस्मिन्याते दिवं लोकः सशोको विललाप तम् ।
हा कं श्रयाम भवति नाकलोकमुपस्थिते ॥११९॥

---

111 b) C K शंष–; B शंख–. —c) M (evid. emend.) °ल्लावदीन°.

112 b) D मत्परं.

113 d) C सास्र–; B (evid. emend.) साश्रु–.

114 c) $S'_{2\cdot3}$ C K D [इ]व (for ए°). —d) S'_2 दण्डयो (sic); A C K भू (mislec. for S'ar. भृ)त्या°.

117 c) K धातुः.

118 a) D B ज्येष्ठ–. —c) $S'_{2\cdot3\cdot6}$ C K पञ्च शती भूयां; A I_2 D B पञ्चाशतिं भूपो (as in text); I_1 पंच···तिं.

अस्मान्को नृपते कृच्छ्रात् त्वां विना पालयिष्यति ।
मृगाङ्कसुन्दराकार महासेनपराक्रम ॥१२०॥

महम्मदमहीपाल महीं हित्वा क यास्यसि ।
इति प्रलापमुखरा राजद्वारे स्थिताः जनाः ।
संस्थितस्य नृपस्यादुर्बाष्पैरिव जलाञ्जलीन् ॥१२१॥

कर्णरिथमथारोप्य शवं बृहन्मृताजिरे ।
दत्तस्कन्धाः पितुः पार्श्वे गोगर्ते मन्त्रिणोऽक्षिपन् ॥१२२॥

केन्दुकोमलशय्यासु नृपार्हं शयनं प्रभोः ।
क शर्करिलभूम्यन्तस्तमोन्धे विवरे स्थितिः ॥१२३॥

तदह्नि शोकमूकस्य लोकस्योच्छ्वसनात् परम् ।
धूमादि रन्धनाभावान्नालक्ष्यत गृहेषु तत् ॥१२४॥

मार्गेशेन कृताशंसः सप्रशंसोऽस्य मन्त्रिभिः ।
शंसशाहोऽयमित्याख्यां कृत्वा पुत्रोऽभ्यषिच्यत ॥१२५॥

नवराज्योर्जितं चैतं युवानं वीक्ष्य भूमिपम् ।
महान्तः पामराः सर्वे तुतुषुः राजवल्लभाः ॥१२६॥

---

121 a) $I_{1\cdot2}$ D महाम (mislec. for S'ār. हम्म)द–. —c) MSS and C B -मुखरे (gram. assim.). —d) $I_{1\cdot2}$ स्थिते (gram. assim.). —f) S'_2 जलाञ्जलिम् .

122 a) $I_{1\cdot2}$ D कर्णे–. —c) S'_3 दन्त (mislec. for S'ār. त्त). —d) D °णोक्षिपुः ; B °णः क्षिपुः (sic).

123 a) D B केदं; M (evid. emend.) क तद्दुकूल– (for केन्दुकोमल–). —d) C $I_{1\cdot2}$ D विवर–.

124 b) S'_3 A C D °च्छ्वास°. —d) S'_2 (after तत्) figure 2. —After 124 $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B इति (I_2 D om. इति) महम्मदशाह–(I_2 हि)स्वर्यानम् .

125 c) I_1 D शंष–; B (evid. emend.) शंख–.

चिरं स्वे पैतृके राज्ये स्थेया इति जनाशिषः ।
शृण्वन् राजगृहं प्राप शंसशाहः सहानुजः ॥१२७॥

तस्मिन् राज्यस्थिते जैनपुरान्नगरमाययौ ।
काचचक्रपती रिगचक्राश्वस्तो महाबलः ॥१२८॥

दृष्ट्वा वीरं तमायान्तमुत्सभट्टान्वितस्ततः ।
मार्गेशहोस्सनः प्रायात् कीचाश्रमेऽध्वपान्तिकम् ॥१२९॥

प्रविष्टो नगरं रम्यं काचचक्रः सभाजितः ।
नृपेण तेन सस्नेहं परपक्षविमर्दनः ॥१३०॥

तथा काञ्चनचक्रेशो ज्ञात्वा दूरगतान् रिपून् ।
सबलो गर्धसोड्डारे निविष्टोऽरिजिगीषया ॥१३१॥

अत्यन्तिकस्थं बलिनं रिपुमाकर्ण्य मार्गपाः ।
चमूं निवेशयामासुस्तूर्णं जलगदान्तिके ॥१३२॥

महात्मा रिगचक्रेशः काचचक्राध्वपेशयोः ।
गत्वा प्रेरितदूतः स साम कर्तुमथेष्टवान् ॥१३३॥

नगरे काचचक्रेशः क्रमराज्ये तु मार्गपाः ।
सन्तु सोऽहं समस्तेषामिति सन्धिं व्यधादयम् ॥१३४॥

अथ मार्गेशसैन्यस्थानानीयान्तिकमात्मनः ।
जैतचक्रेशमल्लेकदौलतैब्राह्मखानकान् ॥१३५॥

---

127 b) C D B स्थाया. —c) S'_3 दृष्ट्वा; $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B शृण्वन् (as in text). —d) I_2 D शंष–; B (evid. emend.) शंख–.

129 d) B °न्तिके (mislec. for Dev. कं).

130 c) K नृपे ग (mislec. for S'ar. ण).

131 c) S'_2 गर्वसो°; A C गर्धभो°; K गर्धसोत्ता (mislec. for S'ar. ड्डा) रे; D B गर्भसोडारे; S'_6 गर्धभोड्डा (marg. *pr. m.* र्भसोडा) रे.

132 d) A निज– (for जल–).

134 c) S'_2 सम्मतोऽहं समस्तानाम् (sic).

135 c) S'_2 जेत–; $S'_{3\cdot6}$ A C K जैतश्च°. —d) B (evid. emend.) -दौलतेब्राह्म–.

स्वबन्धून् काचचक्रेश आरुरोह जयी पुरम् ।
निवासमकरोद्वीरो रिगचक्रालयेषु सः ॥१३६॥

काचचक्रे स्थिते राज्ञोऽन्तिके निर्णयकारिणि ।
बलं बलवतां दृष्टं शौर्यं न तु पृथग्जने ॥१३७॥

आगत्य रिगचक्रेशः काचचक्रान्तिकं तदा ।
दिनान्युषित्वा ज्ञात्वास्य स्वल्पप्रेमागमत्पुनः ।
मार्गेशनिकटं गत्वावोचचक्रेशचेष्टितम् ॥१३८॥

संमन्त्र्य वीरान् सर्वांस्तान् संघटय्य नृपाग्रगान् ।
रिगचक्रः स मार्गेशं ज्ञात्वा दुष्टमिवामयम् ॥१३९॥

HERE ABOUT ENDS ŚUKA'S RĀJATARAṄGIṆĪ[1]

136 [b]) S'_2 आविवेश; $S'_{3\text{-}6}$ A C $I_{1\text{-}2}$ K D B आरुरोह (as in text).

137 [d]) MSS and C B शौर्येण (emended as in text with M).

138 [c]) I_1 D दिनान्. —[d]) S'_2 ततः; $S'_{3\text{-}6}$ A C $I_{1\text{-}2}$ K D B पुनः (as in text)

139 [a]) D (by transp.) सर्वान् वीरान्. —[b]) I_2 संघट्टय्य. —[d]) D blank for ज्ञात्वा.

1. See *Jonarāja*, Introduction., § § 39; 40, n 8.

APPENDICES *A-I*

परिशिष्टानि

APPENDIX *A*

(B 398) कश्मीरभूमौ प्रथिता अमात्या
भीमार्जुनद्रोणसमा रणेषु ।
मल्लेकश्रीदौलतगाजखान-
चक्रेशमुख्याश्च विचारदक्षाः ॥ १ ॥

(B 399) सिद्धादेशात् प्रसिद्धस्य सिद्धादेशाधिकारिणः ।
श्रीमन्मल्लेकराजाननौजकस्य मुखाद्यथा ॥ २ ॥

(B 400) विज्ञाप्यन्तेऽत्रदेशीयैः कांदिशीकैर्बलातुरैः ।
सर्वजनपदैर्दीनैर्दुरातङ्ककलङ्कितैः ॥ ३ ॥

(B 401) जैनशाहे दिवं याते दुर्बला बलवत्तरैः ।
पीडिताः कांदिशीकाश्च जना दुर्दण्डतो गताः ॥ ४ ॥

(B 402) श्रीसैफडामरेन्द्रेण नृपामात्येन पालिता ।
लालिता च प्रजा नित्यं दुर्व्यवस्थानिवारणात् ॥ ५ ॥

(B 403) पुण्यपापपरीपाकान्मन्त्रिभिरन्तरान्तरा ।
पोषिताः शोषिता लोकाः सद्विचाराविवेकतः ॥ ६ ॥

---

1 [c]) B (evid. emend.) -दौलत-.

2 [d]) S'_3 C I_2 K D -नु(D न)ज्यकस्य; S'_6 (before corr.) A B -नाजुकस्य.

3 [a]) I_1 B विज्ञप्यन्ते. —[b]) K बलान्त (mislec. for S'ār. तु)रैः. —After 3 $S'_{3\text{-}6}$ A C $I_{1\text{-}2}$ K D B ins. तथाहि ।

4 S'_2 om. 4^{cd}.

5 [a]) K -शैफ-. —[c]) K पालिता; S'_3 C D [अ]थ (for च).

6 [b]) MSS and C B अन्तरा(K C र)न्तरात् (emended as in text). —[d]) A (evid. emend.) सद्विवेकाविचारणात्.

(B 404) भानुरिव ततश्चक्रपतिर्मल्लेककाञ्चनः ।
उदेत्य मन्त्रिवीथीं तां नृपादेशादभूषयत् ॥ ७ ॥

(B 405) विचारनिरतेऽमुष्मिन्नासीने राजमन्दिरे ।
बलं बलवतां दृष्टं शौर्यें न तु पृथग्जने ॥ ८ ॥

(B 406) वैमत्यान्महतां पापाद्विशां च तत उत्थिताः ।
मुग्गुलातङ्कदुर्भिक्षदोषास्तस्मिन् बहिर्गते ॥ ९ ॥

Appendix *B*

(B 407) मार्गेशाब्दालकानीतो मेरेजोऽगणयत् ततः ।
अप्राप्तानिव प्राप्तान् स कश्मीरांश्चक्रिणो भयात् ॥ १ ॥

(B 408) काचचक्रेशमल्लेके हिन्दुवाटे गते दिवम् ।
काश्मीरिकाणां बाह्यानामभूत् कलुषितं मनः ॥ २ ॥

(B 409) तदाकर्ण्याथ मेरेजहैदरोऽचीकरन्महान् ।
कुलागतमिव स्वस्थं तदा कश्मीरमण्डलम् ॥ ३ ॥

(B 410) चक्रेशेऽन्तर्हिते भूमौ मुग्गुला दैत्यरूपिणः ।
विचेरुः शारदापीठे निःशङ्कमकुतोभयाः ॥ ४ ॥

---

8 c) $S'_{3.6}$ C $I_{1.2}$ K बलवता. —d) MSS and C B शौर्येण (emended as in text with M).

9 c) $S'_{2.3.6}$ (before corr.) A C °लान्तक–; $I_{1.2}$ K D B °लातङ्क– (as in text).

---

1 b) B (evid. emend.) मीरेजो. —c) $S'_{3.6}$ A C $I_{1.2}$ K प्राप्तः (for °प्तान्).

3 a) B (evid. emend.) मीरेज–. —b) $S'_{3.6}$ Ċ $I_{1.2}$ K D -हैधरा (C रौ ?). —c) D B [अ] स्वस्थं.

4 b) B (evid. emend.) मुगला.

(B 411) मेरेजमधुगोलस्य कश्मीरस्थस्य चान्तिकम् ।
आययुः परदेशेभ्यो मुग्गुलाः सरघा इव ॥ ५ ॥

(B 412) बलेषु वर्धमानेषु तेषु या नीतवार्षिका ।
लोत्रप्रतिग्रहोपात्ता भूर्हता तैर्नियोगिभिः ॥ ६ ॥

(B 413) दिवानैर्म्लेच्छसंख्येशैर्लिखिता मुसुलाक्षरैः ।
भूमिः समग्रराष्ट्राणां हृत्वाप्यायं प्रजास्वपि ॥ ७ ॥

(B 414) इत्येव भूर्नभोमासि साध्वीवाथ व्यकम्पत ।
द्वाविंशेऽब्दे जनान्नीचान् हताप्यायानवेक्ष्य सा ॥ ८ ॥

(B 415) प्रनष्टमुग्गुले देशे भूमीच्छुरखिलो जनः ।
काश्मीरिकाणां विजयाद् भूयोऽभूदर्थलिप्सया ॥ ९ ॥

(B 416) तुरुष्कसाहचर्यात्ते काश्मीरा नात्यजंस्त्रयम् ।
वेशो भूमिर्भोजनं च चिकित्सादण्डमद्भुतम् ॥ १० ॥

(B 417) दृष्टाशुभोऽपि लोकोऽयं नामुञ्चद्धृदयाद् दृढाम् ।
दुर्वासनां महावैद्यश्चिकित्सां शास्त्रगामिव ॥ ११ ॥

(B 418) दुराचारादियं भूमिर्वायुक्रान्तेव भूरिशः ।
त्रिंशेऽब्दे चाश्वयुङ्मासे कम्पिता स्वामिनो मुहुः ॥ १२ ॥

---

5 [a]) B (evid. emend.) मीरेज–; K C मशु– (mislec. for S′ār. धु). —[d]) B (evid. emend.) मुगलाः.

6 [b]) $S'_{2\cdot 6}$ A C $I_{1\cdot 2}$ D B [अ]तीत–; S'_3 K नीत– (as in text).

7 [a]) M (evid. emend.) -सैन्येशैः (for संख्ये°). —[c]) $S'_{3\cdot 6}$ A C $I_{1\cdot 2}$ K समय– (for °ग्र). —[d]) A हत्वा.

8 [a]) D B इतीव.

9 [a]) $I_{1\cdot 2}$ D प्रणष्ट– (corrupt); B (evid. emend.) -मुगले. —[d]) I_1 -विवक्षया (for लिप्सया).

10 [b]) K स्वयम् (for त्र°). —[d]) S'_2 किचित्सा– (sic).

11 [a]) $S'_{3\cdot 6}$ A C K दृष्ट्वा. —[b]) D दृढम्. —[c]) C B -वैद्याः

(B 419) आर्तस्त्राणान्मही दानान्मुक्तेर्लौत्रप्रतिग्रहम् ।
मोक्षश्चातिथिसत्काराद् ग्रहो धर्मेण शाम्यति ॥ १३ ॥

APPENDIX *C*

(B 501) राज्यं नाजोकखानाय दत्त्वा दौलुतचक्ककः ।
स्वयं स बुभुजे देशं निर्देशेन ह्यशेषतः ॥ १ ॥

(B 502) कम्पितो म्लेच्छलोकेन नवे तस्मिन्नराधिपे ।
रज्यते स्म जनो नित्यं शिशिरेण मधाविव ॥ २ ॥

(B 503) नाजोकशाहे तद्राज्यं गृहीते निर्वबुर्जनाः ।
उदयाद्रिं गते सूर्ये प्रातः पद्माकरा इव ॥ ३ ॥

(B 504) मिलितेष्वथ सर्वेषु परस्परविरोधिषु ।
पुनर्ग्रामविभागेन शनैर्वैरमजायत ॥ ४ ॥

(B 505) एदेरैणादयो लोका मेर्जाहैदरसेवकाः ।
चक्कजातिविरोधेन सदाशिबपुरेऽवसन् ॥ ५ ॥

---

13 a) $S'_{2\cdot3\cdot6}$ A C I_1 K अतन्त्रा ($S'_{2\cdot6}$ A न्त्र)णात् ; I_2 आतंत्राणात् ; D B आर्त– (emended as in text). —b) MSS and C B -प्रतिग्रहे (mislec. for S'ār.) हं (? हः); $S'_{2\cdot6}$ A C I_1 मुक्ते (gram. assim. influenced by corrupt -प्रतिग्रहे). —c) MSS and C B मोक्षाच्च (mislec. for S'ār. क्षश्च).

—Before st. I D ins. ओं नमो भगवते वासुदेवाय । श्रीगुरवे नमः ओं; $I_{1\cdot2}$ ओं (I_1 om. ओं) श्रीगणेशाय नमः.

1 a) B (evid. emend.) नाजुक–. —b) B (evid. emend) दौलत–; S'_2 (evid. emend.) -चक्रकः. —c) $S'_{2\cdot3\cdot6}$ A C I_1 K B न (emended to स with I_2 D).

3 a) B (evid. emend.) नाजूक–.

5 a) B (evid. emend.) -राणा° (for -रै°). —b) B (evid. emend.) मिर्जा–. —c) S'_2 (evid. emend.) चक्र–. —I_2 om. 5^{cd}, 6, 7.

(B 506) वितस्तातीरमाश्रित्य समुद्रामठवासिनः ।
युयुधुर्दहनास्त्रेण चक्कदौलुतकादयः ॥ ६ ॥

(B 507) मासमेकं कृते युद्धे दहनास्त्रशरादिभिः ।
दौलुतचक्कलोकेन विजयो विहितस्तदा ॥ ७ ॥

(B 508) अत्रान्तरे स होमायः पातिशाहोऽभवद् भुवि ।
नमत्समस्तभूपालमौलिघृष्टपदाम्बुजः ॥ ८ ॥

(B 509) तेन निर्वापितो राज्ञां मिथो वैरमहानलः ।
प्रजानां हृदयोन्माथी न दारिद्र्यदवानलः ॥ ९ ॥

(B 510) अजम्होमायनामासीद्वैरी तस्य महीभृतः ।
स देशं दुर्गमं श्रित्वा स्थातव्यमित्यचिन्तयत् ॥ १० ॥

(B 511) किं नु नेष्यामि कश्मीरदेशं पर्वतदुर्गमम् ।
तत्र स्थितं न बाधेत मां होमायमहीपतिः ॥ ११ ॥

(B 512) इत्युक्त्वा चलिते तस्मिन्नजम्होमायभूपतौ ।
काश्मीरैः सह सङ्ग्रामो बभूव नगमस्तके ॥ १२ ॥

(B 513) ततः काश्मीरलोकेन पर्वतोपरिवासिना ।
अजम्होमायभूपस्य निहतं सर्वसैनिकम् ॥ १३ ॥

---

6 a) M (evid. emend.) आसाद्य (for °श्रित्य). —b) I_1 -मड- (for °ठ). —c) K देहिना- (for दहना-). —d) B (evid. emend.) -दौलतका°.

7 c) B (evid. emend.) दौलत-; S'_2 (evid. emend.) -चक्र-. —d) $I_{1\cdot2}$ (after तदा) figure 100.

9 a) MSS and C B राज्ञा (emended as in text). —$I_{1\cdot2}$ D blank for 9[bc].

10 a) MSS and C B अजह्रो (emended as in text)माय-.

11 a) MSS and C B किंतु (emended as in text with M); S'_2 जी (sic) ष्यामि.

12 b) MSS and C B अजह्रोमाय- (see crit. App. 10).

13 c) MSS and C B अजह्रोमाय- (see crit. App. 10); S'_2 -नृपते: (for भूपस्य).

(B 514) अयं तु नृपतिः शश्वत्पाति कश्मीरमण्डलम् ।
नाजोकनृपतौ साक्षाद्दिग्दाहः सर्वतोऽभवत् ॥ १४ ॥

(B 515) द्वितीये प्रहरे रात्रेः प्रसुप्ते सकले जने ।
बभूव धरणीकम्पो मथितानेकमानवः ॥ १५ ॥

(B 516) भूमिरन्ध्रेषु जातेषु भूकम्पेन पदे पदे ।
पथि संचरतां मार्गः पान्थानां विस्मृतोऽभवत् ॥ १६ ॥

(B 517) भूमिरन्ध्रगते गेहे रात्रौ निर्गमनोत्सुकाः ।
उपर्याच्छादनं भित्त्वा जनाः प्रातर्विनिर्ययुः ॥ १७ ॥

(B 518) वितस्तातोयपतिताद् गृहात् काष्ठमयात्तदा ।
सप्तक्रोशेष्वतीतेषु प्रबुद्धा निर्ययुर्जनाः ॥ १८ ॥

(B 519) हसैनपुरहोसैनपुरयोर्दूरवर्तिनोः ।
नदीमुल्लङ्घ्य भूकम्पे व्युत्क्रमोऽद्यापि दृश्यते ॥ १९ ॥

(B 520) क्वचिद्धा तातेति क्वचिदपि च हा मातरिति वा
क्वचिद्धा मित्रेति क्वचिदपि च हा भ्रातरिति वा ।
तदा तत्रत्यानां करुणरुदितं दुर्व्यसनिनां
निशम्याभूद् वज्रप्रतिहतमिवातीव हृदयम् ॥ २० ॥

(B 521) निर्घातध्वानभीमे नभसि हतगतौ तारकाणां समूहे
कल्लोलालोलतुम्बीफलवदविरतं चञ्चले भूमिखण्डे ।
पुत्रे मित्रे कलत्रे सुजनसहृदये द्रव्यजाते जनानां
भूकम्पातङ्कशङ्काप्रचलितमनसां स्नेह आसीन्न तेषाम् ॥२१॥

---

14 a) I_2 D blank for 14a. —c) B (evid. emend.) नाजूक-.

20 a) I_2 words beginning with 2nd क्वचिद् and ending with वा om. hapl.

21 a) $S'_{2\cdot3}$ -ध्वान्त-; S'_6 A C $I_{1\cdot2}$ K D B -ध्वान- (as in text). —c) A C -सुहृदये-.

(B 522) विजयेश्वरमार्ताण्डवराहक्षेत्रवासिनाम् ।
पुण्यतीर्थप्रभावेन भूकम्पान्नाभवद्भयम् ॥ २२ ॥

(B 523) पुनःपुनः प्रतिदिनं भूमिकम्पे प्रवर्तिते ।
उवास सकलो लोकः पटमण्डपपङ्क्तिषु ॥ २३ ॥

(B 524) याते बहुविधे काले निर्वृते सकले जने ।
ररक्ष सकलं देशं सम्यग्दौलुतचक्रकः ॥ २४ ॥

(B 525) निरुध्य जलसंचारं वेतालाङ्गनभूमिषु ।
विदधे निजमास्थानं सस्यक्षेत्रचिकीर्षया ॥ २५ ॥

(B 526) एतादृशे कृते कार्ये क्रुद्धवेतालचोदिताः ।
गृहे दौलुतचक्रस्य पतन्ति स्म शिला निशि ॥ २६ ॥

(B 527) अदृष्टदेवताक्षिप्तशिलावर्षणसंकुलम् ।
राजद्वारं निशीथिन्यामभवद्विस्मयावहम् ॥ २७ ॥

(B 528) ईदृशं प्रत्यहं केन कृतं पाषाणवर्षणम् ।
इत्थं परस्परं लोकः कथयामास विस्मितः ॥ २८ ॥

(B 529) तूलमूलाभिधे ग्रामे सम्यग्ज्ञानपरायणः ।
अभिमन्युरिति ख्यातः साधुरासीन्महातपाः ॥ २९ ॥

(B 530) एकदा तद्गृहं गत्वा साधुं दौलुतचक्रकः ।
उवाच निर्भयं प्राज्यं कथं राज्यं भविष्यति ॥ ३० ॥

---

22 [a]) C B -मार्तण्ड–.

24 [b]) S'_3 निवृत्ते; C निर्वृत्ते; B (evid. emend.) निवृते. —[d]) B (evid. emend.) दौलत–.

25 [b]) S'_9 व(sic)ताला°; B (evid. emend.) °लाङ्गण–. —[d]) S'_3 C K शस्य–.

26 [c]) B (evid. emend.) दौलत–. —[d]) $S'_{2\cdot3\cdot6}$ A C K पतिताश्च; $I_{1\cdot2}$ D B पतन्ति स्म (as in text).

27 [a]) K -क्षिप्र– (for °प्त).

30 [b]) B (evid. emend.) दौलुत–.

(B 531) इत्युक्तो तेन सोऽवादीन्निवारय मदाज्ञया ।
वार्षिकं ब्राह्मणकरं तेन सिद्धिर्भविष्यति ॥ ३१ ॥

(B 532) इत्थं निवेदिते तेन साधुना म्लेच्छसत्तमः ।
उवाच वचनं सम्यक् शृणु वच्मि महामुने ॥ ३२ ॥

(B 533) तूलमूलाभिधं ग्राममर्पयिष्यामि तेऽधुना ।
विप्रदण्डं कथं म्लेच्छो वारयामि त्वदाज्ञया ॥ ३३ ॥

(B 534) इत्थं दौलुतचक्रेन वचने कथिते सति ।
अभिमन्युर्बभूवासौ रोषव्याकुलमानसः ॥ ३४ ॥

(B 335) तेनाशु ब्राह्मणकरो यदा नैव निवारितः ।
साधुर्दौलतचक्रं तं शशाप रोषसंयुतः ॥ ३५ ॥

(B 336) समुद्रमध्यमासाद्य चन्द्रार्कौ ते पतिष्यतः ।
इति शापप्रनष्टश्रीर्ययौ दौलुतचक्रकः ॥ ३६ ॥

(B 337) वर्षमेकं कृते राज्ये हमेभाभिधभूभृता ।
जग्राह तत्पदं लोभाद् गाजीखानस्ततः स्वयम् ॥ ३७ ॥

(B 538) तत्प्रतापाग्निदग्धेषु सिक्ताः स्त्रीनयनाम्बुभिः ।
गृहेषु वैरिणां नित्यमुत्पद्यन्ते तृणाङ्कुराः ॥ ३८ ॥

(B 539) रुदच्छात्रवनारीणामम्बुवर्षाकुलेष्वपि ।
ज्वलत्यपूर्वो गेहेषु यत्प्रतापदवानलः ॥ ३९ ॥

---

31 a) MSS and C B इत्युक्ते (emended as in text with M).

33 ab) S'_2 ग्रामं समर्पं° (hypermetric)

34 a) B (evid. emend.) दौलत–.

35 c) B (evid. emend.) दौलत–; S'_2 (evid. emend.) -चक्रं.

36 c) D -प्रण(sic)ष्ट–. —d) B (evid. emend.) दौलत–; S'_2 -चक्रकः.

37 a) $S'_{2\cdot3\,6}$ A C I_1 K मासम्; D B वर्षम् (as in text).

38 a) S'_2 यत् (sic) —b) B (evid. emend.) °श्रुभिः.

39 b) B (evid. emend.) अश्रु–.

(B 540) अथ दिग्दाहभूकम्पान् समीक्ष्य पृथिवीभृता ।
पृष्टा वाक्यमिदं प्राहुर्गणका गणनापराः ॥ ४० ॥

(B 541) देशेऽस्मिंस्तव संभविष्यति महद्युद्धं समृद्धं प्रभो
सङ्ग्रामेष्वपि निःसरिष्यति महावेगा च रक्तापगा ।
लोकानां प्रचरिष्यति प्रतिपदं दुर्भिक्षपीडाथवा
तस्माच्चारुविचारणेन धरणीं भूपाल भोः पालय ॥ ४१ ॥

(B 542) अथाययौ स्वसेनाभिर्मैजहैदरसेवकः ।
करबह्दोरनामासौ भूयो देशजिगीषया ॥ ४२ ॥

(B 543) निशम्यैतादृशीं वार्तां गाजशाहो विनिर्ययौ ।
तुरङ्गमखुरोद्धृष्टचूर्णीकृतमहीधरः ॥ ४३ ॥

(B 544) स समाश्रित्य भूपालो देशं राजविराभिधम् ।
पदातिमार्गलोकानां समराय समादिशत् ॥ ४४ ॥

(B 545) राजवीराभिधे देशे मिलिते राजकद्वये ।
भीतिर्बभूव लोकानां द्वैराज्यशङ्किनां तदा ॥ ४५ ॥

(B 546) रणे विलोक्य सर्वासां पत्तीनां गतिचातुरीम् ।
बभूव वायुवत् कम्पो भीतिचञ्चलमानसः ॥ ४६ ॥

---

42 b) B (evid. emend.) मिर्जा–; K -हैधर–. —c) $S'_{2\cdot3\cdot6}$ C I_1 K करभद्दो(I_1 दो)र–; A करभड्डुर–; D करबह्दोर– (as in text); B (evid. emend.) करबह्दुर–.

43 b) S'_3 C K D B -शाहिः. —c) M (evid. emend.) °घृष्टि–.

44 c) D blank for -मार्ग–.

45 a) C राजावि(sic)रा°. —d) $S'_{3\cdot6}$ A C I_1 K B द्विजराज(A C जा) नामशङ्किनाम्; D ……मशाङ्किनाम्.

46 a) M (evid. emend.) सर्वेषां (for °र्वासां). —ab) D blank for सर्वासां पत्तीनां. —c) D blank for वायुवत् कम्पो. —d) I_1 D सीति– (for भी°).

(B 547) करभद्दोरो दृष्ट्वाथ काश्मीरशरवर्षणम् ।
सक्रोधः करभद्दोरः पत्तिलोकविलोकनात् ॥ ४७ ॥

(B 548) अन्धकार इव प्रातः साक्षादरुणदर्शनात् ।
तस्मिन् पलायिते देशान्निर्ववौ सकलो जनः ॥ ४८ ॥

(B 549) सर्पे विनिर्गते गेहात् कुटुम्बमिव तत्क्षणम् ।
तदास्य ववृधे तेजः करैर्जज्वाल मेदिनी ।
विससार प्रतापश्च ग्रीष्मकाले रवेरिव ॥ ४९ ॥

(B 450) अत्रान्तरे महारोषजर्जरीकृतमानसाः ।
हभेचक्रादयो लोकाश्चस्कन्दुर्नगरान्तरम् ॥ ५० ॥

(B 551) सदाशिवपुरे दुर्गं कृत्वा तिष्ठत्सु वैरिषु ।
दिद्दामठान्तिके तस्थौ भूपो युद्धचिकीर्षया ॥ ५१ ॥

(B 552) युद्धेऽस्मिन् हाटकस्वामिसदाशिवपुरस्थयोः ।
वितस्ता सेनयोर्मध्ये वारयन्तीव सा बभौ ॥ ५२ ॥

(B 553) नदीमुल्लङ्घ्य भूपालो युद्धं कृत्वा महत्तरम् ।
सितानदीप्रवाहेषु हभेचक्रममारयत् ॥ ५३ ॥

---

47 a) $S'_{2.3}$ C K करभद्दोरो (K °र–); S'_6 करभदु (before corr. द्दो)रो; A करभहदुरो; I_1 D करभद्दोर– (°रो as in text); B (evid. emend.) करबद्दुरो; K दृ(sic)ष्टाथ; D blank for दृष्ट्वाथ. —c) S'_3 C $I_{1.2}$ K B स क्रुद्धः; S'_6 A संक्रुद्धः; D blank for सक्रोधः; S'_3 C K करभद्दोरः; S'_6 करभदु (दु inserted later) दु (before corr. द्दो)रः; S'_2 (evid. emend.) सहसा धीरः; A करभहदुरः; I_1 M (evid. emend.) करवहदोरः; I_2 करभद्रोरः; D करभद्दारः (as in text); B (evid. emend.) करबद्दुरः.

49 a) I_1 C देहात्.

50 a) A -घो mislec. for S'ār. रो)ष–. —c) $S'_{3.6}$ A C हन्त च°; S'_2 हन्त चक्रा°; K हन्नचं°; D हभे– (as in text); $I_{1.2}$ हते (mislec. for S'ār. भे)च°; B (evid. emend.) हबी–.

52 a) C K D B हाटके (corrupt).

53 d) S'_2 हभेभ्रम (mislec. for S'ār. च)क्रम्; I_2 हभ– (for हभे).

(B 554) गते बहुविधे काले नोस्सीचक्रप्रचोदितः ।
आययौ मुग्गुलस्वामी श्रीकश्मीरजिगीषया ॥ ५४ ॥

(B 555) शाहअब्दोलमालीति नाम यस्याभवद् भुवि ।
स काश्मीरान्तरं प्राप बहुलोकसमन्वितः ॥ ५५ ॥

(B 556) तत्तदागमनं श्रुत्वा सैन्येन महता वृतः ।
आससाद स भूपालः परिहासपुरान्तिकम् ॥ ५६ ॥

(B 557) कृते बहुविधे युद्धे सकले सैनिके मृते ।
शाहअब्दोलमाली स चचाल निजवर्त्मना ॥ ५७ ॥

(B 558) बभूवुः समरे तत्र यवना विगतासवः ।
यमस्तुतोष रक्तौघव्याजेनाधिगतासवः ॥ ५८ ॥

(B 559) आनीतैः समरस्थानाद् भूपालो नगरान्तरे ।
गृहमुट्टङ्कयामास मृतमानवमस्तकैः ॥ ५९ ॥

(B 560) एकदा सप्तवर्षस्य बालस्योन्मुष्णतः फलम् ।
कृपां विहाय भूपालः करं चिच्छेद तत्क्षणम् ॥ ६० ॥

(B 561) चौरे मुष्णति कस्मिंश्चिन्मीनान् ग्रामनिवासिनाम् ।
बलाज्जहार भूपालः स्वर्णमुद्राशतद्वयम् ॥ ६१ ॥

(B 562) मातुलं स्वं जिघांसन्तं यौवनस्थं प्रतापिनम् ।
क्षणाज्जघान भूपालः स्वसुतं हैदराभिधम् ॥ ६२ ॥

---

54 [b]) S'_2 (evid. emend.) -चक्र-. —[c]) D मुद्गल-; B (evid. emend.) मुगल-.

55 [a]) S'_2 I_2 -श(mislec. for S'ār. अ)ब्दो°; B S'_6 (after corr.) अब्दुल°.

56 [a]) S'_2 उ(or त)त्तराग°. — पत्तना- (for तत्तदा°) is suggested.

57 [b]) S'_2 वृ(sic)ते; S'_3 C K धृते (for मृ°). —[c]) B (evid. emend.) अब्दुल-. —[d]) S'_2 After निजवर्त्मना a mark, thus ≍, signifies a break in the text.

(B 563) निहते स्वसुते तेन यौवनस्थे दुरात्मना।
हतः पुत्रोऽप्यनेनेति हाहाकारो महानभूत् ॥ ६३ ॥

(B 564) अष्टादशाभवंस्तस्य युवराजस्य मन्त्रिणः।
स तान् जघान भूपाल उन्मत्त इव राक्षसः ॥ ६४ ॥

(B 565) एकदा कुष्ठरोगेण बहलेन महीपतिः।
बभूव विगतच्छायो ग्रहणेनेव चन्द्रमाः ॥ ६५ ॥

(B 566) कण्डूः कीटकृता देहे पूयशोणितनिर्गमः।
नरके यानि चिह्नानि तान्यासंस्तस्य जीवतः ॥ ६६ ॥

---

63 ^{c}) K [अ]थ (for °पि).

64 ^{c}) S'_3 C I_1 K (corrupt) सुतान् (K °तां) (for स तान्).
The following passage read after 87 in $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K B is transposed to this place:—

*4 येनापराधः कृतस्तत्प्रातिवेश्मिकान् राजा मुमोष । प्रत्यहं शतशो लोकान् जघान । स्वल्पापराधेऽधिकं दण्डं कृतवान् । एकस्य ग्रामस्यापराधे सति बहून् ग्रामान् मुमोष । सुपात्रे किमपि न ददौ, कुपात्रेषु समार्पयत् । स्वसेवकं जैतानामानमादिदेश—मत्पुत्रो हन्यताम् । स स्नेहवशाद्राजपुत्रं न जघान । ततो राजपुत्रं देलावरखानो जघान । लोकास्तत्रसुः । हा पाप राजन् परलोके का गतिस्तव भविष्यति । स्वसुतस्यापि कृपा न जाता । तत्सेवकानपराधरहितान् किमवधीः ।

[(1.4) $S'_{3\cdot6}$ A C I_1 K B बहूत्तमान्; I_2 बहून् ग्रामान् (as above). —(1.6) I_1 जैत–; M (evid. emend.) जैद–. —S'_2 D om. 4*.]

65 ^{b}) $S'_{2\cdot3\cdot6}$ A C I_1 K D B बहुलेन; I_2 बहलेन (as in text). —^{c}) $S'_{2\cdot3\cdot6}$ (before corr.) विगतोच्छायो.

66 ^{d}) K जीविनः.

(B 567) कीटो जघास मांसानि पीत्वा तत्पूयशोणितम् ।
नरकादधिका पीडा बभूवैतस्य जीवतः ॥ ६७ ॥

(B 568) हा तात मित्र हा पुत्र मम कष्टमुपस्थितम् ।
इति क्रन्दितमाकर्ण्य को नाभूद् दीनमानसः ॥ ६८ ॥

(B 569) इति स्पृष्टमहाकुष्ठनिपीडितकलेवरः ।
समं संसारलोभेन प्राणांस्तत्याज भूपतिः ॥ ६९ ॥

(B 570) मृतस्य तस्य भूपस्य भ्राता होसैनखानकः ।
निखन्य भूतले सम्यङ्निर्ममे मृतसंस्कृतिम् ॥ ७० ॥

(B 571) अकस्माद् भूतलं तत्र जज्वाल नरकाग्निना ।
धूमेनोत्पतता कुर्वद्विस्मितां जनसंततिम् ॥ ७१ ॥

(B 572) निःश्वास इव कालेन पीड्यमानस्य भूभृतः ।
उत्तस्थौ सर्वतो धूमः सर्वलोकविलोकितः ॥ ७२ ॥

(B 573) रात्रौ तद्भूतलं गत्वा पीड्यमानस्य भूभृतः ।
शुश्राव सकलो लोको यमकिङ्करताडनम् ॥ ७३ ॥

(B 574) तेनोक्तं यादृशं बीजं तादृशं लभ्यते फलम् ।
इत्थं परस्परं लोको वदति स्म सविस्मयः ॥ ७४ ॥

(B 575) वर्षद्वयान्तरे कृत्वा राज्यं पापमलीमसम् ।
कुष्ठरोगविशीर्णाङ्गो गाजिशाहिर्ममार सः ॥ ७५ ॥

---

67 [b]) MSS and C B -शोणिते (mislec. for S′ār. तं). —[d]) S'_2 K जावतः.

69 [a]) $S'_{2\cdot3\cdot6}$ A C I_2 K D B स्पष्ट– (emended as in text with I_1). —[c]) $S'_{3.6}$ A C $I_{1\cdot2}$ K D B सह (for °मं).

72 [b]) S'_2 भूभुजः (for °भृतः). —S'_2 K hapl. om. 72^{cd} and 73^{ab}.

74 [a]) S'_3 येन. —[b]) K लभते. —S'_2 om. 74^{ab}.

75 [d]) S'_3 K गाज–.

(B 576) हा कथं तेन भूपेन कृत्वा पापमहर्निशम् ।
अल्पकालप्रसङ्गेन नाशिता बहुवत्सराः ॥ ७६ ॥

(B 577) स्वर्याते नृपतौ भ्राता राज्यं होसैनखानकः ।
जग्राहास्तंगते चन्द्रे पूर्वाद्रिमिव भास्करः ॥ ७७ ॥

(B 578) राज्यमाश्रित्य भूपालो दुर्विचारदवालनात् ।
प्रजा निर्वापयामास ग्रीष्मर्ताविव तोयदः ॥ ७८ ॥

(B 579) सदा प्रत्यर्थिदानेन लक्ष्मीस्तेन वशीकृता ।
तदा प्रत्यर्थिदानेन कीर्तिर्दूरतरं गता ॥ ७९ ॥

(B 580) चिक्रीड सह कान्ताभिर्भूपः पीतनवासवः ।
सुखं तत्सदृशं स्वर्गे स चकार न वासवः ॥ ८० ॥

(B 581) तद्गृहे गुणबद्धेव लक्ष्मीरासीदनन्यगा ।
तां विलोक्य तथाभूतां कीर्तिर्भीत्येव साचलत् ॥ ८१ ॥

(B 582) तदीयगृहमाश्रित्य प्राप्तसर्वमनोरथः ।
याचको नाभवत् प्रीतो दानेन दयया च कः ॥ ८२ ॥

(B 583) सततं यस्य पादाब्जसमस्तन्यस्तमस्तकः ।
अवाप परमां लक्ष्मीं लोकः शोकविवर्जितः ॥ ८३ ॥

(B 584) तस्मिन् रक्षति कश्मीरदेशं नित्यं विशेषतः ।
अभूत् पुष्पफलोत्पत्तिपरिपूर्णा वसुन्धरा ॥ ८४ ॥

(B 585) दुर्भिक्षचौरराजभ्यो भये तेन निवारिते ।
अमंस्त स्वर्गसदृशं लोकः कश्मीरमण्डलम् ॥ ८५ ॥

---

77 [c]) I_2 -कृते (for ग°); D सूर्ये (for चन्द्रे).

79 [d]) M (evid. emend.) °तरा कृता (for °रं ग°).

80 [a]) $I_{1\cdot 2}$ D B चिक्रीडं (B °डं misiec. for डे).

85 [a]) B (evid. emend.) -चोर-.

(B 586) यदा यदा तेन कृतो विचार
आसीन्न चौरस्य तदा प्रचारः।
अभून्न दानावसरे विकार-
स्ततोऽभवत्तस्य यशःप्रकारः ॥ ८६ ॥

(B 587) खानेजमाननामाभून्मन्त्री तस्य महीभृतः।
स निर्गते महीपाले चस्कन्द नगरं क्षणात् ॥ ८७ ॥

(B 588) तदीयसैन्यमागत्य नाशयामास तत्क्षणम्।
होसैननृपतिः प्रातरन्धकारमिवांशुमान् ॥ ८८ ॥

(B 589) सुखं बहुविधं तेन कृतं नित्यं महीभृता।
संरक्षिता विधानेन प्रजाः संजातविस्मयाः ॥ ८९ ॥

(B 590) विरोधे कृतबुद्धीनां वैरसंसक्तचेतसाम्।
निर्गतानां महीं जेतुं भूपः संप्राप पर्वते।
मह्मदखानकादीनां चकर्ष नयनानि सः ॥ ९० ॥

(B 591) एकदा शारिकास्थाने मिलिते सकले जने।
वसन्तदिवसे राजा स चकार महोत्सवम् ॥ ९१ ॥

(B 592) कुङ्कुमागुरुकर्पूरचन्दनाद्यनुलेपनैः ।
रराज सकलो लोको वसन्तदिवसे तदा ॥ ९२ ॥

(B 593) विहितोन्नतदुर्लक्ष्यलक्ष्यभेदाय भूपतिः।
निजसेवकलोकाय गजवाजिधनं ददौ ॥ ९३ ॥

---

88 c) B हासेन. —K om. 88cd.

89 b) S′2 महीभुजा. —c) S′2.6 A C K D संरक्षता; S′3 I1.2 B संरक्षिता (as in text). —d) S′3 K प्रजा संजातविस्मया.

90 MSS and C B transp. 90cd and 90ef. —d) I2 D space blank for about an inch after भूपः सं; S′3 संप्राप्य. —D repeats 90ef with transp. of चकर्ष and नयनानि.

93 b) M (evid. emend.) -वेधाय (for भेदाय).

(B 594) भूयः श्रीपञ्चमी तत्र दिवसे पृथिवीपतिः ।
दद‍र्श मिलितं लोकं ज्येष्ठरुद्राख्यपर्वते ॥ ९४ ॥

(B 595) कश्चित् कान्तां प्रति कृतरुचिर्मञ्जरीं जिघ्रति स्म
क्षीवोऽन्यस्त्रीहसितसमये व्याकुलः कश्चिदासीत् ।
पीत्वा कश्चिन्मधु समभवत् पुष्पसंभूषिताङ्गः
श्रीपञ्चम्यामिति कृतसुखो निर्ववौ सर्वलोकः ॥ ९५ ॥

(B 596) वराङ्गनानां नवसुन्दरीणां
विलोक्य साक्षाद्बहुनृत्तगीतम् ।
ददौ समासाद्य नवीननावं
सुवर्णदुर्वर्णवसांसि राजा ॥ ९६ ॥

(B 597) अथापस्मारदोषोऽस्य प्रबभूव महीभृतः ।
कलङ्क इव चन्द्रस्य निमर्लस्य शनैः शनैः ॥ ९७ ॥

(B 598) होसैनशाहशीतांशौ ग्रस्तेऽपस्मार राहुणा ।
दुर्विचारान्धकारेभ्यो जनो भीत्याकुलोऽभवत् ॥ ९८ ॥

(B 599) होसैनपृथिवीपालो राज्यं संस्थाप्य सोदरे ।
कुतूहलादिव स्वर्गं ययौ दानसमर्जितम् ॥ ९९ ॥

---

94 [a]) I_2 D om. भूय: ; $S'_{2\cdot3}$ -पञ्चमे (corrupt); D om. तत्र. —[ab]) M (evid. emend.) श्रीपञ्चमीदिने तत्र भूय: स पृथिवीपाति: .

95 [a]) $S'_{2\cdot3}$ K -रुचिं म(<चिम्म mislec. for S'ār. मं)ञ्जरीं. —[b]) K व्याकुलं. —[d]) $S'_{3\cdot6}$ (marg.) A $I_{1\cdot2}$ D B निर्बभौ.

96 [a]) K इव (for नव–); I_1 युव– (for नव); I_2 D om. नवसुन्द°. —[b]) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K B -नृत्य–. —[d]) $S'_{2\cdot6}$ A (evid. emend.) सुवर्णरूप्यं (A प्य) वसनानि; C (evid. emend.) -वासांसि.

97 [a]) C [अ] पश्मा (Bengali speech-habit for स्मा)र–.

98 [a]) D B -शाहि–.

99 [d]) K -समर्पितम् .

(B 600) सप्तवर्षेष्वतीतेषु नित्यं सुखमयेषु सः ।
स्वर्गोऽयं कीदृशोऽस्तीति दर्शनार्थं ययाविव ॥१००॥

(B 601) विमानितापि द्रविणव्ययेन
सदैव याता क्षितिपस्य लक्ष्मीः ।
आराधितापि प्रसभं धनेन
कीर्तिः कथं तिष्ठति लोकमध्ये ॥१०१॥

(B 602) आलेखानाश्रिते राज्ये तुतुषुः सकलाः प्रजाः ।
उदयाद्रिं गते सूर्ये प्रातः कमलिनी यथा ॥१०२॥

(B 603) कश्मीरदेशमालोक्य सम्यग्भूपालपालितम् ।
निनिन्द सुखितो लोकः स्वर्गं दैत्येन्द्रनाशितम् ॥१०३॥

(B 604) विचारे विहिते तेन दुर्जना विलयं ययुः ।
उलूका इव पूर्वाद्रिं प्रयाते दिवसेश्वरे ॥१०४॥

(B 605) तस्मिन्नवसरे चौरा गुप्ता आसन् भयाकुलाः ।
मध्याह्नकाले संप्राप्ते बिलमग्ना इवाखवः ॥१०५॥

(B 606) प्रत्यर्थिभ्यो ददौ दानं महासमितिसंयुतः ।
चकार सफलान्नित्यं मार्गणान्निर्गतांस्तदा ॥१०६॥

(B 607) यत् सर्वेषां दयां चक्रे भीतानां धरणीपतिः ।
अतः संह्लादयांचक्रे प्रजाः संजातकौतुकाः ॥१०७॥

---

100 [c]) $I_{1\cdot 2}$ D B कीदृशं स्वर्गमस्तीति.

102 [a]) B (evid. emend.) आलि–. —[b]) S'_2 जना: (for प्रजा:). —[d]) D B कमलिनी:.

103 [b]) A -भूषितम् (for पालि°).

104 [c]) C K om. *anusvāra* in °द्रिं.

105 [c]) C K संप्राप्तं (mislec. for S'ār. प्ते).

107 [a]) M (evid. emend.) सर्वेषु. —[b]) M (evid. emend.) भीतेषु. —[c]) I_2 D स (for सं).

(B 608) अकस्मादरुणीभूतं बभूवाथ दिशां मुखम् ।
भाविदुर्भिक्षसंहाररौद्रकालानलोपमम् ॥१०८॥

(B 609) उत्पातलक्षणोपेता चकम्पे च वसुन्धरा ।
दुर्भिक्षभारोद्वहनादसमर्थेव साभवत् ॥१०९॥

(B 610) मार्गे मार्गे तदा तस्थुरुच्छूनाः शवपङ्क्तयः ।
दुर्भिक्षकालमासाद्य यमस्य पटहा इव ॥११०॥

(B 611) सुवर्णरजतादीनां नाभूत्तत्र प्रयोजनम् ।
किण्वमात्रं सुदुष्प्रापं चिन्तारत्नमिवाभवत् ॥१११॥

(B 612) काचिच्च विना भर्तारं गृहणी स्नेहवर्जिता ।
जघास भोजनं गूढं पुत्रे दूरं निवारिते ॥११२॥

(B 613) बुभुक्षासहिते पुत्रे कन्ययापि कृतार्थना ।
चकार भोजनं नारी प्राणांस्त्यजति भर्तरि ॥११३॥

(B 614) एकदा बहुभिर्लोकै राजद्वारि मृते गजे ।
अहंपूर्विकया लोभान्मांसं नीतं पृथक्पृथक् ॥११४॥

(B 615) एकदा कन्दुकारेण हत्वा नापितबालकम् ।
पक्त्वा भक्ष्यप्रसङ्गेन विक्रीतं मानुषामिषम् ॥११५॥

---

108 [d]) $S'_{2\cdot3}$ K -द्रु-.

109 [a]) K उत्पाप-.

110 [c]) $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K अभ्यस्य; D B आसाद्य (as in text). —[d]) $I_{1\cdot2}$ D यमस् (mislec. for S'ār. स्य).

112 [a]) I_2 D om. काचिच्च; MSS and C B खिन्ना (emended to विना as in text); M (evid. emend.) विना स्वभर्तारं (for च खिन्ना भ° of C B). —[d]) MSS and C B दूरे (mislec. for S'ār. रं).

113 [b]) $S'_{2\cdot3}$ K कन्यका(sic)पि.

114 [c]) S'_2 लोका(sic)त्.

115 [a]) K कुंद-; I_2 कर्मु (mislec. for S'ār. न्दु)का°.

(B 616) विहाय स्वगृहं लोकाः पुत्रदारसमन्वितम् ।
देशान्तरं तदा जग्मुः प्राणत्राणसमुत्सुकाः ॥११६॥

(B 617) तस्मिन्नवसरे वायुर्ववावुत्पाटितद्रुमः ।
कल्पान्तकालसंहारभीतलोकविचारितः ॥११७॥

(B 618) वायुनोत्थापिते धूलिराशौ वलितभास्करे ।
मध्याह्नसमयः साक्षादर्धरात्र इवाभवत् ॥११८॥

(B 619) वायौ चलति चाकस्मात् सदाशिववनोत्थितः
अग्निर्जज्वाल संमूर्च्छन्निव मित्रदिदृक्षया ॥११९॥

(B 620) वितस्तातीरमुल्लङ्घ्य समुद्रामठसंयुतम् ।
ददाह नगरं सर्वं वायुवेगानुगोऽनलः ॥१२०॥

(B 621) ज्वलन्ती नगरी रेजे वितस्ताजलबिम्बिता ।
जलान्तर्दत्तझम्पेव दाहनिर्वाणहेतवे ॥१२१॥

(B 622) धूमेनोत्पतता व्योम्नि तारकाः पिहिता अपि ।
अनेकाङ्गाररूपेण बभूवुर्द्विगुणा इव ॥१२२॥

(B 623) धूमेन पिहितास्तारास्तत्र व्योमनि ता बभुः ।
ज्वलन्तं वह्निमालोक्य भयेनेव पलायिताः ॥१२३॥

(B 624) नववर्षार्जितान् भोगान् भुक्त्वा स धरणीपतिः ।
दुर्भिक्षपीडाविज्ञप्तिं कर्तुमिव ययौ दिवम् ॥१२४॥

---

117 b) MSS and C B बभूव (emended to ववौ as in text with RSs_2).

118 a) S'_2 [उ]त्पाटिते.

119 b) D B सदाशव (B ब–).

120 a) M (evid. emend.) आसाद्य (for उल्लङ्घ्य).

122 a) $S'_{3\text{-}6}$ (after corr.) A C $I_{1\text{-}2}$ K B [उ]त्पातिता.

Indologisches Institut der Universität * Wien *

(B 625) तस्मिन् प्रयाते त्रिदिवं नरेन्द्रे
राज्यं गृहीते च तदीयपुत्रे ।
अब्दालखानोऽपि चकार कोपं
पितृव्य एतस्य महीभृतोऽपि ॥१२५॥

(B 626) यद्यपि म्रियते भ्राता भ्राता गृह्णाति तत्पदम् ।
इत्थं कुलक्रमोऽस्माकं कथं राज्यं स इच्छति ॥१२६॥

(B 627) इत्युक्त्वा प्रहिते दूते तेनाब्दालाभिधेन तत् ।
युद्धं योसोभशाहस्य सेकन्दरपुरेऽभवत् ॥१२७॥

(B 628) अब्दालखानको युद्धं कृत्वा हत्वारिसैनिकम् ।
कुतूहलेनेव दिवं ययौ भ्रातृदिदृक्षया ॥१२८॥

(B 629) योसोभभूपती राज्यं गृहीत्वा प्रददौ धनम् ।
प्राक्तनान् कर्णमान्धातृमुखान् विस्मारयन्निव ॥१२९॥

(B 630) अथ सर्वमहायोधदुर्विवेकेन चोदितः ।
तस्य मोमारखानोऽगाद् दूरं युद्धचिकीर्षया ॥१३०॥

(B 631) मह्मदखाननामाभूद् योसोभक्ष्मापसेवकः ।
युयुधे सह तेनैष तदा दिह्ामठान्तिके ॥१३१॥

(B 632) महानीलरजोराशिमेघान्तरविमूर्च्छिताः ।
जगर्जुर्दहनास्त्रस्य ज्वाला विद्युल्लता इव ॥१३२॥

(B 633) निःशोभा अभवल्ँलोका मृते मह्मदखानके ।
अस्तं दिनकरे याते सायं पद्माकरा इव ॥१३३॥

---

127 c) B (evid. emend.) युसूब– (This emendation is not recorded onward). —d) B (evid. emend.) सिकन्दर–.

129 a) MSS and C B राज्यं (mislec. for S'ār. ज्यं). —b) MSS and C B (gram. assim.) गृहीते influenced by (corrupt) राज्ये.

130 a) $S'_{2\cdot3}$ C $I_{1\cdot2}$ K -योग–; S'_{6} A D B -योध– (as in text). —c) A मुमार–; B (evid. emend.) मूमार–.

(B 634) चलन्तः सादिनोऽप्यासन् वितस्ताजलबिम्बिताः ।
विशन्त इव पातालं तत्पराभवशङ्कया ॥१३४॥

(B 635) मासद्वयस्य सार्धस्य भोगान् भुक्त्वा स भूपतिः ।
जगाम खशलोकानां मार्गं पर्वतदुर्गमम् ॥१३५॥

(B 636) राज्ये मोमारखानेन श्रिते योसोभभूपतिः ।
चचालोदयति प्रातः सूर्ये चन्द्र इवाशुगः ॥१३६॥

(B 637) समस्तपृथिवीपालज्यल्लालदेनभूपतेः ।
चरणं शरणीकर्तुं ययौ योसोभभूपतिः ॥१३७॥

(B 638) मोमारखानलोकस्य शनैर्वैरमजायत ।
परस्परविमर्देन वनस्येव दवानलः ॥१३८॥

(B 639) सपादस्यैव मासस्य सुखं कृत्वा स भूपतिः ।
उवास देवतागारे शत्रुलोकाभिरक्षितः ॥१३९॥

(B 640) मोमारखानं निर्जित्य चक्कहैदरकादयः ।
राज्ये निवेशयामासुः श्रीमल्-लह्वरचक्ककम् ॥१४०॥

(B 641) तस्मिंल् लह्वरभूपाले भूमिं शासति सर्वतः ।
बभूवोपद्रवो नित्यं सिंहेभ्यो ग्रामवासिनाम् ॥१४१॥

---

135 d) A परम- (for °र्वत-). —K hapl. om. 135[cd] and 136[ab].

136 a) MSS and C B राज्यं (mislec. for S'ār. ज्ये); B (evid. emend.) मूमार-. —A om. hapl. 136[cd] and 137.

137 b) B (evid. emend.) -जलालदीन. (This emendation is not recorded onward).

138 a) B (evid. emend.) मूमार-. —c) D B विरोधे (D *pr. m. sup. lin.* मर्द)न.

139 c) M (erroneously) बन्धना° (for देवता°).

140 a) B (evid. emend.) मूमार-. —b) S'_2 (evid. emend.) चक्र-, —d) S'_2 °लष्करचक्रकम् .

141 a) S'_2 लष्कर-; A लोहर-,

(B 642) रात्रौ यो यः प्रतिग्रामं गृहद्वाराद्विनिर्गतः ।
निहितः स स सिंहेन पिशाचेनेव भक्षता ॥१४२

(B 643) ज्यल्लालदेनभूपालपाददर्शनहर्षितः ।
आययौ वत्सरे याते श्रीमान् योसोभभूपतिः ॥१४३॥

(B 644) श्रीमत्सुय्यपुरग्रामं वितस्ताजलदुर्गमम् ।
शिश्रिये स महीपाल उदयाद्रिमिवांशुमान् ॥१४४॥

(B 645) तदा लह्वरभूपालो निर्ययौ नगरान्तरात् ।
अनेकलोकसंयुक्तः सिंहो नगमुखादिव ॥१४५॥

(B 646) ज्ञात्वा सुय्यपुरग्रामं वितस्ताजलदुर्गमम् ।
ययौ हैदरचक्कोऽसावन्यमार्गेण सत्वरम् ॥१४६॥

(B 647) ज्ञात्वा योसोभभूपालस्तत्तद्रिपुविचेष्टितम् ।
वितस्ताजलमुल्लङ्घ्य युयुधे लह्वरेण सः ॥१४७॥

(B 648) विधाय तुमुलं युद्धं सर्वप्राणिभयावहम् ।
मन्त्री लह्वरखानस्य ममाराब्दालमेरकः ॥१४८॥

(B 649) नष्टे लह्वरभूपाले मिलितैर्निजसैनिकैः ।
अवर्धत स भूपालो नदैरिव महार्णवः ॥१४९॥

(B 650) लह्वरखानो योसोभखानपादमशिश्रियत् ।
सभ्रातरममुं सोऽपि निर्नेत्रमकरोत् क्षणात् ॥१५०॥

---

143 [b]) D -लालितः (for हर्षि°).
145 [a]) S'_2 लष्कर-; A लुहर-.
146 [c]) S'_2 (evid. emend.) -चक्को.
147 [d]) S'_2 लष्करेण.
148 [c]) S'_2 लष्कर-. —[d]) B (evid. emend.) -मीरकः.
149 [a]) S'_2 लष्कर-; S'_3 K लङ्कर-. —[d]) S'_2 नदीभिरिव सागरः.
150 [a]) S'_2 लष्कर-.

(B 651) ज्ञात्वा हैदरचक्कोऽसौ योसोभनृपचेष्टितम् ।
शिश्रिये जाङ्गलं देशं पुनर्युद्धचिकीर्षया ॥१५१॥

(B 652) युद्धं योसोभभूपालचक्कहैदरयोरभूत् ।
वनेषु शोणितासारदूरीकृतदवानलम् ॥१५२॥

(B 653) ज्यल्लालदेनभूपस्य ययौ हैदरचक्ककः ।
सकाशं वसुभिर्हीनो भास्करस्येव चन्द्रमाः ॥१५३॥

(B 654) शशास चलिते तस्मिन् देशं योसोभभूपतिः ।
अन्धकारे गते दूरं पद्माकरमिवोष्णगुः ॥१५४॥

(B 655) ववर्ष वासवः सम्यग् ववौ वायुः सुखावहः ।
तताप तपनः साक्षात्तस्मिन् रक्षति मेदिनीम् ॥१५५॥

(B 656) कीर्तिर्दूरीकृता तेन चचाल वसुधामिमाम् ।
यद्गेहे गुणबद्धेव लक्ष्मीरासीदनन्यगा ॥१५६॥

(B 657) गुणेष्वनन्तेष्वपि तस्य राज्ञः ।
स एष दोषः प्रकटस्तदाभूत् ।
यच्चञ्चलाग्राह्यत तेन लक्ष्मीः
स्थिरापि कीर्तिर्विहिता सुदूरम् ॥१५७॥

(B 658) चन्द्रमा गुणिवैरीति प्रसिद्धिं परमां गतः ।
साम्ययोगः कथं तस्य नृपेण गुणिबन्धुना ॥१५८॥

---

151 [c]) A भाङ्गलम् .

152 [b]) S'_2 (evid. emend.) -चक्र-.

153 [b]) S'_2 (evid. emend.) -चक्रकः .

156 [c]) S'_2 [ए]व (for [इ] व).

157 [d]) $S'_{2\cdot 3}$ A C सुदूरे.

158 [a]) S'_3 K गुण-. —[b]) C I_2 K परमो.

(B 659) हभेभखानप्रमुखेषु तेषु
रुद्धेषु योसोभमहीधरेण ।
निष्कृष्य चक्षूंषि विशेषरोषात्
कश्मीरदेशे विहितोऽविचारः ॥१५९॥

(B 660) ज्यल्लालदेनभूपालसेवनार्थं कृतोद्यमः ।
याकोभराजपुत्रोऽपि प्रहितस्तेन भूभृता ॥१६०॥

(B 661) उपायनेषु दृष्टेषु याकोभनिहितेष्वपि ।
कश्मीरविजयोत्कण्ठा संबभूव महीभृतः ॥१६१॥

(B 662) ज्यल्लालदेनभूपेन कश्मीरविजयार्थिना ।
कृताज्ञा भगवद्दासप्रमुखानां महीभृताम् ॥१६२॥

(B 663) तद्विज्ञाय स याकोभस्त्यक्त्वा भूपालसेवनम् ।
प्रत्याययौ स्वकश्मीरदेशं मार्गादलक्षितः ॥१६३॥

(B 664) पितरं स्वं समागत्य याकोभोऽवददव्यथः ।
भगवन् भगवद्दासः प्रहितस्तेन भूभृता ॥१६४॥

(B 665) महतोऽप्यसमर्थस्य महत्त्वं याति निष्फलम् ।
पर्वतसदृशाकारं कुञ्जरं हन्ति केसरी ॥१६५॥

(B 666) इति निश्चित्य सर्वे ते निर्गमाय जयार्थिनः ।
आज्ञां विदधिरे सर्वपर्वतीयदरत्खशान् ॥१६६॥

---

159 a) B (evid. emend.) हबीब-. —b) C $I_{1\cdot2}$ K रुद्रे(mislec. for S'ār. द्धे)षु.

160 c) B (evid. emend.) याकूब- (This emendation is not recorded onward). —d) S'_2 भूसुजा.

164 —After 164 D shows one MS-line blank.

165 d) M (evid. emend.) महाभ्र- (for पर्वत-).

166 c) S'_2 आज्ञा. —d) $S'_{2\cdot3\cdot6}$ A C K B -दरार्पणात् (prob. mislec. for S'ār. -दरत्खशान्); I_1 -ददुःखशान् (sic); I_2 दरु-शान् (sic); M (evid. emend.) -दरार्पणे.

(B 667) विनिर्गते महीपाले सज्जीभूतेऽथ सैनिके।
वैजयन्त्यस्तदा रेजुर्वामनीकृतभूरुहाः ॥१६७॥

(B 668) वराहतीर्थमाश्रित्य तस्थौ योसोभभूपतिः।
तदीयमन्त्रिणोऽप्यग्रे ययुर्युद्धचिकीर्षया ॥१६८॥

(B 669) उवाच सचिवान् भूपो न युद्धं कर्तुमर्हथ।
ज्यल्लालदेनपादाब्जं सेवनायाश्रयामहे ॥१६९॥

(B 670) कथं महत्तरं जेतुं शक्तिर्नीचस्य जायते।
न समीरस्य वेगोऽस्ति पर्वतोन्मूलने क्षमः ॥१७०॥

(B 671) श्रुत्वेति सचिवाः सर्वे तमूचुः पृथिवीपतिम्।
कथमेतादृशी बुद्धिर्भवतामपि जायते ॥१७१॥

(B 672) अकृतगुरुसद्वाक्यः सिद्धिं न गच्छति साधको
व्रजति न सुखं रोगी वैद्यप्रयोगवियोगितः।
अगणितमहायन्ता दन्ती न विन्दति चातुरीं
सचिववचनद्वेषी राजा न याति सुवैभवम् ॥१७२॥

(B 673) निशम्येति स भूपालः सचिवांस्तानवोचत।
दृष्टं सैन्यं न युष्माभिर्ज्यल्लालदेनभूपतेः ॥१७३॥

(B 674) प्राचीमेव शचीपतिः स भजते श्रीदक्षिणाशां यमः
पानीयाधिपतिश्च पश्चिमदिशं वित्तेश एवोत्तराम्।
एते केवलदिक्पतित्वविभवाः स्पर्धां कथं कुर्वते
जीयात् सर्वदिगीश्वरो नरपतिर्ज्यल्लालदेनाभिधः ॥१७४॥

---

167 [d]) D B -भूरुहः.

168 [a]) S'_2 आसाद्य (for आश्रित्य).

172 [b]) S'_6 (after corr.) A B -वियोगतः. —[c]) $S'_{2\cdot3}$ -यत्नो; S'_6 A C $I_{1\cdot2}$ K D B -यन्ता (as in text).

174 [c]) $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K B -विभव-; D -विभवः (emended as in text).

(B 675) नाक्बरसमः कश्चिद्दाताभून्न भविष्यति ।
दानं समर्पितं येन पण्डितेष्वपि वैरिषु ॥१७५॥

(B 675) कर्णः सुवर्णदानेन भूमिदानेन वा बलिः ।
समस्तवस्तुदानेन यशः प्राप्नोति भूपतिः ॥१७६॥

(B 676) वित्ती चेन्नरवाहनो भवति तत्कार्पण्यमुच्चावचं
चन्द्रश्चेत् खलु निर्मलः प्रतिदिनं दोषः कलङ्काभिधः ।
तेजस्वी यदि वह्निरुद्धततमो धूमः सदा दूषको
राज्ञा दानयशःप्रतापनिकरैरेतेऽमुनाधःकृताः ॥१७७॥

(B 677) इत्थं ज्यल्लालदेनस्य सेवाहेवाकतत्परे ।
योसोभनृपतौ सम्यक् सचिवा इदमब्रुवन् ॥१७८॥

(B 678) शत्रुपादस्पृहा यस्य जीवितं तस्य निष्फलम् ।
स एव पुरुषो धन्यो यो द्वेष्टि रिपुणा सह ॥१७९॥

(B 679) भवन्तः सन्तु दूरस्थाः कुर्मस्त्वत्कार्यनिर्णयम् ।
जाङ्गलं देशमाश्रित्य योत्स्यामः प्रत्यहं वयम् ॥१८०॥

(B 680) सहस्रकिरणो रविर्जगति सत्प्रतापोज्ज्वलो
गुहान्तरगतं तमो हरति नो यथा जातुचित् ।
तथा नरपतिः क्षमो भवति चक्रवर्ती कथं
विनाशयितुमद्य नो विहितजाङ्गलासादनम् ॥१८१॥

(B 681) इत्थं निशम्य भूपालः सचिवोदीरितं वचः ।
निर्वापयन्निवोवाच वचनामृतशीकरैः ॥१८२॥

---

176 I_1 B hapl. om. 176[cd]; S'_3 (marg.) 176[cd].

177 [a]) S'_2 (corrupt) वित्तीशो (for वित्ती चे°). —[b]) S'_2 निर्मित:; $S'_{3.6}$ A C $I_{1.2}$ K D B निर्मल: (as in text). —[c]) M (evid. emend.) -तमा.

179 [b]) S'_2 निष्फलं तस्य जीवितम्.

181 [d]) $S'_{2.3.6}$ A C I_1 K B उद्यतो; I_2 D अद्य नो (as in text).

(B 682) भयं त्यजत मद्वाक्यमनुपालयताधुना ।
अहं ज्यल्लालदीनस्य ग्रहीष्यामि पदाम्बुजम् ॥१८३॥

(B 683) अलंकारभूतोऽस्ति यो भूपतीना-
मलं कामदेवो न रूपे यदीये ।
अहं कामतः स्तौमि ज्यल्लालदीन-
महंकार एषोऽस्ति चित्ते मदीये ॥१८४॥

(B 684) करिष्यामः कथं वैरं श्रीचक्रवर्तिना समम् ।
मयैव सेवा कर्तव्या सुखं देशे भविष्यति ॥१८५॥

(B 685) न भूतो न भावी न वा वर्तमानः
कदाचिच्च कश्चिन्महीभृत्समानः ।
इति प्रायशो नित्यशो वर्धमानः ।
सदा जल्पतो वर्तते मेऽभिमानः ॥१८६॥

(B 686) पातिशाहिगुणाञ् श्रोतुं कर्णोऽयं चपलायते ।
एतद्दातृत्वमाकर्ण्य कर्णोऽयं च पलायते ॥१८७॥

(B 687) विधात्रा लिखितां भाले लिपिं दारिद्र्यदूषिताम् ।
पतन्ति चरणे तस्य जनाः कर्तुमिवान्यथा ॥१८८॥

(B 688) मस्तके भूषणं राज्ञां लक्ष्मीप्रातिमहौषधम् ।
अस्ति पादरजस्तस्य दुर्लभं महतामपि ॥१८९॥

(B 689) प्रत्यक्षदेवमादित्यं ध्यायतश्चक्रवर्तिनः ।
साक्षाद्भक्तिप्रभावेन दूरं यान्ति विपत्तयः ॥१९०॥

---

184 b) $S'_{2\cdot6}$ A C $I_{1\cdot2}$ K D B कामदेवेन (emended as in text with S'_3).

186 c) $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K वर्तमानः; D B वर्धमानः (as in text). —d) I_1 °विमानः.

187 S'_2 A I_2 hapl. om. 187cd; S'_6 (marg.) 187cd.

(B 690) वेदान्निर्णीतभेदानसुरवरकराक्रान्तदेशान् सुरेशान्
गन्धर्वान् मन्ददर्पान्प्रतिदिवसभयव्याकुलाँल्लोकपालान्।
वेधोगोविन्दशर्वांस्तदभिमुखकृतप्राञ्जलींश्चापि मत्वा
सूर्यं प्रत्यक्षदेवं प्रणमति मतिमान् शाहिजल्लालदीनः ॥१९१॥

(B 691) अकबरनृपतेर्यदेति सैन्यं
कथमिव शक्यमनेन मद्बलेन।
प्रसरति जलधेर्यदा तरङ्गो
भवति हि शूर्पनिवारणं निरर्थम् ॥१९२॥

(B 692) प्रत्यक्षदेवमादित्यमुलूको यदि निन्दति।
का हानिस्तस्य देवस्य जगतामुपकारिणः ॥१९३॥

(B 693) इति निश्चित्य भूपालो ज्यल्लालदीनभूपतेः।
चरणं शरणीकर्तुं भगवद्दासमाश्रयत् ॥१९४॥

(B 694) अष्टवर्षाश्रितान् भोगान् भुक्त्वा योसोभभूपतिः।
ज्यल्लालदीनभूपालसेवनार्थमथागमत् ॥१९५॥

(B 695) गते तस्मिन् महीपाले भगवद्दाससैनिकम्।
याकोभो नाम तत्पुत्रः प्राज्यं राज्यमथाग्रहीत् ॥१९६॥

(B 696) संग्रामे पितृसर्वस्वमर्जितं कोशसंचितम्।
दत्त्वा याकोभभूपालः सर्वाँल्लोकानरञ्जयत् ॥१९७॥

(B 697) चलिते भगवद्दासे योसोभनृपसंयुते।
बभौ याकोभभूपालो मेघमुक्त इवांशुमान् ॥१९८॥

(B 698) म्लेच्छशास्त्रविनिर्दिष्टमास्ते मतचतुष्टयम्।
अन्योन्यमतवैरेण बभूव कलहागमः ॥१९९॥

---

191 c) S′$_2$ वन्दे (corrupt) (for वेधो-).
195 a) D B पञ्च- (D *sup. lin.* अष्ट).
196 b) M. (erroneously) -सैनिकात्.
199 b) S′$_2$ आसीत् (for आस्ते).

(B 699) शंशचक्कादयस्तस्य नृपस्य धृतमत्सराः ।
सदाशिवपुरे दुर्गं चक्रुर्युद्धचिकीर्षया ॥२००॥

(B 700) अथ याकोभभूपस्य दिद्दामठसमीपतः ।
बभूव तुमुलं युद्धं शंशचक्केन तेन तत् ॥२०१॥

(B 701) अलंमाशिरमल्लेकआलकादिपुरस्कृतः ।
युयोध शंशचक्कोऽसौ याकोभप्रभुणा सह ॥२०२॥

(B 702) शंशचकस्ततो गत्वा मल्लेकआलचोदितः ।
जग्राह जलमध्यस्थं ग्रामं सुय्यपुराभिधम् ॥२०३॥

(B 703) उद्यन्यथा दिनकरः किरणोत्करेण ।
राज्यन्धकारनिकरं हरति क्षणेन ।
सैन्यं तथैव यमसादकरोत् करेण
याकोभ एव कृतसायकमोक्षणेन ॥२०४॥

(B 704) अलंमाशिरखानोऽसौ युद्धं कृत्वा पलायत ।
नगराच्छंशचक्कं तं स रुरोध महीपतिः ॥२०५॥

(B 705) विजये विहिते तेन याकोभेन तदन्तरे ।
मध्यदेशीयभूपालाद्भयं नित्यमजायत ॥२०६॥

(B 706) मध्यदेशमहीपालज्यल्लालदीनभूपतेः ।
कश्मीरविजयोत्कण्ठा भूयः सम्यगजायत ॥२०७॥

---

201 d) S'_2 (evid. emend.) -चक्रेण; S'_6 तस्य (for तेन).

202 a) Metre does not allow the correct spelling आलमशेर- (for अलंमाशिर-) —c) S'_2 (evid. emend.) -चक्रो.

203 a) S'_2 (evid. emend.) -चक्रो. —b) B (evid. emend.) -बल- (for आल).

205 a) For अलंमाशिर- see Crit. App. 202. —b) $S'_{3\cdot6}$ (before corr.) C K I_1 पलायितः. —c) S'_3 (evid. emend.) -चक्रं.

206 c) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B -देशमही-.

207 a) S'_2 -देशे.

(B 707) कासेमखाननामानं चकहैदरसेवितम् ।
प्रेरयामास भूपालः कश्मीरविजयेच्छया ॥२०८॥

(B 708) द्वाविंशानां तदा सेनापतीनां निर्गमाय स ।
चकाराज्ञां महीपालः कश्मीरविजयोत्सुकः ॥२०९॥

(B 709) ते सेनापतयस्तत्र भूपतेराज्ञया क्षणात् ।
लाहोरनगरात् तस्मान्निर्जग्मुरूर्जितश्रियः ॥२१०॥

(B 710) कूपा निरुदका आसन् पङ्कशेषास्तदा ह्रदाः ।
मरुश्च समतां यातस्तदा सेनाप्रचारतः ॥२११॥

(B 711) तत्र रेजुः पताकाभिः पटमण्डपपङ्क्तयः ।
कश्मीरपर्वतालोकसमुत्क्षिप्तमुखा इव ॥२१२॥

(B 712) उद्ययौ स रजोराशिस्तथा सेनाप्रचारतः ।
येन नभसि सूर्यस्य राहुभीतिर्यथाभवत् ॥२१३॥

(B 713) मार्गस्थानां हि धूलीनां यथा संख्या न विद्यते ।
तथा संख्या न सेनायाः पदातिगजसादिनाम् ॥२१४॥

(B 714) दिनैः कतिपयैः सेना दूराध्वमलिनीकृता ।
चन्द्रभागां नदीं प्राप चकोरीन्दुकलामिव ॥२१५॥

(B 715) वस्त्राण्यनेनिजुस्तत्र पपुस्तोयं च निर्मलम् ।
तडागदूषिता लोकाः सुखं चक्रुर्यथेप्सितम् ॥२१६॥

---

208 [a]) B (evid. emend.) कासिम- (This emendation is not recorded onward). —[b]) S'_2 चक्र-; A -हैधर-.

209 [a]) M (evid. emend.) °शतैः (for °शानां).

211 [c]) B मरुच्च (mislec. for श्च).

212 [b]) $I_{1.2}$ D B पट्ट-.

213 [c]) S'_2 व्योम्नि (submetric) (for नभसि).

214 [a]) D च (for हि).

216 [a]) $I_{1.2}$ D वस्त्रान्.

(B 716) स्नानत्रस्तचलद्वाजिभीतित्रश्चलमानवे ।
चन्द्रभागातटे दूरादुपहासः कृतोऽभवत् ॥२१७॥

(B 717) स्नानमुक्ताद्गजाद् यत्राप्यग्रेदत्तकरेणुकात् ।
अन्यदन्तिकृतत्रासाज्जनो भीत्याकुलोऽभवत् ॥२१८॥

(B 718) चन्द्रभागां समुल्लङ्घ्य दिनैः स्वल्पतरैरपि ।
पर्वतस्यान्तिकं प्राप सेना काश्मीरदेशगा ॥२१९॥

(B 719) पर्वतेषु पदातीनामारोहणावरोहणैः ।
जानुगुल्फपदादीनामवसादो महानभूत् ॥२२०॥

(B 720) क्वचित् तोये धारा क्वचिदपि जलं दुर्लभतरं
क्वचित् पङ्के म्लानिः क्वचिदपि शिलाताडनभयम् ।
क्वचिच्छीतं नित्यं क्वचिदपि सदोष्णांशुपतनं
नगस्थाने पन्था भवति यममार्गोऽपर इव ॥२२१॥

(B 721) सुवृष्टिकोमलीभूतं तासु पर्वतभूमिषु ।
नवघासाङ्कुरं जक्षुर्वृषवारणवाजिनः ॥२२२॥

(B 722) मध्यदेशीयलोकानां पश्यतां पर्वतस्थितिम् ।
पृच्छतां नाम वृक्षाणां चमत्कारो महानभूत् ॥२२३॥

---

217 b) S'_2 -भीत–; $I_{1.2}$ D °मानने. —d) $I_{1.2}$ उपहास–.

218 a) A -मुक्ताङ्गजात्. —c) I_2 -रुत– (for °कृ).

220 c) A C K -पदाती°.

221 a) RSs_2 quotes 221 entirely. —a) RSs_2 धारातोयं (for तोये धारा); D तोयधारा; S'_2 शिलाताडनभयं (for जलं दुर्लभतरं). —b) S'_2 ……दुर्लभतरम् (for -ताडनभयम्); RSs_2 -निर्गम– (for -ताडन–). —c) RSs_2 शीतादार्तिः (शीतं नित्यं); RSs_2 (submetric) तीक्ष्णांशु– (for सदोष्णांशु–); S'_2 RSs_2 (evid. emend.) -तपनं (for -पतनं). —d) RSs_2 नगस्थानाध्वासौ (for नगस्थाने पन्था).

223 c) $S'_{2\cdot3\cdot6}$ A C K ग्राम–; $I_{1.2}$ D B नाम (as in text); S'_2 -वृद्धानां (for वृक्षाणां).

(B 723) तास्ताः सङ्कटभूमयः सुगमतां नीताः शिलापट्टकै-
स्ते ते कुञ्जगकुञ्जराः किल भटैर्भीतिं तदा प्रापिताः।
लोकः कुञ्जमतिप्रकाशमकरोत् सानुं स्वतोयोद्गमं
सेना पर्वतमस्तके समभवत् कल्पान्तकालोपमा ॥२२४॥

(B 724) चक्रवार्तिप्रभावेण तत्सेनादर्शनेन च।
पर्वतीयजना आसन् भयाच्चकितमानसाः ॥२२५॥

(B 725) छागानुपायनीकृत्य मातुलुङ्गफलानि च।
पर्वतीयजनास्तत्र कासेमखानमाययुः ॥२२६॥

(B 726) यद्वद् व्योमचरोऽपि मांसशकलैः संरुध्यते खेचरो
यद्वत् तोयतलस्थितोऽपि बडिशैर्मत्स्योऽपि चाबाध्यते।
यद्वच्छष्पसमर्पणेन कृतिभिर्दूरात् पशुर्नीयते
तद्वत् तेन वशीकृता जनपदाः कासेमनाम्ना धनैः ॥२२७॥

(B 727) हैदरचक्रनामाभूद् याकोभे वैरतत्परः।
मार्गसंदर्शनार्थे तत्खानकासेमसैनिके ॥२२८॥

(B 728) अत्रान्तरे तु काश्मीरमार्गरक्षणतत्परः।
बह्रामनायकोऽप्यासीद् याकोभभयविह्वलः ॥२२९॥

---

224 [cd]) S′$_2$ hapl. om. words beginning with सानुं and ending with समभवत्.

225 [a]) S′$_6$ A I$_{1\cdot2}$ K D B -प्रभावेन.

226 [a]) S′$_2$ का (mislec. for S′ar. छा)गान्. —[b]) S′$_{3\cdot6}$ A C I$_{1\cdot2}$ K मातुलङ्ग-.

227 [a]) S′$_2$ भूचरैः; S′$_{3\cdot6}$ A C K मानवैः; I$_{1\cdot2}$ D B खेचरो (as in text). —[b]) D तोय¯हितो; I$_{1\cdot2}$ तोयहि°. —[c]) S′$_3$ शस्य- (for शष्प-); D B मृगो गृह्यते (for पशुर्नीयते).

228 [a]) K हैधर-. —[b]) S′$_2$ याकोभ-; S′$_{3\cdot6}$ (before corr.) A C I$_{1\cdot2}$ K याकोभे (as in text); D याकोभो (corrupt). —[c]) S′$_{2\cdot3}$ K °नार्थी (corrupt).

229 [a]) S′$_3$ C K D स (for तु). —K hapl. om. 229[cd].

(B 729) बह्ममनायको लोकं स्थापयित्वा बहिः स्वयम् ।
जगाम केवलतया खानकालेमसैनिकम् ॥२३०॥

(B 730) तस्य कासेमखानोऽपि सर्वकार्यविचक्षणः ।
चकार बहुसंमानं वस्त्रैराभरणैर्धनैः ॥२३१॥

(B 731) अथान्यैरपि याकोभमवगण्य समर्पितम् ।
राज्यं होसैनखानस्य पश्चानिलगिरिस्थितैः ॥२३२॥

(B 732) कासेमखानमायान्तं देशान्तरव्यवस्थितम् ।
मध्ये होसैनखानस्य राज्यं श्रुत्वा चुकोप सः ॥२३३॥

(B 733) अथ याकोभभूपालः प्रस्थानं कृतवान् क्षणात् ।
होसैनखानं निर्भर्त्स्य पश्चानिलगिरिं प्रति ॥२३४॥

(B 734) याकोभप्रहितं सैन्यं प्रभुसेवापराङ्मुखम् ।
साकं होसैनखानेन संधिं चक्रे यदृच्छया ॥२३५॥

(B 735) श्रुत्वा याकोभभूपालो मिलितं निजसैनिकम् ।
निन्दां चपलचित्तानां सेवकानां चकार सः ॥२३६॥

(B 236) हरन्ति संपत्तौ वित्तं विपत्तौ विद्विषन्ति च ।
सेवकाः सन्ति दुर्ग्राह्यास्तत्समा न तु तस्कराः ॥२३७॥

(B 737) शंशचक्राभिधं बन्धान्मेरमह्मदसंयुतम् ।
मोचयित्वा स याकोभः काष्ठवाटान्तरं ययौ ॥२३८॥

(B 738) याकोभभूपमधिगम्य निरस्तवीर्यं
ते सेवका न विदधुर्बहुमानसेवाम् ।
चिन्तामणिं लुठितहस्ततलाभिघातैः
खेलन्ति वानरगणा गुलिकाक्रमेण ॥२३९॥

---

232 c) $I_{1\cdot 2}$ D B होसन–; M (evid. emend.) -खानाय.
233 c) B (evid. emend.) होसन–.
234 c) B (evid. emend.) होसन–.
235 c) B (evid. emend.) होसन–.
238 a) S'_2 (evid. emend.) -चक्रा°. —b) B (evid. emend.) मीर–.
239 a) $S'_{2\text{-}3}$ A C K अधिकृत्य.

(B 739) याकोभे चलिते सैन्यं विससार पृथक्पृथक् ।
हारसूत्रे स्वयं छिन्ने मौक्तिकं विद्रुतं यथा ॥२४०॥

(B 740) काष्ठवाटान्तरे केचित् केचिन्नगरवासिनः ।
आसन् केचिद्विदेशस्थाः केचिन्मुग्गुलसंगरे ॥२४१॥

(B 741) होसैनखानादाहृत्य राज्यं पर्वतमस्तके ।
जगृहे शंशाचक्केन कासेमाभिधशङ्कया ॥२४२॥

(B 742) कासेमखानमायान्तं निशम्य कृतनिश्चयः ।
जग्राह शंशाचक्कोऽसौ पर्वतं जनदुर्गमम् ॥२४३॥

(B 743) स्वल्पलोकसमायुक्तः शंशाचक्कोऽभवत्तदा ।
कासेमखानकोऽप्यासीद् बहुलोकसमावृतः ॥२४४॥

(B 744) पुरस्कृत्य स कासेमखानो हैदरचक्ककम् ।
चकार तुमुलं युद्धं सुग्रीवमिव राघवः ॥२४५॥

(B 745) काश्मीरसैनिकं सर्वं चक्कहैदरदर्शनात् ।
चचाल रात्रितामिस्रं प्रातरिवारुणोदयात् ॥२४६॥

(B 746) यथा महान् रजोराशिर्वायुमात्रेण नश्यति ।
तथा मुग्गुलसैन्येन नष्टं काश्मीरसैनिकम् ॥२४७॥

---

240 b) A विचचार-. —c) S'_{3-6} A C K द्रये (mislec. for S'ār. स्वयं).

241 d) I_2 D मुद्गल-; B (evid. emend.) मुगल- (This emendation is not recorded onward).

242 a) B (evid. emend.) होसन-. —c) B जग्रहे; S'_2 (evid. emend.) -चक्रेण.

243 c) S'_3 (evid. emend.) -चक्रो.

244 b) S'_2 (evid. emend.) -चक्रो.

245 b) S'_2 (evid. emend.) -चक्रकम्.

246 a) C K -सैनिके (mislec. for S'ār. कं); C K सर्वे (mislec. for S'ār र्वं). —b) A -हैधर-.

(B 747) काश्मीरसैनिके नष्टे मुग्गुलैर्विजयः कृतः ।
इति श्रुत्वा पुरन्ध्रीणां हाहाकारो महानभूत् ॥२४८॥

(B 748) भयधूतकराम्भोजा विलोलनयनोत्पलाः ।
कुन्तलालियुतास्तस्थुः पद्मिन्य इव योषितः ॥२४९॥

(B 749) शोकान्धकारे संप्राते रराज नयनोत्पलम् ।
स्त्रीणां किंतु मुखाम्भोजं संकोचमगमत्तदा ॥२५०॥

(B 750) रुदन्तीनां कुचे स्त्रीणां निपेतुर्बाष्पबिन्दवः ।
ज्वलन्तं हृदि शोकाग्निं दूरीकर्तुमिवोद्यताः ॥२५१॥

(B 751) द्राक्षाक्षोटफलव्याप्तं पुष्पकुङ्कुमशोभितम् ।
प्रविश्य नगरं मेने स्वर्गवद्यवनो भृशम् ॥२५२॥

(B 752) शाके प्रयातेऽष्टखपञ्चचन्द्र-
संख्ये द्वितीयादिषु कार्तिकस्य ।
शुक्लेऽथ पक्षे रविवासरे च
सैन्यप्रवेशो नगरे बभूव ॥२५३॥

(B 753) द्राक्षाफलमथास्वाद्य कार्षिकोपायनीकृतम् ।
निनिन्दुर्मुग्गुलाः सर्वे निजकान्ताधरामृतम् ॥२५४॥

(B 754) कुङ्कुमपुष्पमालाभिर्भूषिताशेषमस्तकः ।
मुग्गुलो मद्यपानेषु निजं वीर्यं व्यकत्थत ॥२५५॥

---

249 b) D विलोक्य (sic).
250 d) S′$_2$ अभजत् (for °गम°).
251 a) B (evid. emend.) [उ]दिताः .
252 d) S′$_2$ -यवनैः .
253 a) D *pr. m. sup. lin.* gloss शालिवाहनशाकः १५०८.
255 d) A अकत्थत (for व्यक°).

(B 755) कासेमखाननेतारं दृष्ट्वा हैदरचक्ककम् ।
अथ काश्मीरलोकोऽपि तत्सेवनमशिश्रियत् ॥२५६॥

(B 756) अनेकलोकसंयुक्तं दृष्ट्वा हैदरचक्ककम् ।
भीत्या कासेमखानोऽपि कारागारे न्यवेशयत् ॥२५७॥

(B 757) अथ कासेमखानेन रुद्धे हैदरचक्कके ।
काश्मीरलोकाः सर्वे ते दूरं जग्मुर्वनान्तरम् ॥२५८॥

(B 758) एकत्र मिलिताः सर्वे ते निन्दां चक्रुरात्मनः ।
परस्परं च संमन्त्र्य मतिं युद्धाय चक्रिरे ॥२५९॥

(B 759) योषित् पत्या विहीनेव चन्द्रहीनेव शर्वरी ।
लोकपूर्णा तथा सेना राजहीना न शोभते ॥२६०॥

(B 760) इति निश्चित्य सर्वे ते लोका यवनभर्त्सिताः ।
क्षणादानाययामासुर् याकोभं कृतनिश्चयाः ॥२६१॥

(B 761) याकोभमागतं श्रुत्वा साक्षात् कासेमखानकः ।
मोमारखाननामानं प्राहिणोत् तज्जिगीषया ॥२६२॥

(B 762) मोमारखानमायान्तं श्रुत्वा याकोभभूपतिः ।
बभूव बद्धसन्नाहः सम्यग्युद्धचिकीर्षया ॥२६३॥

---

256 b) S'_2 (evid. emend.) -चक्रकम् . —K hapl. om. 256^{cd} and 257^{ab}.

257 b) S'_2 (evid. emend.) -चक्रकम् . – d) S'_3 C $I_{1.2}$ K D B -गृहे (for -गारे).

260 b) S'_2 शशि– (for चन्द्र–).

261 a) S'_3 (after corr.) संमन्त्र्य (for निश्चित्य). —K om. 261^{ab}.

262 c) B (evid. emend.) मुमार–.

263 a) B (evid. emend.) मुमार–.

(B 763) कोऽयं मोमारखानाख्यो युष्मत्सेवकसेवकः ।
एतेन सह योद्धव्यमित्यूचुस्तस्य मन्त्रिणः ॥२६४॥

(B 764) त्यक्त्वा मोमारखानं तं विजयेश्वरसंस्थितम् ।
प्रस्थानमन्यमार्गेण चकार नगरं प्रति ॥२६५॥

(B 765) तस्मिन्नवसरे सूर्यः साक्षाद्वेदत्रयीमयः ।
भाविसङ्ग्रामसंहारघृणयेवास्तमाययौ ।२६६॥

(B 766) शनैः शनैर्दिने याते केवलत्वभियेव सा ।
तत्संगमार्थिनी संध्या ययौ स्थित्वा क्षणान्तरम् ॥२६७॥

(B 767) याकोभमायान्तमवेक्ष्य चन्द्रो
हस्तस्थखड्गद्वयदुर्निरीक्ष्यम् ।
राजेतिनामद्वयमाकलय्य
भीत्येव यातोऽस्तनगप्रदेशम् ॥२६८॥

(B 768) अत्रान्तरे स याकोभो दूराध्वखिन्नसैनिकः ।
सदाशिवपुरस्थाने चस्कन्द नगरं क्षणात् ॥२६९॥

(B 769) कृतवति सति कान्ते चुम्बनालिङ्गनानि
क्षिपति च निशि बाणान्निर्दयं कामदेवे ।
सुरतनिरतनारीसंगमे संनिकृष्टे
समरभुवि नराणां सिंहनादो बभूव ॥२७०॥

(B 770) मार्गे गृहान्तरे वापि हत्वा यवनसैनिकम् ।
सैन्येन महता युक्तो राजद्वारं ददाह सः ॥२७१॥

---

264 [a]) B (evid. emend.) मुमार-. —[c]) M (evid. emend.) नैतेन.
265 [a]) B (evid. emend.) मुमार-.
266 [b]) M (evid. emend.) देव- (for वेद).
268 [b]) S'_3 K -निरीक्षम्. —[c]) I_2 C राजैति.
270 [c]) S'_2 -संगरे.
271 [e]) S'_2 युक्ते (sic).

(B 771) अलिः सूर्योदयार्थीव रात्रिबद्धोऽम्बुजान्तरे।
कासेमखानकोऽप्यासीद् गुप्तं निजगृहान्तरे ॥२७२॥

(B 772) फतिहखाननामाभून्मुग्गुलो धृतसैनिकः।
सम्यङ्नद्धतनुत्राणः सिकन्दरपुरेऽभवत् ॥२७३॥

(B 773) जज्वाल नगरं सर्वं यवनत्रासकारकम्।
अपि ज्वालाप्रकाशेन काश्मीरैर्युयुधे रणे ॥२७४॥

(B 774) ततः कासेमखानेन दृष्ट्वा काश्मीरसैनिकम्।
कारागृहस्थितो रोषाद्धतो हैदरचक्ककः ॥२७५॥

(B 775) लोठं कृत्वा गते सैन्ये वाजिवारणवाससाम्।
प्रभाते स च याकोभो रात्रियुद्धान्न्यवर्तत ॥२७६॥

(B 776) रात्रौ दुर्जनचक्रताडनमलं राज्ञि स्वयं कुर्वति
तारारत्नसमूहमम्बरवणिग् व्यस्तारयत् सर्वतः।
प्रातश्चण्डकरे प्रभौ कमलकोशोत्पाटनं तन्वति
प्रालेयश्रमवारिणाकुलतरः सोऽगोपयत्तं क्षणात् ॥२७७॥

(B 777) जाते प्रभातसमये शशिनि प्रयाते
चास्तं क्षणाद्दिनकरेण तमो निरस्तम्।
याकोभभूपतिरतीव बभूव भीतः
सोऽभूच्च मुग्गुलजनः सकलः समेतः ॥२७८॥

(B 778) प्रातश्चलति याकोभे यवना नगरान्तरम्।
मुमुषू रात्रियुद्धेन रोषसंतप्तमानसाः ॥२७९॥

---

272 d) A C गुप्तो.

273 a) D फतेह–; $S'_{2\cdot3}$ A C [अ]सौ (for °भूत्). —c) $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K खमुद्धत–; D B सम्यङ्नद्ध– (as in text). —d) $S'_{3\cdot6}$ (before corr.) A C K D सेकं (D गं)धर–.

274 b) S'_{2} -कारणम्.

275 d) S'_{2} (evid. emend.) -चक्रकः.

276 a) S'_{2} (evid. emend.) लुण्ठि.

277 d) B (evid. emend.) °तरं.

(B 779) याकोभं चलितं ज्ञात्वा दृष्ट्वाभग्नं स्वसैनिकम् ।
स्वयं कासेमखानोऽपि निर्जगाम जयोत्सुकः ॥२८०॥

(B 780) येन येन स याकोभो मार्गेण चलितोऽभवत् ।
तेन तेन हि कासेमखानको निर्ययौ स्वयम् ॥२८१॥

(B 781) तस्य कासेमखानस्य बहुलोकसमावृतः ।
अलंमाशिरखानाख्यो बभूव चरणानतः ॥२८२॥

(B 782) अलंमाशिरखानस्य तैलग्रामनिवासिनः ।
मित्रेण शंशचक्रेन युद्धमासीत् परस्परम् ॥२८३॥

(B 783) फतेहखाननामाभून्मुग्गुलो बहुसैनिकः ।
नगरान्तररक्षार्थं सेकन्धरपुरस्थितः ॥२८४॥

(B 784) युद्धं याकोभभूपालखानकासेमयोरभूत् ।
काश्मीररक्षितपाषाणशरतोमरदारुणम् ॥२८५॥

(B 785) अथ काश्मीरलोकानां विरोध उदभूत्पुनः ।
राजाहमेव राजाहमिति कोलाहलान्वितः ॥२८६॥

(B 786) विरोधमुत्थितं ज्ञात्वा सहायभ्रातृचोदितः ।
ययौ याकोभभूपालः काष्ठवाटान्तरं पुनः ॥२८७॥

(B 787) ततो योसोभखानेन मेरमह्मदकेन च ।
संधिः कासेमखानस्य विहिता शरणार्थिना ॥२८८॥

---

281 c) S′$_2$ [अ]पि (for हि).

282 c) For अलंमाशिर– see Crit. App. 202.

283 c) S′$_2$ (evid. emend.) -चक्रेण.

284 a) S′$_2$ फतिह–. —d) D सेगंधर–; B (evid. emend.) सिकन्दर–.

285 d) S′$_{2\cdot3}$ -दारणम्; K -धारणात्.

288 b) B (evid. emend.) मीर–. —d) B (evid. emend.) विहितो; A C °र्थिनः.

(B 788) तेन कासेमखानेन ज्यल्लालदीनभूभृतः ।
योसोभखानप्रमुखाः प्रहिताश्चरणान्तिकम् ॥२८९॥

(B 789) ज्यल्लालदीनभूपेन समस्ताश्चरणानताः ।
संमानितास्तदा वित्तैः खानयोसोभकादयः ॥२९०॥

(B 790) कश्मीरेषु महाशीतव्यथितानेकमानवः ।
आययावथ हेमन्तो द्वितीय इव मुग्गुलः ॥२९१॥

(B 791) ततो यवनगेहेषु पपात हिमसंततिः ।
विजये विहिते सद्यः पुष्पवृष्टिरिवाम्बरात् ॥२९२॥

(B 792) याकोभभूपस्य कृतश्रमस्य
रणाय कुर्वाण इवोपदेशम् ।
पुष्पोत्करैः संस्कृतसर्वमार्गो
वसन्तकालः प्रकटीबभूव ॥२९३॥

(B 793) अथ याकोभभूपालः काष्ठवाटप्रदेशतः ।
आययौ मुग्गुलान् जेतुं बहुलोकसमावृतः ॥२९४॥

(B 794) तस्य कासेमखानोऽपि वार्तां श्रुत्वा जिगीषया ।
निर्ययावथ हस्त्यश्वव्याकुलीकृतभूतलः ॥२९५॥

(B 795) तयोर्याकोभभूपालखानकासेमयोरभूत् ।
क्षेत्रदेशे महायुद्धं शरपाषाणदुर्दिनम् ॥२९६॥

(B 796) अथ याकोभभूपालः प्रस्थानं नगरं प्रति ।
चकारालक्षितो भूत्वा मुग्गुलैरनुयायिभिः ॥२९७॥

---

290 c) S′$_{3\cdot6}$ A C I$_{1\cdot2}$ K D B सदा (for त°).
293 b) D B [उ]पक्रारभ् (for °देश°).
295 a) S′$_{2\cdot3\cdot6}$ A C I$_1$ K तत्र ; I$_2$ D B तस्य (as in text). —d) B (evid. emend.) -भूभृतः (for °तलः).
296 c) MSS and CB क्षेत्र-; RSs$_2$ notices क्षेत्रो-; छोत्रो- is suggested.

(B 797) धान्यराशिसमीपस्थं नगमाश्रित्य दुर्गमम् ।
याकोभभूपः सहसा युयुधे सह मुग्गुलैः ॥२९८॥

(B 798) निर्मलासितनुत्राणबिम्बितार्कमरीचिभिः ।
प्रकाशमन्धकारेऽपि बभूव वनगह्वरम् ॥२९९॥

(B 799) अनेकविगलल्लोकशोणितासवपूरिताः ।
बभुस्तत्र शिरस्त्राणा यमस्य चषका इव ॥३००॥

(B 800) अनेकक्षिप्तपाषाणचूर्णीकृतमहीरुहाः ।
पर्वतस्यापि काश्मीरा उन्नतत्वं न सेहिरे ॥३०१॥

(B 801) मृतशोणितसंलिप्तनिर्झराम्बुच्छलेन किम् ।
अभवद्यमराजस्य क्रीडतः कुङ्कुमद्रवः ॥३०२॥

(B 802) इत्थं याकोभभूपालखानकासेमयोरभूत् ।
युद्धं तन्मासमात्रेण न जयो न पराजयः ॥३०३॥

(B 803) आदूलखाननामापि खानकासेमचोदितः ।
जगाम सबलो योद्धुं काश्मीरान् पर्वतस्थितान् ॥३०४॥

(B 804) युद्धे संनिहिते तेषां मेघैराच्छादितो गिरिः ।
म्लेच्छानामिव कुर्वद्भिः कालरात्रिसमानताम् ॥३०५॥

(B 805) रराज ध्वनिते मेघे विद्युन्मालातिचञ्चला ।
जिह्वेव यमराजस्य स्वादुचर्वणताडिता ॥३०६॥

(B 806) धारासारजले मेघे चलिते निजसैनिके ।
आदूलखाननामायं स्वर्गमार्गमथारुहत् ॥३०७॥

---

299 d) S'_2 नग– (for वन).

304 a) I_1 D B अदूल–; I आहू (or ह्)त–.

305 b) K हरिः (for गि°). —d) $S'_{2\cdot3}$ A C K -रात्रिं; $S'_{2\cdot3}$ C $I_{1\cdot2}$ K समारुताम्; S'_6 -रात्रि समाह्व (marg. *pr. m.* त्रिसमान)ताम्.

306 b) S'_2 [अ]पि (for °ति°).

307 a) $S'_{2\cdot3}$ K -चले. —c) D B अदूल–.

(B 807) श्रीरङ्गो नाम राजाभूज् ज्यह्लालदीनसेवकः ।
सोऽपि तत्समरं प्राप्य स्वर्गमार्गमशिश्रियत् ॥३०८॥

(B 808) सदाशिवपुरे दुर्गं कृत्वा तिष्ठति मुग्गुले ।
ज्येष्ठरुद्रसमीपस्थः काश्मीरैराश्रितो गिरिः ॥३०९॥

(B 809) तत्र संनिहिते युद्धे निर्ययुः शोणितापगाः ।
बभूव संगमो यासां सह नद्या वितस्तया ॥३१०॥

(B 810) इत्थं विधाय समरं निहते च लोके
कासेमखानयवनस्य बभूव भीतिः ।
भग्नानवेक्ष्य यवनान् परिभूयमानान्
काश्मीरलोकनिकराः सहसा ववल्गुः ॥३११॥

---

308 d) S'_2 नाक- (for स्वर्ग-); A अथारुहत् (for °शिश्रिय°).
—After 310 $S'_{3.6}$ A C I_1 K B ins.:

5* मेर्जाआदूलनामा पातिशाहिसेवको युद्धार्थं जगाम । तस्मिन्नवसरे काश्मीरालंशिरखानकलोकैर्याकोभलोकस्य युद्धं बभूव । तयोर्युद्धे संनिकृष्टे आदूलखानोऽपि जगाम । आदूलखानमायान्तं दृष्ट्वा याकोभलोको वदति स्म—इह मुग्गुला आगताः। ते चालंशिरखानसैनिकं त्यक्त्वा आदूलखानं जगृहुः । तेन सह युद्धमभूत् अलंशिरखानलोकोऽपि आदूलखानसहायतां चकार । याकोभेन सह युद्धं चकार । आदूलखानोऽप्यलंशिरखानस्य सन्तुष्टो बभूव । पातिशाहिकार्यं त्वया कृतमिति वचनमुवाच । श्रीरङ्गोऽपि रायसिंहबद्धसंबन्धो बभूव । तस्य निकटे चत्वारिंशद्राजपुत्रा आसन् । वर्षे पतिते श्रीरङ्गो राजपुत्रानवदत् । भो राजपुत्रा यूयं चलत । अहं पङ्गुरस्मि चलितुं समर्थो नास्मि । ते चावदन्—मैवं, राजपुत्रजातौ चलनं न वर्तते । पातिशाहो राजपुत्रेषु संमानं करोति । अत एवास्माभिर्लङ्का रक्षणीयेति । ते राजपुत्रा न चेलुः ।
[(1.2) S'_3 K -मलीकस्य; RSs_2 -मह्लेकस्य (for -लोकस्य)].

311 c) S'_3 C K D B °भूयमाना: (gram. assim.).

(B 811) वार्तामेतादृशीं श्रुत्वा ज्यल्लालदीनभूपतिः ।
सैदयोसोभखानस्य चकाराज्ञां जिगीषया ॥३१२॥

(B 812) वार्तां योसोभखानस्य श्रुत्वा याकोभभूपतिः ।
चचाल गर्जितं ज्ञात्वा मृगेशस्येव जम्बुकः ॥३१३॥

(B 813) श्रीकश्मीरसरोजमध्यनिरतं लोभाशया संगतं ।
याकोभाभिधरात्रिबद्धवपुषं नोद्यद्बहिर्निर्गमम् ।
कासेम्खानकषट्पदं भययुतं कुर्वन् क्षणान्निर्भयं
सूर्योऽयं जयति प्रकाशमहितो योसोभखानाभिधः ॥३१४॥

(B 814) शंशचक्रादयो लोका मेर्जायोसोभवार्तया ।
चेलुरुड्डयनत्रस्ता श्येनस्येव कपोतकाः ॥३१५॥

(B 815) योसोभखान आयाते भयात् कासेमखानकः ।
निर्ययावुदिते सूर्ये चक्राह्वो विरहादिव ॥३१६॥

(B 816) मेर्जायोसोभखानस्य कश्मीरजनसंयुतः ।
मह्मदमेरनामाभूत् सदा सेवनतत्परः ॥३१७॥

(B 817) मेर्जायोसोभखानेन ज्यल्लालदीनभूपतेः ।
काश्मीराः बहवो लोकाः प्रहिताश्चरणान्तिकम् ॥३१८॥

(B 818) अथ याकोभभूपाल आययौ काष्ठवाटतः ।
तथैव मुग्गुलाञ् जेतुं पतङ्गोऽग्निं यथा मदात् ॥३१९॥

(B 819) मेर्जायोसोभखानेन मह्मदाभिधसंयुतः ।
हाज्यमेरकनामापि प्रहितस्तज्जिगीषया ॥३२०॥

(B 820) तस्याचलेऽभवत् सेना मुग्गुलानां च भूतले ।
ते उभे तुल्यया धृत्वा विधिर्बलमिवैक्षत ॥३२१॥

---

314 b) S'_2 -वपुषो (sic). —d) MSS and C B -स (mislec. for S'ār. म)हितो.
320 c) B (evid. emend.) हाजीमीरक–.
321 a) I_2 तस्यचिले; $S'_{2\cdot3\cdot6}$ A C K [अ]चला (corrupt).

(B 821) यवना नैर्ऋते भूमौ काश्मीराश्च नगोपरि ।
अन्योन्यसंनिकर्षे तु गन्तुं शक्ता न तेऽभवन् ॥३२२॥

(B 822) सिंहनादोऽभवन्मध्ये सेनयोरुभयोस्तयोः ।
लोकजिघत्सया शब्दो यमदंष्ट्रोद्भवो यथा ॥३२३॥

(B 823) ततोऽभूत् तुमुलं युद्धं देवदानवभीषणम् ।
महायोधगुणग्रामनिकषोपलसंनिभम् ॥३२४॥

(B 824) काश्मीरक्षिप्तपाषाणकम्पितानन्तपल्लवाः ।
आसन् युद्धं द्रुमा दृष्ट्वा भयाद्धूतकरा इव ॥३२५॥

(B 825) महायोधकृतानन्तसिंहनादापदेशतः ।
क्रन्दन्निवाभवत् तत्र पर्वतोऽपि भयाकुलः ॥३२६॥

(B 826) योधक्षिप्तशरव्रातच्छन्नस्कन्धाः महाद्रुमाः ।
तद्दृष्ट्वा तुमुलं युद्धमासन् रोमाञ्चिता इव ॥३२७॥

(B 827) युद्धं बहुविधं कृत्वा तुष्टं मुग्गुलसैनिकम् ।
स्वबलं भग्नमालोक्य याकोभोऽभूद्भयाकुलः ॥३२८॥

(B 828) मद्योधचन्द्रमा मन्ये ग्रस्तो यवनराहुणा ।
केवलोऽहं कथं शक्तो म्लेच्छसंग्रामसागरे ॥३२९॥

(B 829) इत्युक्त्वा स च याकोभः केवलोऽप्यचलत् ततः ।
काष्ठवाटान्तरं प्राप लज्जमानो दिनेदिने ॥३३०॥

(B 830) ज्यल्लालदीनसेवार्थं गते योसोभखानके ।
भ्राताभून्मेर्जबद्धाकः कश्मीरेष्वधिकारवान् ॥३३१॥

---

322 [a]) MSS and C B यवनै: (emended as in text). —[b]) MSS and C B काश्मारै: (emended as in text).

329 [d]) S'_2 -सागरसङ्गरे (for -सङ्ग्रामसागरे).

331 [e]) $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ म्लेच्छ–; K स्ले(mislec. for S'ār. म्ले)च्छ–; D मेर्ज– (as in text); B (evid. emend.) मिर्ज–; S'_2 -वर्धक:, S'_3 -वर्द्धत्क:; I_1 C -बद्धक:; I_2 -बद्रक: ; K -वर्मक: ; A -बुद्धीक: ; D B -बद्धाक: (as in text); S'_6 (conflated) म्लेच्छबद्धाक: (for मेर्ज°).

(B 831) विचारे विहिते तेन निर्ववौ सकलो जनः।
चकोर इव शीतांशावुदयं प्रति गच्छति ॥३३२॥

(B 832) कुर्वन्तमेकदा हिंसां वणिजं निजवेश्मनि।
कण्ठे निबद्धय तन्मांसं नगरे प्रत्यवेलयत् ॥३३३॥

(B 833) यः कश्चित्पुरुषो मोहात् प्राणिहिंसां करिष्यति।
एतादृशं महत्कष्टमवाप्स्यति न संशयः ॥३३४॥

(B 834) एकदा यवनः कश्चिदपराधं विनाकृतम्।
कश्चिज्जघान काश्मीरं पुरुषं मदविह्वलः ॥३३५॥

(B 835) निहतं पुरुषं सम्यगन्तर्धाय जलान्तरे।
न मया निहतः कश्चिदित्यूचे स मृषा वचः ॥३३६॥

(B 836) विज्ञप्तस्तत्कुटुम्बेन तत्क्षणं मेर्जबद्धकः।
उवाच हेतुना केन काश्मीरो निहतस्त्वया ॥३३७॥

(B 837) उवाच यवनस्तं तु नैव कश्चिन्मया हतः।
यद्ययं निहतस्तस्य कबन्धः कुत्र तिष्ठति ॥३३८॥

(B 838) इत्थं कृतप्रतिज्ञेऽस्मिन् यवने मेर्जबद्धकः।
लोकानाज्ञापयामास सरस्यन्तर्विलोक्यताम् ॥३३९॥

---

332 [b]) S'_2 निवबुः सकला जनाः. —[c]) S'_2 चकोराः.

333 [d]) C न नरं (for नगरं); $S'_{2.3.6}$ A $I_{1.2}$ K D B नगरं (mislec. for S' ār. रे); I_1 D प्रत्यवालयत्; B (evid. emend.) प्रत्यवल्गयत्; S'_6 प्रत्यवेल (marg. *pr. m.* ल्ग)यत्.

335 [b]) S'_2 अपराग- (sic); S'_6 A C $I_{1.2}$ K D B अपराध-; S'_3 अपराधं (as in text); M (evid. emend.) -विवर्जितं (for विनाकृतम्).

336 [a]) I_1 निहितं. —[b]) S'_3 ग(marg. ज)लान्तरे.

337 [a]) S'_2 विक्षिप्तः (sic). —[b]) M (evid. emend.) मिर्ज-; S'_3 C K -वर्द्धकः; S'_2 A वर्धकः; $I_{1.2}$ D B -बद्धकः (as in text); S'_6 मि(after corr.)र्जवर्ध (marg. *pr. m.* बद्ध)कः.

338 [a]) $S'_{3.6}$ A C $I_{1.2}$ K D B च (for तु).

339 [b]) For मेर्जबद्धकः see Crit. App. 337.

(B 839) सरस्यालोडिते सम्यक् कबन्धे निर्गतेऽपि च ।
यवनस्यापराधोऽभूत् पुरुषं निघ्नतस्तदा ॥३४०॥

(B 840) अपराधिनमालोक्यं यवनं मेर्जबद्धकः ।
शास्त्रोक्तेन विधानेन दण्डं तस्य समादिशत् ॥३४१॥

(B 841) ततो ज्यल्लालदीनेन पृष्टो योसोभखानकः ।
उवाचानन्तकाश्मीरगुणानानतमस्तकः ॥३४२॥

(B 842) कश्मीरदेशो विहितो विधात्रा
स्वर्गस्य निर्माण इव द्वितीयः ।
शेषः समर्थो रसनासहस्र-
द्वयेन वक्तुं न गुणान् यदीयान् ॥३४३॥

(B 843) द्राक्षाफलानि क्षणमात्रनश्य-
न्माधुर्यपूराणि विहाय यस्मिन् ।
शृङ्गारिलोका अमृतं स्रवन्ति
पिबन्ति कान्ताधरपल्लवानि ॥३४४॥

(B 844) यत्राङ्गनानां सततं मुखानि
विलासलोलाक्षिपरम्पराणि ।
चकासते क्षिप्रचलद्द्विरेफ-
मालाश्रितानीव सरोरुहाणि ॥३४५॥

(B 845) हाहा तुषारं व्यथयत्यजस्र-
मिति च्छलाद्धस्तयुगं विधूय ।
यस्मिन्नभीष्टं पतिलोकमध्ये
नारी विलासं प्रकटी करोति ॥३४६॥

---

341 b) For मेर्जबद्धकः see Crit. App. 337.

343 b) M (evid. emend.) निर्माणमिव द्वितीयम्. —d) B (evid. emend.) तदीयान्.

344 b) $S'_{2\cdot3}$ A C $I_{1\cdot2}$ K मधूद–; D B माधुर्य– (as in text); S'_{6} मधूद– (*sup. lin. pr. m.* माधुर्य)पू°.

345 c) $S'_{3\cdot6}$ A D B चकासाति; C $I_{1\cdot2}$ K चकाशति.

(B 846) अन्येऽपि मन्त्रिणस्तस्य जगदुर्जगतीश्वरम् ।
चक्रवर्तिन्नसंख्याता गुणाः कश्मीरसंभवाः ॥३४७॥

(B 847) यस्मिन् भगवती संध्या संध्यानां त्रितये सदा ।
ददाति दर्शनं ग्रीष्मे सलिलागमनिर्गमैः ॥३४८॥

(B 848) यत्रामरेश्वरः साक्षाद्धिममूर्तिधरो विभुः ।
वर्धते शुक्लपक्षेऽसौ कृष्णपक्षे च हीयते ॥३४९॥

(B 849) भगवान् स्वयमग्निः स यत्र जाज्वल्यते सदा ।
नेन्धनं विद्यते यस्य नाङ्गारो यस्य दृश्यते ॥३५०॥

(B 850) अथ ज्यल्लालदीनोऽसौ श्रुत्वा कश्मीरजान् गुणान् ।
निर्ययौ दर्शनार्थाय लाहोरनगरान्तरात् ॥३५१॥

(B 851) ज्यल्लालदीनभूपालः कश्मीरनगरान्तरम् ।
आषाढशुक्लपञ्चम्यामाससाद ससैनिकः ॥३५२॥

(B 852) आषाढशुक्लसप्तम्यामाशीर्वादपरायणान् ।
पुपोष स्वर्णदानेन भूपो ब्राह्मणबालकान् ॥३५३॥

(B 853) ततो मार्ताण्डमाश्रित्य गोप्रदानानि भूपतिः ।
मुक्तासुवर्णयुक्तानि ब्राह्मणेभ्यः समार्पयत् ॥३५४॥

(B 854) द्राक्षाटङ्कफलाक्षोटदिव्यपालीवतान्वितम् ।
कश्मीरदेशमालोक्य तुतोष धरणीपतिः ॥३५५॥

---

347 [b]) C जगदीश्व°.

348 [d]) S'_2 सलिलस्य गमागमैः.

350 [d]) S'_2 यत्र (for °स्य).

351 [d]) I_2 K °न्तरम्.

352 [c]) S'_3 K -पक्षस्या (S'_3 marg. ञ्चम्या)म्.

354 [c]) A -रत्नानि (for -युक्ता°).

355 [a]) $S'_{2\cdot3}$ C K -फलोत्तुङ्ग- (for °लाक्षोट); I_1 -टंक- (for [अ] क्षोट); I_2 टश्छ (mislec. for S'ār. ङ्क). —[b]) $I_{1\cdot2}$ D B भ (I_2 त mislec. for S'ār. भ)व्य- (for दिव्य); $S'_{2\cdot3\cdot6}$ A C K B -तालीवना-; $I_{1\cdot2}$ D पालीवता- (as in text). —S'_2 transp. 355[cd] and 356[ab].

(B 855) वितस्तातीरमाश्रित्य पश्यतो नगरस्थितिम् ।
ज्यल्लालदीनभूपस्य बभूवातीव कौतुकम् ॥३५६॥

(B 856) ज्येष्ठरुद्रसमीपस्थं नानापुष्पोपशोभितम् ।
सरः संपश्यतस्तस्य चमत्कारो महानभूत् ॥३५७॥

(B 857) ज्यल्लालदीनपादत्रपवित्रीकृतमस्तकः ।
चरणं शरणीकर्तुं याकोभोऽपि समाययौ ॥३५८॥

(B 858) शरणार्थिनमायातं याकोभं चरणानतम् ।
मानसिंहमहीपालसेवकं कृतवान्नृपः ॥३५९॥

(B 859) देशान्तरं समासाद्य चक्रवर्तिसमर्पितम् ।
सुखं चकार याकूबो मानसिंहपदानतः ॥३६०॥

(B 860) ज्यल्लालदीनभूपालो दृष्ट्वा कश्मीरमण्डलम् ।
देशं योसोभखानाय दत्त्वा देशान्तरं ययौ ॥३६१॥

(B 861) मेर्जायोसोभखानोऽसौ नृपसेवाविचक्षणः ।
देशं ररक्ष निःशेषमादेशेन [विशेषतः ॥३६२॥

(B 862) श्रीमज्ज्यल्लालदीनेन मेर्जायोसोभरोषतः ।
विहितः काजिआलाख्यः कश्मीरेष्वधिकारवान् ॥३६३॥

(B 863) वार्षिके ढौकिते तेन मेर्जायोसोभसेवकाः ।
अधिकारविहीनास्ते गृहे प्राघुर्णिका इव ॥३६४॥

न दत्तं तेन कस्मैचिन्न भुक्तं स्वयमेव वा ।
(B 864) किंतु राशीकृतं धान्यं हृत्वा स्वर्णमिवाखुना ॥३६५॥

लोका योसोभखानस्य काजिआलेन भर्त्सिताः ।
(B 865) बभूवुः क्षुधयाक्रान्ता निदाघेनेव चातकाः ॥३६६॥

---

359 b) $S'_{2\cdot 3}$ C I_1 K श(mislec. for S'ār. च)रणा°.

364 d) $I_{1\cdot 2}$ D प्राघुणिका.

धान्यं राशीकृतं दृष्ट्वा काजिआलेन वर्धितम् ।
(B 866) आययावथ कश्मीरलोकस्तद्धरणेच्छया ॥३६७॥

दुष्टेन काजिआलेन द्रविणे न व्ययीकृते ।
(B 867) अथ मुग्गुल्लोकस्य विरोधोऽभूत् परस्परम् ॥३६८॥

भ्राता योसोभखानस्य मेर्जायाद्वारकोऽकरोत् ।
(B 868) संधिं कश्मीरलोकेन काजिआलजिघांसया ॥३६९॥

विधाय विविधं युद्धं काजिआलोऽचलत् तदा ।
(B 869) पर्वतारोहणादश्वे मृते स्वर्गं च सोऽगमत् ॥३७०॥

हस्सनभिगनामाभूज्ज्यल्लालदीनसेवकः ।
विधाय समरं सम्यग् जीवन्प्रत्याययौ च सः ॥३७१॥

(B 870) चित्तं विधाय कुटिलं यदनेन वित्तं
संरक्षितं तु रिपुभिः खलु भक्षितं तत् ।
हा संहृतं कथमिति प्रकटप्रहास-
मस्तोकशोकरहितं वदति स लोकः ॥३७२॥

(B 871) तेन यत् संचितं वित्तं वञ्चयित्वा कृषीवलान् ।
तत् सर्वं निजलोकेभ्यो मेर्जायाद्वारको ददौ ॥३७३॥

(B 872) ज्यल्लालदीनभूपालपादसेवापराङ्मुखः ।
जग्राह मेर्जयाद्वारो राज्यं कश्मीरमण्डले ॥३७४॥

(B 873) तद्दृष्ट्वा भाविसंग्रामभीतिचञ्चलमानसाः ।
ततः समस्तकाश्मीरा हाहेति जगदुर्जनाः ॥३७५॥

---

371 [a]) S'_3 C I_2 K हसन–; D D हसैन–; B (evid. emend.) हसेनबेग–.

372 [c]) $S'_{2.3}$ A C $I_{1.2}$ K हासं कृतं (corrupt); S'_6 हासं कृ (*pr. m.* marg. हृ) तं.

373 [a]) $S'_{2.3.6}$ A C I_1 K B येन; I_2 D तेन (as in text).

374 [c]) S'_3 -याज्ञा (mislec. for S'ār. द्रा)रो.

(B 874) इत्थं निशम्य चरितं यवनस्य तस्य
ज्यल्लालदीननृपतिः सहसाजगाम ।
रोषेण रुद्धकटकं कटकं विसार्य
चूर्णीचकार च स पर्वतदुर्गमार्गम् ॥३७६॥

(B 875) ततो ज्यल्लालदीनेन बहुलोकसमन्वितः ।
श्रीमच्छिखफरेदाख्यः प्रहितस्तज्जिगीषया ॥३७७॥

(B 876) स रुरोह ततो हस्तिगंजपर्वतमस्तकम् ।
उदयाद्रिमिव प्रातः साक्षाद्भास्करसारथिः ॥३७८॥

(B 877) तस्मिन्नवसरे मेर्जायाद्गारो निजसेवकैः ।
प्राप्य शूरपुरग्रामं निहतो द्रोहकर्मणा ॥३७९॥

(B 878) हतं तं पतितं दृष्ट्वा जम्बूकश्वाशितामिषम् ।
स्वामिद्रोहीति थूत्कृत्य सहसा जगदुर्जनाः ॥३८०॥

(B 879) आयात एव भगवानिह चक्रवर्ती
पूजा ह्यनेकविधिना च मया विधेया ।
इत्याकलय्य स उपायनभक्तियुक्ति
याद्गारको रचितवान् निजजीवितेन ॥३८१॥

(B 880) मेर्जायाद्गारके तस्मिन्निहते निजसेवकैः ।
ततः शिखफरेदाख्यः स प्राप नगरान्तरम् ॥३८२॥

---

376 a) A वचनं (for चरितं).

377 b) S'_2 भूरि- (for बहु-). —c) B (evid. emend.) °च्छेखफरीदाख्य.

378 c) $S'_{2.3.6}$ A I_1 B प्राप्तः; C I_2 K D प्रातः (as in text).

380 b) D जम्बुक-; S'_3 K B °श्वा (mislec. for S'ār. श्वा) सिता°; S'_2 A C °श्वासिता°.

381 b) D B [आ]दि (for हि). —c) $S'_{2.3.6}$ A C K -युक्तं; $I_{1.2}$ D B -युक्ति (as in text).

382 c) B (evid. emend.) शेखफरीदा°.

(B 881) साक्षाच्छिखफरेदेन रक्षिते नगरान्तरे ।
चौराणां नाभवन्मार्ग उलूकानामिवोषसि ॥३८३॥

(B 882) ततो ज्यल्लालदीनोऽसौ द्रष्टुं कश्मीरमण्डलम् ।
आययौ कुङ्कुमाक्षोटफलपुष्पोपशोभितम् ॥३८४॥

(B 883) काचिद् दर्शनकाङ्क्षिणीं प्रियसखीं सन्दर्शयन्ती नृपं
व्यग्राभूदपरा चमूपतिरयं दृष्टो मयेत्यब्रवीत् ।
काचिद्रुद्धपयोधरं समचलत् संतर्जयन्ती शिशु-
मित्थं भूपविलोकने समभवत् पौराङ्गनानां त्वरा ॥३८५॥

(B 884) ततः काश्मीरलोकेन कृते भूपतिदर्शने ।
सद्यः प्रतिगृहं नित्यं प्रावर्तत महोत्सवः ॥३८६॥

(B 885) पुरा चक्रकुलोत्पन्नैर्भूपैर्जातिविरोधतः ।
ब्राह्मणेभ्यस्तदा दण्डो गृहीतः किल वार्षिकः ॥३८७॥

(B 886) यो ररक्ष निजां जातिं कुलशीलसमन्वितः ।
स ददौ वार्षिकं राज्ञे करं प्रतिगृहं द्विजः ॥३८८॥

(B 887) ब्रह्मयज्ञोपवीतस्य रक्षणाय समर्पितः ।
प्रत्यब्दं ब्राह्मणै राज्ञां चत्वारिंशत्पणाः करः ॥३८९॥

(B 888) उत्तमो ब्राह्मणो देशं तत्याज म्लेच्छदूषितम् ।
तत्याज मध्यमो लज्जां जातिं तत्याज चाधमः ॥३९०॥

(B 889) म्लेच्छमेघे स्थिते तस्मिन्नन्धकारितदिङ्मुखे ।
विप्रा देशान्तरं जग्मुर्मराला इव मानसम् ॥३९१॥

---

383 [a]) B (evid. emend.) शेखफरीदेन,

385 [c]) I_2 C D -पयोधरां; S'_6 पयोधरां (marg. *pr. m.* रं). —[d]) I_2 hapl. om. words beginning with समभवत् and ending with -लोकेन in 386[a].

387 [a]) S'_2 (evid. emend.) चक्र-. —D om. 387[cd], 388 and 389.

389 [d]) MSS and C B कराः (emended as in text with M).

(B 890) तादृशान् ब्राह्मणाञ् ज्ञात्वा ज्यल्लालदीनभूपतिः ।
चक्रवंशक्रमायातं विप्रदण्डं न्यवारयत् ॥३९२॥

(B 891) कश्मीरदेशविप्राणां यो यः पूजां करिष्यति ।
तस्मै तस्मै प्रदास्यामि तत्क्षणं पारितोषिकम् ॥३९३॥

(B 892) कश्मीरदेशविप्रेभ्यो वार्षिकं यो ग्रहीष्यति ।
अचिरात्तस्य भूपालो गृहमुत्पाटयिष्यति ॥३९४॥

(B 893) इत्यादेशेन भूपस्य हतवार्षिकसाध्वसाः ।
आशीर्वादपरा आसन् ब्राह्मणा ब्रह्मवादिनः ॥३९५॥

(B 894) साक्षाज् ज्यल्लालदीनोऽयं जीयाद्वर्षशतार्बुदम् ।
योऽस्माकं वार्षिकं दण्डं वारयामास भूपतिः ॥३९६॥

(B 895) चक्रवंशप्रभूणां हि भूपतीनां पुराज्ञया ।
नित्यं धेनुसहस्रस्य वधोऽभूदनिवारितः ।।३९७॥

(B 896) म्लेच्छान्धकारविध्वस्ता मित्रदर्शनवर्जिताः ।
ब्राह्मणा अन्वतप्यन्त रात्रौ पद्माकरा इव ॥३९८॥

(B 897) देशेऽस्मिन् म्लेच्छदावाग्निशोषिताशेषवृत्तयः ।
नाबभुर्ब्राह्मणाः सर्वे दग्धारण्ये मृगा इव ॥३९९॥

(B 898) क्वचिद्धासः क्वचित्त्रासः कचिच्चैव निभर्त्सनम् ।
जम्बुकस्येव विप्रस्य पथि संचरतोऽभवत् ॥४००॥

---

393 a) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B -देशे. —d) S'_2 K D °तोषकम्.

394 a) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B -देशे.

395 a) $S'_{2\cdot3}$ A C K इत्यादिशन्तो (S'_2 तो).

396 b) B (evid. emend.) -शतार्बुदः.

397 a) S'_2 चक्रे वर्षभावानां (corrupt). —b) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B मदा° (for पुरा°). —d) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K D B मृत्युरासीद° (for वधोऽभूदनि°).

399 c) $S'_{2\cdot3\cdot6}$ A C K नाभवन् (for बभुर्).

(B 899) ज्यल्लालदीनभूपालनित्यसेवनतत्परः ।
बभूव रामदासाख्यो विप्राणामुपकारकः ॥४०१॥

(B 900) तादृशान् ब्राह्मणान् दृष्ट्वा रामदासो महायशाः ।
वितीर्णस्वर्णदुर्वर्णो बभौ कर्ण इवापरः ॥४०२॥

(B 901) यद्वर्षणैरमृतमेष ददाति मेघ-
स्तद्वर्जितेन स विकत्थत एतदेव ।
दानं सदैव ददतो न बभूव तस्य
श्रीरामदासनृपतेर्हृदयेऽभिमानः ॥४०३॥

(B 902) मान्धातर्मन्ददाता भवसि गुणगणैः कर्ण कर्णं पिधेहि
व्रीडा जीमूतवाह त्वयि भवति न वा किं बले त्वं बलीयान् ।
सत्यं वा वेद्मि नित्यं किमु तव यशसा विक्रमादित्य कृत्यं
दानं सम्यग्विधानं वितरति चतुरं रामदासः सदा सः ॥४०४॥

(B 903) निवेद्याशीर्वचस्तस्मै ब्राह्मणा ब्रह्मवादिनः ।
गृहं प्रत्याययुः सर्वे पण्डिता निर्मलादयः ॥४०५॥

(B 904) अन्येद्युरपि सर्वे ते प्रह्लादनिर्मलादयः ।
संमानिता नरेन्द्रेण वचनामृतवर्षिणा ॥४०६॥

---

403 b) S′$_2$ व्यकत्थत.

404 c) I_2 B त्वा°; I_1 D चा° (for वा°).
—After 404 S′$_{3\text{-}6}$ A C I_1 K B ins.:

6* अकबरसेवकेन रामदासेन ब्राह्मणगृहं प्रति रजतमुद्राशतं सुवर्णमुद्रासहितं समर्पितम् ।
रजतमुद्रापञ्चाशत्सहस्राणि रामदासेन ब्राह्मणानां दारिद्र्यदूषितानां परिकल्पितानि ।

—After 6* S′$_{3\text{-}6}$ A C I_1 K B, and after 404 S′$_2$ ins.:

7* यावदन्तरमदानदानयो रामदास जगतीसुरद्रुम ।
अन्यदीयभवदीयदानयोस्तावदन्तरमिति प्रतीयते ॥

405 c) S′$_2$ सर्वे-. —d) A om. words beginning with पण्डिता and ending with ते in 406[a].

406 b) S′$_6$ (after corr.) A D B प्रह्लादा.

(B 905) श्रीमज्ज्यल्लालदीनोऽपि रामदासानिवेदितान् ।
विप्रान् निर्वापयामास चकोरानिव चन्द्रमाः ॥४०७॥

(B 906) ग्रामेषु तेन दत्तेषु बभौ पण्डितमण्डलम् ।
मेघे वर्षति दावाग्निसंतप्तमिव काननम् ॥४०८॥

(B 907) ज्यल्लालदीनभूपालसदासेवनतत्परः ।
अभूद् राजानकादित्यो भूमिदानविवेचने ॥४०९॥

(B 908) विपक्षं गुणिनं हित्वा स्वपक्षं गुणवर्जितम् ।
पुपोष भूमिदानेन स ज्ञातिस्नेहमोहितः ॥४१०॥

(B 909) कश्मीरेष्वथ रामदासवचनक्षुब्धाचलस्फारितं
भूदानामृतमुत्थितं सुविमलं श्रीराजगेहाम्बुधेः ।
आदित्याभिधराहुणा सुविबुधान् हा वञ्चयित्वा कथं
नीतं दुर्जनबन्धुदैत्यसुमहत्संतृप्तये तत्क्षणम् ॥४११॥

(B 910) साक्षाज् ज्यल्लालदीनोऽसौ करुणामृतसागरः ।
स्वर्णदुर्वर्णदानेन भिक्षुलोकमपूपुरत् ॥४१२॥

(B 911) देशं योसोभखानाय समर्प्य पुनरेव सः ।
ज्यल्लालदीनभूपालो देशान्तरमथागमत् ॥४१३॥

---

407 a) $S'_{2\cdot3}$ A C K श्रीमान्.

409 b) $S'_{2\cdot3\cdot6}$ A C $I_{1\cdot2}$ K -विचक्षणः; D B °नतत्परः (as in text). —d) D B -दाने.

410 RSs_2 quotes 410 entirely. —a) RSs_2 विपक्षान् गुणिने (?नो). —b) RSs_2 सपक्षं (sic) गुणवर्जितान्.

411 RSs_2 quotes 411 entirely. —b) I_2 अर्थितं (for उत्थि°). —c) $S'_{3\cdot6}$ A C $I_{1\cdot2}$ K B सवि°. —D om. 411.
—After 412 $S'_{3\cdot6}$ A C K B ins.:
8* ततः पातिशाहिः शिखाफैजं समादिशत् भवता भाण्डागारे रौप्यमुद्रासहस्राणि गृहीत्वा ग्रामे चाटव्यां च सर्वेषु स्थानेषु ब्राह्मणानां भिक्षुकाणां च द्रविणं समर्पणीयामिति तेनापि तथैव कृतम् ॥
[I_2 A रूप्य-].

(B 912) देशे योसोभखानेनाश्रिते ते निर्ववुर्जनाः ।
उदयाद्रिं गते सूर्ये प्रातः पद्माकरा इव ॥४१४॥

(B 913) समर्पिताः प्रतिग्रामं कार्षिकाः कृतवार्षिकाः ।
धानुष्काश्च पुनर्युद्धशङ्कया तेन वारिताः ॥४१५॥

(B 914) प्रवर्तते यथा हंसः क्षीरनीरविवेचने ।
तथाभूत् सोऽपि धानुष्ककृषीवलविचारणे ॥४१६॥

(B 915) ज्यल्लालदीनसेवार्थे गते योसोभखानके ।
मेर्जालश्करनामाभूत् तत्पुत्रोऽत्राधिकारवान् ॥४१७॥

(B 916) कलङ्करहितः साक्षात् सदा सर्वशिरोमणिः ।
सुधामयवपुः सोऽयं बालचन्द्र इवाबभौ ॥४१८॥

(B 917) सेवको यवनो लोकं वितस्तातीरमाश्रितः ।
उह्यतां काष्ठभारोऽयमित्यादिश्य व्यमर्दयत् ॥४१९॥

(B 918) तादृशं यवनं दृष्ट्वा मेर्जालश्करकः स्वयम् ।
उवाच सचिवं शीघ्रं पश्यायं हन्ति मानवान् ॥४२०॥

(B 919) अहो मत्सेवका लोकान् काश्मीरान् व्यथयन्ति किम् ।
ज्यल्लालदीनभूपालान्न भयं वर्तते कथम् ॥४२१॥

(B 920) मार्गे नास्ति विलुण्ठनं न च भयं चौरान्न वा दुर्जनाद्
ग्रामे वा नगरे प्रयच्छति वणिग्लोको न शुल्कं क्वचित् ।
मेघो वर्षति मेदिनी फलयुता सद्वार्षिकाः कार्षिका
देशं रक्षति न क्षितेः क्षतिरहो ज्यल्लालदीनाभिधे ॥४२२॥

---

415 MSS and CB समर्पि (prob. mislec. for S′ār. र्चि)ताः.

416 d) S'_2 -विवेचने (for °चारणे).

417 c) $S'_{3\cdot6}$ A C K -लस्कर-.

420 b) A C -लस्करकः. —K om. 420ab. —c) MSS and C B सचिवान् (emended as in text).

422 c) S'_2 ··· घे; S'_6 A D B मेघे; S'_3 C $I_{1\cdot2}$ K मेघो (as in text). —d) S'_3 C K देशे (mislec. for S′ār. शं).

(B 921) अधुना भवता शीघ्रं यवनोऽयं निरुध्यताम् ।
इत्याज्ञप्तो निरोद्धुं तमधावत् सचिवः क्षणात् ॥४२३॥

(B 922) चलिते यवने तस्मिन् भयात्तं सचिवोऽब्रवीत् ।
भगवन् यवनः सोऽयं त्वद्भयेन पलायितः ॥४२४॥

(B 923) इत्युक्ते तेन भूयः स भेर्जालश्करकोऽवदत् ।
अधुना चलिते तस्मिन् मदुक्तं वचनं कुरु ॥४२५॥

(B 924) मध्येवितस्तमानीय नावं काष्ठसमन्वितम् ।
तथा दहन्तु लोकानां यथा भीतिर्भविष्यति ॥४२६॥

(B 925) तथाविधे कृते तेन मन्त्रिणा यवनास्तदा ।
ज्वलन्तीं नावमालोक्य भयेनासन् मृता इव ॥४२७॥

(B 926) यः कश्चिद्यवनो मोहात् काश्मीरान् पीडयिष्यति ।
स निजस्यापराधस्य सत्वरं फलमाप्स्यति ॥४२८॥

(B 927) भूतलान्निर्गता रेजे कुङ्कुमाङ्कुरसन्ततिः ।
शरद्दिदृक्षया शेषशिरःपङ्क्तिरिवोत्थिता ॥४२९॥

(B 928) प्रादुरासीत् ततो हित्वा निर्मलाङ्कुरचोलकम् ।
शिखा कुङ्कुमपुष्पाणां लज्जयेव शनैः शनैः ॥४३०॥

(B 929) कुङ्कुमपुष्पशोभाढ्यं द्राक्षाक्षोटसमन्वितम् ।
दृष्ट्वा पद्मपुरं ग्रामं निनिन्द त्रिदिवं जनः ॥४३१॥

(B 930) खारीके वापिते बीजे श्रावणे भुवि कार्षिकैः ।
अर्धखारीप्रमाणानि पुष्पाण्यवचितानि तैः ॥५३२॥

---

423 c) I_2 C निरुद्ध.
425 b) S''_3 A C -लस्करको.
426 a) A D वितस्तां.
428 a) S''_2 मानवो (for यवनो).
431 c) $S'_{2.3.6}$ A C $I_{1.2}$ D B पद्मपुर–; K पद्मपुरं (as in text).
—After 435 $S'_{3.6}$ C $I_{1.2}$ K D B इति कुङ्कुम (D B मोत्पत्ति)वर्णनम् .

(B 931) प्रातर्यावन्ति पुष्पाणि चितानि धरणीतलात् ।
आसन् चितानि तावन्ति सायंमध्याह्नयोरपि ॥४३३॥

(B 932) यदाप्रभृति नागेन तक्षकेण प्रदर्शितम् ।
तदाप्रभृति तादृक्षं कुङ्कुमं नाभवद् भुवि ॥४३४॥

(B 933) कश्चित् पुष्पावचयनिरतो ढौकयानोऽपि कश्चित्
कश्चिद्भारप्रमथितशिरा नौशयानोऽपि कश्चित् ।
कश्चिन्नित्यं तुलननिरतो रक्षणे कोऽपि सक्त-
स्तस्मिन् काले बहुलघुसृणव्याकुलो लोक आसीत् ॥४३५॥

(B 934) अष्टवर्षेष्वतीतेषु ज्यल्लालदीनभूभृता ।
योसोभखानादाहृत्य देशोऽन्येषु समर्पितः ॥४३६॥

(B 935) आसाफखान आयाते मेर्जायोसोभसैनिकम् ।
पृथक्पृथग् ययौ याते वायाविव रजोभरः ॥४३७॥

(B 936) श्रीमज्ज्यल्लालदीनेन प्रहितौ निजसेवकौ ।
अह्मदखानसोल्तानमह्मदकुलखानकौ ॥४३८॥

(B 937) आसाफखानस्तौ ज्ञात्वा ज्यल्लालदीनसेवकौ ।
देशाधिपतितां दत्त्वा प्रभुपादान्तिकं ययौ ॥४३९॥

(B 938) कश्मीरेष्वपि तौ सम्यग् दुर्विचारं रिरेचतुः ।
अन्धकारं सदा पृथ्व्यां सूर्याचन्द्रमसाविव ॥४४०॥

---

437 [a]) S'_2 आसाद–; C I_2 K आसाह्– (mislec. for S'ār. फ).

438 [c]) $S'_{2\cdot3\cdot6}$ (before corr.) C I_2 आह्लाद– (for अह्मद–); B (evid. emend.) -सुल्तान–. —K hapl. om. 438[cd].

439 [a]) S'_2 आसाद–; S'_3 C आसाह्– (mislec for S'ār. फ).

440 [b]) $S'_{2\cdot3}$ K दुर्विकारं; S'_6 A C $I_{1\cdot2}$ D B दुर्विचारं (as in text); $S'_{2\cdot3\cdot6}$ A C I_1 B विचेरतुः; I_2 विरेचेरतु; K विचरतुः; D वि(mislec. for S'ār. रि)रेचतुः (as in text).

(B 939) अकबरनृपतेरथाज्ञया तौ प्रवरपुरान्तिकशारिकासमीपे ।
विदधतुरगमाकलय्य दुर्गं नगनगरीति विरुद्धनामधेयम् ॥४४१॥

(B 940) बहुविधतपसा विधूय देहं
त्रिदिवगतिः खलु जन्मनि द्वितीये ।
इह नगनगरीं विलोक्य लोक-
स्त्रिदिवमिदं न समीहतेऽधिगन्तुम् ॥४४२॥

(B 941) तस्मिन्नवसरे गेहे रुद्धे भूपालसेनया ।
दुःखं बभूव लोकानां नगरान्तरवासिनाम् ॥४४३॥

(B 942) तादृशं दुःखमालोक्य वणिग्लोकनिवेदितम् ।
लोकान् निर्वापयामास निर्देशेनेति भूपतिः ॥४४४॥

(B 943) नवीननगरीमध्ये मामकाः सन्तु सेवकाः ।
यः पीडयति काश्मीरान् सोऽपराधी भविष्यति ॥४४५॥

(B 944) आदेशे विहिते तेन ज्यल्लालदीनभूभृता ।
अथ मुग्गुलल्लोकोऽयं शिश्रिये नगरीं नवाम् ॥४४६॥

(B 945) शारिकापर्वते रेजे नगरी सा सुधासिता ।
राजधानीं समीपस्थां हसन्तीव पुरातनीम् ॥४४७॥

(B 946) निर्गते यवने लोकस्तुतोष विहितोत्सवः ।
ज्यल्लालदीनभूपालसदाशीर्वादतत्परः ॥४४८॥

(B 947) द्विसहस्रगृहोपेतमलावदीननिर्मितम् ।
अकस्मादथ मध्याह्ने जज्वाल नगरं क्षणात् ॥४४९॥

---

441 [a]) S'_2 अकभर-. —[d]) $I_{1\cdot2}$ K D B निरुद्ध-.

442 [b]) MSS and C B नाति: (emended as in text with RSs_2). —[d]) M (evid. emend.) इमं (for °दं).

444 [c]) A C $I_{1\cdot2}$ निवाप°. —[d]) D B निदेशेन.

447 [d]) $I_{1\cdot2}$ D पुरातनाम्.

449 [b]) $S'_{3\cdot6}$ (before corr.) C $I_{1\cdot2}$ K D अलाभ°.

(B 948) मुग्गलान्निर्गतान्दृष्ट्वा नवीननगरीस्थितान् ।
विरहादिव जज्वाल नगरी सा पुरातनी ॥४५०॥

(B 949) गृहशालादिविस्तीर्णं नानाचित्रोपशोभितम् ।
वह्निना क्षणमात्रेण भस्मशेषमभूत् पुरम् ॥४५१॥

(B 950) पुराणनगरीदाहे सा बभौ नगरी नवा ।
सपत्नीविरहे जाते नूतनोढेव वल्लभा ॥४५२॥

APPENDIX *D*

(B 432) जिष्णुः संतापितारातिः कालखड्गधरो रणे ।
प्रणेता जगतां प्राणः शंकरो विनतात्मनाम् ॥ १ ॥

(B 433) कलावान् राज्यराड् भास्वान् गुरुकाव्यज्ञमङ्गलः ।
जीयाद् भूभूषणो नित्यं गाजशाहो महारथः ॥ २ ॥

(B 434) मुन्यग्निसंख्ये वर्षे च शुचौ मास्यसितेतरे ।
अष्टम्यां राजहोमायपुत्रस्याक्बरभूभुजः ॥ ३ ॥

---

450 d) $I_{1\cdot2}$ D पुरातना.

452 d) $S'_{2\cdot3}$ A C K मोदते इव (S'_2 A नव–); $I_{1\cdot2}$ D B नूतनोढेव (as in text); S'_6 मोदते न (marg. *pr. m.* नूतनोढे)व.
—After 452 $S'_{3\cdot6}$ A C I_1 K B conclude with इति (I_1 om. इति) पातिशाहिअ (S'_6 शाह्य) कबरज्य (B ज)ल्लालदीनस्य कश्मीरप्राप्तिवर्णनम् . —After -वर्णनम् A B ins. इति श्रीप्राज्यभट्टकृता (A विरचिता) चतुर्थी राजतरङ्गिणी; I_1 संवत् १८७७ वैशाख वदि १३; S'_6 संवत् ४९८९ चैत्र वदि नवम्यां भृगौ पज्यनोपाधिमता पण्डितमधुसूदनेन स्वविनोदकृते प्राज्यभट्टविरचिता राजतरङ्गिणीयं विचिख्यते । श्रीशाकाः १८३५, श्रीविक्रमादित्यसंवत् १९७०—

> शाके शराग्निवस्विन्दौ काव्ये चैत्रेऽसिते मुदा ।
> नन्देऽलिम्पत् तुर्यराजतरङ्गिणीं मधुसूदनः ॥
> नन्दाष्टताने सप्तर्षौ चैत्रिके नवम्यां कवौ ।
> नीले व्यलिम्पद्राज्ञां तरङ्गिणीं मधुसूदनः ॥

—Before st. 1 D ins. ओं.

3 d) $S'_{2\cdot3}$ C अम्ब (mislec. for S'ār. क्ब)र–; $I_{1\cdot2}$ D अकभर–.

(B 435) मुग्गुलेशस्य सेनानी करबाहुधरान्वितः ।
नाजुकशाहः पाषण्डदेशं प्राप्तो जिगीषया ॥ ४ ॥

(B 436) संमन्त्र्य गाजशाहोऽथ श्रुत्वा तद्बाह्यचेष्टितम् ।
मल्लेकहोसचक्रेशं बाह्यदेशं व्यसर्जयत् ॥ ५ ॥

(B 437) लौलमल्लेकचक्रेशपिजाहैभतखानकैः ।
खुज्याफतिहमेरालकाद्यैर्मन्त्रिवरैर्युतः ॥ ६ ॥

(B 438) वीरायुतैः पत्तिभिश्च निःसंख्यैः पटमण्डपैः ।
महात्मा होसमल्लेको निविष्टः सुयलान्तरे ॥ ७ ॥

(B 439) तावन्मुग्गुलसैन्येन महता बाह्यभूर्वृता ।
विमला सज्जनस्येव चित्तभूः कलुषैर्मलैः ॥ ८ ॥

(B 440) ततो राजपुरीदेशमशेषमावृणोद् बलैः ।
मुग्गुलेशस्य प्राक्सैन्याः पाषाण्डैरकृतादरैः ॥ ९ ॥

(B 441) क्रुद्धः काश्मीरिको राजाकर्ण्य शूरपुरात् बहिः ।
सबलो हिन्दुवाटं स प्रयातस्तज्जिगीषया ॥ १० ॥

(B 442) ऊर्जितां गाजशाहस्य चमूं दृष्ट्वा महीयसीम् ।
मार्दवं म्लेच्छसेनागाद्धिमानीवार्करश्मिभिः ॥ ११ ॥

(B 443) दृष्ट्वोर्जितं गाजशाहबलमाजग्मतुर्द्रुतम् ।
फत्तेमल्लेकलुहरमल्लेकावस्य चान्तिकम् ॥ १२ ॥

---

6 [a]) I_2 लोल–. —[b]) B (evid. emend.) -पेजाहैबत–. —[c]) B (evid. emend.) खुजाफतिहमारा°.

7 [d]) I_2 K स्वयला°; I B (evid. emend.) सुबला°; M (evid. emend.) सबलोऽन्तरे.

8 [b]) $S'_{2\cdot3}$ K बा¯भू–.

9 [c]) M (evid. emend.) सेनानी (for प्राक्सैन्याः). —[d]) M -कृतादरः (for °रैः).

10 [b]) A आकल्य (mislec. for S'ār. र्ण्य).

12 [a]) $S'_{2\cdot3}$ A C I_1 बलोर्जितं; K वली(sic)र्जितं; I_2 D B दृष्ट्वोर्जितं (as in text); S'_6 बलो (marg. *pr. m.* दृष्ट्वो)र्जितं.

रुद्धेषु दुर्गमार्गेषु प्रभूतं मौग्गुलं बलम् ।
(B 444) वीरैः फतिहखानाद्यैर्गर्जद्भिराकुलीकृतम् ॥ १३ ॥

खुज्यहाज्यकयोसोफचक्राद्यैर्मुगलान्वितैः ।
(B 445) साम राजपुरीराज्ञा गाजीशाहभयात् कृतम् ॥ १४ ॥

नौशहारस्थिते शाहनाजोके मुग्गुलास्तथा ।
(B 446) ऊहुस्ते संधिबन्धेन कालं दुर्गादिकर्मभिः ॥ १५ ॥

विसृष्टो गाजभूभर्त्रा दूतेशो मुखवाचिकम् ।
(B 447) करबाहुधरादीनां प्राह गत्वा सभान्तरम् ॥ १६ ॥

भो भो म्लेच्छपते कस्मादकस्मात् प्रबलैर्बलैः ।
(B 448) आयाताः केन विश्वस्ता अज्ञातनृपविक्रमाः ॥ १७ ॥

अथवा प्राक्तनी शैली शाहियुद्धं नु विस्मृतम् ।
(B 449) बलद्वयवधात् पापं युष्माकं परिणंस्यति ॥ १८ ॥

यदि शक्तिः किमेतैः स्याद् दुर्गग्रन्थ्यादिकर्मभिः ।
(B 450) विधिर्ददाति यद्यस्य स तत्फलमथाश्नुते ॥ १९ ॥

---

13 [a]) K रुद्रेषु. —[c]) D फत्तिह–.

14 [a]) M (evid. emend.) खुजाहाजक–. —[b]) D B चक्राद्या मुगलान्विताः. —[c]) $S'_{2.3.6}$ (before corr.) C $I_{1.2}$ K -राजा (S'_3 ज) (emended to राज्ञा as in text with A D B).

15 [a]) A D B नौशाहार–. —[b]) B (evid. emend.) -नाजुके. —[c]) K ऊचुस्ते; D B उवाह; M (evid. emend.) अक्षिपन् (for ऊहुस्ते).

16 [b]) I_2 दूभेशो. —[c]) M (evid. emend.) °धरादीन् हि.

17 [c]) M (evid. emend.) कस्य विश्वासाद् (for केन विश्वस्ताः).

18 [a]) M (evid. emend.) प्राक्तनं शैले. —[d]) M (evid. emend.) युष्मासु.

19 [b]) $S'_{2.3.6}$ (before corr.) C I_2 K -ग्रन्थादि–. —[c]) M (evid. emend.) यस्मै (for यस्य).

चक्रिराजानकाद्या वा स्थिता अंशहरा इतः ।
(B 451) देशात्के मुग्गुला को वा खुज्यहाज्यो भविष्यति ॥ २० ॥

इत्युक्तो लेखहारेण खुज्यहाज्योऽब्रवीदिदम् ।
(B 452) शासनमक्भराख्यानमुग्गुलेशस्य वक्ष्म्यहम् ॥ २१ ॥

चक्रेशभूतं दातारं गुणज्ञं धन्विनां वरम् ।
(B 453) विचारे नौशिरोवानं कया स्तुत्या स्तुवीमहे ॥ २२ ॥

काश्मीरिकाणां देशांशान् म्लेच्छानां पारितोषिकम् ।
(B 454) दत्त्वा मुग्गुलराजस्य चेतःशुद्धिर्विधीयताम् ॥ २३ ॥

अथवा देशधाटीभिः किं स्यात् प्राकृतमेतया ।
(B 455) युद्धेन वीरहानिः स्याज्ज्ञाता सर्वस्य भूमिपः ॥ २४ ॥

दृष्टाः श्रुताः स्मृता नैव गाजिशाहस्य संनिभाः ।
(B 456) योद्धुं दिगन्तरं को नु यात एतत्परः समः ॥ २५ ॥

दूतात् प्रत्यागताच्छ्रुत्वा क्रोधविस्मयवान् नृपः ।
(B 457) अवरूढोऽद्रितुङ्गात् स समारूढो महद्यशः ॥ २६ ॥

---

20 c) $S'_{2\cdot3\cdot6}$ A C I_1 K देशा: के (mislec. for S'ār. शात्के); B देशत्के (sic).

21 b) M (evid. emend.) खुजहाज्य–. —K om. 21[cd]. —c) S'_3 अत्त (mislec. for S'ār. क्‍भ)रा°; I_1 C अकु (mislec. for S'ār. क्भ)रा°; MSS and C B °ख्यानं (emended as in text).

22 a) S'_6 A C $I_{1\cdot2}$ D B -भूपं (for °तं). —c) $S'_{2\cdot3\cdot6}$ (after corr.) C नौशरोवानं.

23 a) M (evid. emend.) काश्मीरिकेभ्यो; I_1 D B देशांशो. —b) M (evid. emend.) म्लेच्छेभ्यः S'_6 A I_2 D B °तोषकम्.

24 d) K ज्ञात्वा.

25 b) S'_3 C K गाज–. —d) I_2 °पुर: (for पर:).

श्रीमच्छृङ्गारमल्लेक आलेमल्लेक इत्यपि ।
(B 458) खना अह्मदयोसोफएभशाहादयः सुता ॥ २७ ॥

खानः स शाहिभाजोऽपि वृतश्चान्यैश्च मन्त्रिभिः ।
(B 459) स्वस्वसैन्यसमुन्नद्धैः कश्मीरेन्द्रो विभूषितः ॥ २८ ॥

सहस्रैरश्ववाराणां वाजिभिर्वेगराजिभिः ।
(B 460) शार्ङ्गत्सरुगदाप्रासशक्तितोमरभूषितैः ॥ २९ ॥

नागरन्ध्रगतोफाकनामाश्मरन्ध्रगायुधैः ।
पदातिलक्षैः संनद्धैः शत्रुसेनान्तिकेऽवसत् ॥ ३० ॥

(B 461) अन्तिकादन्तिकं व्यूहैर्निविष्टे सैन्ययोर्द्वये ।
पारावारगता योधा रणरङ्गमभूषयन् ॥ ३१ ॥

(B 462) हासदुन्दुभिनादेन कर्णतालैश्च हेषकैः ।
गजाश्वानामश्मरन्ध्रगर्जनैस्तर्जयन्निव ॥ ३२ ॥

(B 463) अथ पत्तिसहस्रेण पुरोगेण प्रभूषितः ।
प्रवीरो गाजिशाहोऽत्र समरारम्भमग्रहीत् ॥ ३३ ॥

(B 464) दृष्ट्वा वीरं तमायान्तं केचिन्मुग्गुलपुङ्गवाः ।
मनःशैथिल्यमादाय शनैर्युद्धाय निर्ययुः ॥ ३४ ॥

(B 465) नृपाग्रे म्लेच्छवीराणां स्वामिभक्त्या पुरोगताः ।
मुण्डानि चिच्छिदुर्युद्धे शरावानिव चक्रतः ॥ ३५ ॥

---

27 [b]) B (evid. emend.) आली–. —[cd]) B (evid. emend.) -योसूफइब–.

28 [d]) $S'_{2 \cdot 3}$ C I_2 K कश्मीरेन्द्र–.

30 [a]) K नागरंध्र–. —[c]) C -लक्ष्यैः.

31 [a]) K आलोकादन्तिके; $S'_{2 \cdot 3 \cdot 6}$ A C K व्यूढे (for व्यूहैः); M (evid. emend.) व्यूहे. —[b]) K विनिष्टे.

32 [b]) M (evid. emend.) हेषणैः.

35 [d]) $I_{1 \cdot 2}$ D B शरावाणीव.

(B 466) रणे हैभतखानेन प्राणदानेन तत्क्षणम् ।
विवाहोऽजनि स्वःस्त्रीणां पञ्चबाणेन योषिताम् ॥ ३६ ॥

(B 467) वीरव्रतं पुरोगानामद्भुतं च तपः प्रभोः ।
विचिन्त्य मुग्गुलाश्चेलुर्हतशेषा यथागतम् ॥ ३७ ॥

(B 468) स्वप्राणवेतनैर्योधाः पुरोऽस्त्रव्यवहारिणः ।
विजित्य कीर्त्युपचयं स्वर्यातास्तद्वलद्वयात् ॥ ३८ ॥

(B 469) पत्तीनामद्भुतं वीर्यं वीक्ष्य म्लेच्छबलान्तरात् ।
धाट्यात्तं रूप्यकुप्यादि तद्राज्ञानुग्रहीकृतम् ॥ ३९ ॥

(B 470) स्वसैन्यापचयं शत्रुसेनोपचयमेव च ।
विचिन्त्य मुग्गुला याता वाणिजा इव वेतने ॥ ४० ॥

(B 471) सह राजपुरीराज्ञा पाषाण्डान् करदायिनः ।
कृत्वा प्रत्याययौ गाजशाहः सुविक्रमोर्जितः ॥ ४१ ॥

(B 472) नित्यं जेता चिरं स्थेया राजन् साम्राज्यदीक्षितः ।
इत्याशिषो जनाच्छृण्वन् काश्मीरान्तर्नृपोऽविशत् ॥ ४२ ॥

---

36 [a]) B (evid. emend.) हैबत–.

38 [a]) D B (evid. emend.) युद्ध्वा. —[ab]) M (evid. emend.) योद्धारो ह्य (for योधा: पुरो). —[b]) MSS and C B परो (emended as in text). —[d]) $S'_{3.6}$ A C $I_{1.2}$ K D B स्वर्यातस्.

39 [b]) K -बलान्तरम् (M °रे evid. emend.).

40 [b]) A वेतनैः.

41 [a]) B (evid. emend.) स रराज (for सह राज–); S'_3 C $I_{1.2}$ B °पुरीराजा (B °जः). —[b]) B पाषण्डान्. —[d]) D B स (for सु°).

42 [a]) S'_3 C K नित्य–.

APPENDIX *E*

(B 420) अदृष्टविग्रहेशेन स्वेच्छाक्रीडनक इव ।
धात्रा विनिर्मितः स्रष्टुं जगद् बाबाधमाभिधः ॥ १ ॥

(B 421) दृष्ट्वैनं स्त्रीयुतं चाग्रे प्रादुरासन् दशाष्ट च ।
सहस्राण्यालयान्यस्य विभोर्दुर्घटलीलया ॥ २ ॥

(B 422) अर्शकोर्शे दिवः सप्त भुवः षट्त्रिंशदावृतम् ।
जगत् स्फारमवेक्ष्यर्षिरूपाः सृष्टाः पिगम्बराः ॥ ३ ॥

(B 423) विभुधामाश्रयी श्रीमान् रसोलोऽद्य पिगम्बरः ।
दिगम्बरेच्छया लोककृपालुर्मानवो जयेत् ॥ ४ ॥

(B 424) खदैवसृष्टिभूमध्ये हिमवान् गिरिरुत्तमः ।
तत्रास्ति देशः कास्कारो हारो भूमिवरस्त्रियः ॥ ५ ॥

(B 425) सतां सुकृतसंभारोऽगारः सर्वधनुष्मताम् ।
नानाद्रुमलताकारो विहारः सर्वसंपदाम् ॥ ६ ॥

---

1 [b]) MSS and C B -क्रीडनका: (emended as in text). —[d]) $S'_{2\cdot3}$ A C I_1 जगद्धा (I_1 C द्धा)रा (mislec. for S'ār. द्धाबा)धमा°; B (evid. emend.) बाबादमा°.

2 [c]) K आलुयानि. —'आलमानि' is suggested for आलयानि.

3 [a]) S'_3 C अश(C शं) काशर्; $S'_{2\cdot6}$ A K अप्रकाशा (for अर्शकोर्शे. Thus marg. in S'_6); -कोर्सं (=कुर्सी) is suggested for -कोर्शे; S'_2 दिश: (for °व:).

4 [a]) $S'_{2\cdot3\cdot6}$ A C K विबुधानाश्रयी; $I_{1\cdot2}$ D B विभुधामाश्रयी (as in text). —[b]) B (evid. emend.) रसूलो. —[d]) S'_3 C K D B कृपालो; S'_2 दा(mislec. for S'ār. मा) नवे (?वो); S'_3 C K [अ]जयत्.

5 [c]) I_1 D काश्कारो.

6 [a]) $S'_{2\cdot3}$ A C I_1 -संसारो; S'_6 संसा (marg. *pr. m.* भा)रो.

(B 426) मेधावी रेवतीशप्रथितभुजबलः सद्धयः श्रीधरश्च
भूपालेन्द्रः प्रतापोर्जितनिजयशसा भूषितो नामवर्णैः ।
जीयात् तद्देशजन्मार्जितबहुवसुधः प्रोद्धतो भानुमूर्तिः
काश्मीरान्यो हि नानानयतिमिरहतान्न्यायविज्ञान्व्यधत्त॥७॥

(B 427) मेरेजहैधर महम्मदवाक्प्रमाणो
जीयाच्चिरं वसुमतीमवतीर्ण एव ।
कर्तुं सतीसरसि नौशरवानतुल्यं
पूर्वोर्वरीशचरितं चिरकालनष्टम् ॥ ८ ॥

(B 428) सर्वैः पिगम्बरवरैर्मिलितैः सदैव-
स्याशास्यते इह पिगम्बरवाटिकां ताम् ।
एतां कुकृत्यचरिताख्यदवाग्निदग्धां
सत्कर्मवृष्टिनिवहैः परिपोषणाय ॥ ९ ॥

APPENDIX *F*

(B 429) श्रीमत्काञ्चनचक्रपेश विधिनान्वर्थीकृताख्याक्षर-
राजिः काञ्चनदानतस्तव सदा सत्यं समीक्षामहे ।
भ्राजिष्णौ करपद्मपर्णनिचयेऽभिज्ञानमेतादृशं
सव्यः सोऽस्तु करः परोपकृतयेऽजस्रं सहस्रं समाः ॥१॥

---

7 a) $S'_{2\cdot3\cdot6}$ सद्दयः (corrupt); C K सद्दय°; S'_2 श्रीव (mislec. for S'ār. ध) रश्च. —c) MSS and CB -वसुधा- (emended as in text). —d) D B योजनाया° (for यो हि नाना°); D B योजनायेव नष्टम् (for न्यायविज्ञान् व्यधत्त); M (evid. emend.) -वित्तान् (for °ज्ञा°).

8 a) B (evid. emend.) मीरीजहैदर; $I_{1\cdot2}$ D महाम (mislec. for S'ār. हम्म)द-. —b) A असौ (for चिरं). —c) S'_2 K नौशरबाण-. —d) M (evid. emend.) -चरिते चिरकालनष्टे.

9 a) I_1 A B पैगम्बर-. —b) D [आ]देशतो इह; B (evid. emend.) [अ]देशतस्त्विह (for °शास्यते इह).

---

1 a) MSS and C B -चक्रपे च (mislec. for S'ar. श); BC °क्षरा-. —c) B (evid. emend.) -कर्ण- (for प°).

APPENDIX *G*

(B 430) श्रीमन्मार्गपतीश तावकयशः शुभ्रं विलोक्याबहि-
श्चक्राधीश समागतो ऋतुपतिस्त्वां सेवितुं सर्वतः।
कुन्दैः कुङ्मलकर्णिकारकुटजैः स्रग्भिस्तथा मञ्जरी-
पुष्पैः षट्पदकोकिलास्वनभरैः कुर्वञ् जयोद्घोषणाम् ॥१॥

(B 431) सन्तः प्रमुदिताः के न न केन तव कर्मणा।
वसन्तो भवतामस्तु वसन्तः शुभकृत् सदा ॥ २ ॥

APPENDIX *H*

(B 473) वेदैः षट्स्वरसैः पदक्रमयुतैर्वेदान्तसिद्धान्तकै-
स्तर्कव्याकरणैः पुराणपठनैर्मन्त्रैः षडङ्गागमैः।
शैवैर्वैष्णवसौरबौद्धसहितैश्चित्रैर्विहारैर्मठै-
र्द्राक्षाकुङ्कुमसस्यशालिनिवहैः पुष्पैः सुगन्धैरपि ॥१॥

